संस्कृतसाहित्यशास्त्रे गुणविवेचनम्



डॉ. विश्वमूर्तिशास्त्री

संस्कृतसाहित्यशास्त्रे गुणविवेचनम्

रचयिता :

डॉ० विश्वमूर्ति शास्त्री

साहित्याचार्यः, विद्यावारिधिः (पीएच.डी)

साहित्यविभागाध्यक्षः

राष्ट्रियसंस्कृतसंस्थानम् मानितविश्वविद्यालयः

रणवीरपरिसरः, जम्मू

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya Bharatiya Vidya

716

लेखक व प्रकाशक :
डॉ. विश्वमूर्ति शास्त्री
3/127, इन्दिराविहार, पुराना जानिपुर, जम्मू तवी–180007
दूरभाष : 2535563

वितरक :
अमर ग्रन्थ पब्लिकेशन्स
८/२५, विजय नगर, दिल्ली–११०००९

संस्करण : प्रथम व्यासपूर्णिमा

वर्ष : 2004

मूल्य : 450/- रु०

Bhawan's Sri Sankaracharya ... Mahavidyalaya
716

शब्द संयोजक एवं मुद्रक :
अभिनव प्रिन्टर्स एण्ड एडवर्टाइजर
395-पी, अम्बेडकर नगर एक्स्टैंशन, त्रीकुटा नगर, जम्मू–180012
(जम्मू–काश्मीर) दूरभाष : 0191-2452066

डॉ. मुरली मनोहर जोशी
Dr. Murli Manohar Joshi

मानव संसाधन विकास मन्त्री
भारत
नई दिल्ली–110001

शुभाशंसा

जम्मूकश्मीर मनीषियों, कवियों एवं शास्त्रमर्मज्ञों की पुण्य भूमि रही है। कैयट, मम्मट, लोलट आदि उद्भट विद्वान् इस धरातल के अलंकार हुए हैं। उसी परम्परा में आज भी यह भूमि ख्याति प्राप्त, साहित्यशास्त्रनिष्ठ डॉ. विश्वमूर्ति शास्त्री जैसे विद्वानों से मण्डित है। साहित्यशास्त्र में शास्त्रीजी का **''संस्कृतसाहित्यशास्त्रे गुणविवेचनम्''** ग्रन्थ अपना एक विशेष स्थान रखता है।

मुझे विश्वास है कि इस ग्रन्थ से साहित्य के विद्वान् तथा अनुसन्धान करने वाले शोध छात्र विशेष लाभान्वित होंगे तथा जम्मू कश्मीर में संस्कृत साहित्यशास्त्र लोकप्रियता के पथ पर अग्रसर होगा। इसी मंगलकामना के साथ में मैं डॉ. विश्वमूर्ति शास्त्री को शुभाशीष प्रदान करता हूँ कि वे निरन्तर अपनी साहित्यक अभिव्यक्ति भविष्य के लिए भी करते रहें।

(मुरली मनोहर जोशी)

अनुशंसा

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयनिष्पत्तिर्हि सर्वाभीप्सिता वरीवर्ति। सा च श्रुतिस्मृतिपुराणसाहित्येतिहासादितत्तच्छास्त्राधीना विराजते। विश्वस्मिन् शास्त्ररूपं काव्यरूपमितिभेदेन वाङ्मयस्य द्वैविध्यं दरीदृश्यते, तत्र शास्त्रपदेन न्यायव्याकरणदर्शनादीनां ग्रहणम्। काव्यपदेन कवेः कर्मेति जरीगृह्यते, कवयति वर्णयतीति कविः—

पदवाक्यप्रमाणेषु तदेतत्प्रतिविम्बितम्।

यो योजयति साहित्ये तस्य वाणी प्रसीदति।।

अत्र साहित्यपदेन काव्यशास्त्रस्योपादानं वरीवर्ति। सकलविद्या-स्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानम् इति निजगाद राजशेखरः। पञ्चमी साहित्यविद्या इति यायावरीयः।

साहित्यशास्त्रे गुणानां स्थानं सर्वोत्कृष्टं विराजते। तानुपजीव्य ज्यौतिषशास्त्रे वेदे च कृतभूरिपरिश्रमैः साहित्यशास्त्रमर्मज्ञैः जम्मूकाश्मीर-प्रान्तस्य मानसमरालैः पण्डितमूर्धन्यैः डॉ. विश्वमूर्तिशास्त्रिभिः—

"संस्कृतसाहित्यशास्त्रे गुणविवेचनम्" इत्याख्योग्रन्थः प्रकाशितः— इत्यहममन्दानन्दसन्दोहकन्दवृन्दमनुभवामि, वेदादारभ्य आचार्यविश्वेश्वरपर्यन्तं गुणविषयिणी या धारणा विद्यते, तस्याः साङ्गोपाङ्गं विवेचनम् विद्वांसो अत्रैव द्रक्ष्यन्ति। विश्वसिमि अनेन ग्रन्थेन विद्वांसश्छात्राअनुसन्धित्सवः लाभान्विता जायेरन्। संस्कृतसाहित्यस्य श्रीवृद्धिरपि भविष्यति। इदानीं शास्त्रिवर्येभ्यः शततः सहस्रशोः अभिनन्दनानि प्रदीयन्ते।

निदेशक, राष्ट्रियसंस्कृतसंस्थानम्,
57-57, इन्स्टीच्यूशनल एरिया,
जनकपुरी, नई दिल्ली-110058

डॉ. वेम्पटिकुटुम्ब शास्त्री



स्व० पं. अनन्तराम ज्योतिषी

स्व० श्रीमती उमादेवी

समर्पणम्

ज्योतिषशास्त्रमहोदधिमन्थनमन्दरायमाणाः, निजयशसा धवलिताऽखण्डभूमण्डलाः, समस्तप्रशस्तगुणगणसमलङ्कृताः, ब्रह्मविद्यायां द्विगर्तप्रान्ते भास्करायमाणाः, तपोमूर्तयः ज्ञानैकनिष्ठाः, त्यागतपस्यादयादानैकदक्षाः मम पितृचरणाः स्वनामधन्याः **स्व० पं. अनन्तराम ज्योतिषी** महाभागा आसन्, वात्सल्यज्ञानस्नेहविग्रहा शीतलस्वभावा धैर्यवती मम **जननी स्व० उमादेवी** आसीत्, ताभ्यां परमपूज्यमातापितृचरणकमलाभ्यां सश्रद्धं सादरं ग्रन्थप्रसूनमिदं समर्पयति।

—विश्वमूर्तिशास्त्री

आत्मनिवेदनम्

विश्वस्मिन् विश्वे समुपलभ्यमानं निखिलमपि वाङ्मयं साहित्येशब्देनाभिधीयत इति विदितमेव विपश्चिदपश्चिमानां समेषाम्। वेद-ब्राह्मण-आरण्यक उपनिषपत् प्रभृतिषु वैदिकवाङ्मयेषु छन्दोऽलंकारगुणगणभरिता अनेकाः कथाः समुपवर्णिताः। यासामवितथं सूक्ष्मंज्ञानमलङ्कारशास्त्रापरपर्याय साहित्य–शास्त्रस्य गभीरंज्ञानंविनाऽसम्भवप्रायम्। अतः राजशेखरादिभिः आचार्यैः वेंदानामुपकारकत्वादलंकारशास्त्रं सप्तमाङ्गत्वेन परिगणितम्।

साहित्योदधिमन्थनमन्दरमनसां सुमनसां "रस एव आत्मा" इत्यत्रास्ति ऐकमत्यम्। तस्य च रसस्य अन्वयेन व्यतिरेकेण च गुणाः परिपोषकाः भवन्ति। यथा शरीरे दया-दाक्षिण्यादयो गुणाः आत्मोत्कर्षहेतवो भवन्ति तथैव काव्ये आत्मस्थानीयस्य रसस्य माधुर्यादयोगुणाः उत्कर्षकाः समस्तमपिकाव्यं भृशमुत्कर्षयन्ति। अतः अलंकारविरहितेऽपि काव्ये काव्यत्वन्तु स्वीकर्तुं शक्यते, परं गुणशून्यं काव्यं न काव्यत्वसम्पन्नं स्वीक्रियते। यथोक्तम्–

अलङ्कृतमपि श्रव्यं न काव्यं गुणवर्जितम्।
गुणयोगस्तयोर्मुख्यो गुणालंकार योगयोः।।

अतो मया गुणानुपजीव्यैव "संस्कृतसाहित्यशास्त्रे गुणविवेचनम्" इत्यभिधानोग्रन्थो चिकीर्षितः। ग्रन्थेऽस्मिन् सप्तसु अध्यायेषु आलंकारिकाणां तथाऽऽधुनिकानाञ्च विदुषां मतानि यथास्थानं विवेचितानि।

पाठकैरेतदध्यातव्यं यदयंग्रन्थो मम शोधप्रबन्धस्यैव परिष्कृतंस्वरूपम्। श्रीरणवीर केन्द्रीय संस्कृतविद्यापीठे साहित्यशास्त्रमेवव्याख्यातृपदमधितिष्ठता मया बहुवर्षाणि अध्यापितं परं युगानुरूपो विद्यावारिधित्युपाधिर्मम नासीदिति–यदाकदाचित् चित्तं खेदमनुभवतिस्म तस्मिन्नेव प्रसंगे तदानीमुपाचार्यपदे

प्रतिष्ठिता न्याय व्याकरणादिविविधशास्त्रविद्योतितान्तःकरणाः डॉ. मुरलीधर पाण्डेयाः "संस्कृतसाहित्यशास्त्रे गुणविववेचनम्" इति विषयमुपजीव्य यदि भवन्तः शोधकार्यं कुर्युस्तदा शोभनं स्यादिति मामवोचन्। जम्मू विश्वविद्यालयस्य संस्कृतविभागाध्यक्षपदमलंकुर्वतीभिः "डॉ. वेदकुमारी घई" महोदयाभिश्च पाण्डेयमहोदयानां परामर्शः भृशमनुमोदितः।

अतोमया तमेव विषयमादाय शोधकार्यं कर्तुंनिश्चयः कृतः। अयि भोः। एतादृशं कार्यं प्रारम्भे यादृशं सुकरं प्रतिभाति न तथाऽग्रे भवति तत्रापि अध्यापनवृत्तौ व्यग्राणां कृते तु समयाभावात् अधिकमेव कठिनायते। परं छात्रावस्थायां श्रीरघुनाथसंस्कृतमहाविद्यालये प्राचार्यै स्व. परशुरामशास्त्रिपादैः व्याकरणस्य, स्व. जयरामशास्त्रिचरणैर्न्यायस्य, स्व. काकारामशास्त्रिपादैः साहित्यस्य श्री पूर्णचन्दपादैर्ज्योतिषस्य श्री मूलराजशास्त्रिपादैश्च वेदस्य याः निरर्गलाः वृष्टयः क्रियन्तेस्म तासु स्नायं स्नायं वयसोऽल्पात् ये कणाः गृहीतास्तानेवावलम्ब्य दुस्तरमेतत् कार्योदधिं उत्तरिष्यामीति विश्वस्य शोधकार्यं प्रारब्धम्।

' तदानीन्तनानां प्राचार्यवर्याणां सम्प्रति देवेन्द्रसखानां देश-विदेशे च 'विख्यात यशसां तेत्रभवतां डॉ. मण्डनमिश्रमहोदयानां समये समये प्रोत्साहनमयीः सम्मतीरवाप्य भगवत्याः वैष्णवीदेव्याः कृपालेशतः शोधप्रबन्धो ममाद्यग्रन्थ-रूपेण प्रकाशतामधिगच्छति इति मोमुद्यते मे मनः। ग्रन्थ प्रकाशनक्रमे कृतज्ञताज्ञापनमेका पद्धतिरिवाभूत्। अतो मयाऽपि अयंक्रमः परिपाल्यते। अन्यथा तपस्यया गायत्र्याः लब्धवराणां कर्मकाण्डमार्तण्डानां त्रिकालज्ञदैवज्ञानां गोलोकवासिनां पूज्यतातपादानां पं. अनन्तराम ज्यौतिषीणाम्, करूणामूर्तीनां मातृचरणानां स्वर्गवासिनीनां उमादेवीनां कार्तज्ञं किं सहस्त्रशब्दैरपि ज्ञापयितुं शक्यते? नैव। अतः एतेषां चरणाब्जेषु नामं नामम् आजन्म आधमर्ण्यमेव—वोढुमिच्छामि।

सम्प्रति राष्ट्रियसंस्कृतसंस्थाने निदेशकपदमलंकुर्णाणानां सकलशास्त्र निष्णातानां परमादरणीयानां प्रो. वेम्पटिकुटुम्बशास्त्रिणां हृदयेन कार्तज्ञं विभर्मि येषामनुकम्पया प्राप्तधनसाहाय्येन मम शोधप्रबन्धः पुस्तकरूपेण सम्मुखायते।

स्व. डॉ. मण्डनमिश्रमहोदयानां, पदवाक्यप्रमाणज्ञानां प्राचार्यचराणां डॉ. मुरलीधर पाण्डेयमहोदयानां, विद्यापीठेऽस्मिन् उपाचार्यपदमलंकुर्वतां स्व. डॉ. केवलकृष्णशास्त्रिमहोदयानां, दर्शनविभागाध्यक्षाणां, डॉ. वैद्यनाथझा महोदयानां, साहित्यविभागे उपाचार्य पदमलंकुर्वतां डॉ. प्रियतमचन्द्रशास्त्रि-वर्याणां च कार्तज्ञं विभर्मि यैः समये समये ग्रन्थप्रकाशनाय अहमुत्प्रेरितः येषां प्राचीनार्वाचीनानामाचार्याणां आधुनिकानामालोचकानां विवेचकानांच प्रत्यक्षरूपेण परोक्षरूपेण वा साहाय्यं मयाधिगतं तेषां कृतज्ञतामनुभवामि।

अन्ते जीवनसंगिन्याः श्रीमत्याः सुदेश शर्मा प्रियतमायाः अपि सहयोगः अपलपितुं न शक्यते यया एकाकिन्या एव समस्तमपि गृहकार्यं वहन्त्या ममापि सकलविघ्नापायपूर्वकं सकलसौविध्यमुपनीतम् अन्यथा इदं ग्रन्थप्रकाशन-रूपं कार्यं सुकरं नासीत्। अतः तस्याः सहयोगमनुभवन् कार्तज्ञं विभर्मि।

अधुना प्रकाशक महोदयाअपि धन्यवादार्हाः सन्ति येषां सततप्रयासेन इदं पुस्तकं संस्कृतसाहित्यसमीक्षकाणां सम्मुखीनं भवति।

अन्ते—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
उत्थाप्य सानुकम्पंहि समादधति सज्जनाः।।

इति निवेद्य विरमति विदुषां वशंवदः।

विश्वमूर्ति शास्त्री

भूमिका

गीर्वाणवाणीवाङ्मये वेदस्याङ्गभूतानि, शिक्षाकल्पव्याकरणप्रभृतीनि षट् शास्त्राणि विराजन्तेतराम् तेषां समेषां महिमाऽपि मनीषिणां कृते तिरोभूतो न वर्तते। तेष्वपि काव्यशास्त्रं स्वीयमन्यतमं स्थानं विन्दति–

यद्यपि सर्ववाङ्मयं साहित्यशब्देनाभिधीयते, परं तत्र प्राधान्येन साहित्य शब्देन काव्यशास्त्रस्यैवोपादानं विधायाहं वेदकालादारभ्येदानीं यावत्–**"संस्कृत साहित्यशास्त्रे गुणविवेचनम्"** इत्यभिधानं कृतं ग्रन्थस्य।

लाक्षणिकग्रन्थानां गूढमभिप्रायं वक्तुकामोहं सरलां भाषामशिश्रियम्। बाल्यकालादेव मदीया प्रवृत्तिः काव्यशास्त्रं प्रति प्राभूतिका आसीत्। तत्रापि अध्ययनकाले गुणविषये चेतो जिज्ञासतेस्म वर्णाः केन हेतुना मानवहृदि माधुर्यौजः प्रभृतिभावान्–उत्पादयन्ति? इयमेव धारणा सम्प्रति यथानुरूपंग्रन्थ रूपेणाङ्कुरिता, पल्लविता, पुष्पिता च। ग्रन्थेऽस्मिन् मयेतदर्थमाचार्याणां नामानि साम्रेडं गृहीतानि यत्तेषां मतस्याऽवगमोऽपि पठनसमये पाठकानां सम्मुखीनं सम्भवेत्। गुणानां वर्गीकरणं तत्तदाचार्यणां गुणविवेचनप्रसङ्गे–एव प्रतिपादितम्।

गुणमहत्वम्–

साहित्यशास्त्रे रीत्यलंकारध्वन्यौचित्यादीनां सिद्धान्तानां विशदं विवेचनं नयनसरणिं सरीसर्ति। यथैषां सर्वेषां प्रयोगेण काव्यशास्त्रस्य प्राभूतिकं पार्याप्तिकं महत्वमेधते, तथैव गुणानामपि स्वीयं महत्वं वरीवर्ति। गुणानां लक्षणानि निजप्रतिभापाटवेन कोविदैः पृथगत्वेनालेखि। शब्दो धातोर्मूलरूपं न जहाति, भिन्नार्थेषुसत्स्वपि तत्र बीजरूपेण व्याख्यास्यमानोऽर्थो वरीवर्ति। पदशास्त्रमुपजीव्य आमन्त्रणार्थक गुणधातोः क प्रत्ययेन निष्पन्नोऽयं गुणशब्दः संस्कृतकाव्यशास्त्रे शब्दार्थेषु रसधर्मेषुमाधुर्यादिषु च स्वत्वं दाधर्ति। गुणाः प्रायः सर्वेषामाचार्याणां मते, शब्दार्थयोधर्मा विद्यमाना रीतौ जीवनाधायकत्वेन विराजमाना रसे धर्मत्वेन रमणीयत्वमुत्पाद्यमाना अनुपसर्जनत्वेन नित्यत्वं संदधाना, रसात्मानमुत्कर्षयन्ति।

गुणस्य महिमा—एतदर्थमपि काव्यजगति मूर्धन्यत्वेन चकास्ति, यतोहि गुणाः सर्वोत्कृष्टो रसध्वनौ विलसन्तो रीत्यौचित्यादिष्वपि स्वीयंस्थानंधारयन्तो रसं परिपोषयन्ति। अलंकाराभावेऽपि काव्यं काव्यत्वेन मन्यते, परं गुणाऽभावे कविकर्मणि पूर्णत्वं न जायते।

तत्र मया प्रथमेऽध्याये चर्तुदशविद्यासु साहित्यस्यस्थानं, व्यापकत्वं, शब्दार्थयोः सहभावत्वं प्रतिपादयताऽलंकारशास्त्रे शास्त्रशब्दस्य प्रयोगः, शब्दार्थयोर्द्वादशसम्बन्धाश्च सप्रमाणमलेखि। साहित्यशास्त्रस्योद्भवे वेद-ब्राह्मणारण्यकोपनिषत्सु काव्यतत्वानि शोधसरणीमाश्रित्य, बीजरूपेण विराजन्त इति सम्यक्समुद्भावितम्, तत्राहं रामायणमहाभारतवात्स्यायनकामसूत्रादि ग्रन्थानपि—अग्राहिषम्।

द्वितीयेऽध्याये—संस्कृतसाहित्यशास्त्रस्य क्रमिकविकासे, भरतदण्डि-वामनादीनां केषांचित् प्रमुखानामाचार्याणां परिचये दृढतमा हेतवः समुपन्यस्ताः।

तृतीयेऽध्याये—वैदिकवाङ्मये गुणानामुद्गमो विकासश्च निर्दिशता मया सर्वतोभावेन वेदकालेऽपि शुभप्राप्तिकल्याणदर्शनादिगुणानां सद्भावः, शब्दार्थगता गुणधारणा, माधुर्यमोजः प्रभृति "गुण" शब्दानां प्रयोगाः, पुराणेषु गुणगताधारणा च सहेतुकं प्रदर्शिता।

चतुर्थेऽध्याये—भरतात् प्राग् गुणस्थितिर्निवेदयता महाभारतकौटिल्यार्थ-शास्त्रशिलालेखादयः समाश्रिताः।

पञ्चमेऽध्यायेऽहं भरतादारभ्य समेषामाचार्याणां मतमतान्तराणि निर्दिशन् गुणविवेचनमकार्षम्।

षष्ठेऽध्याये—गुणशब्दस्यार्थो गुणव्यञ्जकवर्णानामाधारश्च, इमं विषयम-धिकृत्य गुणशब्दस्यव्युत्पत्तिनिर्देशपूर्वकं तन्त्रशास्त्रदृशा प्रतिपादनं विहितम्।

सप्तमेऽध्याये—रसरीत्यलंकारध्वनिवक्रोक्त्यौचित्यसिद्धान्तैः सह गुणानां सम्बन्धः प्रदर्शितः। एवंप्रकारेण ग्रन्थोऽयं मया सप्तभिरध्यायैः समाप्तिं नीतः शोधौचितानि समग्राणिकार्याणि क्रमेण प्रतिपादितानि सन्ति।

ग्रन्थस्योपयोगित्वम्—

वैदिककाले गुणशब्दस्य स्थितिः रसबलाद्यर्थे समुपलभ्यते, परं तेषामभिप्रायः परंपरया साम्प्रतिकेषु माधुर्यादिगुणेषु संघटते। अत्रमया

तेषांभावं—गृह्वता शब्दसाम्येन भावसाम्येनापि विवेचनं विहितम्। अस्य ग्रन्थस्य इदमपि वैशिष्टयं वक्तुंपार्यते यत् पण्डितराजजगन्नाथेन गुणप्रकरणे आत्मनः सगुणत्वस्य खण्डनं विधाय गुणानां रसधर्मत्वं न्यक्कृतमासीत्। अत्र मया सप्रमाणमात्मनः सगुणत्वं व्यवस्थापयता गुणा रसधर्मत्वेन प्रतिपादिताः।

संस्कृतवाङ्मये गुणानुपजीव्य बहुभिर्विद्वद्भिर्बहुविधं कार्यं विहितम्, परं तत्सर्वविभक्तं विद्यते, तेषांसर्वेषां कालक्रमेण एकत्रोपन्यसनं तेषां विवेचनं, सिद्धान्तैः सह साम्यं, वैदिकवाङ्मये गुणविषयिणीधारणा च ग्रन्थेऽस्मिन् सौकर्येण द्रष्टुं शक्यते। वैदिककालादारभ्य गुणानां साङ्गोपाङ्गनिरूपणं अत्रैव पाठका द्रक्ष्यन्ति इत्यहं सम्भावयामि।

विश्वनाथो मम्मटकृतमाधुर्यगुणलक्षणे द्रुतिं खण्डयामास, द्रुतौ आह्लाद-कृतायां च सूक्ष्मभेदत्वाद् द्वयोरैक्यमसम्भवम् अयं सूक्ष्मभेदो ग्रन्थ एवावलोकयितुं शक्यते। प्राचीनाचार्यैः स्वीकृतेषु दशगुणेषु माधुर्यादयस्त्रयोगुणा ध्वनिवादिभिः रसधर्मत्वेन स्वीकृता आसन्, उपचारेण तेषां शब्दार्थधर्मत्वमङ्गीकृतमासीत्। अस्मिन्ग्रन्थे माधुर्यादयस्त्रयोगुणा रसगतत्वेन, शब्दार्थगतत्वेनान्ये सप्तगुणाः साक्षाच्छब्दार्थत्वेन स्वीकृताः। तन्त्रशास्त्राऽनुसारं गुणानामनुरूपस्वभावतया तेषां वर्णव्यञ्जकत्वे कारणं निगदितम्।

पूर्ववर्त्यपरवर्त्याचार्याणां ग्रन्थानामनुशीलनंविधाय ग्रन्थपूर्त्यै प्रयत्नोविहितः, मन्ये गुणज्ञा ममोत्साहं वर्धयिष्यन्तीति। अशासे धीधना गुणैकपक्षपातिनः ग्रन्थगतान् गुणानेव द्रक्ष्यन्ति नतु दोषान्। यतोहि—

गुणदोषौ बुधोगृह्णन्—इन्दुः क्ष्वेडाविवेश्वरः।
शिरसाश्लाघतेपूर्वं परं कण्ठे नियच्छति।

डॉ. विश्वमूर्ति शास्त्री

मंगलाचरणम्

आशीर्वादपरैकहस्तदयिता वाणी द्विपाणिः कथं—
वीणां स्वां सुनिनादयेदितिमना ब्रह्मा रसज्ञाग्रणीः।
धर्त्तुं स्वांश्चतुरो भुजान् सविनयं यस्मात् प्रियः प्रार्थयत्-
तस्मात्तद्दिनतश्चतुर्भुजधरा सा मे धियः काशयेत्।।१।।

साक्षाच्छिवः शिवंकुर्यात् मंगलं सर्वमंगला।
तत्सुतौ श्रीकरौ स्याताम् ग्रन्थेऽस्मिन् गुणगुम्फिते।।

बुद्धौ वागीश्वरी नित्यमानने च गजाननः।
रसनायां रसो ब्रह्म विश्वमूर्तेर्विराजताम्।।

माधवः पातु माधुर्यमोजः पातु महेश्वरः।
प्रसादं शारदा पातु विश्वमूर्तिर्गुणत्रयम्।।

विषयानुक्रमणिका

विषयाः	पृष्ठाङ्काः
I. आत्मनिवेदनम्	IX-XI
I. भूमिका	XIII-XV
III. मंगलाचरणम्	XVI
IV. विषयानुक्रमणिका	XVII-XXII

प्रथमोऽध्यायः

साहित्यशास्त्रस्योद्भवः	1–18
1. चतुर्दशविद्यास्थानेषु साहित्यस्यस्थानम्	1
2. किं नाम साहित्यम्	2
3. शब्दार्थयोः सहभावः साहित्यम्	3
4. काव्यं साहित्यशास्त्रम्	4
5. अलङ्कारशास्त्रं साहित्यम्	5
6. रसशास्त्रं साहित्यम्	5
7. अलंकारशास्त्रे शास्त्रशब्दस्य प्रयोगः	6
8. वेदेषुकाव्यतत्वम्	7
9. ऋग्वेदे अलङ्कारशब्दस्य प्रयोगः	10
10. ऋग्वेदादिषु उपमा प्रयोगः	11
11. रूपकालंकारः	13
12. उत्प्रेक्षालंकारस्य प्रयोगः	14
13. दृष्टान्तालंकारस्य प्रयोगः	14

द्वितीयोऽध्यायः

संस्कृतसाहित्यशास्त्रस्य क्रमिको विकासः	19–51
1. भरतमुनिः	19
2. आचार्यो मेधावीरूद्रो वा	22

3. अष्टत्रिंशदलंकारास्त्रयोगुणाः (भामहः) 23
4. वैदर्भमार्गस्य प्राणा दशगुणाः (दण्डी) 26
5. रीतेरात्मत्वम्, गुणदोषयोः शब्दार्थे च विभक्तिः (वामनः) 27
6. पूर्ववर्तिभ्यः केषांचन नूतनालंकाराणामाविर्भावः (उद्भटः) 29
7. रूद्रटः 31
8. आनन्दवर्धनः 34
9. राजशेखरः 36
10. वक्रोक्त्यलंकारस्य स्थापनम् (कुन्तकः) 38
11. ध्वनिलक्षणस्य अनुमानेऽन्तर्भावः (महिमभट्टः) 40
12. भोजराजः 41
13. औचित्यमेवकाव्यजीवनम् (क्षेमेन्द्रः) 43
14. वाग्देवतावतारो मम्मटः 45
15. अग्निपुराणम् 47
16. राजानकरूय्यकः 48
17. कविराजविश्वनाथः 49
18. पण्डितराज जगन्नाथः 50

तृतीयोऽध्यायः

वैदिकवाङ्मये गुणानामुद्गमोविकासश्च 52–58
1. वैदिकीगुणधारणा 52
2. शब्दार्थगता गुणधारणा 53
3. गुणानामुद्भवः 56
4. ऋग्वेदे गुणप्रयोगः 57

चतुर्थोऽध्यायः

भरतात् प्राक् गुणस्थितिः 59–79
1. रामायणे गुणप्रयोगः 59
2. महाभारते गुणप्रयोगः 59
3. नारदपुराणेगुणाः 62
4. विष्णुधर्मोत्तरपुराणम् 63
5. अग्निपुराणे, गुणमहत्वम् 63

6. गुणा न केवलं दोषाभावरूपाः 64
7. गुणलक्षणम् 64
8. सामान्यगुणस्वरूपं तद्भेदाश्च 65
9. अर्थगुणलक्षणम्, तद्भेदाश्च 68
10. शब्दार्थोभयसामान्यगुणाः 71
11. वैशेषिकगुणाः 74
12. गुणतालिका 76
13. कौटिल्याऽर्थशास्त्रेगुणाः 76
14. रुद्रदाम्नः शिलालेखेगुणाः 78

पंचमोऽध्यायः

गुणविवेचनम् 80—242
1. भरतमते गुणस्वरूपम् 81
2. गुणलक्षणे विपर्यय शब्दस्य विचारः 81
3. विपर्ययशब्दविषये अभिनवगुप्तमतम् 81
4. विपर्ययशब्दविषये कौटिल्यमतम् 82
5. विपर्ययशब्दविषये आधुनिक विवेचकानांमतानि 83
6. भरतमते गुणस्वरूपविचारः 86
7. भरतमते गुणभेदानां विवेचनम् 86–108
8. गुणत्रयनिरूपकः प्रथमाचार्योभामहः 108
9. दण्डिनो गुणस्वरूपम् 110
10. दण्डिमते गुणस्वरूपनिष्कर्षः 113
11. आचार्यदण्डिप्रतिपादितदशगुणानां विवेचनम् 114–128
12. वामनसम्मतं गुणस्वरूपम् 128
13. वामनप्रतिपादितशब्दगुणानां विवेचनम् 131–140
14. वामनप्रतिपादितार्थगुणानां विवेचनम् 140–148
15. आनन्दवर्धनमते गुणस्वरूपम, गुणानां विवेचनञ्च 148–153
16. राजशेखरमते गुणविवेचनम् 153–155
17. आचार्यकुन्तकस्य मार्गत्रयनिरूपणम् 155
18. सुकुमारमार्गः 157
19. सुकुमारमार्गस्य माधुर्यगुणः 157

20. सुकुमारमार्गस्य द्वितीयः प्रसादगुणः 158
21. सुकुमारमार्गस्य तृतीयोगुणः 159
22. सुकुमारमार्गस्य चतुर्थोगुणः 160
23. विचित्रमार्गस्य वैशिष्टयम् 160
24. विचित्रमार्गस्य माधुर्यगुणः 161
25. विचित्रमार्गस्य प्रसादगुणः 161
26. विचित्रमार्गस्य लावण्यगुणः 162
27. विचित्रमार्गस्याभिजात्योगुणः 163
28. मध्यममार्गस्य स्वरूपम् 163
29. मध्यममार्गस्यौचित्यगुणः 164
30. मध्यममार्गस्य सौभाग्यगुणः 165
31. भोजदेवमते गुणानामनिवार्यत्वम् 166
32. बाह्यशब्दगुणानां विवेचनम् 167–178
33. आभ्यन्तरिकार्थगुणानां विवेचनम् 178–186
34. वैशेषिक पदगतदोष गुणाः 187–193
35. वाक्यार्थदोषगुणाः 193–196
36. क्षेमेन्द्रमते गुणविवचेनम् 196
37. आचार्यमम्मटमते गुणस्वरूपम् गुणानां विवेचनं च 198–203
38. गुणानामन्तर्भावस्य कारणम् 203
39. मम्मटमते दशशब्दगुणानामन्तर्भावः 204
40. मम्मटमते दश अर्थगुणानामन्तर्भावः 204–206
41. दशगुणस्वीकृतौ कारणम् 207
42. मम्मटस्य निष्कर्षः 209
43. वाग्भटः 210
44. हेमचन्द्रः 211
45. जयदेवमते गुणस्वरूपम् 213
46. जयदेवमते गुणविवेचनम् 214–217
47. विद्याधरः 217
48. विद्यानाथमते गुणविवेचनम् 218
49. विश्वनाथमते गुणविवेचनम् 220
50. द्रुति–आह्लादयोर्भेदाभेदविमर्शः 221

51. केशवमिश्रः 224
52. कर्णपूरगोस्वामी 226
53. आचार्यविश्वनाथदेवः 227
54. धर्मसूरिः 229
55. पण्डितराजजगन्नाथः 231
56. गुणानां काव्य–आत्माश्रयत्वविमर्शः 237
57. अप्रसिद्धगुणनिरूपकानामाचार्याणां संक्षेपतो गुण निरूपणम् (तत्रादौ रुद्रटः) 240

षष्ठोऽध्यायः

गुणशब्दस्यार्थाः 243-263
1. गुणशब्दस्यार्थाः 243
2. तन्त्रशास्त्राऽनुसारं माधुर्यादिगुणव्यञ्जकवर्णानामाधारः 245
3. छन्द : शास्त्रोक्तवर्णानां शुभाशुभत्वम् 246
4. माधुर्यगुणव्यञ्जकवर्णाः 246
5. माधुर्यगुणव्यञ्जकवर्णानामाधारः 247
6. ओजोगुणव्यञ्जकवर्णाः 251
7. ओजोगुणव्यञ्जकवर्णानामाधारः 251
8. गुणानां समन्वयात्मकविमर्शः 254
9. गुणानां लक्षणोदाहरणानि 257–263

सप्तमोऽध्यायः

रसरीत्यलंकारप्रभृतिभिः सिद्धान्तैः सह गुणानां सम्बन्धः 264–304
1. रसस्वरूपम् 264
2. रसगुणयोर्नित्यः सम्बन्धः 270
3. रीतिसिद्धान्तः 273
4. गुणरीत्योः सम्बन्धः 279
5. अलंकार सिद्धान्तः 285
6. गुणालंकार सम्बन्धः 289
7. ध्वनिसिद्धान्तः 295
8. ध्वनिगुणयोः सम्बन्धः 296

9. वक्रोक्तिसिद्धान्तः 298
10. वक्रोक्तिगुणयोः परस्परं सम्बन्धः 300
11. औचित्यसिद्धान्तः 301
12. औचित्यगुणयोः परस्परं सम्बन्धः 303

उपसंहारः 305–307
अनुशीलितग्रन्थानां सूची 308–315
अनुशीलितकोशानां सूची 316
अनुशीलित हिन्दी ग्रन्थानां सूची 317-318
अनुशीलित ग्रन्थानां संकेत सूची 319-321
अनुशीलित ग्रन्थान्तर्गताध्यायादीनां संकेत सूची 322

प्रथमोऽध्यायः

साहित्यशास्त्रस्योद्भवः

1. ''चतुर्दशविद्यास्थानेषु साहित्यस्य स्थानम्''

प्राक्तनैर्मनीषिभिः याज्ञवल्कय्प्रभृतिभिर्ज्ञानसाधनानि विद्यास्थानानि चतुर्दश परिगणितानि[1]। चतुर्दशसु विद्यास्थानेषु साहित्यस्य पृथक्स्थानं नास्ति। किन्तु परवर्तिकाले एकादशशताब्द्यां राजशेखरेण स्वीयकाव्यमीमांसा ग्रन्थे विद्यास्थाने साहित्यस्यकृते स्थानं परिगणितम्। तेनोक्तं यत् साहित्यंनाम सर्वेषांशास्त्राणां निष्कर्षभूतं निश्च्योतभूतं वा, तेन सर्वशास्त्राणांमेकत्र प्रतिबिम्बभूतंदर्शनं साहित्ये—एव जायते। राजशेखरेण काव्यविद्या पंचदशतमे स्थाने स्वीकृत्याऽभिहितं यच्चतुर्दशविद्यानामाधारभूतेयंकाव्यविद्या, काव्यस्य गद्यपद्यमयत्वात् कविकर्माधीनत्वात् समग्राणिशास्त्राणि काव्यविद्यायाः अनुसरणं कुर्वन्ति[2]। यस्य काव्यशास्त्रस्यैवनामान्तरं साहित्यशास्त्रालङ्कारशास्त्रंच एतदग्रेस्फुटी भविष्यति। अस्यशास्त्रस्यज्ञानेन काव्यस्य स्वरूपरसध्वनिदोष-गुणरीत्यलङ्कारशास्त्रस्यावश्यकता बोभवीति। वैदिकलौकिकग्रन्थानां सम्यग्ज्ञानाय नितान्तमावश्यकमिदमलङ्लकारशास्त्रम्। पूर्ववर्तिभि-रलंकारिकैः साहित्यशास्त्रस्य स्थाने "अलंकारशास्त्रम्" इति नाम्न एव परम्परा समवलम्बिता—आसीत्।

भरतमुनिकृतनाट्यशास्त्रान्तरं, शिलालिकृशाश्वमेधावीत्यादीनां कृतय आसन्, परं कालकवलितत्त्वात् तासां कृतीनामुपस्थितिरस्माकं समक्षे न वर्तते। तदनन्तरं अलंकारविषये स्वतन्त्रग्रन्थः षष्ठशताब्द्यां भामहकृत, काव्यालंकारो वर्तते। भामहादाराभ्य उद्भटदण्डिवामनरूद्रटरूय्यकेत्या-दिभिराचार्यैः स्व स्वग्रन्थस्य नाम काव्यालंकार एव निर्धारितम्।

---

1. (क) पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
   वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।। ..याज्ञवल्क्यस्मृतिः, 3/3
   (ख) अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
   पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।। ..विष्णुपुराणम्, 3/6/28/9
2. सकलविद्यास्थानैकायतनं पंचदशं काव्यं विद्यास्थानम् इति यायावरीयः। गद्यपद्यमयत्वात्, कविधर्मत्वात् हितोपदेशकत्वाच्च। तद्धि शास्त्राण्यनुधावन्ति। ...काव्यमीमांसा, अ० 2, पृ० 9।

दण्डिना अलंकारशब्दस्य स्थाने आदर्श (दर्पण) शब्दस्य प्रयोगो विहितः। वेदत्रय्याः कृते काव्यशब्दस्य प्रयोगः प्राचीनत्वमाकलयति[1]।

''किं नाम साहित्यम्''

भामहेन काव्यालंकारे साहित्यस्य व्यापकता प्रतिपादिता विद्यते[2]। सर्वप्रथमं भामहेनैव स्वकाव्यलक्षणे सहितशब्दस्य प्रयोगो विहितः[3]। यत्र शब्दार्थयोः सहितभावोऽभिप्रेतः। अयं सहितशब्द एव कालान्तरे साहित्यशब्देऽन्तर्गतः। अत्र काव्यलक्षणे सहितशब्दस्य सङ्केतः साहित्यार्थं कृतः। कौटिल्यार्थशास्त्रस्य चतुर्थेऽध्याये प्रथमेप्रकरणे विद्यासमुद्देशे चतस्रः विद्याः कथिताः—आन्विक्षिकी, त्रयी, वार्ता, दण्डनीतिः—पंचमी ''साहित्य'' विद्या इति यायावरीयः। चतसृणामपि विद्यानां निष्यन्दः[4]। एवमेवाचार्यकुन्तकेनाऽपि काव्यलक्षणे सहितशब्दस्य प्रयोगो विहितः[5]। अत्रापि पूर्ववत् सहित शब्द एव ''साहित्य'' शब्दस्यआधारो जातः। काव्यशोभांप्रति शब्दार्थयोर्न्यूनाधिक्यरहितं, परस्परंसंस्पर्द्धि समभावेन लोकोत्तर-मनोहारिणी स्थितिः साहित्यशब्देनोच्यते[6]।

अतः एवंविधा कापि विशिष्टा रचना साहित्यनाम्नोऽधिकारिणी भवति यस्यां रचनायां वैदर्भ्यादिरीतीनामनुकूलता, गुणानां तथाअतिशयरूपेण, वंक्रोक्त्याद्यलंकाराणां विन्यासः, वृत्तीनामौचित्येन, हृदयहारिरसानां परिपोषणेन, शब्दार्थौस्पर्द्धयां यत्र विद्येते, एवं च काव्यज्ञानां आनन्दप्रदानाऽनुकूल- व्यापारेण रम्या, शब्दार्थयोरनिर्वचनीयस्थितिः, व्याकरणमीमांसान्यायशास्त्रस्य सारः साहित्यशब्देनाद्रियते[7]। साहित्यशब्दः, काव्यशब्दार्थे एव पर्यवसितोऽस्ति। एकादश शताब्द्यां श्रीरूय्यकेन स्वग्रन्थस्य नाम साहित्यमीमांसा इति निर्धारितम्।

---

1. यजुर्वेद अ० 15–4
2. न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।
   जायते यन्न काव्याङ्गमहोभारो महान् कवेः।। भामह, का०लं० 5–4
3. शब्दार्थौ सहितौकाव्यं गद्यं पद्यं च तद् द्विधा।
   संस्कृतं प्राकृतं चान्यद् अपभ्रंश इति त्रिधा।। ...तत्रैव, 1–16
4. का०मी० अ० 2, पृ० 1.
5. शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
   बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी।। वक्रोक्तिजीवित, 1–7
6. साहित्यमनयोः शोभशालितां प्रति काप्यसौ।
   अन्यूनानतिरिक्तत्व मनोहारिण्यवस्थितिः।। ...तत्रैव, 1–17
7. वक्रोक्तिजीवित, 1-34-36

चतुर्दशशताब्द्यां श्री विश्वनाथेन स्वग्रन्थस्य नाम ''साहित्यदर्पण'' इति निर्धारितम्।

2. ''शब्दार्थयोः सहभावः साहित्यम्''

शब्दार्थयोः परस्परं वैशिष्ट्यप्रकारेण सम्बन्धः ''साहित्यम्''। हितेन सह वर्तते इति ''सहितं'', तस्य भावः ''साहित्यम्''। यद्वा संदधातीति संहितस्तस्य भावः ''साहित्यम्''[1] अथवा सहितयोर्भावः ''साहित्यम्'', शब्दार्थयोर्नित्यसम्बन्धो वर्तते, अनयोःपार्थक्यं नैव कर्तुं शक्यते। न केवलं शब्दः नत्वर्थः साहित्यं कथ्यते अपितु द्वयोर्भावः ''साहित्यम्''।

सहितस्यभावः साहित्यम्, इत्यत्र ''गुणवचनब्राह्मणादिभ्यः कर्मणि च'' इति पाणिनिसूत्रेण ''ष्यन्'' प्रत्ययो भूत्वा ''साहित्य'' शब्दो निष्पद्यते। शब्दार्थयोर्नियतसाहचर्यमभिप्रेक्ष्यैव महावैयाकरणपतंजलिना–शब्दार्थयोर्नित्यः सम्बन्धः स्वीकृतः[1]। मीमांसकजैमिनिना मीमांसादर्शनेऽपि शब्दार्थयोः सहभावः स्वीकृतः। तथा च–तत्सूत्रम् औत्पत्तिकस्तु शब्दस्यार्थेनसम्बन्धतस्य ज्ञानमुपदेशोत्पत्तिरेकश्चार्थेऽनुपलब्धेस्तत्प्रमाणं वादरायणस्यानपेक्षत्वात्[2]।

महाकविकालिदासेन–वागार्थाविव संपृक्तौ इत्युक्त्वा शब्दार्थयोः सम्बन्धः स्वीकृतः[3]। इत्थं शब्दार्थयोर्नियतसाहचर्यमभिप्रक्ष्यैव महावैयाकरण पतंजलिना–शब्दार्थयो र्नित्यःसम्बन्धः प्रतिपादितः[4]। मीमांसक जैमिनिनाऽपि औत्पत्तिकस्तुः सम्बन्धः शब्दार्थयोः प्रतिपादितः[5]। वक्रोक्तिजीवितेप्युक्तम्–सहितयोर्भावः साहित्यम्[6]। अनयोः शब्दार्थयोर्याकाप्यलौकिकी चेतनाचमत्कारितायाः कारणं, अवस्थिति- र्विचित्रैवविन्यासभङ्गी, सा च कीदृशी अन्यूनानतिरिक्तत्व मनोहारिणी, परस्परस्पर्द्धित्व रमणीया। यस्यां द्वयोरेकतरस्याऽपि न्यूनत्वं अपकर्षो न विद्यते नाप्यतिरिक्तत्वमुत्कर्षोवास्तीत्यर्थः।

ननु च तथाविधं साम्यं द्वयोरूपहतयोरपिसम्भवतीत्याह, शोभाशालितां प्रति। शोभासौन्दर्यमुच्यते। तया शालते, श्लाघते यः स शोभाशाली तस्यभावः

---

1. महाभाष्य, प०अ०, 1-2/1
2. मी०द०, 1-1/5
3. रघुवंश, 1-1.
4. म०भा०प०आ० 1-1-1.
5. जै०सू० 1-1-5-1.
6. वक्रो० जी 1-17.

शोभाशालिता तां प्रति सौन्दर्यश्लाधितां प्रति-इत्यर्थः। सैव च सहृदयाह्लाद-कारिता तस्यां स्पर्द्धित्वेन या साऽवस्थितिः परस्पर साम्यमुपगमस्थानं सा साहित्यमुच्यते। तत्र वाचकस्य वाचकान्तरेण, वाच्यस्य वाच्यान्तरेण साहित्यमभिप्रेतम्।

आचार्य कुन्तकेनाभिहितं यदद्यपर्यन्तं साहित्यशब्दः नाममात्रेणैव प्रसिद्धः। अद्यावधि न केनाप्याचार्येण साहित्यशब्दस्योपरि विचारः कृतः[1]। राजशेखरेण शब्दार्थयोर्यथावत्सहभावव्यत्रिजका विद्या साहित्यविद्याकथ्यते, इति निगदितम्[2]। अनेन स्पष्टरूपेण कथितं यदलङ्कारशास्त्रं सप्तममङ्गं विद्यते यतोहि तत्स्वरूपपरिज्ञानेन विना वेदार्थज्ञानमसम्भवमेव[3]।

भोजदेवेन शृङ्गारप्रकाशे अभिधाविवक्षातात्पर्यप्रविभागव्यपेक्षासामर्थ्यान्व-यैकार्थीभावदोषहानगुणोपादानालङ्कारयोगरसावियोगरूपाः शब्दार्थयोः द्वादशसम्बन्धाः साहित्यम् इति कथितम्। अनेन प्रकारेण साहित्यस्य द्वादश सम्बन्धाः स्वीकृताः[4]। वामनेनाऽपि काव्यलक्षणे संस्कृतशब्दस्य प्रयोगः कृतो विद्यते[5]। अत्र संस्कृतशब्दः सहित शब्दस्य व्यंजकः।

"काव्यं साहित्यशास्त्रम्"

राजशेखरेण काव्यपुरुषस्य वर्णनंकुर्वता स्पष्टरूपेण काव्याङ्गानां विवेचनं अनेनप्रकारेण कृतम्। शब्दार्थौ ते शरीरम्, संस्कृतम्-मुखम्, प्राकृतं बाहुः, जघनमपभ्रंशः, पैशाचं पादौ, उरोमिश्रम्, समः प्रसन्नो मधुर उदार ओजस्वी चासि, उक्तिचणं च ते वचो, रसआत्मा, रोमाणि छन्दांसि, प्रश्नोत्तर-प्रहेलिकादिकं च वाक्केलिः, अनुप्रासोपमादयश्च त्वामलङ्कुर्वन्ति। भविष्यतोर्थ-स्याभिधात्री श्रुतिरपि भवन्तमभिस्तौति[6]।

कविराजविश्वनाथेनापि साहित्यदर्पणे काव्याङ्गानां विवेचनं कृतं वर्तते,[7]

---

1. अत एवैतदुच्यते तदिदं साहित्यं नाम तदेतावति निःसीमानि समयाध्वनि साहित्यशब्दमात्रेणैव प्रसिद्धम्। तत्रैव, 1-17.
2. शब्दार्थयोः यथावत्सहभावेन विद्यासाहित्यविद्या। का०मी०, 2 अ०पृ०, 92.
3. तत्रैव, 2, अ०, पृ० 7.
4. शृङ्गारप्रकाश (उद्धृतः) का०मी० पृ० 23.
5. काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते। का०ल०सू० 1-3.
6. का०मी०, तृतीय अधिकरण, पृ० 18.
7. काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाःशौर्यादिवत् दोषाः काणत्वादिवत् रीतयोऽवयवसंस्थानविशेषवत् अलङ्काराःकटककुण्डलादिवत् इति। (सा०द० प्र. परिच्छेदः, पृ० 16.

परं तद्विवेचनं पूर्णरूपेण न वर्तते। राजशेखरेण तु सर्वेषां काव्याङ्गानां स्पष्टरूपेण निरूपणं कृतम्।

''अलंकारशास्त्रं साहित्यम्''

साहित्यशास्त्रस्य अथवा काव्यशास्त्रस्यादिमेकाले प्रधानरूपेण साहित्य-शास्त्रस्यकृते काव्यालंकार प्रयोगो भवतिस्म। पूर्ववर्त्याचार्यैः भामहोद्भट् रूद्रट्रुय्यकवामनप्रभृतिभिः, स्व–स्वग्रन्थस्य काव्यालंकार नाम एव निर्धारित-मासीत्। अस्मात् प्रतीयते यत् प्राचीनाः अलंकाराणां वैशिष्ट्येन महत्त्वंस्वीचक्रुः। वामनेन स्वकाव्यालंकारग्रन्थे "काव्यं ग्राह्यमलंकारात्"[1] "कोऽयमलंकारः" इति जिज्ञासायां सौन्दर्यमलंकारः[2] इत्यभिधाय अलंकार शब्दस्य सौन्दयर्मर्थः स्वीकृतः। अलंकारः काव्ये सौन्दर्यातिशयं पुष्णाति। अतः प्राक्तनैराचार्यैरलंकारः सौन्दर्याधायकतत्वमिति स्वीकृत्य साहित्यशास्त्रसम्बन्धि ग्रन्थानां काव्यालंकार नाम एव स्वीकृतम्[3]। एषु काव्यालंकारेषु न केवलं अलंकाराणां निरूपणं वर्तते अपितु काव्यलक्षण, गुणदोषरीतिरसादीनामपि विवेचनमस्ति। अलंक्रियतेऽनेनेति व्युत्पत्या करणार्थे प्रत्ययेन अलंकार शब्दः न यमकाद्यलंकार बोधकः अपितु अलंकृतिरलंकारः, इतिभावार्थकप्रत्ययनिष्पन्नो दोषापनयन गुणालंकारसंवलनकृत सौन्दर्यपरः तत्प्रतिपादकत्वादेव अस्य अलंकारनाम्ना व्यपदेश इति। अतएवाचार्यवामनेन "अलंकरोति इति अलंकारः" अलंकार-शब्दोऽयमुपमादिषु वर्तते। दण्डिनाऽपि काव्यशोभोत्पादकधर्मा अलंकाराः स्वीकृताः[4]।

''रसशास्त्रं साहित्यम्''

काव्ये रसस्याऽधिपत्यं भवति। रस एव काव्यस्यात्मा वर्तते। काव्यस्य आत्मस्थानीय रसं विहाय बाह्य सौन्दर्याधायकेभ्यस्तत्त्वेभ्यो अलंकारेभ्यो कथं पूर्ववर्ति आचार्यैर्महत्ता प्रदत्ता। अलंकार रहितं काव्यं काव्यनामभाग् भवितुमर्हति किन्तु रसेनविना काव्ये काव्यत्वं नैवागच्छति, परं प्राक्तनैः रसस्यमहत्वं गौणरूपेणैव स्वीकृतम्। प्राक्तनेषु भट्टलोल्लटश्रीशंकुकभट्टनायक, अभिनव-गुप्तादिभिर्भरत रससूत्रस्य व्याख्यां विधाय काव्ये रसस्यैवाऽधिपत्यं स्वीकृतम्।

---

1. का०लं०सू० 1-3.
2. तत्रैव 2-1-6.
3. तत्रैव 2-1-7.
4. काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते। काव्यादर्शः 2-1.

भामहवामनादिभिस्तु काव्ये अलंकाराणां महत्वं स्वीकृत्य (प्राधान्येन हि व्यपदेशा भवन्ति) इति नियम्ग्रात् स्व स्वग्रन्थानां नाम काव्यालंकार एव सुनिश्चितम्।

''अलंकारशास्त्रे शास्त्रशब्दस्य प्रयोगः''

काव्यं तथा अलंकारशब्देनसह शास्त्रशब्दस्य प्रयोगोऽपि वर्तते। भोजदेवेन (शासनात् शास्त्रं) इतिव्युत्पत्याधारेण शास्त्रशब्दः स्वीकृतः, अस्याऽयमभिप्रायः यद्विधिनिषेधप्रतिपादकं, शासनकर्ता शास्त्रमेव[1]; तथा च लोकव्यवहार प्रवर्तकमपि शास्त्रमेव, अथवा (शंसनात् शास्त्रं) काव्यशास्त्रइतिहासप्रकारेण त्रैविध्यं, एषां परस्परं सम्मिश्रणेन, काव्यस्य शास्त्रस्य च संयोगेन (काव्यशास्त्रम्) काव्यस्य इतिहासस्य च संयोगेन (काव्येतिहासः)। शास्त्र– इतिहासयोः संयोगेन (शास्त्रेतिहासः) अनेन प्रकारेण भोजदेवेन षट् ज्ञान साधनानि प्रतिपादितानि[2]।

(१) काव्यम्, (२) शास्त्रम्, (३) इतिहासः, (४) काव्यशास्त्रम्, (५) काव्येतिहासः, (६) शास्त्रेतिहासश्च। एषां पृथक्-पृथक् उदाहरणान्यभिधाय एवं प्रकारेण कथितं यदुक्तिप्राधान्यात् काव्यमित्युच्यते। स्निग्धत्वादेः शब्दप्राधान्यमिति शासनात् शास्त्रमिदम्। अतीतार्थप्राधान्यादितिहासः। काव्येन शास्त्रमभिहितं इतीदं काव्यशास्त्रम् प्रागुक्तस्यैवेतिहासार्थस्य काव्येनाभिधानात् काव्येतिहासोऽयम्। धर्मार्थकाममोक्षाणामितिहासेनिवेशितत्वात् अयं शास्त्रेतिहासः। अस्य शास्त्रस्य कृते वात्स्यायनमुनिप्रणीते कामसूत्रे विद्यासमुद्देश प्रकरणे चतुःषष्टि कलासु एकाकला क्रियाकल्प इत्यभिधाना वर्तते[3]। जयमंगलाव्याख्यायां क्रियाकल्पस्य व्याख्या एवं कृता विद्यते—क्रियाकल्प इति—काव्यकरणविधिः काव्यालंकार इत्यर्थः। आचार्यदण्डिनाऽपि काव्यनिर्माण-पद्धत्याः कृते क्रियाविधिशब्दस्य प्रयोगः कृतो विद्यते। अनेन प्रकारेण काव्यशास्त्रस्य कृते पंच नामानि समुपलभ्यन्ते; 1. काव्यालंकारः, 2. काव्यशास्त्रम्, 3. अलंकारशास्त्रम्, 4. साहित्यशास्त्रम्, 5. क्रियाकल्पश्च। एषु कामसूत्रोक्तं क्रियाकल्पनाम प्राचीनत्वमाकलयति।

---

1. यद्विधौ च निषेधे च व्युत्पत्तेरेव कारणम्।
   तदध्येयं विदुस्तेन लोकयात्रा प्रवर्तते।। स०कं०भ० 2-154.
2. काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च।
   काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्।। स०क०, 2-155
3. कामसूत्र, 1-3.

आर्यजनानां सभ्यतासंस्कृतिप्रादुर्भावकालादेव संस्कृतसाहित्यस्योद्भवः समभवत्। किन्तु अतिप्राचीनकाले प्रारंभकाले वा एतादृशं विकसितं रूपं नासीद् यथाद्यत्वे। संस्कृतसाहित्यस्य सर्वेषामङ्गानां सूक्ष्मतमं रूपं बीज-रूपेण ऋग्वेदादिषूपलभ्यते। विक्रमसमयादारभ्य अद्यपर्यन्तं द्विसहस्रात्मक वर्षान्तराले अस्यशास्त्रस्य प्रचुररूपेण विकासः समभूत्। तथाप्यस्माकं कृते एतद् विचारणीयं यत् इतोऽपि पूर्वमस्य शास्त्रस्य विकासमूलं कुत्र विद्यते, किमाधारः, यथा मूलमुत्पाटय् पत्रसिंचने वृक्षवृद्धिर्नैव भवति तथैव अस्य शास्त्रस्योद्भवज्ञानात् यदि वंचिता वयं, तदा केन प्रकारेणास्य विकासं कथयितुं प्रभवामः। अस्य साहित्यशास्त्रस्यादिकालज्ञानमन्तराऽन्यशास्त्रेष्वस्य गरिमा नैव प्रतिपादयितुंशक्यते। पूर्वमपि प्रतिपादितं यत् साहित्यशास्त्रस्यैव नामान्तरं काव्यमिति। तत्काव्यमधिकृत्य ऋग्वेद ब्राह्मणादिषु साहित्यतत्वानि प्रदर्श्यन्ते।

वेदेषु काव्यतत्वम् :

ऋग्वेदे कवि शब्दस्य तथा काव्यशब्दस्य प्रयोगो लभ्यते, काव्यरचनादेव कवयो भवन्ति इति ऋग्वेदोऽभिधत्ते।[1] "क्रान्तकर्मा मेधावी" इत्यर्थे कविशब्दस्य प्रयोगः[2]। एवमेव "विप्रस्य मनुषो हविभिर्देवां अयजः कविभिः कविः सन्"[3]। अस्मिन् मन्त्रेऽपि कविशब्दस्य प्रयोगः क्रान्तदर्शीत्यर्थे कृतः। श्रीगणेशः क्रान्तदर्शी आसीत्। तस्मादेवकारणाद् श्रीगणेशमन्त्रे "गणानांत्वा गणपतिं" हवामहे कविं कवीनामुपश्रवस्तमम्" इत्यत्र कविशब्दस्य प्रयोगः कृतः।

"मन्दिष्ट यदुशनकाव्ये" इत्यत्र काव्यशब्दस्य प्रयोगः कृतो विद्यते[4]। कदाचिन्मन्त्रार्थेऽपि कविशब्दः प्रयुज्यतेस्म[5]। कविकृतस्तुतिरूप वाक्यस्यार्थे-श्लोकशब्दस्य प्रयोगः[6]। "अचिकित्वान्चिकितुषश्चिदत्र कवीन् पृच्छामि विद्मने न विद्वान्" अस्मिन् (1/3/15) मन्त्रे "कवीन्" द्वितीया विभक्तेर्बहुवचनस्य प्रयोगो विहितः। गुणिनिष्ठगुणाभिधानलक्षणस्यार्थे स्तुतिरूपार्थे च काव्यता-शब्दस्य प्रयोगः[7]। असमष्टकाव्ये अत्रापि काव्य शब्दस्य प्रयोगः प्राचीन–

---

1. काव्येन कवयः स्तोतारः तत्कर्म स्तोत्रम् तेन स्तोत्रेण समाचक्रे। ऋग्वेद, द्वितीय भाग, ऋचा–5, पृ० 370.
2. पुरामिन्दुर्युवारचितौजा अजायत। तत्रैव। भाग 11.4 पृ० 65.
3. तत्रैव, 1 भाग, 1-5-24.
4. ऋग्वेद 1-4-10.
5. निकाव्या वैधसः शश्वातार्क हस्तेदधानो नर्या पुरूणि इत्यादि। तत्रैव 1-5-24.
6. तत्रैव, 1-4-4.
7. तत्रैव, 1-7-3.

त्वमाकलयति[1]। अस्मात् स्फुटतया एतद् वक्तुं पार्यते यदृग्वेद समयेऽपि मन्त्ररूपकाव्यरचयितारः (स्तोत्र रयचितारः) कवि शब्देनोच्यन्तेस्म, तथा च श्लोकात्मकमन्त्ररचनार्थे काव्यशब्दः व्यवह्रियते स्म। ऋग्वेदाऽधारेणैव कविकाव्य शब्दयोः प्रयोगः प्रचलितो समभूत्।

ऋग्वेदे रीतिशब्दस्य प्रयोगोप्यस्ति[2]। स्रवणार्थक रीङ्धातोः रीतिशब्दो निष्पद्यते, यथा गङ्गादीनां स्रोतो विभक्तंसत् निम्नदेशाभिमुखं प्रसरति, कदाचिन्नदीनां प्रवाहः वैमुख्येनाभिगच्छति, तथैव देशभेदेन रचना प्रवाहोऽपि, वैदर्मी गौड्यादि रीतिषु विभक्तो वर्तते। साहित्यशास्त्रस्यात्मभूत रसशब्दस्य प्रयोगो ऋग्वेदमनुसरति[3]। पृथिव्याः सारभूत हविरित्यर्थे रसशब्दस्यप्रयोग ऋग्वेदे समुपलभ्यते। साहित्यशास्त्रेऽपि काव्यस्यात्मा सारभूतरसस्यार्थे-शृंगारादिरसानां प्रयोगः विहितोऽस्ति। जलसारस्य कृतेऽपि रसशब्दस्य प्रयोगः कृतो वर्तते।[4]

रसनिष्पत्तौ विभावाः कारणानि भवन्ति। ऋग्वेदेऽपि दीप्तिमान् इत्यर्थे विभाव शब्दस्य प्रयोगः समुपलभ्यते[5]। पाणिनिनाऽपि "रसदिभ्यश्च" इतिसूत्रे रसशब्दस्य प्रयोगः कृतोविद्यते। अस्योदाहरणम्, रसवान्, रूपवान् इति वर्तते। महाभाष्ये अस्योदाहरणं "अगासीन्नटः" इति लभ्यते। अस्मात् प्रतीयते यत् साहित्यशास्त्रोक्त रसशब्दस्य प्रयोगः पाणिनि समयेप्यासीत्, नटाः गानं कुर्वन्ति स्म[6]।

ऋग्वेदे, मधुररसोपेतमित्यर्थे[7] मधुमद् शब्दस्य प्रयोगः। माधुर्योपेतस्य सोमस्यार्थे मध्व शब्दस्य प्रयोगः[8]। माधुर्योपेतस्य वाक्यस्य कृते मधुमद् शब्दस्य प्रयोगः, मधुभाषिजिह्वोपेतार्थे मधुजिह्व शब्दस्य प्रयोगः। माधुर्य रसस्यार्थे मधुरशब्दस्य प्रयोगः दरीदृश्यते[9]। अग्नये—अङ्गनादिगुणयुक्ताय देवाय

---

1. तत्रैव, 2-2-1.
2. ब्रह्मणस्पते रभवद्यथा वशं सत्योमन्युर्महिकर्मा करिष्यतः।
   योगा उदाजत्स दिवे विचाभजन्महीव रीति शवासा।। अ० 2-3-24.
3. महे यत् पित्र ईं रसं दिवेकरतत्सरत् पृशन्यश्चिकित्वान्।। ऋग्वेद 1-5-15.
4. आपो अद्यान्वचारिषं रसेन समगस्मयि। —तत्रैव 1-2-12.
5. पुरूणिदस्मो निरिणाति जम्भैराद् रोचतेवत् आविभावा इत्यादि। तत्रैव, 1-2-17.
6. तत्रैव, 1-2-17.
7. तत्रैव, 2-6-10.
8. तत्रैव, 1-2-11.
9. तत्रैव, 1-2-11.

मधुमत्-वचः, माधुर्योपेतं वचनं अवोचाम प्रावादिष्म[1]। साहित्यशास्त्रोक्त-माधुर्यगुणस्याऽधारोऽपि ऋग्वेद–एव।

अनेन प्रकारेण साहित्यशास्त्रोक्तोजोगुणास्याधारोऽपि ऋग्वेद एव यथा—तेजोबलस्यार्थे ओजस् शब्दस्य प्रयोगः[2]। युद्धसामर्थ्यार्थे ओजस् शब्दस्य प्रयोगः[3]। लोकेऽपि कवयो वीररौद्रादि रसवर्णनं ओजो गुणव्यंजकवर्णैः कुर्वन्ति। शत्रुहननादिरूपपराक्रमस्यार्थे, स्वभुजबलस्यार्थे, ओजस् शब्दस्य प्रयोगाः समुपलभ्यन्ते।

आदिकाव्ये श्रीमद्वाल्मीकीये रामायणे बालकाण्डे साहित्यशास्त्रोक्त गुणेषु उदारता (उदारत्वम) मनोरमता (माधुर्यं अथवा प्रसादः) गुणयोरूल्लेखः अक्षिलक्षीभवति[4]। काव्ये गुणयुक्तरचना कर्तव्या इत्युक्तेः प्राक् वाल्मीकी एवं प्राह—

"सोऽनुव्याहरणाद् भूयः शोकः श्लोकत्वमागतः।
तस्य वुद्धिरियं जाता वाल्मीकेर्भावितात्मनः।
कृत्स्नं रामायणंकाव्यमीदृशैः करवाण्यहम्[5]।"

कौटिल्यार्थशास्त्रेऽपि अर्थक्रमः, सम्बन्धः, परिपूर्णता, माधुर्यमौदार्यं स्पष्टत्वमिति लेखसम्पत्[6] एषां गुणानां नामानि लक्षणानि च समुपलभ्यन्ते, तत्र चाणक्याचार्येण कथितं यदुपर्युक्तगुणा, रचनायां अवश्यमेव प्रयोक्तव्याः, येन रचना सुदृढास्यात्। एषां गुणानां लक्षणानि गुणविवेचनाध्याये, स्फुटी भविष्यन्ति।

जूनागढ़े, समुपलब्धस्य रूद्रदाम्नः शिलालेखेन साहित्यशास्त्रस्य विकास-विषये समयविषये च पर्याप्तरूपेण ज्ञातुं शक्यते, अस्मिन् शिलालेखे, चर्तुणां गुणानां उल्लेखः कृतोऽस्ति। शिलालेखोऽयं ओजोगुणाऽनुकूल दीर्धसमासैर्युक्तो वर्तते। अस्य समयः (150 ई० सन्) वर्तते।

पाणिनिनाऽपि "रसादिभ्यश्च" इति सूत्रे रस शब्दस्य प्रयोगः कृतोविद्यते अस्योदाहरणम्, रसवान्, रूपवान् इति वर्तते। तत्वबोधिनी टीकायांतु अस्योदाहरणं रसिको नटः—इति वर्तते। महाभाष्ये अस्योदाहरणं अगासीन्नट-

---

1. तत्रैव, मुद्गलभाष्य 1-5-26.
2. स भूत योहे प्रथमाय धायस ओजोभिमानो महिमान मातिरत। ऋग्वेद द्वितीय भाग, 2-2-17.
3. तत्रैव, 3-3-22.
4. वाल्मीकिरामायणम्, बालकाण्ड, 7-42.
5. तत्रैव, 7-41.
6. कौटिल्य अर्थशास्त्रम् 2-10.
7. संस्कृत काव्यशास्त्रस्येतिहासः, पी०वी० काने० द्वितीय भाग।

इति लभ्यते अस्मात् प्रतीयते यत् साहित्यशास्त्रोक्तरसशब्दस्य प्रयोगः पाणिनि-समयेऽप्यासीत्, नटा गानं कुर्वन्ति स्म[1]। नारदपुराणे शिक्षानिरूपाध्याये देवर्षिनारदजिज्ञासायां सनक सनन्दनेन गानस्य दशगुणानामभिधानं कृतमस्ति। तेषु गुणेषु समप्रसन्नव्यक्तसुकुमारमधुरगुणानां नामानि सन्ति। तेषां गुणानां साहित्यशास्त्रोक्तसमताप्रसादअर्थव्यक्तिसौकुमार्यमाधुर्यगुणैः सह साम्यं वर्तते[2]। अग्निपुराणस्य (346 अध्याये), यः काव्ये महतीं शोभां अनुगृह्णात्यसौगुणः इति गुणलक्षणं कृत्वा, सामान्यवैशेषिक भेदेन गुणस्य द्वैविध्यं प्रदर्श्य सामान्यगुणस्य त्रयोभेदाः प्रतिपादिताः। शब्दगुणस्य सप्त भेदाः, अर्थगुणस्य षट् भेदा विद्यन्ते इति प्रतिपादितम्।[3] अग्निपुराणोक्त गाम्भीर्यगुणाधारोऽपि ऋग्वेद एव। गौरवेण गाम्भीर्योपेतार्थे गभीरशब्दस्य प्रयोगः ऋग्वेदे दृश्यते[4]। महत्वेन गाम्भीर्योपेतार्थे गम्भीर शब्दस्य प्रयोगः तत्रैवदृश्यते[5]।

विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डेऽपि गुणशब्दप्रयोगः समुपलभ्यते[6]।

''ऋग्वेदे अलंकारशब्दस्य प्रयोगः''

अलंकाराणां प्रारम्भिकं स्रोतो ऋग्वेद एव यथा–त्वमग्नेद्रविणोदा अरंकृते''[7] इत्यादि (2-5-8) ऋग्वेदमन्त्रे–अलंकरणार्थे अरंकृत शब्दस्य प्रयोगोऽस्ति, अयमेव अरंकृतशब्दः साहित्ये उपमादि अलंकारार्थे प्रयुक्तः। रलयोः डलयोः न कोऽपि भेद इति नियमात्। पर्याप्त्यर्थवाचकअरंशब्दस्य प्रयोगः ऋग्वेदे समुपलभ्यते, साहित्यशास्त्रेऽपि अलंकारेणैव पर्याप्तिर्भवति, अलं (अरं) करोतीति अलंकारः रलयोरभेदात्[8]।

पर्याप्त्यर्थस्य भूषणार्थस्य च अरंकृतशब्दस्य प्रयोगः ऋग्वेदे लभ्यते[9]। ''लकारस्य रेफत्वं छान्दसम्''। ईलते त्वामवस्य वः कृण्वासो वृक्त वर्हिषः हविष्मन्तो अरंकृताः। अत्र अलंकरणार्थे तथा च पर्याप्त्त्यर्थे अरंकृतशब्दस्य प्रयोगः[10]।

---

1. सिद्धान्तकौमुदी तत्वबोधिनी, 5-2-95.
2. नारदपुराणम्, श्लोक 43, पृ० 224.
3. अ०पु०अ० 346, पृ० 502-503.
4. ऋ० वे० 1-7-26.
5. तत्रैव, 2-2-1.
6. विष्णुधर्मोत्तर पुराणम् 42-2.
7. ऋ०वे० 2-5-18.
8. ऋग्वेद, 1-7-26.
9. वायवा याहि दर्शतेमे सीमा अरंकृताः तेषां। पाहि श्रुधीहवम् तत्रैव, 1-3-2.
10. तत्रैव, 1-1-26.

अनेन प्रकारेण ऋग्वेदस्य अरंकारः तथा अरंकृतादिशब्दानामाधारेण साहित्यशास्त्रे उपमाद्यलङ्काराणां नाम सुनिश्चितं वरीवर्ति।

"ऋग्वेदे उपमा प्रयोगः"

उपमालंकारस्याऽधारभूत उपमाशब्दस्य प्रयोगः सर्वप्रथमं ऋग्वेदे समुपलभ्यते[1]। उपमाशब्दस्यार्थः स्कन्द, वेङ्कट, मुद्गल व्याख्यासु एवं स्वीकृतः।

क) गन्त्रीणां वह्नीनां मध्ये उपमानभूता अत्यन्तोत्कृष्टेत्यर्थः।

ख) दीप्यमानानां मध्ये प्रथमा उत्कृष्टा।

ग) उपसमीपे निर्मिता।

साहित्यशास्त्रेऽपि सर्वोत्कृष्टस्यार्थे उपमा शब्दो वेदमनुरति।

अभ्रातेव पुंस एति प्रतीची, गर्तारूगिव सनयेधनानाम्।
जायेव पत्य उषतीसुवासः, उषाहस्रेव निरिणीते अप्सः[4]।।

अस्मिन् उषा विषयक मन्त्रे—1. अभ्रातेव, 2. गर्तारूगिव, 3. जायेव, 4. हस्रेव इमाः चतस्रा उपमाः सन्ति।

ऋग्वेदस्य अग्निसूक्तमन्त्रेषु उपमालङ्कारस्योपमाभेदानां च डॉ० हेमलता सिंहेन निरूपणं कृतमस्ति। तदर्थं तस्य हिन्दीग्रन्थः ऋग्वेदस्य अग्निसूक्तस्योपमानामध्ययनम् द्रष्टव्यः।

यजुर्वेदेऽपि उपमालंकारस्य प्रयोगो दृष्टिप्रथमवतरति यजुर्वेद संहितायां (34-6 मंत्रे) वारद्वयं उपमालंकारस्य प्रयोगः कृतः। एवं च यजुर्वेदस्य 17-48 तथा 33-41 मन्त्रेषु उपमालंकारस्य साम्राज्यं वरिवर्ति।

ब्रह्मणस्पते रभवद्यथावशं सत्यो मन्युर्महिकर्मा करिष्यतः। योग उदाजत्स दिवे विचामभजन्महीव रीति शवसा सरत्पृथक्।। अस्मिन् ऋग्वेदस्य (2-3-24) मन्त्रे पूर्णोपमालंकारो वर्तते।

यास्काचार्येणापि निरुक्ते उपमायाः षट्भेदाः स्वीकृतास्सन्ति, यथा—कर्मोपमा, भूतोपमा, रूपोपमा, सिद्धोपमा, लुप्तोमा, अर्थोपमा। यास्केन निरुक्ते अभ्रातृकाया कन्यायाः, अधिकारप्रसङ्गे ऋग्वेदस्य आभ्रातेव पुंस एति प्रतीची इत्यादिमन्त्रः उद्धृतोऽस्ति, पूर्वकथनानुसारेण अस्मिन् मन्त्रे

---

4. आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना।
ईयुषीणामुपमा शाश्वतीनां विभातीनां प्रथमोषा व्यश्वैत्।।ऋ०1म भाग 1-8-3.

1. ऋ०वे० द्वितीय भाग 1-14-7.

वारचतुष्टयं उपमावाचक शब्दानां प्रयोगोऽस्ति[1]। वेदमूलकब्राह्मणग्रन्थेष्वपि उपमालंकारस्य प्रयोगो दृष्टिप्रथमायाति। शतपथब्राह्मणे पिण्डपितृयज्ञप्रसंगे उपमालंकारो वर्तते[2]। "तिर इव वै पितरो"—इत्यत्रापि उपमा अलंकारस्य सद्भावः स्पष्ट एव[3]। रामायणेऽपि बाहुल्येन उपमालंकारस्योदाहरणानि लभ्यन्ते।

कठोपनिषदि पूर्णोपमाअलंकारस्यसद्भावः स्पष्टरूपेण प्रतीयते[4]। अत्र ज्ञानवतः पुरूषस्य संयमितइन्द्रियानां तुलना सारथेः वशीकृतैरश्वैः सह कृता वर्तते। अत्रोपमानोपमेयइवादिशब्दसाधारणधर्माणां चतुर्णामुपादानेन पूर्णोपमालंकारो विद्यते। श्वेताश्वेतरोपनिषदि उपमालंकारो यथा—"घृतात्परं", मण्डमिवातिसूक्ष्मम्"[5] इत्यादि मन्त्रे उपमानोपमेयउपमावाचकशब्दाः, साधारण-धर्माश्च क्रमेण, मण्ड, शिव, इव, अतिसूक्ष्म, शब्दाः पूर्णोपमालंकारं व्यंजयन्ति।

यजुर्वेदेऽपि उपमालंकारस्य प्रयोगः दृष्टिपथमवतरति यजुर्वेद संहितायां 34-6 मन्त्रे वारद्वयं उपमालंकारस्य प्रयोगः कृतः। एवं यजुर्वेदस्य (7-48 तथा 33-4) मन्त्रेषु उपमालंकारस्य साम्राज्यं वरीवर्ति[6]।

पाणिनिनाऽपि व्याकरणे एवंविधानां सूत्राणां प्रतिपादनं कृतमस्ति यैरेतत् ज्ञायते यत् उपमायाः प्रयोगस्तस्मिन् समयेऽपि भवति स्म, कृष्ण इवाचरति, कृष्णायते वा। घन इव श्यामो घनश्यामः, पुरुष व्याघ्रः पुरुषो व्याघ्र इव आचरति, घृतं निधाय निहितं जलं घृतमिव सुरक्षितमित्यर्थः एषु उदाहरणेषु कुत्रचित्—

---

1. निरूक्तभाष्य, 3-1-5 ऋ०वे० 1-124-7.
2. अथ सकृदाच्छिन्नान्युपमूलं दिनानि भवन्ति। अग्रमिव वै देवानांमध्यमिव मनुष्यानांमूलमिव, पितृणां तस्मादुपमूलं दिनानि भवन्ति, सकृदाच्छिन्नानि भवन्ति, सकृदुह्येव परांचः पितरस्तस्मान्सकृदाछिन्नानि भवन्ति।....शतपथब्राह्मणम्, अ० 2 प्रपाठिका-2.
3. तत्रैव, अ० 2 प्रपाठिका-2.
4. यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा।
तस्येन्द्रियाणि वश्यानि सदाश्वा इव सारथेः।। कठोपनिषद् 3-6.
5. घृतात्परं मण्ड मिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम्।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वादेवं मुच्यते सर्व पाशैः।।
श्वेताश्वतरोपनिषद्, 4-16.
6. यजुर्वेदः 34-6. 17-48, 36-41.

उपकालंकारः कुत्रचिल्लुप्तोपमा वर्तते[1]।

महाभारतेऽपि उपमालंकारस्य प्रयोगो दृश्यते। भीमकृतकीचकवधप्रसंगे वैशम्पायनस्योक्तिर्यथा—

बाहुयुद्धं तयोरासीत्क्रुद्धयोर्नरसिंहयोः।
वसन्तेवाशिताहेतोर्बलवद्गजयोरिव।।

कीचकभीमसेनयोः परस्परं एवं युद्धमभूत् यथा वसन्तसमये एकस्या-हस्तिन्याः कृते द्वौ गजौ विवादं कुर्वतः। अत्रोपमालंकारः[2]। अन्यच्च.

तां मृगीमिव चित्रस्थां दृष्ट्वा कृष्णां समीपगाम्।
उदतिष्ठन्मुदा सूतो नावं लब्ध्वेव पारगः[3]।।

कीचकः हरिणाक्षीं द्रौपदीं दृष्ट्वा स्वस्थानादेवमुदतिष्ठत् यथा—नदीपारगः कश्चित् नौकांदृष्ट्वा उतिष्ठति। इत्यत्राप्युपमालंकारस्य सद्भावः स्पष्ट एव।

''रूपकालंकारः''

ऋग्वेदे रूपकातिशयोक्ति—अलंकारस्याऽनुगुणा रचना समुपलभ्यते[4]। अत्रोभयत्र रूपकातिशयोक्तेः सद्भावः लक्ष्यते। उपनिषदिऽपि अतिशयोक्ति अलंकारस्याऽनुगुणारचना दृष्टिपथमायाति। यथा—

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वंपूषन्नपावृणु सत्यधर्माय दृष्टये।।

अत्रोपमानभूतसत्येन ब्रह्मतत्व निगीर्णत्वात्-अतिशयोक्तिं अलंकारो वर्तते[5]।

---

1. उपमानादाचारे। सिद्धान्तकौमुदी, तत्त्वबोधिनीसहिता, 3-1-10.
   उपमितं व्याघ्रादिभिः सामान्याप्रयोगे।—तत्रैव, 2-1-56.
   उपमानानि सामान्यवचनैः। तत्रैव, 2-1-55.
   उपमाने कर्मणि च। तत्रैव, 5-4-45.
2. महाभारत, विराटपर्व, 21-49.
3. तत्रैव, 14-21.
4. द्वासुपर्णा सजुया सखाया समानं वृक्षं परिषस्वजाते।
   तयोरन्यः पिप्पलंस्वाद्वत्यनश्नन्योऽभिचाक्शीति।। ऋ०वे० 2-2-13.
5. ईशावास्योपनिषद् 15.

''उत्प्रेक्षालंकारस्य प्रयोगः''

ऋग्वेदे उत्प्रेक्षालंकारस्याऽनुसारेण रचना दृष्टिपथमवतरति[1]। शतपथ–ब्राह्मणेऽपि उत्प्रेक्षालंकारस्य प्रयोगो विद्यते[2]। सूर्य एव अग्निहोत्रमित्य-त्रोत्प्रेक्षालंकारः। कठोपनिषदि, अहं त्वां नाचिकेतसं ज्ञानाभीप्सिनं मन्ये इत्युक्त्वा, उत्प्रेक्षालंकारस्य सद्भावः प्रतिपादितः[3]। अग्निपुराणेऽपि, 344 अध्याये "अन्यथा मन्यते यत्र तामुत्प्रेक्षा प्रचक्षते" इत्युक्त्वा अर्थालंकारेष्वस्या-लङ्कारस्य गणना स्वीकृता।

"आनो ब्रह्मणि मरुतः" इत्यादिऋग्वेदोक्तमन्त्रे उपमादृष्टान्ताऽलंकारौ वर्तेते। यथाश्वाः पीनावयवा भवन्ति तद्वन्मेघं वर्षणसमर्थमाप्यायितं कुरु इत्यर्थः[4]।

''दृष्टान्तालङ्कारस्य प्रयोगः''

शतपथब्राह्मणे सूर्याग्निहोतृप्रसंगे उदीयमानसूर्यस्य तेजःप्राप्तिदृष्टान्तेन प्रतिपादनं कृतम्। तेजसः प्रतिबन्धकं रात्रिरूपं पापं वर्तते, तस्मात् सूर्यः तेन प्रकारेण निर्मुक्तो भवति यथा सर्पः निजत्वचः (कंचुल्यात्) निर्मुक्तो भवति[5]। इत्यत्र सधर्मस्य वस्तुनः प्रतिबिम्बनात् दृष्टान्तोऽलकारः।

अपि चं

श्वेताश्वतरोपनिषदि दृष्टान्तालंकारस्य प्रयोगो यथा–"मृत्तिकोपलिप्त सुवर्णपिण्डस्य तथा आत्मत्त्वस्य साक्षात्कर्तरि जीवे बिम्बप्रतिबिम्बभावात्–दृष्टान्तोऽलंकारः[6]।

---

1. आयोवनो तातृषाणो न भाति वार्णपथा रथ्येव स्वानीत्।
   कृष्णाध्वा तपूरन्वश्चिकेत दयोरिवस्मयमानो नभोभिः।। ऋ०वे० 2-1-4.
2. सूर्योहवा अग्निहोत्रं। तदयदेतस्या अन्न आहुते रुदैत्तस्मात्सूर्यो अग्निहोत्र 11 श०ब्रा० 2-2.
3. दूरमेते विपरीत्वे विषूचो अविद्याया च विद्येति ज्ञाता।
   विद्याभीप्सिनं नचिकेतसं मन्ये नत्वाकामा बहवोऽलोलुपन्त।।
   कठो०, 1-2-4.
4. ऋ०वे० 2-4-34.
5. स यथाहिस्त्वचो निर्मुच्येत। एवं रात्रैः पाप्मना निर्मुच्यते यथा हवाऽहिस्त्वचोनिर्मुच्यते तैवं सर्वस्मात् पाप्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोति तदे तस्येवानु प्रजाति मिमाः सर्वाः प्रजा अनुप्रजायन्ते विहि सृज्यन्ते यथार्थं।। शतपथब्रा० 2-2
6. यथैव विम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधान्तम्।
   तद्वाऽत्मतत्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः।। श्वेता०उ० 2-24.

ऋग्वेदे जकारलकारयोरनुप्रासः साहित्यशास्त्रोक्तअनुप्रासलंकारं सूचयति[1]।

केनोपनिषदि वृत्यनुप्रासस्याऽनुगुणारचना लभ्यते[2]।

सूत्ररचनासमये पाणिनिनाऽपि "जाम्ववती विजय" नामकं काव्यं रचितम् इति शरणदेवस्य दुर्घटवृत्तिग्रन्थस्य अष्टादशसर्गात् पद्यमेकं उद्धृतं वर्तते[3]। यस्मात् प्रतीयते यदिदं अष्टादशसर्गात्मकं अवश्यमेवासीत्।

पाणिनेः रचना सरसा मधुरा च विद्यते। पाणिनिः एकस्मिन् प्रसंगे इत्थं वर्णयामास[4]। वर्षाकाले मेघानां प्रचण्डघनघोरगर्जना वर्तते। पाणिनिमते इयं गर्जना नीरसा नैव अपितु करुणक्रन्दनं वर्तते। निष्कर्षोऽयं यद्रात्रौ अभिसारिकाया मुखं विद्युतरूपाभ्याम् नेत्राभ्यां निरीक्ष्य मेघाः सन्दिहानाः सन्ति, यदस्माकं धारासम्पातेन सह किं निशापतिः भूमौ अपतत्। यद्येवंनास्ति तर्हि गाढान्धंकारे अभिसारिकायाः एवंविधं देदीप्यमाननं कुतः समागतम्। नायिकायाः अत्यन्तकान्तियुक्तं मुखं विलोक्य चन्द्रस्य भ्रमो भवति, अस्मिन् सन्देहे निमग्नाः मेघाः कारुणक्रन्दनं कुर्वन्ति। अस्मात् प्रतीयते यत् ईस्वीतः शताब्दीः पूर्वं उत्तमकाव्यानां रचना समभूत् नास्त्यत्र सन्देह लेशः। राजशेखरेण सूक्तिमुक्तावल्यां पाणिनि काव्यविषये लिखितमस्ति[5]।

एवं प्रकारेण उपनिषत्सु एवंविधाः बहवः मन्त्रास्सन्ति येषु माधुर्यगुणस्य सारालंकारादीनांच प्रयोगः समभूत्[6]। अनेनोपरिनिर्दिष्ट क्रमेण ज्ञायते यद् ऋग्वेदसमयादारभ्य एव, साहित्यशास्त्रस्य अलंकाररसगुण-

---

1. विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते।
   आवजिते भोजिते अब्जिते भरेन्द्राय सोमं जयताय हर्यताम्।।
   ऋ०वे० 3-2-22 पृ० 272.
2. केनेषितं पततिप्रषितंमनः केन प्राणः प्रथमः प्रैतियुक्तः।
   केनेषितां वाचमिमांवदन्ति चक्षुः श्रोत्रं क उदेवोयुनक्ति।। केनो०उ० 1-1.
3. त्वया सहार्जितं यच्च यच्चसंख्यं पुरातनम्।
   चिराय चेतसि पुरस्तरुणीकृतमद्यते।।
   सं०सा०इ०, तृतीय पारि० आचार्य बलदेव उपाध्याय, पृ० 135.
4. निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः।
   धारा निपातैः सहकिन्नुवान्तश्चन्द्रोऽयमित्यार्ततरं ररास।। तत्रैव तृतीय परि०
5. स्वस्ति पाणिनये तस्मै यस्य रुद्र प्रसादतः।
   आदौ व्याकरणमनुजाम्ववती जयः।। सूक्ति मुक्ता०, श्लो० 42.
6. मुण्डाकोपनिषिद् 1-2-4.

रीतिरसादीनां साहित्यतत्वानां उद्भव आसीत्। यद्यप्येषां साहित्य तत्वानां स्वरूपनिर्धारणं ऋग्वेदसमये नाऽवलोक्यते परं ऋग्वेदसमये कवयः साहित्य-तत्वेभ्योऽनभिज्ञा नैवासन्, ऋग्वेदस्था मन्त्राः काव्यरूपा एव सन्ति। साहित्य-शास्त्रे चिरन्तनैराचार्यैः पाकशब्दस्य प्रयोगः परिपक्वरचनार्थे कृतः। यतोहि कवीनां नैरन्तर्याभ्यासेन काव्ये परिपक्वता समायाति। ऋग्वेदेऽपि पाकस्था-नीयोऽपाकशब्दः प्राचीनत्वमाकलयति[1]। अपाकशब्दस्यार्थाः स्कन्दवेंकटमुद्गल-व्याख्यासु क्रमेण एवं प्राप्यन्ते।

क) आपाकाः अपक्तव्यप्रज्ञाः अत्यन्तपरिपक्वप्रज्ञा इत्यर्थः। ख) आपाकाः अपक्तव्यप्रज्ञाः। ग) आपाकाः—परिपक्वज्ञानाः अग्निपुराणेऽपि कथितं यत् कापि उच्चैःपरिणतिर्पाकनाम्ना व्यवह्रियते। अग्निपुराणे शब्दार्थोभयगतगुणस्य षट्भदेषु पाकरागयोर्नाम गृहीतम् पाकस्य चातुर्विध्यं प्रदर्श्य, रागोऽपि हरिद्रारागकौसुम्भीरागनीलीरागभदेन त्रिधा विभज्य स्वीयलक्षाऽनुसारी वैशेषिको ज्ञेयः-इत्युक्तम्[2]।

ध्वन्यालोके आनन्दवर्धनाचार्येण रामायणात् पद्यमेकं अत्यन्ततिरस्कृत-वाच्यध्वनेरुदाहरणार्थे उद्धृतम्। तत्र अन्धशब्दोऽत्यन्ततिरस्कृतवाच्यध्वनिं व्यनक्ति[3]। महाभारतस्यादिपर्वणोऽपि ध्वन्यालोके अविवक्षितवाच्यस्य अत्यन्त-तिरस्कृतवाच्यताप्रभेदे वाक्यप्रकाश्यतोदाहरणं प्रदत्तम्। अस्मिन्नुदाहरणे, निशार्थो न च जागरणार्थः कश्चिद् विवक्षितः किं तर्हि। तत्वज्ञानावहितत्वं अतत्वपराङ्मुखत्वं च मुनेः प्रतिपाद्यत इति तिरस्कृतवाच्यस्याऽस्य व्यंजकत्वम्[4]। महाभारतस्य शान्तिपर्वणः गृध्रगोमायुसंवादात् एकं संवादमुदाहरता काव्यप्रकाशे मम्मटेनोक्तं चतुर्थोल्लासे अर्थशक्त्युद्भवभेदगणनासु प्रबन्धेऽपि द्वादशभेदा भवन्ति, तेषु द्वादश भेदेषु एको यथा—

---

1. शिवसंङकल्पोपनिषद् 18.
1. आभोगयं प्रयदिच्छन्त ऐतनापाकाः प्राञ्चोममके चिदामयः। ऋ०वे० 1-7-30 पृ० 794-795.
2. अ०पु०अ० 346 पृ० 502.
3. रविसंक्रान्त सौभाग्यस्तुषारावृतमण्डलः।
   निश्वासान्ध इवादर्शचन्द्रमा न प्रकाशते।।
   ध्वन्या०, द्वितीय उद्योतः, रामायण, आरण्य काण्ड, 22-23.
4. या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
   यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।।
   ध्वन्या० तृतीय उद्योतः, महाभारत, आदिपर्व, प्रथम अ०।

दिन एव मृतमांसभक्षण समर्थो गृध्रः बालकस्य सम्बन्धिजनान् श्मशानात् निवारयन् कथयति यत् बालकं विहाय सर्वैः इतो गन्तव्यम्, यतोहि अद्यपर्यन्तं कालकवलितः कश्चिदपि न जीवितः[1]। रात्रौ दर्शनसामर्थ्यशालित्वात् शृगालोऽभिलषति यत् सूर्यास्तं यावत् जना अत्रैवावस्थितिं कुर्युः तेषां जनानां तत्र स्थितो सत्यां गृध्रः बालकस्य मृतशरीरं न भक्षयेत्–

तदनन्तरं समग्रं मासं मां प्राप्नुयादिति[2]। अस्मात् प्रतीयते यत् रामायण महाभारतसमयेऽपि ध्वनि प्रयोगो भवति स्म।

अनेनोपरिनिर्दिष्टक्रमेण ज्ञायते यद् ऋग्वेदसमयादारभ्य एव, साहित्य शास्त्रस्य अलंकाररसगुणरीतिरसादीनां साहित्यतत्त्वानां उद्भव आसीत्। यद्यप्येषां साहित्यतत्त्वानां स्वरूप निर्धारणं ऋग्वेद समये नाऽवलोक्यते परं ऋग्वेदसमये कवयः साहित्यतत्वेभ्योऽनभिज्ञा नैवासन्।

राजशेखरेण काव्यमीमांसायां कथितं यस्य शास्त्रस्य अष्टादशाधिकरणानां रचना अष्टादशोपदेशकैः कृता, यथा–

"तत्र कविरहस्यं सहस्राक्षः समाम्नासीत्, औक्तिकमुक्तिगर्भः, रीति निर्णयं सुवर्णनाभः, आनुप्रासिकं प्रचेतः, यमो–यमकानि, चित्रंचित्राङ्गदः शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः औपम्यमौपकायनः, अतिशयं पारशराः, अर्थश्लेषमुतथ्यः, उभयालंकारिकं कुवेरः, वैनोदिकं कामदेवः रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणोपादानिकमुपमन्युः, औपनिषदिकं कुचुमारः, इति ततस्ते पृथक्-पृथक् स्वशास्त्राणि विरचयाञ्चुक्रुः अलंकारशास्त्रं सप्तममंगं स्वीकृत्य ऋते च तत्स्वरूपपरिज्ञानात् वेदार्थानवगतिः, अलंकारमजानन् वेदार्थस्यसम्यग्ज्ञानमसम्भवमिति काव्यमीमांसाया कथयामास राजशेखरः। एतत् कथनं सन्देहयुक्तं प्रतीयते यद्राजशेखरेण

---

1. अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले।
कङ्कालवहले घोरे सर्वप्राणिभयङ्करे।।
न चेह जीवितः कश्चित् कालधर्ममुपागतः।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी।।
काव्य० प्रकाश चतुर्थ उल्लास। महाभारत, शान्तिपर्व, अ० 153, श्लोक 93-94.

2. आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत साम्प्रतम्।
वहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन।।
अमुं कनकवर्णाभं बालमप्राप्तयौवनम्।
गृध्रवाक्यात् कथं मूढास्त्यजध्वमविशङ्किताः।।
काव्य० प्रकाश चतुर्थ उल्लासः महाभारत, शान्तिपर्व, अ० 153 श्लोक 95-96

किमाधृत्य एतल्लिखितं इत्यस्मिन् विषये किमपि प्रमाणं नोपलभ्यते तथाप्यस्य साहित्यशास्त्रस्य ऋग्वेदसमयादेव उद्‌भवः समभूत्, ऋग्वेदब्राह्मणोपनिषत्-सूत्रग्रन्थरामायणमहाभारतपुराणकौटिलीयार्थशास्त्रशिलालेखानामध्ययनेन अयमेव निष्कर्षो जायते यत् साहित्यशास्त्रस्योदभवः ईसवीयतः वहुशत-वर्षपूर्वमभवत्। यद्यपि साक्षात् रूपेण वेदशास्त्रेषु काव्यविषयकाः मन्त्रा नोपलभ्यन्ते तथापि बहुषु मन्त्रेषु रस गुणालंकाररीति- पुरस्सरं काव्यात्मकाः भावा दृष्टिपथमवतरन्ति, येनेदं स्फुटतया वक्तुं पार्यते यत् संस्कृतसाहित्ये वैदिकाः संकेता बीजरूपेण विद्यन्ते ये च कालक्रमेण अङ्‌कुरिताः, पुष्पिताः फलिताश्च समभूवन्।

---

1. का०मी० 1-3.

द्वितीयोऽध्याय:

संस्कृतसाहित्यशास्त्रस्य क्रमिको विकास:

संस्कृतसाहित्योद्भवक्रम इवास्य क्रमिकविकासोऽपि यथार्थतो निरुप्य एव। अस्माकं दौर्भाग्यवशात् कालप्रवाहेऽनेके साहित्यग्रन्था मनोहराः कविकृतयश्च कालकवलिताः। अतो वास्तविको विकासक्रमः यत्-किञ्चिदाधृत्यानुमान गम्य एव। ईस्वीयतः पूर्वतनं महर्षिपाणिनिप्रणीतं-जाम्बवती-परिणय नाम काव्यम्, श्रीमदश्वघोषविरचितं शारिपुत्रनाम नाटकमेवंविधा-न्यमराणि काव्यानि च लुप्त प्रायाणि। एतेषां केचन श्लोका एव प्राप्यन्ते।

अतः प्राप्तग्रन्थग्रन्थांशाधारेण प्राक्तनो विकासक्रमो निरूप्यते। ईस्वी-यादनन्तरमथवा गुप्तसाम्राज्यादनन्तरमस्माकं भाग्यवशात् संस्कृतसाहित्यस्य क्रमिक–इतिहासः प्राप्यते। तत्रापि बहवः कवयः सन्ति, अनेकाः कृतयः सन्ति, अतः सर्वाणि आधृत्य निरूपयितुं न पारये। तस्मात् मुख्यमुख्यकृतीराधृत्य विकासक्रमो निरूप्यते।

संस्कृतसाहित्येन स्व दौर्भाग्याद् बहवो विकरालकाला अवलोकिताः यस्मिन् संस्कृतसाहित्यशास्त्रस्य सिद्धान्तानां विकटप्रवक्तारो बहवो विद्वांसोऽजायन्त।

सर्वप्रथममस्माकं भारतवर्षे वैदिककालादेवास्य शास्त्रस्य उद्गमोऽभूदिति निश्चप्रचं वक्तुं शक्यते। परमस्य विकासश्चापि भारतीयैराचार्यैरेव कृतः। ततः विदेशीयैराचार्यैरपि अस्य शास्त्रस्याऽनुकरणं कृत्वा स्व साहित्य (लिट्रेचर) पदाभिधेयस्य सिद्धान्ततत्त्वानां निर्माणमकारीति निश्चितम्।

पाणिनिनाऽपि–"पराशर्यशिलालिभ्यां भिक्षुनट सूत्रयोः" अस्मिन् (4-3-110) सूत्रे पाराशर्यशिलालिप्रणीतनटसूत्राणां–उल्लेखः कृतः, परं तेषां रचनाः अद्य न समुपलभ्यन्ते, तथापि तासामस्तित्वमासीदिति निश्चीयते।

"भरतमुनिः"

अद्य साहित्यज्ञानां समक्षे द्वितीयेसवीयशताब्द्यां, लब्धजनिश्रीभरतमुनि-प्रणीत नाट्यशास्त्रं विहाय न कोऽपि प्राचीनतमो ग्रन्थो दृष्टिपथमवतरति येन साहित्यशास्त्रस्याऽधारं कच्चिज्जानीयात्।

नाट्यशास्त्रप्रणेतुर्भरतात्पूर्वमपि भरतनामधारिणः पंचभरताः समभूवन्–

1. दशरथस्यपुत्रो भरतः,

2. दुष्यन्तस्य पुत्रो भरतः,

3. मान्धातुः प्रपौत्रो भरतः,

4. जडभरतः,

5. पंचमवेदप्रणेता.....अर्थात् नाट्यशास्त्रस्यकर्त्ता–भरतः।

पंचम भरतमधिकृत्यैव साहित्यशास्त्रस्य क्रमिको विकासः–उपक्रंस्यते। साहित्यशास्त्रस्याधारभूतभरतमुनिप्रणीतनाट्यशास्त्रस्य सप्तत्रिंशदध्यायास्सन्ति। यद्यप्यत्र नाट्यशास्त्रेति नाम्ना नाटकविषयस्यैव प्राधान्यं प्रतीयते, परं साहित्यशास्त्रस्य गुणदोषरीतिरसालंकारादीनां च मूलबीजान्यपि–अत्रैव समुपलभ्यन्ते, विशेषतो नाट्यशास्त्रषष्ठाध्याये साङ्गोपाङ्गरसनिरूपणं षोडशाध्याये, षट्त्रिंशत्प्रकाराणि लक्षणानि, उपमालङ्कारस्य लक्षणं, उपमायाः प्रशंसोपमा, निन्दोपमा, कलितोपमा, सादृश्युपमा, किंचित्सदृशी इति पंचभेदा, रूपकदीपकयमकालङ्काराणां लक्षणानि, पादान्तकप्रकारादिक्रमेण, यमकस्य दशभेदाः, एवंच गूढार्थअर्थान्तरअर्थहीनभिन्नार्थैकार्थ, अभिप्लुतार्थन्यायादपेतविषमविसन्धिशब्दच्युतदशविधदोषाणां लक्षणप्रतिपादनं, श्लेषप्रसादसमतासमाधिमाधुर्यओजः, सौकुमार्य–अर्थव्यक्ति, उदारताःकान्तिदशविधकाव्यगुणानां लक्षणं-अलंकाराणां रसेषु विनियोगः, काव्यरचनायां शब्दमाधुर्य, पाठ्ये अक्षरविधिः तथा च भूषणादीनां नामनिर्देशं वर्तते। नाट्यशास्त्रमिदं न केवलं नाट्यकलानां कोषः अपितु सर्वासां ललितकलानां विश्वकोश इति निःसङ्कोचं वक्तुं पार्यते। भरतेन स्वयमेवऽभिहितम् यत्–

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न विद्यते[1]।।

नाट्यशास्त्रनिर्माणप्रकारः भरतेन एवमभिहितः। पाठ्यमृग्वेदात्सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि[2]।'' नाट्यशास्त्रस्य विषयः प्राचीनत्वमाकलयति। सर्वप्रथमं भरतेन, नाट्यवेदस्य गुरुं ब्रह्माणं तथा च ताण्डवस्याऽधिपतिं महेश्वरं नमस्कृत्य, ब्रह्मणोक्तनाट्यशास्त्रस्य प्रवचनं कृतम्[3]।

---

1. ना०शा० 21-112.
2. तत्रैव, 1-17.
3. नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्। तत्रैव, 1-1.

सर्वोपयोगार्थं भरतेन नाट्यशास्त्राख्य पंचमोवेदो व्यरचि[1]। मत्स्यपुराणेऽपि भरतमुनेरुल्लेखः कृतो वर्तते। एकदा भरतेन देवलोके लक्ष्मीस्वयम्बरनाटकस्य अभिनयः कारितः। अस्मिन्नभिनये दर्शकेषु इन्द्रस्यपार्श्वे पुरुरवाप्यासीत्। लक्ष्म्याअभिनयंकुर्वाणां उर्वशी पुरुरवाकृतिं दृष्ट्वा मुग्धाजाता तथा च स्वाभिनयं विसस्मार। अस्मिन् समये अप्रसन्नमनस्को भरतः शशाप।

महाकविकालिदासेनापि कथितं वर्तते यद् भरतः अष्टौरसान् स्वीकरोतिस्म तथा च भरतेन इन्द्रसदसि नाटकाऽभिनयः कारितः[2]।

अस्य नाट्यशास्त्रस्य प्राचीनतायामपि मतमतान्तराणि सन्ति, साहित्य-शास्त्रस्यालोचकैरस्य समयः—ईसायाः द्वितीयशताब्दी एव स्वीकृतः। महा-महोपाध्याय पी०वी० काणे मतानुसारेणास्य समयः 300 ई० वर्तते। आचार्य मधुसूदनशास्त्रिमतानुसारेण भरतसमयो दशलक्ष्यवर्षाणि पूर्वं सिद्धति। तेषां तर्कोऽत्र दीयते।

युगान्तेऽन्तर्हितान् वेदान् ऐतिहासान् महर्षयः।
तपसः लेभिरे विष्णोरवतारात् सुरक्षितान्।।

अस्माकं प्राचीनपरम्परानुसारं तेषामयमभ्प्रिायः यत् त्रेतायुगान्ते रामावतारः समभूत यस्य चरितवर्णनं रामायणे वर्तते। रामायणानन्तरमेव नाट्यशास्त्रस्य रचना कालो वर्तते। यथा—अद्यपर्यन्तं कलियुगस्य 5067 वर्षाणि व्यतीतानि, द्वापरस्य 864000 वर्ष प्रमाणमासीत् द्वयोर्योगेन 869067 वर्ष संख्या जाता अस्मिन् त्रेता युगस्य 216000 सन्ध्यांशानां वर्षसंकलनेन 1085067 योगो भवति, एष एव रामायणस्य रचना समयः, तत्पश्चात् 10 लक्ष्य वर्षाणिपूर्वं नाट्यशास्त्रस्य रचना कालो वर्तते[3]। भरतेन स्वयमेव नाट्यशास्त्रे कथितमस्ति यत् लवकुशयोरिव योऽस्मिन्नाट्यशास्त्रे निपुणो भवति स कुशीलवइत्युच्यते[4]।

भरतेन शतपुत्राणां....अथवा पुत्रकल्पानां शिष्याणां नाट्यशास्त्रस्य अध्यापन कारितमासीदिति नाट्यशास्त्रादेव प्रतीयते[5]।

---

1. सस्मार चतुरो वेदान्योगमास्थाय तत्त्ववित्।
(नेमे वेदाः यतः श्राव्याः स्त्रीशूद्राद्यासु जातिषु)
वेदमन्यत्ततः स्रख्ये सर्वश्राव्यन्तु पंचमम्।। ना०शा० 1-13.
2. मुनिना भरतेन यः प्रयोगो भवतीष्वष्ट रसाश्रयः प्रयुक्तः।
ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टु मनाःस लोकयालः।। विक्रमोर्वशीय 2-18.
3. ना०शा० अभिनव भा० भूमिका पृ० 12.
4. तत्रैव, 35-84.
5. शाण्डिल्यं चैव वात्स्यं च कोहलं दत्तिलं यथा।
जटिलाम्बष्टकौ चैव तण्डुमग्नि शिखं तथा।। तत्रैव ना०शा० 1-26.

शत्शिष्येषु कोहलस्य नाम नाट्यशास्त्रे–बहुधा लभ्यते। अस्मात् प्रतीयते यत् कोहलः अस्य योग्यः प्रियपुत्रः अथवा प्रियशिष्यआसीत्। वात्स्यशाण्डिल्य-दत्तिलादीनां नामान्यपि नाट्यशास्त्रे पृथक् रूपेण सन्ति[1]।

नाट्यशास्त्रस्य प्रचारप्रसारविकासकर्तारो निश्चयमेव कोहलादय एवासन्[2]।

शिंगभूपालेनाऽपि भरतशाडिल्यदन्तिलमतंगकोहलाणां च नामानि प्रमुख नाट्यकर्तृषु लिखितानि[3]।

यद्यपि कोहलादीनां ग्रन्था अद्य न समुपलभ्यन्ते तथाप्येते भरतमुनेरनन्तरं नाट्यशास्त्रस्य सिद्धान्तानां विकासे अनन्यतमा एवासन्।

''उपमायाः सप्तदोषाः (आचार्यो मेधावी रूद्रो वा)''

तृतीयचतुर्थशतकयोरन्तराले भरतादनन्तरं साहित्यशास्त्रस्येतिहासे मेधावीरूद्रस्य अथवा मेधावी–इत्याख्याचार्यस्य नाम भामहकृतकाव्यालङ्कारे तथा राजशेखरकृतकाव्यमीमांसायां समुपलभ्यते।

भामहकृत''काव्यालङ्कारात् प्रतीयते यत्-मेधावी अलङ्कारशास्त्रस्य प्रणेता आसीत्। भामहेन मेधाविनोक्त सप्त उपमादोषाः कथिताः, तथा च स्वसम्मत्याऽपि एते दोषाः स्वीकृताः[4]।

राजशेखेरेणापि मेधाविरुद्रकुमारदासादयो जात्यन्धाः कवयः श्रूयन्ते इत्युक्तम्[5]। राजशेखराऽनुसारेणाऽयं[6] कविप्रवरः जन्मान्ध आसीत्। अस्य नाम रूद्र आसीत्। मेधावी–अस्य विशेषणमासीत्, मेधावी विशेषणे कारणमेतत्

---

1. कोहलादिभिरेतैर्वा वात्स्यशाण्डिल्यदन्तिलैः।
मर्त्यधर्मतयायुक्तैःकन्चिच्कालमवस्थितैः।। तत्रैव 36-71.
2. एवमुर्वीतले नाट्यं शिष्यैः समवतारितम्। भरतानां च वंशोऽयं भविष्ये च प्रवर्तितः। कोहलादिभि रेवन्तु वत्सशाण्डिल्यधूर्तितैः। मर्त्यधर्मक्रियायुक्तैःकञ्चित्कारमवस्थितैः। तत्रैव 36-23-24.
3. रसार्णवसुधाकर, प्रथम विलास, श्लोक 50-52.
4. हीनतो सम्भवो लिंगवचोभेदो विपर्ययः।
उपमानाधिक्त्वं च तेनासदृशतापि च।।
त एत उपमादोषाः सप्त मेधाविनोदिताः।
सोदाहरण लक्ष्माणो वर्ण्यन्तेऽत्र च ते पृथक्।। भा०का० 2-39-40.
5. का०मी०अ० 4, पृ० 27.
6. तत्रैव, परिशिष्ट 1, पृ० 287.

यत्-रूद्रः जन्मान्धआसीदतस्तस्य मेधा प्रखरा आसीत्, मेधया एव स चाक्षुषं कार्यं करोति स्म। अतो मेधावीशब्दः रूद्रस्य कृते–प्रचलितोऽभूत्। अस्य एकापि कृतिर्न लभ्यते। रूद्रटेन काव्यालङ्कारे उपामालंकारस्य दोषवर्णनप्रसंगे मेधाविनो अलंकारिकस्य मतं एवं प्रदर्शितम्, अत्र च स्वरूपोपादाने सत्यपि चत्वार इति ग्रहणाद्यन्मेधाविप्रभृतिभिरूक्तं[1]। अस्मादस्य अस्तित्वमवश्यमेवासीदिति वक्तुं शक्यते।

''अष्टत्रिंशदलङ्काराः, त्रयोगुणाः''

भामहः–भरतादनन्तरमुपलब्धकृतीषु भामहस्य काव्यालंकार एव दृष्टिपथमवतरति। अस्य स्थितिकालः षष्ठशतकस्य मध्यभागः। श्रीभरतादनन्तरम् एतावति सुदीर्घे काले साहित्यशास्त्रस्य स्वतन्त्ररूपेण प्रतिष्ठापकोऽपरः–न कश्चिदवलोक्यते। भरतेन तु नाट्यशास्त्रे विविधविषयाणां निरूपणं कृतं विद्यते। परं भामहेन साहित्यशास्त्रस्य स्वतन्त्ररूपेण प्रतिष्ठापनं कृतम्। अतस्तेन सर्वप्रथमं काव्यस्वरूपं प्रादर्शि यथा–काव्यलक्षणम्, काव्यप्रयोजनम् काव्यस्य सामान्यस्वरूपं तद्भेदाश्च एवं च वैदर्भ गौडमार्गयोर्भेदः काव्यदोषाः काव्यदोषपरिहारश्च प्रभृतयो विविधा विषयाः।

भरतमुनेरनन्तरं भामहेन सर्वप्रथमं अष्टत्रिंशदलंकाराः स्वीकृताः। भामहः अलंकारवादी आसीत्। भामहेन शब्दालंकारवादिनां अर्थालंकारवादिनां च मतं प्रदर्श्य स्वमते उभयोः स्वीकृतिः प्रदत्ता[2]। अस्मात्प्रतीयते यन्भामहात् पूर्वमपि साहित्यशास्त्रस्य प्रणेतार आसन्, यैः शब्दालंकार अर्थालंकार धारा स्वीकृतासीत्। भामहेन स्वयमपि काव्यालंकारे केचित्[3] अन्यैः[4], अपरे[5], सुधीभिः[6]–इत्यादि शब्दैरन्येषां मतानि स्वीकृतानि।

---

1. भा०का० 11-24.
2. रूपकादिरलंकार स्तथान्यैर्बहुधोदितः।
   न कान्तमपि निर्भूषं विभाति वनिताननम्।।
   रूपकादिमलंकारं वाह्यमाचक्षते परे।
   सुपां तिङांच व्युत्पत्तिं वाचां वांछन्त्यलंकृतिम्।।
   तदेतदाहुःसौशब्द्यं नार्थव्युत्पत्ति रीदृशी।
   शब्दाभिधेयालंकार भेदादिष्टं द्वयं तु नः।। भा०का० 1-13-15.
3. तत्रैव, 2-2-37.
4. तत्रैव, 1-24.
5. तत्रैव, 1-8-53. 3/4. 5/69.
6. तत्रैव, 1-31.

काव्यस्वरूपनिरूपणानन्तरं माधुर्योजप्रसादगुणानां लक्षणानि निरूपितानि। भरतेन नाट्यशास्त्रे दशगुणाः स्वीकृताः, किन्तु भरतादनन्तरं सर्वप्रथमंभामहेनैव त्रयोगुणाः स्वीकृताः। तदनन्तरमन्येषांमते पञ्च अलंकाराः प्रदर्शिताः[1]। एषु अनुप्रासालंकारंविहाय अन्ये चत्वारो अलंकारा भरतोक्ता एव। एषां अलंकाराणां भेदाऽप्यत्र प्रदर्शिताः। तदनन्तरं मेधाविमताऽनुसारेण उपमालंकारस्य सप्तदोषा निरूपिताः[2]। तदनन्तरमाक्षेपाद्यलकाराणां लक्षणोदाहरणप्रतिपादनपूर्वकं सर्वेषामलंकाराणां मूले अतिशयोक्त्य[3]लंकारस्य अस्तित्वं भवतीत्यभिधाय वक्रोक्त्याः सम्यक् प्रकारणे समर्थनं कृतम्[4]। अस्मिन्नेव सन्दर्भे हेतुसूक्ष्म-लेखालंकारणां गणना अलंकारेषु न कृता[5]। काव्यालंकारे तृतीयपरिच्छेदे यद्यप्यलंकाराणां लक्षणोदाहरणानि प्रदर्शितानि सन्ति।

परमलंकारस्य सामान्यलक्षणं भामहेन क्वचिदपि न कृतम्। इदं वैचित्र्यं यद्श्रृंगारादिरसानां गणना अलंकारेषु कृतास्ति[6]। भामहात्पूर्वं भरतेन तथा तत्पश्चाद्वर्तिभिः कैश्चिदपि श्रृंगारादीनां गणना अलंकारेषु न कृता। काव्यगतानाम् सर्वप्रथममनेनैव अष्टादशदोषाणां[7] चयनं कृतम्। इतः पूर्वं श्री भरतेन केवलं दशैव दोषाः परिगणिताः। पूर्वं केषांचन मतेऽष्टादश दोषा इति निरूप्य स्वमतेन दोषाणां संख्या लक्षणं च एकोनसप्ततिरिति वर्णितम्[8]।

षष्ठपरिच्छेदे, व्याकरणज्ञानस्याऽनिवार्यतां प्रदर्शयन् शब्दस्वरूपविषये बौद्धमतप्रदर्शनपूर्वकं, अपोहवादस्यखण्डनं तथा दुर्बोधअपेशलग्राम्यनिरर्थक-शब्दानां प्रयोगस्य हेयता निरूपिता। भामहेन काव्ये दोषाणां सम्यक् प्रकारेण-परिहारः कृतः[9] दोषाणां वर्णनं वारचतुष्टयं विहितम्। प्रथमरिच्छेदे दश-

---

1. अनुप्रासः सयमको रूपकं दीपकोपमे।
   इतिवाचामलंकाराः पञ्चैवान्यैरूदाहृताः।। भामह का०लं० 2-4.
2. हीनताऽसम्भवोलिङ्गवचोभेदो विपर्ययः।
   उपमानाधिकत्वं च तेनासदृशतापिच।
   त एव उपमा दोषाः सप्तमेधाविनोदिताः।। तत्रैव, 2-39-40.
3. सर्वेवातिशयोक्तिस्तु तर्कयेतां यथागमम्। तत्रैव, 2-84.
4. सैषासर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
   यत्नोऽस्यां कविना कार्यः कोऽलंकारोनयाविना।। तत्रैव 2-85.
5. हेतुश्च सूक्ष्मो लेशोऽथनालंकारतया मतः। तत्रैव 2-86.
6. रसवद्दर्शितस्पष्टश्रृंगारादि रसं यथा। भा०का०लं० 3-6.
7. तत्रैव, 4-1-51.
8. तत्रैव, 5-1-69.
9. सर्वथा पदमप्येकं न निगाद्यमवप्रवत्।
   विलक्ष्मणाहिकाव्येन दुःसुतनैव निन्द्यते।। तत्रैव, 1-11.

दोषाणां, द्वितीयपरिच्छेदे मेधाविनोक्त सप्तदोषाणां चतुर्थपरिच्छेदे पञ्चदश दोषाणां पञ्चमपरिच्छेदे दोषत्रयाणां निरूपणमस्ति। काव्यालंकारंविहाय नान्या अस्य रचना अद्यपर्यन्तं समुपलब्धा, काश्मीरनरेशस्य जयादित्य सभायाः सभापतिना उद्‌भटेन—भामह विवरणात्मको ग्रन्थो रचित आसीत् परं सोऽद्य नैव प्राप्यते। रक्रिलगोभिन्सूनुना भामहेन मंगलाचरणमध्ये सर्वज्ञशब्दस्य प्रयोगः कृतः (सर्वं जानातीति सर्वज्ञः) अमरकोषे बुद्धनामसु वुद्धस्य सर्वज्ञेति[1] नाम वर्तते तथा च शिव नामसु शिवस्य सर्वज्ञनाम वर्तते[2]।

परं सर्वज्ञशब्देनास्य बौद्धत्वं नैव सिद्धति। भामहः—बौद्धाचार्यदिङ्नागमताऽनुसारेण पंचमपरिच्छेदे प्रत्यक्षलक्षणमकरोत्[3]। पंचमपरिच्छेदे शब्द-स्वरूपकथने बौद्धमतस्योल्लेखः[4] अन्य इतिशब्देन कृतः। यदि भामह बौद्ध-आसीत्तदा बौद्धमतेनसह अस्यसम्मतिरवश्यमेव भवितव्यासीत्। प्रत्युत भामहेन बौद्धमतस्य खण्डनं कृतम्। भामहस्य स्थितिकालविषये पर्याप्तो मतभेदो दरीदृश्यते केषांचनमते षष्टशताब्दी केषांचन मते च पंचमशताब्दी वर्तते। आचार्य पी०वी०काणे मताऽनुसारेण विविधैः प्रमाणैः भामहः दण्डिनोत्तरवर्ती आसीदिति तस्यग्रन्थेन संलक्ष्यते[5]। आचार्य वलदेवोपाध्यायमताऽनुसारेण भामह दिङ्नागसमकालीनः अथवा किंचिदनन्तरं 400 ई० समये बभूव[6]। वहुषु ग्रन्थेषु दण्डिनः पूर्वं आचार्यभामहस्य नाम दृश्यते अतएव दण्डिनः पूर्वं भामहस्य परिचयो लिखितः। रसस्यविषये यद्यप्यनेन स्वातन्त्र्यरूपेण न किमप्यभिहितम् तथापि—युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् इत्युक्त्वा महाकाव्यार्थे रसस्यास्तित्वं स्फुटरूपेण स्वीकृतम्[7]। अस्मात् प्रतीयते यत् आचार्यभामहः स्वातन्त्र्यरूपेण न किमपि प्रतिपादितवान् तथाप्यस्य काव्यालंकारात् स्पष्टरूपेणप्रतीयते यत् स्फुटरूपेणाऽयं रसस्यास्तित्वं स्वीकृतवान्।

---

1. सर्वज्ञः सुगतो बुद्धोधर्मराजस्तथागतः। अमरकोषः 1-13.
2. कृशानुरेतः सर्वज्ञो धूर्जटिर्नीललोहितः। तत्रैव 1-33.
3. प्रत्यक्षं कल्पनापोढं सतोऽतार्थादितिकेचन।
   कल्पनां नाम जात्यादि योजनां प्रति जानते।। भा०का०, लं० 5-6.
4. अन्यापोहेन शब्दोऽर्थमाहेत्यन्ये प्रच्क्षते।
   अन्यापोहश्च नामान्यपदार्थापाकृतिः किल।। तत्रैव 6-16.
5. सं का०शा०इति० पृ० 110, सः 160 पर्यन्तम्।
6. संस्कृत शा०इति० तृतीय परि० पृ० 184.
7. भा०का०लं० 1-21.

वैदर्भमार्गस्य प्राणा दशगुणाः (दण्डी)—

भामहादनन्तरमनेके कवयः स्वकृतिभिः संस्कृतसाहित्यंव्यरचयन् किन्तु साहित्यशास्त्रसिद्धान्तदृष्ट्या महाकविर्दण्डी एव काव्यादर्श नामकं ग्रन्थमुपास्थापयत्। दण्डी ईसवीयस्य सप्तमशतकस्योत्तरार्द्धे अष्टमस्याथवादौ जनिमलभत[1]। अनेन काव्यादर्शे काव्यस्य आदर्शसिद्धान्तप्रदर्शयितुकामेन कानिचत् स्वीयोद्भावितानि नवीनानि तथ्यानि उद्घाटितानि।

काव्यादर्शस्य प्रथमपरिच्छेदे, काव्यमाहात्म्यम्, दोषनिन्दाप्रतिपादनम् तथा काव्यशरीरविवेचनम्, काव्यभेदाः, आख्यायिकाकथारूपेण गद्यकाव्यस्य द्वौभेदौ, एवं च वैदर्भगौडीयमार्गयोः लक्षणोदाहरणप्रतिपादनपुरस्सरंभरताऽनुसारेण श्लेष प्रभृतीनां दश गुणानां लक्षणोदाहरणानि, मार्गनिरूपणोपसंहारः, काव्यसम्पत्कारणं च कविना प्रतिपादितमस्ति।

द्वितीयपरिच्छेदे अलंकारस्वरूपं, अलंकाराणां समुद्देशः, तथा स्वभावोक्ति अलंकारादारभ्य भविकालंकारपर्यन्तं 35 अलंकाराणां निरूपणं विद्यते।

तृतीय परिच्छेदे—यमकालंकारस्य लक्षणम, यमकस्य चतुर्दशभेदाः, गोमूत्रिकाबन्धः, अर्धभ्रमसर्वतोभद्रस्वरस्थानवर्णनियमाः, प्रहेलिकायाः षोडशभेदाः, तथा दशविधकाव्यदोषाणां लक्षणोदाहरणानि सन्ति। भामहेनकाव्यालंकारे (2/86) हेतुसूक्ष्मलेषालंकाराणां गणना अलंकारेषु नैव कृता परं दण्डिना भामहात्पूर्णतयाविपरीतमेषां अलंकाराणां—अलंकारत्वं स्वीकृतम्[2] यदेष्वलंकारेषु अलंकार सामर्थ्यं विद्यते एभिर्वाचि चमत्कारोदेति। भामहेन मेधाविनोक्तोपमायाः सप्तदोषाः स्वीकृताः, किन्तु दण्डिना एषु चत्वार एव किंचित्मात्रेण स्वीकृताः नतुपूर्णरूपेण। यथा भामहेन दोषाणां पूर्णरूपेण हेयता स्वीकृता, दण्डिनाऽपि दोषाणां हेयता स्वीकृता[3]। यथा रूपयौवनसम्पन्नं सुवासादिभिरलङ्कृतं शरीरं एकेनैव श्वेतकुष्ठेन गर्हितं (दुष्टं) भवति तथैव काव्यरसास्वादप्रतिबन्धकच्युतसंस्कृत्यादिदोषसहितस्य काव्यत्वं न भवति। दण्डिना यद्यपि "अस्त्यनेकोगिरांमार्गः" इत्युक्त्वा रीतेः स्थाने

---

1. संस्कृत काव्यशास्त्रस्येतिहासः (पी०वी० काणे) पृ० 162.
   (क) काव्यप्रकाशस्य भूमिका आ० विश्वेश्वर पृ० 36.
   (ख) काव्यादर्श भूमिका पृ० 20.
2. हेतुश्च सूक्ष्मलेशोथ वाचामुत्तमभूषणम्।
   कारकज्ञपिकौ हेतू तौचानेकविधौ यथा।। काव्यादर्श 2-235.
3. तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन।
   स्याद्वपुः सुन्दरमपि श्वित्रणैकेन दुर्भगम्।। काव्यादर्शे 1-7.

मार्गाणां वैविध्यं प्रदर्शितं तथापि वैदर्भगौड़मार्गयोरेव स्वकीया सम्मतिः प्रदत्ता, भरतमताऽनुसारेणैव संख्यायां, नाम्नि च, काव्ये समानरूपेण दशगुणाः स्वीकृताः, यद्यपि दण्डिमते गुणभेदगणनायां पौर्वापर्यं विद्यते परं भरतादनन्तरं सर्वप्रथमं स्वातन्त्र्येण दशगुणा दण्डिनैव स्वीकृताः। पूर्वेभ्योआलंकारिकेभ्योऽलंकाराणां अधिकाधिकभेदाः दण्डिना एव निरूपिताः।

भामहेन् अलंकारस्य सामान्यलक्षणं नैवकृतमस्ति परं दण्डिना-अलंकारसामान्यलक्षणाऽभिधाने स्व प्राथमिकत्वंद्योतितम्। दण्डिना भरतोक्तोपमायाश्चतुर्षुभेदेषु निन्दोपमाप्रशंसोपमा च इमौ द्वौभेदौ स्वीकृतौ। सादृश्युपमास्थाने समानोपमा स्वीकृतास्ति। अनेन प्रकारेण भरतोक्तोपमा-यास्त्रयोभेदा दडयभिमताः।

दण्डिना रसस्यास्तित्वमपि स्वीकृतं विद्यते[1]।

रीतेरात्मत्वम् गुणदोषयोःशब्दार्थे च विभक्तिः (वामनः)—

साहित्यशास्त्रस्य क्रमिकविकासे रीतिसम्प्रदायोस्याथवा गुणसम्प्रदायस्य प्रवर्तकः साहित्यशास्त्रतत्वज्ञः काव्यालंकारसूत्रग्रन्थस्य कर्ता, उद्भटसम-कालिकः काश्मीरनरेशस्य जयापीडस्य शासनकाले अष्टशतकस्यान्तिमेभागे वामनो मन्त्रिपदमलकुर्वाण आसीत्[2]।

वामनविरचितकाव्यालंकारसूत्रे साहित्यशास्त्रस्य सम्पूर्णसिद्धान्तानां निरूपणंसूत्रेषु कृतमस्ति। सूत्राणांवृत्तिभागोऽपि वामनकृदेव विद्यते[3]। साहित्य–शास्त्रे सूत्रेषु साहित्यसिद्धान्तप्रतिपादने प्रथमोऽयं ग्रन्थः साहित्यजगति विराजते। अस्यग्रन्थस्य पंचअधिकरणानि, अधिकरणान्तर्गत द्वादश अध्यायाः सन्ति। साहित्यशास्त्रस्य भरतभामहदण्डिप्रभृतिभ्यः पूर्ववर्त्याचार्येभ्यो वामनेन साहित्यशास्त्रं शब्दार्थयोर्विभागे विभज्य यदुपकारः कृतःतन्नकेनाप्याचार्येण कृतः।

यद्यपि साहित्यशास्त्रस्य आचार्यवामनात् चिरन्तनैराचार्यैर्वैदर्भीगोड्यो-र्निरूपणं कृतमासीत् एवं च दण्डिनाऽपि वैदर्भमार्गस्य प्राणभूता दशगुणाः कथिताः[4]। परं वामनेन एका अधिका पांचालरीतिर्निरूपिता तथा च

---

1. तत्रैव 1-18-51.
2. मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा।
   बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः।। राज०तरं० 4-497.
3. प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया।
   काव्यालंकारसूत्राणां स्वेषा वृत्तिर्विधीयते।। का०लं०सू० 1-1.
4. इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः। का०द० 1-42.

"रीतिरात्मा काव्यस्य[1]" इत्युक्त्वा रीतेर्महत्वं प्रदर्शितम्–का पुनरियं रीतिः इति जिज्ञासायां "विशिष्टापदरचनारीतिः[2]" अर्थात् विशेषतापूर्णपदानां रचना रीतिरित्युच्चे, कोऽसौ विशेषः इति कथयितुं "विशेषो गुणात्मा"[3] अर्थात् काव्ये विशेषरूपा गुणाः भवन्तीत्यभिहितम्। सर्वप्रथमं काव्यस्यात्मा रीति- र्वर्तते एतत् कथनं वामनस्यैव।

पूर्ववर्तिभिरलंकारिकैः गुणालंकारौ द्वावेव काव्यशोभोत्पादकौ स्वीकृतौ। परं वामनेन गुणालंकारयोः परस्परं विभेदः स्वीकृतः[4]।

काव्यंग्राह्यमलंकारादित्युक्त्वा[5] वामनेन काव्येऽलंकाराणां सत्तापि स्वीकृता परं कोऽयमलंकार इति जिज्ञासायां "सौन्दर्यमलंकारः[6]" इत्यभिधाय कव्यरचनायां यैस्तत्वैः सौन्दर्यमागच्छति, तेऽलंकाराः। अलंकृतिलंकारः करणव्युत्पत्या पुनरलंकारशब्दोऽयं उपमादिषु वर्तते इति वामनस्याऽभिप्रायः स सौन्दर्यरूपोऽलंकारः, दोषाणांपरित्यागेन गुणालंकारोपादानेन भवति[7]।

वामनेन काव्ये गुणानां नित्यत्वं, अलंकाराणांचानित्यत्वं स्वीकृत्य गुणानां महत्वं प्रकटितम्[8]। (एतद् विशदं पुरस्ताद् विवेचयिष्यते) चिरन्तनैराचार्यैः काव्यत्वविघटकाः दशदोषाएवाङ्गीकृताः। परं दोषाणां शब्दार्थरूपेण वर्गीकरणं वामनात् प्राक् न केनाप्याचार्येण विहितम्। वामनेन दोषाणां चतुर्धा वर्गीकरणं कृतम्। (1) पददोषाः[9],(2) पदार्थदोषाः[10], (3) वाक्यदोषाः[11], (4) वाक्यार्थदोषाश्च[12] एषां क्रमेण पञ्च, पंच, त्रयः, सप्त, संख्या निरूपिता।

---

1. का०लं०सू० 2-6.
2. तत्रैव, 2-7.
3. तत्रैव, 2-8.
4. काव्यशोभायाः कर्तारोधर्मा गुणाः।
   तदतिशय हेतवस्त्वलङ्काराः।। का०ल०सू० तृतीय अधि० प्रथम आ० 1/2.
5. का०लं०सू० वा० 1 सूत्र।
6. तत्रैव, 1-2.
7. स दोष गुणालंकारहानादानाभ्याम्।। तत्रैव 1-3.
8. पूर्वे नित्याः 1-3.
9. दुष्टं पदमसाधु कष्टं ग्राम्यमप्रतीतमनर्थकं च। का०लं०सू० 1-4.
10. अन्यार्थनेयगूढार्थश्लील क्लिष्टानि च। तत्रैव 2-1-10.
11. भिन्नवृत्तयतिभ्रष्ठविसंधीनि वाक्यानि। तत्रैव 2-2-1.
12. व्यर्थैकार्थसन्दिग्धाप्रयुक्तापक्रमलोकविद्या विरुद्धानिच। तत्रैव 2-2-9.

वामनात्प्राक् दशगुणा एव क्रोड़ीकृता आसन्। सूत्रकारो वामनः स्वप्रतिभावैच्त्रियेण दशशब्दगुणान् दश अर्थगुणान् च स्वीचकार। भामहनिरूपितेष्वलंकारेषु उपमारूपकउत्प्रेक्षारूपक्योर्द्वयोरलंकारयोर्निरूपणं न व्यधायि प्रत्युत संसृष्ट्यलंकारे अनयोरन्तर्भावः कृतः[1]। भामहः शृंगारादि रसानांस्थितिं रसवदाद्यलंकारेषु दर्शयामास दण्डिनाऽपि रसा अलंकारेष्वन्तर्निहिताः परं अष्टरसानां उदाहरणानि स्फुटतया प्रदत्तानि[2]। वामनेन शृंगारादि रसानां कान्तिनामकार्थगुणे अन्तर्भावोऽकारि[3]। अलंकाराणां शब्दार्थद्वारावर्गीकरणस्यश्रेयो वामनं प्रतिगच्छति। यद्यपि उद्भटेनाऽपि अलंकाराणां शब्दार्थयोर्वर्गद्वये विभाजनं कृतमस्ति। परं द्वयोर्मध्ये न केनाऽपि स्वग्रन्थे अन्यस्य मतं प्रदर्शितम्। पूर्ववर्तिभ्यो वामनेन अलंकाराणां निरूपणमतिसमासेन कृतम्। यमकाऽनुप्रासौ द्वावेव शब्दालंकारौ निरूपितौ। ये उपमालंकारदोष मेधाविनोक्त भामहेननिरूपितास्तेभ्यो, हीनत्वाधिकत्वलिङ्गवचनभेदासादृश्याऽसम्भवास्तद्दोषा इत्युक्त्वा अष्टदोषेषु षड्दोषाः निरूपिताः[4]। अर्थालंकाराणां निरूपणंकुर्वता वामेनन सर्वे अलंकारा उपमा सापेक्षत्वात् उपमाया एव प्रपञ्चास्सन्तीति साधितम्[5]। सादृश्यलक्षणान्तर्गत वक्रोक्त्यलंकारस्य निरूपणं तथा अर्थालंकारेश्वस्य परिगणनं सर्वप्रथमं वामननैव कृतम्[6]।

पूर्ववर्तिभ्यः केषांचन नूतनालंकारणामाविर्भावः (उद्भटः) -

साहित्यशास्त्रस्य क्रमिकविकासक्षेत्रे उद्भटोप्यपूर्वोऽलंकारिकः समभूत्। अयमुद्भटः कश्मीरदेशे नृपति जयापीडस्य शासन काले विक्रमी सं० 836 तः 870 पर्यन्तं नृपसदसि सभापतिपदमलंचकार[7]। कल्हणकृतराजतरङ्गिन्यां उद्भटस्य नाम वर्तते आधारभूतेनानेनपद्येन उद्भटस्य समयः विक्रमी सं०

---

1. तद्भेदावुपमरूपकोत्प्रेक्षा वयवौ। का०लं०सू० 4 अधि० तृतीय अ० 31.
2. का०द०पृ० 248 तः 254 प्रर्यन्तम्।
3. दीप्तरसत्वंकान्तिः। दीप्तारसाः शृंगारादयो यस्य सदीप्तरसः तस्यभावो दीप्त रसत्वं कान्तिः। का०लं०सू० तृतीय अधि० द्वितीय 15.
4. का०लं०सू० 4-2-8.
5. प्रति वस्तुप्रभृतिरूपमाप्रपंचः। तत्रैव 4-3-1.
6. सादृश्याल्लक्षणा वक्रोक्तिः। का०लं०सू० 4-3-8.
7. सं०शा०इति० तृतीय परि पृ० 189 आ० वलदेव उपा०।

836 तः 870 पर्यन्तं स्वीक्रियते[1]। उद्भटेन ग्रन्थत्रयं व्यरचि। (1) भामहविवरणम्, (2) कुमारसम्भवकाव्यम्, (3) काव्यालंकारसारसंग्रहः। परं त्रिषु ग्रन्थेषु उद्भटस्य "काव्यालंकारसारसंग्रह" एवाऽधुनाउपलब्धोऽस्ति। अस्मिन्ग्रन्थे षड्वर्गेषु नवसप्ततिः कारिकाभिरेकचत्वारिंशदलंकारणां निरूपणं विद्यते।

चिरन्तनाऽचार्येषु केवलमलंकारविषयमधिकृत्य काव्यालंकारसारसंग्रहे–उद्भटस्य प्रथमः प्रयासः। काव्यालंकारसारसंग्रहशब्दात् प्रतीयते यदस्मिन् ग्रन्थे–उद्भटेन स्वपूर्ववर्तिकाव्यालंकार सम्बन्धि ग्रन्थेभ्योऽलंकाराणां संग्रहं विधाय अलंकारा नियोजिताः एतावदेवोद्भटस्यवैशिष्टयं नैव अपितु मौलिक रूपेण केषांचिदलंकाराणां निरूपणं कृतम्। एवंच येषामलंकाराणां चिरन्तनैराचार्यैः स्फुटरूपेण निरूपणं न कृतमासीत् तेषामलंकाराणां स्फुटरूपेण परिमार्जनं विधाय निरूपणं विहितम्। यथा–

1. पूर्ववर्तिभ्यः पंचाऽलंकाराणां मौलिकं निरूपणम्[2]।
2. भामहोक्तत्रयाणांमलंकाराणां, रूपकोत्प्रेक्षावयवोपमारूपकाणां उद्भटेन निरूपणं न कृतम्।
3. रसवदाद्यलंकाराणां निरूपणे भामहोद्भटयोः साम्यं प्रतिभाति[3]। परं स्फुटरूपेण रसवदाद्यलंकाराणां स्वरूपनिधार्रणस्य श्रेयःउद्भटस्यैवेति वक्तुं शक्यते।
4. भामहेन श्लेषालंकारस्य त्रयोभेदाः स्वीकृताः[4]। दण्डिना श्लेषस्य नवभेदा निरूपिताः[5]। परमुद्भटेन श्लेषालंकारस्य (शब्दश्लेष, अर्थश्लेष) नामानौ द्वौभेदौ स्वीकृतौ, एवंच श्लेषालंकारस्य अन्यालंकारणामपेक्षया प्राधानतास्वीकृता तथाचास्य गणना अर्थालंकारेषुविहिता[6]।

---

1. विद्वान्दीनार लक्षेण प्रत्यहं कृतवेतनः। भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः राज० तरं० 4-495.
2. पुनरूक्तवदाभासः 1-1, काव्यलिंगः 6-81, 84, छेकाऽनुप्रासः 1-3 दृष्टान्तः 6-84, 85, संकरः 5-67 तः 71 पर्यन्तम् का०लं०सां०सं०।
3. भामह काव्या० लं० 3-1 तः 3-14 पर्यन्तम्। का०लं०सा०सं० 1/3 तः 4/10 पर्यन्तम्।
4. भा०का०लं० 3è14 तः 20 श्लो० पर्यन्तम्।
5. का०द० 2è310 तः 322 पर्यन्तम्।
6. एकप्रयत्नोच्चार्याणां तच्छायां चैव विभ्रताम्।
स्वरितादि गणैर्भिन्नैर्बन्धः श्लिष्टमिहोच्यते।।
अलंकारान्तरगतां प्रतिभां जनयत्पदैः।
द्विविधैरर्थशब्दोक्तिविशिष्टं तत्प्रतीयताम्।। का०लं०सां० 4/9-10.

 BVRSSMV

5. भामहविवरणनामग्रन्थादुद्धृतेन मम्मटस्य काव्यप्रकाशाऽनुसारेण उद्‌भटेन गुणालंकारयोरभेदः प्रदर्शितः[1]।
6. रसवदाद्यलंकारेष्वेव शृंगारादयो नवरसाः सन्निवेशिताः[2]।
7. हेतुसूक्ष्मश्लेषालंकाराणां निरूपणं उद्‌भटेनापि न विहितम्।
8. प्रतिहारेन्दुराजमते भामहो हि ग्राम्योपनागरिकावृत्तिभेदेन द्विप्रकारक मेवानुप्रासं व्याख्यातवान्। तथारूपकस्य चत्वारोभेदा वक्ष्यन्ते तन्मध्या-दाद्यमेव द्वितीयं व्याजहार[3]। भामहेन ग्राम्योपनागरिकावृत्तिभेदेन अनुप्रासालंकारस्य द्वैविध्यं स्वीकृतम्[4]।

परं उद्‌भटेन परूषा, उपनागरिका, ग्राम्यावृत्ति भेदेन अनुप्रासस्य त्रयो भेदा निरूपिताः[5]। एवंच भामहेन रूपकस्यद्वौभेदौ निरूपितौ[6] उद्‌भटेन तु चत्वारो भेदा अंगीकृताः[7]। प्रतिहारेन्दुराजेन भामहमते ग्राम्योपनागरिकावृत्ति-भेदेन अनुप्रासस्य द्वैविध्यं निर्दिष्टम्। परं वृत्तीनां लक्षणानि नैवकृतानि। भामहेन ग्राम्याऽनुप्रासः स्वीकृतः।

रुद्रटः

काव्यालंकारेषु रुद्रटकृत काव्यालंकारस्य अलंकारसम्प्रदाये पूर्ववर्ति आचार्येभ्योऽलंकारदृष्ट्या विशिष्टं महत्वं विद्यते। कश्मीरदेशवास्तव्योऽयं रूद्रटः नवमशताब्दया मध्यकाले काव्यालंकारं रचयामास। रूद्रटस्यापरं नाम शतानन्दोऽप्यासीत्[8]। अस्मिन् काव्यालंकारे साहित्यशास्त्रस्य प्रायः सर्वेषां तत्वानां निरूपणं वर्तते। परं रुद्रटस्याभिमतेऽत्रालंकाराणां प्राधान्यं प्रतीयते। रूद्रटस्य विशिष्टाः सिद्धान्ता एवं प्रकारेण वर्तन्ते–

---

1. काव्यप्रकाशे अष्टमोउल्लासः सू० 67 पृ० 381.
2. रसवद्दर्शितस्पष्ट शृंगारादि रसादयम्।
   स्वशब्दस्थायिसंचारि विभावाभिनयास्पदम्।
   शृंगारहास्य करूण रौद्र वीर भयानकाः।
   वीभत्सादभुतशान्ताश्च नवनाट्ये रसाः स्मृताः। का०लं०सा०सं० 4/3-4.
3. तत्रैव 1/1.
4. भा०का०लं० 2/6-7-8.
5. का०लं०सा०सं० 1-4, 5, 6.
6. भा०का०लं० 2-22, 23, 24.
7. का०लं०सा०सं० 1-11, 12, 13.
8. शत्तानन्दापराख्येन भट्टवामुक सूनुना।
   साधितं रूद्रटेनेदं साभाजाधीमतांहितम्।। रूद्रट का०लं०टी० 5/12-14.

716

1. रूद्रटेन काव्यालंकारे पंच शब्दालंकारा निरूपिताः[1]।

2. रूद्रटेन सर्वप्रथमं वक्रोक्त्यलंकारस्य शब्दालंकारेषु गणना कृता, तथा च श्लेषवक्रोक्तिकाकुवक्रोक्तिभेदेन द्वौभेदौ स्वीकृतौ[2]।

3. रूद्रटेनालंकाराणां प्रकारचतुष्टयेन वर्गीकरणं कृतमस्ति। यथा—वास्तव-मूलक—औपम्यमूलक—अतिशयमूलक—श्लेषमूलक-वर्गीकृतालंकाराणां संख्या क्रमेण 23, 21, 12, 1 वर्तते[3]।

4. काव्यालंकारे सप्तपञ्चाशदलंकाराणां निरूपणं वर्तते। एषु षड्विंशतिरलंकाराः पूर्ववर्तिभिराचार्यैरपि निरूपिता आसन्। सप्तविंशति अलंकाराणां निरूपणे रूद्रटस्यैव मौलिकयोगदानं सम्भाव्यते। यतोहि[4] एषामलंकाराणां निरूपणं इतः पूर्वं न कुत्रचिदपि दृष्टिपथमायाति। अर्थालंकारेषु चतुर्णामलंकाराणां द्विवारं निरूपणमस्ति, यथा—उत्प्रेक्षा औपम्यगतत्वेन अतिशयगतत्वेन तथा, विषमालंकारो वास्तवगतत्वेन अतिशयगत्वेन, एवंच उत्तरालंकारसमुच्चयालंकारयोर्वास्तवगतत्वेन औपम्यगतत्वेनाऽपि निरूपणं विहितम्[5]। एवं सर्वेषां शब्दार्थालंकाराणां संख्या द्विषष्टि वर्तते, अस्यां संख्यायां श्लेषभेदानां गणना नैव वरीवर्ति।

5. भरतमुनेरनतरं न केनाप्याचार्येण रसस्य वैशिष्टयं स्वीकृतम्। परं रूद्रटेन रसस्य विशेषमहत्वं स्वीकृत्य चिरन्तनैः स्वीकृतेभ्योऽलंकारेभ्य-एकोऽधिकः प्रेयान् रसोऽङ्गीकृतः। एवं प्रकरेण रूद्रटाऽभिमताः दश रसाः सन्ति[6]। पूर्ववर्त्याचार्यैरपि स्वस्वग्रन्थे रसस्य सत्ता स्वीकृता वर्तते[7]।

---

1. वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा परं चित्रम्।
   शब्दस्यालंकाराः श्लेषोऽर्थस्यापि सोन्यस्तु।। का०लं० 2/13.
2. तत्रैव 2/14-17.
3. अर्थस्यालंकारा वास्तवमौपम्यमतिशयः श्लेषः।
   एषामेवविशेषा अन्येतु भवन्ति निःशेषाः। का०लं० 7/9.
4. सं०सा०इ० द्वितीय भाग, सेठ कन्हैयालालपोद्दार पृ० 94.
5. रूद्रट क० लं० 7/11, 12, 8/2, 3, 9/2.
6. शृंगारवीर करूणा वीभत्स भयानकादभुता हास्यः।
   रौद्रः शान्तः प्रेयानिति मन्तव्यारसाः सर्वे।। का०लं० 12/3.
7. भामह० वा० लं० 1/21, दण्डी का० द० 1/18, 51, 60.

परं स्वतन्त्ररूपेण रसमहत्वनिरूपणे रूद्रट एव सर्वप्रथमो विद्यते। "वात्सल्यरसस्यस्थाने अस्मात् पूर्ववर्तिभिः प्रेयोऽलंकारः स्वीकृत आसीत्[1]। परमुद्भटस्य प्रेयोऽलंकारस्योदाहरणम् रूद्रटस्य प्रेयोरसोदाहरणेन" सह साम्यमावहति[2]। रूद्रटेन काव्ये रसस्य विशिष्टा सत्ता स्वीकृता यथा—ननु काव्ये न क्रियते सरसानामवगमश्चतुर्वर्गे। लघुमृदुच नीरसेभ्यस्तेहि त्रस्यन्ति शास्त्रेभ्यः। तस्मात् तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्। उद्वेजनमेतेषां शास्त्रवदेवान्यथाहिस्यात्[3]।

6. पूर्ववर्त्याचार्यैर्भरतभामहदण्डीवामनैः क्रमेण दश, त्रयः, दश, विंशतिर्गुणाः स्वीकृताः परं रूद्रटेन गुणानां निरूपणं न कृतम् वाक्यगुणप्रदर्शनाऽवसरे, दोषाणामभावे वाक्यरचना स्वीकृता[4]। रचनाचारूत्वे शब्दगुणः-स्वीकृतः[5]। रूद्रटात्पूर्वं वामनेन गुणाःशब्दार्थगुणरुपेण वर्गद्वये विभाजिताः। यद्यपि रूद्रटेन गुणानां निरूपणं न कृतम् तथापि—भरतमुनिप्रतिपादितगुणलक्षणमनुसृत्य "दोषविपर्यया गुणा" इत्युक्तिं मनसि निधाय गुण नामानि अगृहीत्वैव दोषाऽभावमात्रे वाक्ये शब्दार्थ-गुणयोरूभयोरपि सत्ता स्वीकृता। साहित्यशास्त्रस्य काव्यस्वरूपं, शब्दशक्तिः, गुणीभूतव्यंग्यः, ध्वनिः, रसः, गुणदोषालंकाराः नायक-नायिकाभेदाः, रीतिः एषु दशाङ्गेषु, रूद्रटेन शब्दशक्तिःगुणध्वनि-गुणीभूत व्यंयानां निरूपणं न कृतम्।

7. रूद्रटेन पदगताः[6], वाक्यगताः[7], अर्थगताः[8], गुणवैपरीत्येन वाक्यपदगत[9] दोषाः प्रतिपादिताः। सामान्यशब्दभेदाः, वैषम्यं, असम्भवः अप्रसिद्धिः

---

1. तत्रैव, 4/5, का०अ० 2/ 278, 79.
2. इयं सुतवात्सल्यान्निर्विशेषा स्पृहावती।
   उल्लापयितुमारब्धा कृत्वेयं क्रोड आत्मनः।। का०लं०सा०सं० 4/2.
3. रूद्रट का०लं० 12/1-2.
4. अन्यूनाधिक वाचक सुक्रमपुष्टार्थशब्दचारूपदम्।
   क्षोदक्षममक्षूणं सुमतिर्वाक्यं प्रयुंजीत।। का०लं० 2/8.
5. रचनाचारूत्वे खलु शब्दगुणः संनिवेशचारूत्वम्।
   तर्वाल्युर्वेवर्षे तरूपङ्क्ति रसंकटैव मुने।। तत्रैव, 2/10
6. का०लं० 6/1.
7. तत्रैव० 6/41.
8. तत्रैव० 11/1.
9. तत्रैव० 2/8.

एते उपमादोषा निरूपिताः अस्मिन् काव्यालंकारे रूद्रटेन पूर्ववर्तिभ्यः लाटीरीतेर्निरूपणं अधिकंकृतम्[1]। नायकनायिकानां विशेषभेदोपभेदनिरूपणमपि सर्वप्रथमं अनेनैवाकारि[2]।

आनन्दवर्धनः

संस्कृतसाहित्यशास्त्रस्येतिहासे ध्वनिसिद्धान्तप्रवर्तकस्य आनन्दवर्धनस्याऽसाधारणं स्थानं विद्यते। कश्मीरदेशवास्तव्यस्य आनन्दवर्धनाचार्यस्य समयो राजतरङ्गिण्याधारेण अवन्तिवर्मणश्शासनकाले (855-884) ई० समज्यायां सुधीषु प्रमुख–आसीत्। अतोऽस्यसमयः 855-884 ईस्वीयान्तराले निश्चीयते अनुसन्धित्सुभिः। अस्य ग्रन्थाः, ध्वन्यालोकः, अर्जुनचरितम्, विषमवाणलीला प्रभृतयः सन्ति। ध्वन्यालोकग्रन्थस्य निर्माणाधारेण आनन्दवर्धस्य साहित्यजगति ख्यातिर्जाता। अनेनाऽस्मिन् ध्वन्यालोके ध्वनिसिद्धान्तस्य प्रतिष्ठापनं कृतम्।

व्याकरणस्य स्फोटसिद्धान्ताऽनुसारेण आनन्दवर्धनः ध्वनिरितिनामकरणं कृतवान्[4]। यद्यपि ध्वन्यालोकस्य चतुर्षूद्योतेषु आनन्दवर्धनेन साहित्यस्य मूलतत्वानां आमूलचूलं निरूपणं विहितम्, परं वैशिष्ट्येन इदमेवावभासते यदस्मिन् ग्रन्थे पूर्वाचार्यैः प्रतिपादितानां रीत्यलंकारप्रभृतीनां साहित्यतत्वानां ध्वनावेवाऽन्तर्भावः कृतः।

ध्वनिविरोधिनाम् अभाववादिभक्तिवादिअलक्षणीयतावादीनाम्[5], इति त्रयाणां सिद्धान्तानां निराकरणं कृत्वा, काव्यास्यात्मा ध्वनि[6] इति सिद्धान्तस्य प्रतिपादनं कृतम्।

---

1. तत्रैव, 2/4.
2. तत्रैव, 12/7-15-16.
3. मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।
   प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः।। राज०तरं० 5/4.
4. प्रथमेहि विद्वांसो वैयाकरणा व्याकरणमूलत्वात् सर्वविद्यानाम्। तेच श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः काव्यतत्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यंजकत्वसाम्याद ध्वनिरित्युक्तः। ध्व०लो० 1/13 पृ० 53.
5. तत्रैव 1/1.
6. तत्रैव 1/2.

आनन्दवर्धनेन वाच्यार्थापेक्षया प्रतीयमानस्य वैचित्र्यं प्रतिपादितम्[1]। वाच्यार्थात् वस्त्वलंकाररसादिध्वनीनां भेदो व्याहृतः[2]। काव्यस्यात्मा प्रतीयमान रसरूपोऽर्थो वर्तते[3]। अलंकारादिषु ध्वनेरन्तर्भावो नैव र्भावतुमर्हति[4]। काव्यस्यात्माध्वनिरित्यभिधाय आनन्दवर्धनेन ध्वनेरात्मा रस एव भवतीत्यभिहितम्[5]। तथा च काव्ये रसस्य–वैशिष्टयम् प्रतिपादितम्। अतो रसवदाद्यलंकारेभ्यः ध्वनेर्विषयो भिद्यते। गुणालंकारयोर्भेदोवर्तते रसाश्रया गुणाः शब्दार्थयोराश्रिताअलंकारास्सन्ति[6]। भरतादनन्तरं भामहस्तथा भामहानन्तरं केवलमानन्दवर्धनस्त्रीन्गुणान् स्वीकृतवान्। अनेन दोषाणां नित्याऽनित्यत्व व्यवस्था स्वीकृता। तत्र च्युतसंस्कृतित्वादयो नित्यदोषाः श्रुतिदृष्टत्वादयोऽनित्यदोषाश्च सन्ति[7]।

रीतिस्थाने संघटनाशब्दस्य प्रयोग एवं च संघटना असमासा, मध्यमसमासा, दीर्घसमासेतिभेदेन त्रिधा निरूपिता[8]। पूर्वाचार्येषु प्रायः सर्वैरेव, रीतयः स्वीकृताः सन्ति। दण्डिना रीतिशब्दस्य स्थाने मार्गशब्दस्य प्रयोगः कृत इतितु पूर्वमपिप्रतिपादितम्, रीतिसम्प्रदायस्य व्यवस्थापको वामन एव।

आनन्दवर्धनेन रीतिस्थाने सङ्घटना शब्दस्य प्रयोगंकृत्वा वैदर्भी पांचाली, गौड़ीरीतिनां नामान्तरेण क्रमशोऽसमासा (वैदर्भी), (मध्यमसमासा) पांचाली गौडी (दीर्घसमासा) इति रूपेण स्वीकृतिः प्रदर्शिता[9]। गुणानांसंघटनायाश्च स्थितिमादाय आनन्दवर्धनेन त्रयः पक्षाः समुपस्थापिताः। गुणानांसंघटनायाश्चैक्यं व्यतिरेको वा? संघटनाश्रया गुणा अथवा गुणाश्रया संघटना इति पक्षत्रय समुपस्थापनपूर्वकं रसाश्रिता गुणा इति गुणानां वास्तविकाश्रयस्य स्थापनं कृतम्[10]।

---

1. ध्य०लो० 1/4.
2. तत्रैव ।1/3 पृ० 17-18.
3. तत्रैव, 1/5 उद्यो०।
4. तत्रैव 1 पृ० 38 तः 52 पर्यन्तम्।
5. ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः। तत्रैव 2/3.
6. तमर्थवलम्बन्तेइत्यादि–तत्रैव 2/6.
7. तत्रैव 2/7, 9, 10.
8. तत्रैव 2/11.
9. ध्य०लो० 3/5.
10. तत्रैव 3/6.

यद्यपिध्वनिसम्प्रदायस्यप्रवर्तकोऽयमानन्दवर्धनः तथाप्यनेन रचनायां रसस्य सत्तामुख्यरूपेण स्वीकृता[1]। रसानांपरस्परंविरोधिरसाः के एवं च तेषां परिहारप्रदर्शनपूर्वकं तन्निबन्धने नियमाः प्रदर्शिताः।

अलंकारेभ्यो व्यंग्यार्थस्यवैशिष्टयं प्रतिपादितम् अलंकारयुक्तं काव्यं व्यंग्यार्थ विरहेण काव्यनाम्ना नैवोच्यते[3]।

रसादि वैशिष्ट्येन गुणीभूतव्यंग्यस्य ध्वनौ–अन्तर्भावः[4]।

रसभावादीनामभावे अलंकाराणां रचना चित्रकाव्यत्वेनव्यवस्थिता[5]।

ध्वनेः पंचत्रिंशत् शुद्धभेदप्रतिपादनपूर्वकं आनन्त्यस्य कथनम्[6]।

भट्टोद्भटादीनांमते उपनागरिकादिवृत्तीनां भरतमते कैशिकीसात्वती–आरभटीवृत्तीनां ध्वनिसमक्षे अनुपयोगित्वं साधितम्[7]।

व्यंग्यव्यंजकभावानां वैविध्येऽपिकविः रसयुक्तं काव्यं कुर्यात्[8]।

अनेनप्रकारेण आनन्दवर्धनः स्वकीयंमतं व्यवस्थापितवान्।

राजशेखरः

विदर्भदेशवास्तव्यस्य ययावरवंशावतंसस्य, दुर्दुकनाम्नःपितुस्तथा शीलवत्यामातुः पुत्रस्य राजशेखरस्य नाम को न जानाति साहित्यजगति। अयंहि कविप्रवरः आचार्य वलदेवोयाध्याय मताऽनुसरेण 880 ई० तः 920 ईस्वीयान्तराले अभूत्।

अनेन, बालरामायणबालमहाभारतविद्धशालभंजिकाप्राकृतभाषायां-कर्पूरमंजरी, नामाभिधानानि चत्वारि नाटकानि रचितानि। अस्य पञ्चमोग्रन्थः काव्यमीमांसा साहित्यजगति अतिशेते।

राजशेखराऽनुसारेणास्यग्रन्थस्य अष्टादश अधिकरणान्यासन्[9]। तेषु कविरहस्यनाम प्रथमाऽधिकरणमेव उपलब्धमस्ति। अस्मिन्नधिकरणे अष्टा-दशाध्यायैरधोलिखिता विशिष्टसिद्धान्ताः सन्ति।

---

1. तत्रैव 3/9.
2. तत्रैव 3/19-20.
3. मुख्या महाकविगिरामलङ्कृतिभृतामपि।
   प्रतीयमानच्छायैषा भूषालज्जेव योषिताम्। तत्रैव 3/38.
4. तत्रैव 3/41.
5. तत्रैव 3/42-43.
6. ध्व०लो० 3/44-45.
7. तत्रैव 3/48.
8. व्यंग्य व्यजंक भावोऽस्मिन् विविधे सम्भवत्यपि।
   रसादिमय एकस्मिन्कविस्यादवधानवान्। तत्रैव 4/5.
9. का०मी० प्रथम अध्याय पृ० 4.

1. सर्वप्रथमं श्रीकंठशिवेन काव्यविद्यायाः सर्वप्रथमोपदेशः परमेष्ठी वैकुण्ठादि चतुःषष्ठिशिष्येभ्यः प्रदत्त आसीत्। तेषु प्रथमशिष्येन ब्रह्मदेवेनाऽप्यस्या विद्याया अयोनिजशिष्येभ्यः ऋषिभ्योप्रदत्तः। तेषुशिष्येषु सरस्वत्याः पुत्रः काव्यपुरुषोप्यासीत्। प्रजापतिर्लोकत्रयान्तर्गतलोकहितकाम्यया काव्यविद्यायाःप्रचारार्थं काव्यपुरुषमादिष्टवान्। काव्यपुरुषोऽपि-अष्टादशभागेषु काव्यविद्योपदेशं सहस्राक्षादिकाव्यविद्यास्नातकेभ्यः प्रदत्तवान्। तेष्वेकैकेनशिष्येन काव्यविद्याया एकैकस्मिन्भागे वैशिष्टयमधिगत्य पृथक्-पृथग्ग्रन्थस्य रचना कृता[1]।

राजशेखरेणालंकारशास्त्रं वेदस्य सप्तमाङ्गत्वेन प्रतिपादितम्[2]। अस्माद्—पौरूषेयवेदस्य सप्तमाङ्गत्वात् साहित्यशास्त्रस्याऽपि अपौरूषेयत्वं सिद्धयति।

चतुर्दशविद्यास्थानेषु काव्यं पंचदशं स्थानम् वरीवर्ति[3]।

आन्वीक्षिकीत्रयीवार्तादण्डनीति इति चतसृषु विद्यासु (पंचमी साहित्य विद्या इतियायावरीयः) साहि चतसृणामपि विद्यानां निष्यन्दः[4]।

हिमालये तपश्चर्यया प्राप्तेन ब्रह्मणो वरदानेन सरस्वती काव्यपुरुषं जनयामास। ततः काव्यपुरुषस्य शरीराङ्गानां निरूपणं वर्तते। असौ काव्य पुरुषः सारस्वतेयं नाम लेभे[5]।

कविवरेण काव्यविद्याऽधिकरिणां तथा च काव्यरचनाया अधिष्ठात्र्या हेतोः प्रतिभायाः विवेचनम् सम्यक्प्रकारेण अकारि[6]।

काव्यरचनायां व्युत्पत्तेरावश्यकत्वंप्रदर्शयन् कवीनां भेदप्रदर्शनपूर्वकं काव्ये पाकस्य नवभेदानां आवश्यकत्वं प्रतिपादितम्[7]। पदानां पंचवृत्तयोभवन्ति, सुबन्तसमासान्ततद्धितान्तकृदन्ततिङ्न्तभेदेन इतिपदविषयंनिरूप्य, गुणवदलंकृतं च वाक्यमेव काव्यम् इति काव्यलक्षणं निरूपितम्[8]।

---

1. का०मी० प्रथम अध्या० पृ० 34.
2. उपकारकत्वादलङ्कारः सप्तममङ्गम् इतियायावरीयः।
   तत्रैव द्वितीय अध्या० पृ० 7.
3. तत्रैव द्वितीय अध्या० पृ० 7.
4. तत्रैव द्वितीय, पृ० 9. द्वितीय प. 10.
5. तत्रैव तृतीय पृ० 14-15.
6. तत्रैव चतुर्थ अ० 25 पृष्ठतः 37 पर्यन्तम्।
7. तत्रैव पंचम आ० पृ० 38 तः 53 पर्यन्तम्।
8. का०मी० षष्ठ अ०पृ० 54 तः 71 पर्यन्तम्।

विद्याधरोप्सरोयक्षराक्षसगन्धर्वकिन्नरादीनां व्यवहारयोग्यायाभाषायाः, वैदर्भी-गौडीपांचाली रीतीनां च साकाङ्क्षनिराकाङ्क्षभेदेन काकुध्वनेर्द्वैविध्यं प्रतिपाद्य तथाच पार्थक्येन प्रान्तेषुस्थितानां मनुष्याणां पृथक्–पृथग् भाषानां निरूपणमस्ति[1]।

काव्यरचनार्थंविषयावाप्तये द्वादशस्त्रोतसां निरूपणं राजशेखरमते, उचितसंयोगयोक्तृसंयोगउत्पाद्यसंयोगसंयोगविकारेणसह षोडषस्त्रोतसां वर्णनं[2] वरीवर्ति।

अर्थस्य सप्तप्रकाराणां निरूपणं, तथा च व्याकरणकोषछन्दोऽलंकारशास्त्र इति चतसृणां काव्योपयोगिविद्यानां, चतुषष्टिकलानां, काव्यस्योपयोगिनी-नामुपविद्यानां, देश-विदेशव्यवहाराणां, एवं च सत्कवीनां काव्याध्ययनेन, लोकव्यवहाराऽनुसारेण अध्ययनं विधाय कविः काव्यक्रियायै प्रयतेदिति निर्देशः[3]।

असूर्यम्यश्यानिषण्णदत्तावसरप्रयोजनिकभेदेन कवीनां चतुर्विधत्व कथनम्[4]।

कविः काव्यनिर्माणे पूर्वरचितप्रबन्धेभ्यः शब्दार्थहरणं केन प्रकारेणकुर्यादिति वर्णितम्[5]।

कविसमयस्य निरूपणं अर्थात् कविभिः केन प्रकारेण प्रबन्धरचना कर्तव्या रचनायां कीदृशाः शब्दाः प्रयोक्तव्या इति सम्यक् प्रकारेण निगदितम। कविसमय शब्दस्यार्थः राजशेखरेणैवं स्वीकृतः "अशास्त्रीयमलौकिकं च परम्परायातं यमर्थ- मुपनिबध्नन्ति कवयः स कविसमयः"। देशकालाद्यवस्थाभेदेन कवीनां कृते रचनायाः निर्देशः कृत[6]।

वक्रोक्त्यलंकारस्य स्थापनम्:

कुन्तकः—

पूर्ववर्ति—अलंकारिकैर्भामहदण्डीवामन—प्रभृतिभिर्वक्रोक्त्यलंकारस्य अस्तित्वं स्वीकृतम्। वामनेन "सादृश्याल्लक्षणा वक्रोक्तिः," अस्मिन् सूत्रे सादृश्यात् लक्षणा वक्रोक्तिर्वर्तते इत्यभिहितम्[7]। तदनन्तरं दशमशताब्द्या

---

1. का०मी० सप्तम अ० पृ० 72 तः 86 पर्यन्तम्।
2. तत्रैव अष्टम अ० पृ० 87 तः 104 पर्यन्तम्।
3. तत्रैव नवम एवं दशम आ०।
4. तत्रैव 10 अ० पृ० 130.
5. तत्रैव अ० 11, 12, 13.
6. का०मी० अष्टम अ० 14 तः 18 पर्यन्तम्।
7. भामह का०लं० 2/85, 5/66, काव्या०द० 2/363, का०लं०सू० 3/8.

मन्तिमेभागे कश्मीरदेशवास्तव्येनकुन्तकेन वक्रोक्तिजीविते ग्रन्थे वक्रोक्त्यलंकारे सर्वेषां काव्यतत्वानामन्तर्भावो निहितः।

वक्रोक्तिजीवितस्य चत्वारोन्मेषाः सन्ति। साहित्यशास्त्रस्येतिहासानामनुसारेण दुर्दैवात् सम्पूर्णोग्रन्थो नोपलब्धोऽस्ति। कुन्तकस्य एकमात्र रचना वक्रोक्तिजीवितमेव। अस्यविशिष्टाः कतिपयसिद्धान्ता एवं प्रकारेण सन्ति।

1. उपमादिसर्वेषामलंकाराणामन्तर्भावः वाक्यवक्रतायामेव भवति[1]।
2. साहित्यलक्षणं सर्वप्रथमं कुन्तकेन कृतम्[2]।
3. वक्रोक्त्यलंकार एव एकमात्रभङ्गीभणितिरिति अलंकाररूपेण व्यवस्थितः[3]।
4. कविव्यापारवक्रतायाः षड्भेदानां निरूपणम्, एवं च तेषां षड्भेदानां भेदोपभेदैःसह चतुर्षु उन्मेषेषु प्रतिपादनम्[4]।
5. कुन्तकेन अलंकारग्रन्थस्य प्रयोजनं अलंकार्यकाव्यस्य च प्रयोजनं पृथक-पृथक् रूपेण निरूपितम्[5]।
6. पूर्वोक्ताचार्याणां स्वीकृतरसवदाद्यलंकाराणां अलंकार्यरूपेण निरूपणम्, तेषां अलंकारताया निराकरणं एवं च स्वाभिमते रसवदाद्यलंकाराणां व्यवस्थाप्रतिपादनम्[6]।
7. वैदर्भ्यादिरीतीनां देशभेदेन, उत्तममध्यमाधमभेदेन निराकरणम्[7]।
8. काव्यरचनाहेतवः, सुकुमारमार्गविचित्रमार्गमध्यममार्गाणां प्रतिपादनपूर्वकं, मार्गाणांनिश्चिद्रूपेण, प्रसादमाधुर्यलावण्यआभिजात्य एते चत्वारोगुणाभवन्तीति प्रतिपादतम्। सौभाग्यौचित्यगुणयोः प्रत्येक मार्गे पदादारभ्य प्रबन्धपर्यन्तं आवश्यकत्वं प्रतिपादितम्[8]।

---

1. वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यत्रालंकार वर्गोऽसौ सर्वोप्यन्तर्भविष्यति।। व०जी० 1/20.
2. साहित्यमनयोः शोभाशालितांप्रतिकाप्यसौ।
अन्यूनानतिरिक्तत्व मनोहारिण्यवस्थितिः।। तत्रैव 1/17.
3. व०जी० 1/10.
4. वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता, प्रत्ययाश्रितवक्रता, वक्रवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता। तत्रैव 1/18, 19.
5. तत्रैव 1/2, 3, 4, 5.
6. तत्रैव 3/11, 12, 13, 14, 15.
7. तत्रैव 1/96, 97, 98.
8. तत्रैव 1/25 तः 29 पर्यन्तम्।

ध्वनिलक्षणस्य अनुमानेऽन्तर्भावः

महिमभट्टः—

न्यायनयनिष्णातो महिमभट्टाचार्यो राजानकोपाधियुक्तः श्रीधैर्यपितुः पुत्रः श्यामलगुरोः शिष्यः एकादशशताब्ध्यामारम्भभागे कश्मीरभुवमलंचकार। अयं हि महानुभावः ध्वनिसिद्धान्तस्यविरोधिष्वन्यतम आसीत्। अनुमानान्तर्गतध्वनेः सत्तांस्वीकुर्वन् आनन्दवर्धनाचार्यकृतध्वनिलक्षणस्य सम्पूर्णध्वनिभेदानांच खण्डनंकर्तु व्यक्तिविवेकाख्यं ग्रन्थं रचयामास। "तत्वोक्तिकोषस्याऽपि ग्रन्थनं अनेन कृतमासीत्" परं दुर्दैवादद्य स नोपलभ्यते[1]। कविपुङ्गवः व्यक्तिविवेकस्य प्रथमविमर्शस्य प्रथमपद्ये, परांवाचम् परमशिवतत्वस्वरूपां पशन्तीं, मध्यमां, वैखरीं च प्रणम्य ग्रन्थस्य मुख्योद्देश्यं ध्वनेरनुमानान्तर्भावरूपं कथयामास[2]।

ध्वनिलक्षणे दशदोषा निम्नप्रकारेणसन्ति—

1. अर्थस्य उपसर्जनीकृतात्मत्वं नैव भवति यतोहि अर्थस्य अर्थान्तर प्रतीत्यर्थमेव गृहीतस्य तद् व्यभिचाराभावात्।
2. ध्वनिलक्षणे शब्दोपादानमपि अनुपादेयमेव, तस्य स्वार्थाभिधानमन्तरा नान्यः कश्चित् व्यापारः।
3. ध्वनिलक्षणे शब्दस्य उपसर्जनीकृतात्मत्वविशेषणमपि अनुपादेयमेव यतोहि अर्थान्तरापेक्षया तस्य उपसर्जनीकृतात्मत्वं पूर्वसिद्धमेव।
4. व्यङ्क्तः—इत्यत्र क्रियापदे अन्तर्निहित व्यंजनाव्यापारस्यखण्डनम्।
5. ध्वनिलक्षणे वा शब्दस्य विकल्पसमुच्चयार्थयोरूभयोर्ग्रहणेऽपि विप्रतिपत्तिः।
6. व्यङ्क्तः अस्य द्विवचनेनोपादानम्—न युक्तियुक्तम्।
7. ध्वनिलक्षणे तमित्यत्र तदः पुंस्त्वेन निर्देशो अनुपपद्यते।
8. काव्यविशेषइत्यत्र विशिष्टत्वं न सुसमीचीनम्। काव्यमात्रस्य ध्वनिव्यपदेशविषयत्वेनेष्टत्वात् तस्य रसात्मकत्वोपगमात्।
9. सूरिभिः कथित इति कथनक्रिया कर्तृनिर्देशः पक्षद्वयेऽपि आवाच्य एव।
10. कथन क्रियायाः कर्तुः शब्देनोपादानम्[3]।

---

1. इत्यादि प्रतिभातत्वमस्माभिरुपपादितम्।
   शास्त्रे तत्वोक्तिकोशाख्ये इति नेह प्रपंचितम्।। व्य०वि० पृ० 118.
2. अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।
   व्यक्तिविवेकं कुरुते प्रणम्य महिमा परांवाचम्।। तत्रैव 1/1.
3. व्य०वि० प्रथम वि० पृष्ठ 9 तः 110 पर्यन्तम्।

अनुमानेन सम्पूर्णध्वनिभेदानां खण्डनेन महिमभट्टस्य प्रगल्भवैदुष्यं प्रतीयते। अनौचित्यमेवकाव्यस्य मुख्यदोष इति निरूप्य अनौचित्यस्य अन्तरंग, वहिरंग, भेदेन द्वैविध्यंप्रदर्श्य रसदोषस्य अन्तरंगभेदेनअन्तर्भावं विधाय वहिरंग- भेदस्य पंचशब्ददोषा निरूपिताः[1]।

ध्वन्यालोकस्य "काव्यस्यात्माध्वनिरिति" पद्यस्योपरि दोषाणां धारासम्पातः कृतः।

बाह्याऽभ्यन्तरवैशेषिकभेदेषु गुणान् विभज्य प्रत्येकस्य भेदस्य चतुर्विंशतिभेदनिरूपणम्—

भोजराजः

नवसाहसाङ्कोपाधिधारिणः सिन्धुराजस्य सुतः भोजराजो यथा दाने उदारस्तथा विदुषामाश्रवोऽप्यासीत्। धारानरेशोऽयं विद्वद्धुरीणधौरेयः असाधारण प्रतिभाशाली आसीत्। भोजराजोऽयं कश्मीरनरेशस्य अनन्तराजस्यसमकालिक आसीदिति निश्चीयते। राजतरङ्गिण्यां अनन्तराजभोजराजयोदार्नस्य विद्वत्प्रिय-तायाश्च वर्णनं इत्थं वर्तते।

सच भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ।
सूरीतस्मिन् क्षणेतुल्यं द्वावास्तां कविबान्धवौ[2]।।

अतो भोजराजस्य समय एकादशशताब्दयाः प्रथमार्धे निश्चेतुं शक्यते। यद्यपि नीतौ वैदुष्यनृपत्वयोर्विरोधनिरूपणमस्ति तथापि भोजे विद्वत्ताया नृपत्वयोश्च साम्यमासीत्।

भोजराजस्य साहित्यशास्त्रसम्बन्धि शृंगारप्रकाशसरस्वतीकण्ठाभरणे द्वौ ग्रन्थौ वर्तेते। षट्त्रिंशत्प्रकाशात्मके शृंगारप्रकाशे, शब्दार्थगुणदोषमहाकाव्य-नाटकादीनां निरूपणं वर्तते परं वैशिष्ट्येन चतुर्विंशतिप्रकाशेषु साहित्यशास्त्रस्य सार्वभौमसिद्धान्तस्य रसस्य व्यापकत्वेन निरूपणं विद्यते।

भोजराजमते शृंगाररस एव सर्वरसानां मूलभूतो वरीवर्ति अन्ये शृंगाररसस्य विकृतरूपा एव। ग्रन्थोऽयं पूर्णरूपेण प्रकाशितो न वर्तते, डॉ० राघवन् महोदयेन आंग्लभाषायां (Thesis) निबन्धो लिखितो वर्तते[3]। अस्मादेवास्य विशालकायग्रन्थस्य आमूलचूलपरिचयो लभ्यते, अस्य त्रयो प्रकाशाः मुद्रितास्सन्ति। पंचपरिच्छेदात्मके सरस्वतीकण्ठाभरणे गुणदोषालंकाराणां रीतिभावरसादीनां च विवेचनं वर्तते। `अस्यग्रन्थस्य संक्षेपेण किंचद् वैशिष्ट्यमत्र प्रस्तूयते—

---

1. इह खलु द्विविधमनौचित्यमुक्तम् अर्थविषयं शब्दविषयं चेति तत्र विभावानुभाव-व्यभिचारिणामयथायथं रसेषु यो विनियोग तन्मात्रलक्षणमेकमन्तरङ्गमाधैरे-वोक्तमितिनेह प्रत्यन्ते। तत्रैव व्य०वि०।
2. रा०त० 7/259.
3. डॉ० राघवनस्य भोजाज् आफ शृंगार प्रकाश सं० 1926 मैसूर आ० वलदेव उपाध्याय सं०शा०इति० तृतीय परि०, पृ० 220.

1. भोजराजेन गुणालंकार रसोपेतं दोषरहितं काव्यं स्वीकृतम्[1]।
2. भोजेन पदवाक्यवाक्यार्थदोषानिरूपिता एवं च तेषां षोडश संख्या स्वीकृता[2]।
3. काव्ये गुणानामावश्यकत्वं स्वीकृत्य, गुणानां बाह्याभ्यन्तरवैशेषिकेति त्रयोभेदाः स्वीकृता एवं च तेषां शब्दार्थगतत्वेन चतुर्विंशति प्रभेदाः निरूपिताः[3]।
4. भोजराजेन अलंकाराणामपित्रयोभेदाःस्वीकृताः–वाह्याभ्यंन्तरोभया-लंकाराश्चेति, शब्दालंकाराणां चतुर्विंशतिः–जातयउल्लिखिताः[4]।
5. रीङ्गतौ इत्यस्माद्धातोर्रीतिशब्दः स्वीकृतः, एवं च पूर्वाचार्येभ्योऽवन्तिका-मागधीरीत्योरधिकंनिरूपणंविधाय षड्रीतयः प्रतिपादिताः[5]।
6. भोजराजेन मध्यमारभटी मध्यमकैशिकीसात्वत्यादयः षड्वृत्तयः स्वीकृताः[6]।
7. यमकस्य द्वात्रिंशत् भेदानभिधाय भैदोपभेदेस्तस्य बहुत्वं प्रतिपादितम्[7]।
8. छायामुद्राउक्तियुक्तिःभणितिःपठितिः, आसां सर्वासां षड् षड्भेदा निरूपिताः[8]।
9. अनुप्रासएव काव्यस्य सर्वस्वमिति स्वीकृतम्[9]।

---

1. सर०कं०भ० 1/2.
2. दोषाः पदानां वाक्यानां वाक्यार्थनां च षोडश।
हेयाः काव्ये कवीन्द्रैर्ये तानेवादौ प्रचक्ष्महे।। तत्रैव 1/3.
3. त्रिविधाश्च गुणाः काव्ये भवन्ति कविसम्मताः।
बाह्याश्चाभ्यन्तराश्चैव येच वैशेषिका इति।।
बाह्याशब्द गुणास्तेषु चान्तरास्त्वर्थसंश्रयाः।
वैशेषिकास्तु ते नूनं दोषत्वेऽपि हि ये गुणाः।। तत्रैव 1/60, 61.
4. शब्दार्थोभय संज्ञाभिरलङ्कारान्कवीश्वराः।
बाह्यानाभ्यन्तरान् बाह्याभ्येन्तरांश्चानु शासति। तत्रैव 2/1.
5. सरस्वती कण्ठाभरणम् 2/27, 28.
6. तत्रैव 2/35.
7. तत्रैव 2/58, 62, 64.
8. तत्रैव 2/39, 44, 52, 56.
9. यथा ज्योत्स्ना चन्द्रमसं यथा लावण्यमङ्गनाम्।
अनुप्रासस्तथा काव्यमलंकर्तुमयंक्षमः।। तत्रैव 2/76.

10. उपमाद्यलंकाररहिताऽपि काव्यपद्धतिः शोभते इति निर्दिष्टम्[1]।
11. जैमिनिप्रतिपादितषट्प्रमाणानि अर्थालंकारेषु परिगणितानि[2]।
12. उपमादीनां बहूनामर्थालंकाराणां–उभयालंकारेषु गणना कृता[3]।
13. पंचमपरिच्छेदे, रसभावसन्धिवृत्ति प्रभृति चतुर्विशति रसान्वयविभूतीनां वर्णनमस्ति, रसनिरूपणात्प्रतीयते श्रृंगाररसएव ग्रन्थकाराय रोचते[4]।

औचित्येवकाव्यजीवनम्

क्षेमेन्द्रः

औचित्यसम्प्रदायप्रवर्तकस्य क्षेमेन्द्रस्य नाम को न जानाति साहित्य संसारे। अस्य पितुर्नाम प्रकाशेन्द्रः तथा गुरोर्नाम अभिनवगुप्तश्चासीत्। अयंहि कश्मीरनरेशस्य श्रीमदनन्तराजनृपति[5] समये एकादशईस्वीयोत्तरार्धभागे[6] औचित्यविचारचर्चा नामकं ग्रन्थं रचितवान्। अस्यापरंनाम व्यासदासोप्यासीत्[7]। यद्यप्यनेन द्वात्रिंशद्ग्रन्थानां रचनाकृता[8] तथाप्ययं साहित्य विषयमधिकृत्य औचित्यविचारचर्चा, कविकण्ठाभरणाभिधानौ द्वौ निबन्धौ रचयामास। अनयोर्द्वयोर्मध्येऽपि औचित्यविचारचर्चा अतिशेते येनास्य ख्यातिर्जाता। क्षेमेन्द्रस्य पंचसन्धिषुविभक्तोऽयं ग्रन्थः कविकण्ठाभरणं वर्तते। पंचसंधीनां विषयनिरूपणं अधोलिखितक्रमेण वरीवर्ति।

कवेस्तत्र कवित्वाप्तिः, शिक्षाप्राप्तगिरः कवेः।
चमत्कृतिश्च शिक्षाप्तौ गुणदोषोद्गतिस्ततः[9]।
पश्चात् परिचयप्राप्तिरित्येते पंच सन्धयः[9]।

पूर्ववर्ति–आचार्यैः प्रायः सर्वैरेव औचित्यस्यमहत्वं स्वीकृतमस्तियथा– वयोऽनुरूपः प्रथमस्तु वेषो[10] इत्यादि पद्येऽनुरूपशब्दो भरतमुनेरौचित्यस्य स्वीकृतपक्षं स्पष्टयति। भामहेन-औचित्यकारणात् भयादिभावानामवसरे

---

1. सर०कं०भ० 2/106.
2. तत्रैव 3/3.
3. तत्रैव 4/1 तः 4 पर्यन्तम्।
4. रसोऽभिमानोऽलंकारः श्रृंगार इतिगीयते।
   योर्थस्तस्यान्वयात् काव्यं कमनीयत्व मश्नुते।। तत्रैव 5/1.
5. तस्य श्रीमदनन्तराजनृपतेः कालो किलायं कृतः। औ०वि०च०पृ० 213.
6. सं०शा०इति० वल०उ० तृतीय परि० पृ० 218.
7. श्रीव्यासदासापरपुण्यनामा औ०वि० पृ० 212.
8. तत्रैव भूमिका पृ० 54.
9. कविकण्ठाभरणम् (के०एम० संस्करण 1937) 1/37.
10. ना०शा० 14/68.

पुनरूक्तदोषस्याऽवकाशो नैव- भवतीत्यभिहितम्[1]।

आचार्यरूद्रटेनापि स्फुटरूपेण औचित्याधारेण अनुप्रासालंकारार्थं निर्देशः कृतः[2]। ध्वन्यालोके आनन्दवर्धनेन औचित्यस्यप्राधान्यं स्वीकृत्य संघटनायां औचित्यस्यावश्यकत्वं स्वीकृतम्[3]। विषयाश्रयकाव्यवाक्यस्यौचित्यमपि सङ्-घटनाया नियन्त्रणंकरोतीत्यानन्दर्धनः[4]। रसबन्धे सर्वत्र औचित्यस्य आवश्यकत्वं प्रतिपादितम्[5]। अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम् इति ध्वन्यालोक-कारः[6]। भोजराजकुन्तकमहिमभट्टादिभिरपि स्व स्व ग्रन्थेषु औचित्यसिद्धान्तः स्वीकृतो वर्तते[7]। क्षेमेन्द्रस्यौचित्यविचारचर्चा साहित्यजगति अतिशेते येनास्य ख्यातिर्जाता, क्षेमेन्द्रेण काव्यतत्त्वेषु औचित्यस्यैव महत्वं स्वीकृतम् यथा—

1. रसस्यजीवनाधायकम्—औचित्यमेव—यथा
   औचित्यस्य चमत्कारकारिणश्चारूवर्णने।
   रसजीवितभूतस्य विचारं कुरुतेऽधुना[8]।।
2. औचित्यादृते गुणालंकाराणां चिन्तनं वैफल्यम् यथा—
   काव्यस्यालमलंकारैः किं मिथ्यागणितैर्गुणैः।
   यस्यजीवितमौचित्यं विचिन्त्याऽपि न दृश्यते[9]।।
3. औचित्यमेव काव्यस्यस्थिरजीवनमुच्यते यथा—
   अलंकारास्त्वलंकारा गुणा एव गुणा सदा।
   औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्[10]।।

---

1. भयशोकाभ्यसूयासु हर्ष विस्मययोरपि।
   यथाह गच्छ गच्छेति पुनरूक्तं न तद्विदुः।। का० अलं० 4/14.
2. का०लं० 2/32.
3. गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन्व्यनक्तिसा।
   रसास्तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः।।ध्व०लो० 3/6.
4. तत्रैव 3/7.
5. तत्रैव 3/9.
6. अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
   प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा।। तत्रैव 3/14 वृत्तौ
7. स०कं०भ० 1/75, व०जी० 1/57 वृ० 1/53 व्य०वि०पृ० 149-51.
8. औ०वि०च० 3कारिका पृ० 2.
9. तत्रैव 4 कारिका पृ० 4.
10. औ०वि०च० पंचम का. पृ० 4.

4. औचित्येनैव गुणालंकारा गुणालंकारपदवाच्या भवितुमर्हन्ति नान्यथा[1]।

5. उचितस्यभाव एवौचित्यम् इति औचित्यस्य लक्षणम् यथा—

उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च योभावस्तदौचित्यं प्रचक्षते[2]।।

सप्तविंशतिकाव्याङ्गेषु—औचित्येनैव, जीवनमायातीति कथितम्—यथा—

पदेवाक्ये प्रबन्धार्थे गुणेलङ्करणे रसे।
क्रियायां कारके लिंगे वचने च विशेषणे।।
उपसर्गे निपाते च काले देशे कुले व्रते।
तत्वे सत्वेप्यभिप्राये स्वभावेसार संग्रहे।।
प्रमायामवस्थायां विचारे नाम्न्यथाशिषि।
काव्यस्याङ्गेषुचप्राहुरौचित्यं व्यापि जीवितम्[3]।।

वाग्देवतावतारो मम्मटः

यद्यपि मम्मटस्य देशकालस्थितिविषये विदुषां मतमतान्तराणि सन्ति तथापि केषांचिन्मान्यसिद्धान्तानामनुसारेणास्यपरिचयोदीयते। कश्मीरदेशवास्तव्योऽयं मम्मटः जैयटगेहिनी सुजठराज्जन्मलेभे। अस्य कैयटऔव्वटौ द्वौ भ्रातरौ—आस्ताम्। अयं हि वाराणस्यामध्युष्य सर्वजनोपकारकत्वं काव्यप्रकाशामिधं साहित्यग्रन्थम् निर्मितवान्। कश्मीरदेशे सरस्वतीस्वयमेव मम्मटरूपेणअवतरितासीत् या साहित्यशास्त्रमुपजीव्य सूत्राणां निर्माणं कृत्वा काव्यप्रकाशस्य रचनामकार्षीत्। एतत् समग्रं विवरणं सुधासागराख्यकाव्यप्रकाशटीकायां भीमसेनेन लिखितमस्ति[4]। निदर्शनाख्यायां काव्यप्रकाशस्यव्याख्यायां आनन्दकविना एतत् प्रतिपादितमस्ति यन्मम्मटेन काव्यप्रकाशः परिकरालंकारपर्यन्त एव रचितः, तदग्रे अल्लटसूरिणा पूरितोऽयं प्रबन्धः। उक्तंच—

कृतः श्री मम्मटाचार्यवर्यैः परिकरावधिः।
प्रबन्धः पूरितः शेषो विधायाल्लटसूरिणा[5]।।

तत्रभवतो मम्मटस्य समयविषये मतमतान्तराणां साराशोऽ्यं यदेकादश शताव्दयामुत्तरार्धेऽस्य समयोनिश्चीयते विद्वद्भिः[5-क]। मम्मटोऽयं सर्व-

---

1. तत्रैव षष्ठ का० पृ० 6.
2. तत्रैव सप्तम का० 8 पृ०
3. तत्रैव नवम, दशम का० पृ० 9.
4. का०प्र० वामनाचार्यझल्लकीकरप्रस्तावनायां पृ० 6.
5. तत्रैव पृ० 8.

5-क. सं०शा०इ०आ० वलदेव उपा० तृतीय परि० पृ० 222.

शास्त्रज्ञोऽपि मुख्यतया वैयाकरण आसीत्, यतोहि काव्यप्रकाशस्य प्रथमोल्लासे वैयाकरणमताऽनुसारेणैव ध्वनिलक्षणं कृतवान्[1]। द्वितीयोल्लासे संकेतग्रहविषये वैयाकरणमताऽनुसारेणैव जात्यादिरिति (व्यक्तेरूपाधौ इति) पक्षं स्वीकृतवान्[2]।

मम्मटात्पूर्वं कुन्तकमहिमभट्टादयो ये ध्वनि–विरोधिन आसन् तान् अकिंचित्करमितिमत्वा ध्वनिकारादनन्तरं सर्वप्रथमोऽयं मम्मटः परिमार्जित रूपेण ध्वनिनिरूपणं कृतवान्[3]। अयमत्र हेतुर्यन्मम्मटः "ध्वनि प्रस्थापन-परमाचार्य" इत्युपाधिना अन्यैःविद्वद्भिरलंकृतः। नियतिकृतनियमरहितामित्यादि पद्ये मम्मटेन विधातुः निर्मितितः कविनिर्मितिः सर्वोत्कर्षेण निरूपिता[4]।

अयं महानुभावश्शक्तिव्युत्पत्याभ्यासानां काव्योद्भवे हेतुत्वं प्रदश्र्य काव्य प्रयोजनप्रतिपादन पुरस्सरं काव्यलक्षणानन्तरं उत्तममध्यमाधमभेदेन काव्यस्य त्रीन् भेदान् प्रतिपादयामास[5]।

काव्यलक्षणे शब्दार्थौ इत्युक्तेरार्थीव्यंजनां, लक्षणामूलाव्यंजनां, अभिधामूलाव्यंजनांच निरूप्य अर्थस्यव्यंजकतां निरूपितवान्[6]। मम्मटो रसस्वरूपमभिधाय भरतोक्तरससूत्रविषये, भट्टलोल्लटश्रीशङ्कुक, भट्टनायकानां त्रयाणां क्रमेण मीमांसान्यायसांख्यदृष्टया उत्पत्तिअनुमिति–भुक्ति् रिति वादत्रयं निराकृत्य स्वाभिमतं अभिनवगुप्तपादस्य रसाभिव्यक्तिरिति सिद्धान्तपक्षं समुपास्थापयत्[7]। मम्मेटेन ध्वनेः शुद्धभेदा एकपंचाशत् स्वीकृताः परं त्रिविधसंकरेण एकया संसृष्टया चतुर्भिर्गुणने शुद्धभेदैः सह पञ्चपञ्चाशदुत्तर-चतुःशताधिकदशसहस्रं ध्वनिभेदाः स्वीकृताः[8]। तत्रभवान् मम्मटो व्यंजना विरोधिमीमांसाकयुक्तीनां खण्डनंकृत्वा सुचारुरूपेण व्यंजनां स्थापयामास[9]।

---

1. का०प्र० 1/2 वृतौ
2. तत्रैव 2/10.
3. तत्रैव 4/39, 65.
4. तत्रैव 1/1.
5. का०प्र० 1/1-3.
6. तत्रैव 2/5-34, 3/35-37.
7. तत्रैव 4/27-28.
8. तत्रैव 4/64-65.
9. तत्रैव 5/217-256 पृ०

पदपदांशवाक्यार्थरस दोषाणां सूक्ष्मप्रकारेण विवेचनं कृत्वा दोषाः कुत्र अदोषत्वं प्राप्नुवन्ति इति प्रतिपादितं मम्मटेन[1]। स्वमते रसस्याङ्गभूत त्रयाणामेव गुणानां लक्षणोदाहरणानि निरूप्य उद्भटमते गुणालंकारयोरभेदं प्रदर्शयित्वा, वामनोक्तश्लेषादिदशशब्दगुणानां दशअर्थगुणानां च स्वमतोक्तेषु त्रिषु-गुणेष्वन्तर्भावो विहितः[2]।

वैदर्भीगौडीपांचालीरीतीनां स्थाने उपनागरिकाकोमलापुरुषावृत्तीनां निरूपणपुरस्सरं वक्रोक्त्यादिषट्शब्दालंकाराणां विवेचनं कृतवान्[3]। दशमोल्लासे उपमादयः एकषष्टि–अलंकारा निरूपिताः।

अग्निपुराणम्–

भरतनाट्यशास्त्रस्यानन्तरं पुराणानां समयएवागच्छति। पुराणानां पुरातनत्वं नाम्ना एव ज्ञायते परंअग्निपुराणविषये विदुषां पर्याप्तरूपेण उहापोहोऽभवत्। काव्यशास्त्रीयविषयाऽवलोकनात् प्रतीयते यदग्निपुराणान्तर्गत काव्यशास्त्रीय भागः भामहकृतकाव्यालङ्कारस्य, तथा दण्डिकृतकाव्यादर्शस्यापेक्षया अर्वाचीनोऽस्ति। संस्कृतस्यालोचकैर्विद्वद्भिः, डॉ० पी०वी० काणेआचार्य बलदेवोपाध्यायडॉ० वी० राघवन्आदिभिः यद्यपि पुराणानांप्राचीनत्वं स्वीकृतमस्ति। तथापि अग्निपुराणस्य काव्यशास्त्रीयभागो भोजसमकालिक एव प्रतीयते। यतोहि भामहदण्डिकृतग्रन्थेभ्योऽक्षरशः काव्यतत्वानि–अग्निपुराणकारेण समुद्धृतानिसन्ति। डॉ० काणे महोदयैर्विभिन्नप्रमाणैः साधितोऽस्य समयः। पुराणेऽस्मिन् द्वासप्तत्युत्तरत्रिशतं–अध्यायाः सन्ति। विद्यासारं पुराणं यत्सर्वं सर्वस्य कारणम् इति अग्निपुराणोक्त 1/13 श्लोकस्या-धारेण सारभूतमिदमग्निपुराणम्। सर्वासां विद्यानां साहित्यशास्त्रस्य च विविध विषयाणां निरूपणं अस्मिन् पुराणे विद्यते। प्रतीयते यदग्निपुराणकारः स्वयं न कस्यापि सम्प्रदायस्य, अथवा काव्यसिद्धान्तस्य पक्षपाती आसीत् अपितु तेन अन्यसाहित्यशास्त्रग्रन्थेभ्यः साहित्यविषयकमूलतत्वानि संकलय्य अग्निपुराणे निर्दिष्टानि। अस्मिन् पुराणे 337 अध्यायादारभ्य 347 अध्यायपर्यन्तं क्रमेण काव्यादिलक्षणम्, नाटकनिरूपणम्, शब्दालंकाराणां अर्थालंकाराणां शब्दार्था-लंकाराणां काव्यगुणानां, काव्यदोषाणांच निरूपणं वर्तते। अग्निपुराणे रसस्वरूपस्य वैलक्षण्यं वर्तते, पूर्ववर्तिग्रन्थेष्वेतत् वैलक्ष्यण्यं न वरीवर्ति।

---

1. का०प्र० 7/71-86.
2. तत्रैव 8/66-77.
3. का०प्र० 9/103-124.
4. सं०का०शा०इति० पृ० 4 तः, 12 पर्यन्तम्।

राजानकरूय्यकः

आचार्य मम्मटानन्तरं कश्मीर भूमौ संस्कृत साहित्यशास्त्रस्य क्रमिकविकासे, राजानकतिलकपुत्रस्य रूचकापरनामाभिधानस्य रुय्यकस्य नाम कोनजानाति साहित्यजगति। अयं महानुभावो द्वादशशताद्वयामध्यकाले समभूदिति विदुषां मतमतान्तराणां सारोविद्यते[1]। अलंकारसर्वस्वस्य निबन्धकर्तुर्विषयेऽपि विदुषां विचारभेदो दृश्यते। अस्यग्रन्थस्य सूत्रकर्ता, वृत्तिकर्ता एक अथवा पृथक्-पृथक्।

रूय्यकरूचकमंखुक, एषु को ग्रन्थस्यरचियितावर्तते? डॉ० राघवन्, डॉ० काणे, डॉ० रामचन्द्रद्विवेदिप्रभृतयः, "अलंकारसर्वस्वं रूप्यक्, अथवा रूचकस्य कृतिरिति स्वीकुर्वन्ति[2]। डॉ० रेवाप्रसादद्विवेदि महोदयेन, सूत्राणां रचयिता रूय्यकः वृत्तिकारो, मंखुकः (मंख, मंखक (मङ्ख–मङ्खक) इति विविधैः प्रमाणैः समर्थितम्[3]। रूय्यकस्याऽधोलिखिता रचनाः सन्ति। सहृदय-लीला, व्यक्तिविवेकविचारः, अलंकारसर्वस्वम् काव्यप्रकाशसंकेतः, अलंकारमंजरी, अलंकारानुसारिणी, साहित्यमीमांसा, नाटकमीमांसा, श्रीकण्ठस्तवहर्षचरित वार्तिकम्[4]। एषु ग्रन्थेषु प्रायः त्रयोग्रन्थाः समुपलब्धास्सन्ति, परं रूय्यक-"कृतीष्वलंकारसर्वस्वं" सर्वोत्कर्षेण विराजतेतराम्। अस्यग्रन्थस्य, राजानकतिलक जयरथसमुद्रबन्धविद्याधरचक्रवर्तिः एते चत्वारो व्याख्याकाराः सन्ति।

1. आचार्य मम्मटवदेव रूय्यकेन शब्दार्थयोर्वर्गद्वये विभाजनं कृतमस्ति।।
2. रूय्यकस्य परिणामउल्लेखविचित्रविकल्पभावोदयभावसन्धि, भाव-शवलता एते सप्त अलंकाराः स्वकल्पिताः वर्तन्ते[5]।
3. रूय्यकेन रसवत्प्रेयउर्जस्वि, समाहितेत्येषां चतुर्णामलंकाराणां, भावोदयादीनां त्रयाणामलंकाराणां, सूत्रद्वये प्रतिपादनं कृतम् परं तेषां पृथक्-पृथक् लक्षणानि सूत्रेषु न निरूपितानि। अतः प्रतीयते यदेते अलंकाराः सम्यक्प्रकारेण रूय्यकाभिमता नैव वर्तन्ते[6]।

---

1. सं०का०शा०इति० पी०वी०काणे पृ० 354, सं०सा०शा०इति०आ०व०उ०पृ० 23.
2. डॉ० राघवन, कु० जानक्याः अंलकारसर्वस्वस्य Forward डॉ० काणे, History of Skt. Poetics डॉ० रामचन्द्रद्वि०अलं०मी० परिचयखण्डः।
3. अलंकार सर्वस्वभूमिका प्रथम सं० पृ० 8-15.
4. सं०का०शा०इति०पी०वी० काणे पृ० 347, आ०वि०का०प्र०भू०पृ० 89.
5. अलंकारसर्वस्व सूत्र सं० 17, 20, 48, 65, 84.
6. अलंकारसर्वस्व सूत्र सं० 83-84.

4. रूय्यकेन अष्टाशीतिसूत्रैः षट्शब्दालंकाराणां षट्सप्तत्यर्थालंकाराणांनिरूपणं पाण्डित्यपूर्णं कृतम्।
5. अनेनालंकारमन्तरा नान्येषां रसगुणरीत्यादि काव्यतत्वानां महत्त्व–मितिप्रतिपादनं कृतम्।

कविराजविश्वनाथः

वृद्धप्रपितामहनारायणस्य प्रपौत्रः महाकविश्रीचन्द्रशेखरस्य पुत्रस्य कविराजश्रीविश्वनाथस्य साहित्यदर्पणाख्योग्रन्थो अतीवप्रसिद्धो विद्यते। विश्वनाथोऽयं साहित्यदर्पणाख्यं ग्रन्थं सन् ई० 1384 तः पूर्वमेव रचयामास। पी०वी० काणे महोदयेन "संस्कृत काव्यशास्त्रस्येतिहासे" प्रतिपादितमस्ति यज्जम्बुस्थ श्रीरणवीरसंस्कृताऽनुसन्धानपुस्तकालये–साहित्यदर्पणस्य हस्तलिखितमेकं पुस्तकं विद्यते, यस्यसमयः सं० 1440 अथवा 1384 ई० सन् वर्तते। अस्मात् स्पष्टमवभासते यदस्यसमयः 1384 ई० सन् तः पूर्वमेववर्तते[1]। साहित्यदर्पणस्य चतुर्थपरिच्छेदे सुल्तान अलाउद्दीनखिलजी महोदयस्य नाम दृश्यते[2], यस्य शासनकालः 1296-1316 ईस्वीयान्तराले आसीत्। अस्यसेनापतिः प्रियमलिक्काफरः दक्षिणे आक्रमणंविधाय "वरंगलं" स्वायत्तीकृतवान् तथा च कन्याकुमारीपर्यन्तं स्वविजयपताकां स्थापयामास[3], अनेन प्रकारेण विश्वनाथस्यसमयश्चतुर्दश शताब्दयां निश्चीयते।

एतद्विरचितसाहित्यदर्पणे दशपरिच्छेदास्सन्ति। प्रथमपरिच्छेदे विश्वनाथेन "तददोषौशब्दार्थौ सगुणावनलंकृती पुनः क्वापि" अस्यमम्मट कृत काव्यलक्षणस्य स्वप्रतिभावैचित्र्येण खण्डनं कृतमस्ति। षष्ठपरिच्छेदे व्यासेन नाट्यशास्त्रसम्बन्धीनां सर्वेषां विषयानां निरूपणं विहितम् येनास्य साहित्यदर्पणस्योपयोगित्वं वृद्धिमगात्। तृतीयपरिच्छेदे रसनिरूपणानन्तरं, नायकनायिकानां भेदाः वैशिष्टयेन प्रदर्शिताः। अन्येषुपरिच्छेदेषु काव्यप्रकाशवदेव सर्वे विषयाः समुपन्यस्ताः। अयं कविप्रवरः षोडषभाषासु विशेषज्ञः "प्रशस्तिरत्नावलीं" विरचितवान्[4]।

---

1. संस्कृत काव्यशास्त्रस्येतिहासः पी०वी० काणे पृ० 370.
2. सन्धौसर्वस्वहरणं विग्रहेप्राण निग्रहः।
3. अलावद्दीननृपतौ न सन्धिर्नच विग्रहः।। सा०द० 4/14.
3. सं०का०शा०इ० पृ० 370.
4. काव्यप्रकाशः–डॉ० नगेन्द्र भूमिका पृ० 88.

तृतीयोऽध्यायः

वैदिकवाङ्मये गुणानामुद्गमो विकासश्च

वैदिकगुणधारणाः

आदिकालतः सर्वेषां सचेतनानामात्मनः सुखायैव[1] सर्वासुक्रियासु प्रवर्तनं तथा अशुभतो निवर्तनम् संभवति। एतच्च वाग्व्यवहारशालिभिर्देवदैत्यदानव मानवैर्वाण्याः शुभाशंसनं तथा वाणीविरहितेषु क्रियाया शुभाशंसनम् अशुभतश्च परावर्तनमनुभूयते। एतद्विषये वेदेषु महर्षीणां भूरिशो वाच उपलभ्यन्ते। येषु महर्षिभिः शुभदर्शनार्थं[2] यजुर्वेदमन्त्रे देवानमग्रे प्रार्थना कृतावर्तते यत् वार्धकावधि अस्मत्पुत्राः पुत्रवन्तो जायन्ते अर्थात् यावदस्माकं पौत्रा भवन्ति तावन्मध्येऽस्माकं–आयुर्मारीरिषत माहिंसिष्ट। शुभप्राप्त्यर्थमनेनैव प्रकारेण प्रार्थना कृता वर्तते यत् हे आपः युष्माकं यः शिवतमः शान्ततमः सुखैकहेतुरसोऽस्ति अस्मिन्–कर्मणि इहलोके वा स्थितान् अस्मान् तस्य रसस्य भागिनः कुरूत अर्थात् तं रसं अस्मान् प्रापय इति।

भद्रश्रवणार्थं[3] वक्ष्यमाणप्रकारेण यजुर्वेदे प्रार्थना कृता विद्यते–यथा–हे देवाः कर्णे कल्याणमनुकूलं वयं श्रृणुयाम। हे यजत्राः–यजमानपालकाः नेत्रैः वयं भद्रं पश्येम। देवोपासनयोग्यं यज्जीवनं तद्वयं प्राप्नुयाम। कीदृशा वयम्–दृढावयवैः करणचरणादिभिः शरीरैः पुत्रादिभिर्युतास्तुवन्तः सन्तः जीवेम।

एवं वेदे कल्याणप्राप्त्यर्थं[4] कल्याण[5] दर्शनार्थं, सुखप्राप्त्यर्थं[6] स्व वंशरक्षार्थं[7]

---

1. आत्मनः सुखायैव सर्वं प्रियंभवति, आत्मनः सुखायैव जाया प्रिया भवति, नतु जायायाः सुखाय जाया प्रियाभवति। बृ०आ०उ०अ० 4 ब्राह्मण 5 पृ० 1132.
2. शतमिन्नु शरदो अन्तिदेवा यत्रानश्चक्रा जरसं तनूनाम्, पुत्रासो यत्रपितरो भवन्तिमानो मध्यारीरिषतायुर्गन्तोः। वायसनेयिमाध्यन्दिनशुक्ल–यजुर्वेदसंहिता 25/22.
   योव : शिवतमोरसस्तस्य भाजयतेहनः उषतीरिव मातरः। यजुर्वेद 11-15.
   स्वति न पथ्यासु धन्वसु स्वरूपसुवृजने स्वर्वति स्वस्ति नः पुत्र कृथेषु योनिषु स्वस्तिराये मरुतो दधातन। ऋ०सं० चतुर्थ भाग 10/5/64.
3. भद्रं कर्णेभिः श्रुणुयाम देवाः भद्रंपश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः। शुक्लयजुर्वेद 25/21.
4. विश्वानि देव सवितर्दुरितानि परासुवयद्भद्रं तन्न आसुव। तत्रैव 30/3.
5. शंनोमित्रः शंवरुणः शुक्लयजुर्वेद 36/9.
6. शंनोवातः पवतांशंन्नस्तपतुसूर्यः। तत्रैव 36/10.
   प्रेता जयता नर इंद्रोवः शर्मयच्छतु। तत्रैव 17/46.
7. परं मृत्यो अनुपरेहिपन्थां इत्यादि। तत्रैव 35/7.

स्वाभीप्सितसिध्यर्थं[1] शतवर्षं जीवितुं, अपराधीनजीवनार्थं दीनतायाअभावार्थं समानभावनायाश्च कृते वैदिकसमयेऽपिमहर्षयः कामयमाना दृश्यन्ते।

अतः प्रतीयते यद् वेदसमयेऽपि शुभदर्शनशुभप्राप्त्यादिगुणानां सद्भाव आसीत्।

शब्दार्थगता गुणधारणाः–

भारतीयदार्शनिकपरंपरायां जगत्सृष्टेर्विविधानि मूलकारणानि प्रतिपादितानि। सांख्ययोगदार्शनिकाः प्रकृतिं, नैयायिकाः परमाणुं, वेदान्तिनः–अविद्यां, अन्ये वेदान्तिनो मायां सृष्टिकारणं मन्यन्ते किन्तु शैवदार्शनिकाः शब्दार्थयुगलं ब्रह्मस्वरूपं मत्वा अस्मादेव सृष्टिप्रक्रियां कथयन्ति शैवदार्शनिकाः सृष्ट्या मूलतत्वे शब्दार्थौ वर्तेते इति स्वीकुर्वन्ति।

काश्मीरभूमावेव काव्यस्योत्पत्तिर्जाता, राजशेखरेणाऽपि काव्यपुरुषोत्पत्तिवर्णनसमये, "काव्यस्य शब्दार्थौ शरीरम्" इत्युक्त्वा शब्दार्थौ शरीररूपेणस्वीकृतौ, काश्मीरदेशवास्तव्येन मम्मटेन काव्यलक्षणे शब्दार्थौं–इति प्रतिपाद्य, शब्दार्थयोर्नित्यत्वं स्वीकृतम्। काव्यात् रसाऽनुभूतिर्भवति, रसब्रह्मणोऽपरनामवर्तते (रसोवैब्रह्म) इति छान्दोग्यवचनादपि रसो ब्रह्मैव वर्तते। अदो ब्रह्म शिवस्वरूपंवर्तते, स नित्यमस्ति। यद्यपि पण्डितेन्द्रजगन्नाथेन काव्यलक्षणे शब्दार्थयोः प्रयोगः न कृतः परं तस्य ग्रन्थस्य नाम (रसगंगाधरः) शब्दार्थयोः सत्तां नित्यतां च प्रतिपादयति। शब्दार्थौ काव्यम् इति स्वीकृत्य, काव्यात् रसमयब्रह्मप्राप्तिः, शिवस्वरूपप्राप्त्याऽऽनन्दवत् काव्यरसादपि परमानन्दप्राप्तिर्भवति।

एतदर्थमेव पण्डितेन्द्रजगन्नाथेन स्वग्रन्थस्य नाम (रसगंगाधर) इति निर्धारितम्। अर्थात् रसो ब्रह्म वर्तते, ब्रह्म शिवस्वरूपोऽस्ति शिवो गंगाधरो विद्यते (गंगांधारयति) अतो रसगंगाधरनाम औचित्यं धत्ते।

---

1. यतोयतः समीहसे इत्यादि। तत्रैव 36/22.
2. तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं-शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्यामशरदः शतंभूयश्च शरदः शतात्। तत्रैव 36/34.
3. संजानीध्वं संपृच्यध्वं सं वो मनांसि जानताम्। देवाभागं यथापूर्वे संजानाना उपासते। अथर्ववेद द्वितीय भागः 64/1.
   समानोमन्त्रः समितिः समानी इत्यादि। 64/2.
   समानीवाकूतिः समाना हृदयानिवः। तत्रैव 64/3.

मीमांसादर्शनेऽपि शब्दार्थयोः सहभावो निगदितो विद्यते। औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशउत्पत्तिरेकश्चार्थेऽनुपलब्धेस्तत्प्रमाणं बादरायणस्यानपेक्षत्वात्[1]। वेदस्य प्रतिपदमर्थं निसर्गत अनुबध्नाति।

वाक्यपदीये भर्तृहरिणा शब्दार्थयोर्नित्यःसम्बन्धः प्रतिपादितः[2]। महर्षि-कात्यायनपतंजलिनाऽपि शब्दार्थयोर्नित्यः सम्बन्धः स्वीकृत आसीत्। महाभाष्यकार पतंजलिना प्रतिपादितमस्ति यत् शब्दार्थयोः पारस्परिकसम्बन्धो नित्यरूपेण वर्तते[3]। यास्केनाऽपि नित्यं ह्यर्थवतामर्थैरभिसम्बन्ध इत्यभिधाय शब्दार्थयोर्नित्यः सम्बन्धः स्वीकृतः। यथा ज्ञाने स्वतो ज्ञानस्य ज्ञेयस्य च समावेशो विद्यते तथैव शब्देऽपि—अर्थरूपस्य स्वरूपस्य च अस्तित्वं विद्यते अर्थप्रतीतिः शब्देन विना न जायते। शब्दस्योपयोगिता अर्थेन विना न भवति, द्वयोःशब्दार्थयोर्भिन्नप्रतीतिः रज्जौ सर्पभ्रमवत् विद्यते[3]। सर्वप्रथमं शब्दस्वीकृति-हेतवे वर्णसत्ता स्वीकार्या, वर्णेभ्यः पदानि, पदेभ्यः शब्दाः प्रतिपद्यन्ते। तदनन्तरं शब्देभ्योऽर्थबोधो जायते[4]।

भर्तृहरिणा शब्दार्थौ एकस्यैवात्मनः द्वौभेदौ प्रतिपादयतः—अनयोरभिन्नसम्बन्धः स्वीकृतः। सिद्धान्तशैवादिमते शिवस्य समवायिनी शक्तिः, ज्ञानशक्तिः तयोश्च तादात्म्यम्, अतः शिवशक्तिश्चैकमेव तत्वम्। शिवस्य परिग्रहशक्तिः विद्याख्या क्रियाशक्तिः परिग्रहोपादानकारणम्। स च बिन्दुर्द्विविधः शुद्धोऽशुद्धश्च। शुद्धबिन्दुरेव महाबिन्दुर्महामायेति। अशुद्धबिन्दुर्माया उच्यते। बिन्दौ समवायिन्याः शक्तेः य सम्बन्धः स एव विकल्पो भेदज्ञानमित्याख्यायते। तं च विकल्पमाश्रित्य शिवः शुद्धबिन्दुं क्षोभयति। तेन च स शब्दार्थधारां जनयति।

सा च शब्दधारा[5] परा पश्यन्तीमध्यमावैखरी रूपा शुद्धा[6]। शब्दार्थयोः अभिन्नत्वे सत्यपि पृथक्-पृथक् कथने लौकिकव्यवहार एव कारणं[7] वर्तते।

---

1. नित्याः शब्दार्थसम्बन्धाः तत्राम्नाता महर्षिभिः।
   सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः। वाक्यपदीये 1/23.
2. सर्वे शब्दाः सर्वार्थाभिधानसमर्थाः इति सर्वैरर्थैः सर्वेषांशब्दानां सम्बन्धः। वैयाकरणसिद्धान्तलघुमंजूषा (नागेश) पृ० 39.
3. आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च विद्यते।
   अर्थरूपं तथा शब्दे स्वरूपं च प्रतीयते। वाक्यपदीये 1/50.
4. न वर्णव्यतिरेकेण पदमन्यच्च विद्यते।
   वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किंचन।। तत्रैव 1/72.
5. एकस्यैवात्मनोभेदौ शब्दार्थावपृथक् स्थितौ। वाक्यपदीये 2/31.
6. श्री शंकरात्प्रागद्वैतवादः। अ० 8 पृ० 266.
7. शब्दार्थयोः सम्भेदे व्यवहारे पृथक् क्रिया।
   यतः शब्दार्थयोस्तत्वमेकं तत् समवस्थितम्। वाक्यपदीये 1/26.

वैयाकरणानां मते–शब्दो ध्वन्यात्मकस्फोटात्मकरूपेण द्विविधः। उच्चार्यमाणः श्रोतुंयोग्यः शब्दो ध्वन्यात्मकः कथ्यते। शब्दस्य अनादिकालात् आगतरूपः स्फोटः अर्थात् स्फुटति–अर्थो अस्मात् इति स्फोटः[1]। वैयाकरणैर्ध्वनिशब्दः नाद–इत्यर्थे प्रयुक्तो वर्तते[2]। शब्दस्य उत्पत्तिरपि अनेनैव क्रमेण भवति साहित्यशास्त्रज्ञैर्ध्वनिशब्दो व्यंजके शब्दे व्यंजकेऽर्थे व्यंजनाशब्दशक्तौ, व्यंग्यार्थे, व्यंग्यप्रधानकाव्यस्य च कृते प्रयुक्तः।

लोके एवंविधः प्रत्ययो न वर्तते यः शब्दादृते यत्किमपि वस्तु प्रकाशयेत्[3]। एवं शब्दार्थयोर्नित्यतां स्वीकृत्य साहित्यशास्त्रस्य प्रायः सर्वैराचार्यैः स्वस्व-काव्यलक्षणे शब्दार्थयोर्वैशिष्ट्येन सत्ता स्वीकृता[4] वर्तते। अतः काव्य शास्त्रस्याधारः शब्दार्थौ वर्तते।

पूर्वचर्चिता एषा शब्दार्थगता वर्णनाः शब्दार्थगुणरूपाः सन्ति। शब्देच वर्णाभवन्ति, वर्णानां समूहएव शब्दः[5]। तेन वर्णानां स्थानदेवजात्यादिप्रयुक्ताः धर्मा ये शुभवहास्ते वर्णगुणद्वारा शब्दगुणाः, अर्थाऽवबोधनद्वारा ये शुभकराधर्मास्ते ऽर्थगुणाः। अनयोर्द्वयोः शब्दार्थयोरतिरिक्तः शब्दोच्चारणे स्वरोऽपि अनुभूयते तस्मात् स्वरद्वारा ये शुभगुणास्ते स्वरगुणाः, स्वरद्वारा गुणानां वेदे, संगीते एव विशेषमहत्वं भवति अतोऽत्र तेषां चर्चा न क्रियते। काव्यं च शब्दार्थ-

---

1. यः संयोग वियोगाभ्यां करणैरुपजन्यते।
   स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः।।
2. लब्धक्रियः प्रयत्नेव वक्तुरिच्छानुवर्तिना।
   स्थानेष्वभिहितोवायुः शब्दत्वं प्रतिपद्यते।
   तस्य कारणसामर्थ्यात् वेगप्रचयधर्मिणः।
   सन्निपाताद् विभज्यन्ते सारवत्योहिमूर्तयः।। वाक्यपदीये 1/108-109.
3. न सोऽस्ति प्रत्ययो लोके यः शब्दानुगममादृते।
   अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते। वाक्यपदीये 1/123.
4. शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा। भा०ला०लं० 1/16.
   काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते। वा०का०लं०सू० 1/1.
   शब्दार्थौ काव्यम्। रूद्रट का०लं० 2/1.
   तद्दोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि। का०प्र० 1/1.
   अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम्। हेमचन्द्रकाव्यानु० पृ० 16.
   वाग्भटविद्यानाथविद्याधरादिभिः स्वस्वकाव्यलक्षणे शब्दार्थयोः प्रयोगः कृतो वर्तते।
5. न वर्णव्यतिरेकेन पदमन्यच्च विद्यते। वाक्यपदीये 1/72.

मयं भवति तस्मात् काव्ये शब्दार्थगता गुणा एव विचार्यन्ते वर्णानां शुभाऽशुभत्वं, तथा वर्णानां देवताविषये वर्णस्वरूपदेवतास्वरूपविषये च तन्त्रशास्त्रे, छन्दः शास्त्रे वहुविचारितं वर्तते, येन गुणव्यंजकवर्णानां विषये ज्ञातुं शक्यते। एतत् सर्वं षष्ठेऽध्याये स्फुटीभविष्यति।

गुणानामुद्भवः

वैदिकवाङ्मयमतीव विशालं वर्तते तच्चेदानीं बहुष्वंशेषु लुप्तप्रायम्, तस्य केचन अंशा अद्यत्वे उपलभ्यन्ते। महाभाष्यकारपतंजलिकाले वेदानां बहवोंऽशा उपलब्धा आसन्[1]। तदनुसारं समुपलब्धेषु अंशेषु एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, नवधा अथर्वणः, एकविंशति बाह्वृच्यम् इत्यादि अद्यत्वेतु केवलं सर्वेषां वेदानां सप्त–अष्टौवा शाखा उपलभ्यन्ते। तासुशाखासु सर्वेषांशास्त्रीयतत्वानां याथातथ्येन पर्यवेक्षणं दुष्करम्, वैदिकी शैली, भाषा चाऽपि दुरूहा तेन साहित्यिक गुणविषये पूर्णरूपेण वेदेषु किमपि पर्यवेक्षण-मसम्भवम्, तथाऽपि इदं वक्तुं शक्यते यद् वाङ्मयस्यारम्भकालादेव वाग् गुणा आसन्। गुणगुणिनोर्नित्यः सम्बन्धः, तस्मात् यदि वाक् गुणिनी माधुर्यादिश्च तस्याः गुणाः तदा गुणगुणिनोश्च नित्यसम्बन्धात् वाक्-गुणहीना स्थातुं न शक्नुयात्। वेदान्तप्रक्रिययाऽपि पंचभूतेषु पंचभूतानामवयवा भवन्ति एतदर्थं तैः पंचीकरणप्रक्रिया–अङ्गीकृता, आकाशमहापिण्डे पृथिव्यप्तेजोवायूनां अष्टमोंऽशभागाः भवन्ति।

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।
स्वस्वेतरचतुर्थांशैर्योजनात् पंच पंचते।।

अनया रीत्या यथा पार्थिवे तत्वेमाधुर्यादयो गुणाः सन्ति तथैव आकाशीय-तत्वे शब्देऽपि माधुर्यादयो गुणा भवितुमर्हन्ति। जैनदर्शनरीत्याऽपि एतादृशी एवस्थितिः।

---

1. महाञ्छब्दस्य प्रयोगविषयः। सप्त द्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्याः बहुधाभिन्ना एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, नवधाथर्वणोवेदाः, वाकोवाक्यमितिहासः, पुराण वैद्यकमित्येतावांछब्दस्य प्रयोगविषयः एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य "सन्त्यप्रयुक्ता" इतिवचनं केवलं साहसमात्रमेव। पातंजलमहाभाष्यम् अ० 1 पा० 1 अ० 1 अ० 1 पृ० 52.
बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगामेति। तत्रैव रूद्रधरशर्माणो निवेदने पृ० 35.

तस्माद् वाङ्मयस्याद्ये ग्रन्थे ऋग्वेदे वाग्गुणा माधुर्यादयः सन्त्येव यद्यपि, स्पष्टतया वेदेषु माधुर्यादिगुणानां स्थितिर्न प्राप्यते तथापि संकेतेन माधुर्यादिगुणानां स्थितिर्लभ्यत एव। गुणैरेव मानवः सर्वत्रप्रतिष्ठां लभते गुणानां महिमा सर्वैरादृतोवर्तते लोकेऽपि मनुष्यस्य कृते गुणानामावश्यकता शास्त्रेषु प्रतिपादिता वर्तते[1]। लौकिकजीवनस्य कृते दयादाक्षिण्यादि गुणाअपेक्षन्ते काव्येऽपि–अत्यन्तानिवार्यरूपेण गुणानामावश्यकता वर्तते, यतो हि काव्यम् गुणाऽनुसारमेव लोकेऽत्यन्तं रूचिकरं भवति।

ऋग्वेदे गुणप्रयोगः

ऋग्वेदे काव्यगुणानां नामानि लभ्यन्ते तत्र माधुर्यशब्दस्य प्रयोगा बहुधा लभ्यन्ते तेषु केचित् यथा–मधुररसोपेतार्थे "मधुमद्" शब्दस्य प्रयोगोऽपि दृश्यते[2]। मधुरवचनस्यार्थे मधुरशब्दस्योपादानं[4] माधुर्योपेतस्य वाक्यस्य कृते मधुमच्छब्दस्य व्यपदेशश्च ऋग्वेदे वर्तते[3]। काव्येऽपि आह्लादकत्वं, द्रुतिजनकत्वं सरसवाक्ये माधुर्यगुणो भवति माधुर्यगुणानुसारेणैव मधुरा रचना मधुरवाक्यम्–इति व्यवहारो दृश्यते[4]। माधुर्योपेतार्थे मधुमत्-शब्दस्य प्रयोगः[5]। मधुस्वादैर्मृष्टैर्हविभिरित्यर्थे मधुमन्तछब्दस्य ग्रहणमवलोक्यते।

मधुरभाषिजिह्वोपेतार्थे मधुजिह्वशब्दस्य निर्देशः, माधुर्यरसस्यार्थे मधुर-शब्दस्य प्रयोगा ऋग्वेदे अतिशयेन लभ्यन्ते[6]।

अग्निपुराणे गाम्भीर्योपेतार्थे गाम्भीर्यनामगुणः स्वीकृतोस्ति ततः पूर्वं ऋग्वेदेऽपि महत्वेन गाम्भीर्योपेतार्थे 2/6/27, 1/6/19, 1/7/26 इत्यादिमन्त्रेषु गम्भीरशब्दस्य प्रयोगा लभ्यन्ते अन्यैर्दुरवगाहार्थे गभीराशब्दस्य प्रयोगो ऋग्वेद मन्त्रे लभ्यते[7]। भरतमुनेरारभ्य साहित्यशास्त्रे ओजोगुणस्याऽपि गणना

---

1. गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।
   गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः।
   गुणाः गुणज्ञेषु गुणाभवन्ति ते निर्गुणं प्राप्यभवन्तिदोषाः।
   ना०शा०अभिनव भा० द्वितीयोभागः पृ० 1252.
2. मधुमद्दुदोहिथ–ऋ०वे० म० 2-अ० 2 सू० 13.
3. परित्मना मितद्रुरेति होताग्निर्मन्द्रो मधुवचाऋतावा। ऋ०वे० 4/1/6.
4. तत्रैव 3/3/32.
5. तत्रैव 3/4/21.
6. मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवेः। अद्या कृणुहिवीतये। तत्रैव 1/1/24.
   तत्रैव 1/2/11.
7. शतंतेराजनभिषजः सहस्रमुर्वी गभीरा सुमतिष्टेअस्तु इत्यादि। ऋ०वे० 1/2/14.

कृता वर्तते यस्याधिक्यं वीरवीभत्सरौद्ररसेषु क्रमेण भवति। अतिशयसारयुक्तं युद्धसामर्थ्यं शत्रुहननादिरूपपराक्रमं स्वभुजबलं एष्वर्थेषु ओजः शब्दस्य प्रयोगाः सन्ति[1]। वेदे तेजोऽर्थे बलार्थे च ओजः शब्दस्योपादानं वरीवर्ति[2]। माधुर्यगुणवाचक मधुमच्छब्दस्यार्थः स्कन्दभाष्ये, मुद्गलभाष्ये च इत्थं स्वीकृतः।

स्कन्दभाष्ये

मधुरमधुमत् प्रीतिकरं स्तुतिलक्षणं वचः।

मुद्गलभाष्ये

अङ्गनादिगुणयुक्ताय देवाय मधुमद्वचो माधुर्योपेतं वचनं अवोचाम अप्रादिष्म[3]। यद्यपि ऋग्वेदे मधुररसस्य कृते, मधुरवाक्यस्य कृते, मधुरवचनस्य कृते, मधु अथवा मधुर, मधुमद् शब्दस्य प्रयोगाः सन्ति तथापि तस्य रचनायां साहित्य शास्त्रोक्त माधुर्यादिगुणानां विन्यासो बीजरूपेण दृग्गोचरीभवति। साहित्यशास्त्रस्य माधुर्यादिगुणानामुद्भवः केवलं नाट्यशास्त्रात्, नैव न केवलं रामायणमहाभारतात् अपितु माधुर्यादिगुणानामुद्भवः ऋग्वेदसमयादेव समभूदित्यत्र नाऽस्ति सन्देहलेशः। ऋग्वेदे माधुर्यादिगुणानां पृथक्-पृथग् लक्षणानि नैवासन् परं गुणानां स्रोतांसि स्पष्टरूपेण लभ्यन्ते अन्येषां रीति रसालंकारादीनामुद्गमः ऋग्वेदादेव वर्तते इति प्रथमेऽध्याये प्रतिपादितम्। अतो गुणानामुद्भवः ऋग्वेदसमयादेवाऽभवत्।

---

1. ऋग्वेद 2/2/13, 3/2/22, 3/3/32.
2. स भूतयोहे प्रथमाय धायसे ओजोऽभिमानो महिमानमातिरत्। शूरो यो युत्सुतन्वं परिव्यत शीर्षणिद्यां मोहिना प्रत्यमुंचत। तत्रैव 2/2/17.
3. अवोचाम रहूगणा अग्नये मधुमद्वचः द्युम्नैरपि प्रणोनुमः। तत्रैव 1/5/26.

चतुर्थोऽध्यायः
भरतात् प्राक् गुणस्थितिः

रामायणे गुणप्रयोगः

रामायणस्य बालकाण्डे "बाल्मीकिः" उदारत्व, मनोरमत्व, समता, माधुर्य, गुणयुक्तां रचनां रचयामास, अस्माद्–ज्ञायते यत्तृतीयशतक ई० पूर्वमपि गुणाऽनुसारिणी रचना क्रियतेस्म[1]।

महाभारते गुणप्रयोगः

यद्यपि महाभारते साहित्यशास्त्रस्य माधुर्यादिगुणानां विषये न प्रतिपादितं विद्यते तथापि नृपतिर्जनकस्य, चारुदर्शनायाः सुलभायाश्च संवादेन प्रतीयते यद्–महाभारतसमयेऽपि गुणविषयिणी धारणा आसीदिति। तत्र सुलभा राजानं प्रति- कथयति, हे राजन्। त्वया एतत्पृष्टं, कासि त्वं ? कस्य त्वं ? कुतः समागता? शरीरस्थानि इन्द्रियाणि विषयान्प्रत्यक्षमनुभवन्ती अन्यान्यबाह्यगुणा-नामपेक्षां कुर्वन्ति, तान् गुणान् श्रृणु[2]–अस्मिन् शरीरे त्रिंशद् गुणास्सन्ति इमे यत्र भवन्ति तच्छशरीरमिति कथ्यते[3]। इमान् गुणान् विहाय अष्टादशगुणानां विषये सुलभया प्रतिपादितं विद्यते। वाक्यं कीदृशं भवितव्यम् इति कथयन्ती सुलभा निजगाद–अष्टादशगुणैर्युक्तं, युक्तिसङ्गतार्थेन सहितम्–पदसमूहं वाक्यं जायते, तस्मिन् सौक्ष्म, सांख्य, क्रम, निर्णय, प्रयोजनेत्येते पंचप्रकारा

---

1. उदारवृत्तार्थपदैर्मनोरमैस्ततः स रामस्य चकार कीर्तिमान्।
   समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारधीर्मुनिः।।
   रामयणम्–बालकाण्ड 2/42.
2. कासि कस्य कुतश्चेति त्वयाहमभिचोदिता।
   तत्रोत्तरमिदं वाक्यं राजन्नेकमनाः श्रृणु।।
   महाभारतशान्तिपर्वपंचमखण्ड 93/101.
3. विंशतिर्दश चैवं हि गुणाः संख्यानतः स्मृताः।
   समग्रा यत्र वर्तन्ते तच्छरीरमिति स्मृतम्।। तत्रैव 113.

अपेक्षन्ते[1]। "सौक्ष्म" गुणविषये प्रतिपादितं यद् घटोऽयं, पटोऽयं अनेन प्रकारेण वस्तूनां यत्र पृथक्-पृथग् ज्ञानं भवति, एवंविधेषु वाक्येषु यथार्थनिर्णायिका बुद्धिः "सौक्ष्म्य" शब्देनाभिधीयते। भोजदेवेन विद्यानाथेन च महाभारताऽनुसारं (सौक्ष्मनामगुणः स्वीकृतः)।

यद्यपि महाभारते साहित्यशास्त्रस्य माधुर्यादिगुणानां विषये वैशिष्ट्येन प्रयोगो न कृतो विद्यते, तथापि महाभारतोक्तगुणनिरूपणेन प्रतीयते यत्–साहित्यशास्त्रस्य गुणविषयकं चिन्तनमवश्यमेव प्रभावितमभूदिति सम्भाव्यते। येषां गुणानां निरूपणं महाभारते विद्यते तेषां पृथकत्वेन लक्षणानि न निर्दिष्टानि। ये गुणा नाम्नातत्र प्राप्यन्ते तेषां विवेचनमित्थं विद्यते[2]।

1. उपेतार्थः—एष गुणः महाभारतस्य टीकाकारेण श्रीनीलकण्ठेन अर्थव्यक्ति-सदृशः स्वीकृतः[3]।

2. अभिन्नार्थगुणः—गुणोऽयं प्रसिद्धार्थपदान्याकांक्षति, येनायं (प्रसादवत् प्रसिद्धार्थे इति दण्डीकृतेप्रसादगुणेन साम्यमावहति।

3. न्यायवृत्तगुणः—एष गुणः श्लाघ्यविशेषणैर्युक्तो भवति। अग्निपुराणे "औदार्यगुणः" श्लाघ्यविशेषणैः प्रवर्तते[4]।

4. अनधिकगुणः—न अधिकं—अनधिकं संक्षिप्तंवा (संक्षेपेणवाक्यकथनम्) गुणोऽयं अर्थगतौजसः पञ्चभेदेषु द्वितीयभेद "समासस्य" सादृश्यमाकलयति[5]।

---

1. नवभिर्नवभिश्चैव दोषैर्वाग्बुद्धिदूषणैः।
   अपेतमुपन्नार्थमष्टादशगुणान्वितम्।।
   सौक्ष्म्यं सांख्यं, क्रमो चोभौ निर्णयः सप्रयोजनः।
   पंचैतान्यर्थजातानि वाक्यमित्युच्यते नृप।। म०भा०शा०पर्व० पंचम खण्ड 78/79.
2. उपेतार्थमभिन्नार्थं न्यायवृत्तं नचाधिकम्।
   नाश्लक्ष्णं न च संदिग्धं वक्ष्यामि परमंततः।।
   न गुर्वक्षरसंयुक्तं (सम्बद्ध) पराङ्मुख सुखं न च।
   नानृतं न त्रिवर्गेण विरुद्धं नाप्यसंस्कृतम्।।
   न न्यूनं कष्टशब्दंवा विक्रमाभिहितंनच। नशेषमनुकल्पेन निष्कारणमहेतुकम्।।
   तत्रैव शान्तिपर्वणि—मोक्षधर्मपर्वे—श्लोक 87, 88, 89 पृ० 5282.
3. महाभारत नीलकण्ठ कृत टीका पृ० 659.
4. अग्निपुराणे काव्यगुण विवेके—अध्याय 346 पृ० 402.
5. वाक्यार्थे पदाभिधानम्—यथा—दिव्येयं न भवति किन्तु मानुषी इति वक्तव्ये निमिषतीति पदाभिधानम्। का०लं०सू. द्वितीय अ० 3 अ० 2 सू० पृ० 103.

5. श्लक्ष्णगुणः—गुणोऽयं श्रुतिकटुत्वदोषाऽभावे प्रवर्तते। माधुर्यगुण सदृशोऽयं नाम्नैव प्रतीयते। हलायुधकोशेऽपि मनोहरवाक्यस्यार्थे "श्लक्ष्ण" शब्दस्य प्रयोगो विद्यते[1]। मनुस्मृतौ मधुररचनार्थे "श्लक्ष्ण" शब्दः प्रयुक्तः[2]।

6. असन्दिग्धगुणः—सन्दिग्धत्वदोषाऽभावेऽस्य गुणस्य सत्ता प्रस्फुरति।

7. अगुर्वक्षरसंयुक्तः—गुणोऽयं नाम्नैव सौकुमार्यगुणस्य प्रातिनिध्यं करोति।

8. पराङ्मुखसुखकरविपर्ययः—गुणोऽयं नीलकण्ठेन "सौक्ष्म्य" सदृशः प्रतिपादितः।

9. अनृतविपर्ययः—ननृतं सत्यं यत्—तदनृतं, तस्य विपर्ययो याथातथ्यम् याथातथ्यवर्णनेनास्य—अभिप्रायः। अस्य गुणस्य सत्यताप्रतिपादनमुद्देश्यं विद्यते, तत्सत्यं काल्पनिक कथायां नैव भवति। अतः यथार्थनिर्णय एव अस्य सद्भावः संलक्ष्यते।

10. त्रिवर्गविरुद्धविपर्ययः—अस्य सद्भावः रचनायां, धर्मविरुद्धस्य अर्थविरुद्धस्य, कामविरुद्धस्य दोषाऽभावत्वं विद्यते। नीलकण्ठः, इमंगुणं प्रेयोलंकार सदृशमनुमनुते। भोजदेवः "प्रेयस्त्वर्थेत्वभीष्टता" इतिप्रेयोगुणस्य लक्षणं कृतवान्[3]।

11. अन्यूनगुणः—न्यूनाधिकपदानामभावे गुणोऽयं विलसति। भोजदेवेन "अन्यून" गुणस्य स्थाने "सम्मितत्व" गुणस्य प्रतिपादनं विहितम्[4]। न्यूनपदत्वदोषाऽभावेऽपि अस्य गुणस्य सद्भावः प्रतीयते।

12. कष्टशब्दविपर्ययः—गुणोऽयं वामनसम्मतार्थगुणेषु सौकुमार्यगुणान्तर्गत एव विद्यते। कष्टत्वदोषाऽभावरूपोऽयं गुणो महाभारते प्रतिपादितः।

13. विक्रमाभिहितगुणः—अस्मिन् गुणे विशिष्टक्रमो निहितो भवति। क्रमनिर्वाहे सत्यस्य गुणस्य सत्ता प्रस्फुरति। डॉ० शोभाकान्तमिश्रमहोदयेन, वामनोक्त—उदारतागुणे अस्यगुणस्य अन्तः पातो विहितः[5]।

---

1. (श्लिष्—आलिंगने "श्लिषेरच्चोपधायाः" इतिकसत् अकाश्चोपधायाः) "मनोहरं श्लक्ष्णकम्" हलायुधकोशः पृ० 675-688.
2. अहिंसयैवभूतानां कार्यश्रेयोऽनुशासनम्।
   वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या भूतिमिच्छता।। मनुस्मृतौ - 2/159.
3. सं०कं०भ० "आनन्दरामवरूथ" पृ० 25.
4. शब्दार्थौ यत्र तुल्यौ स्तः सम्मितत्वं तदुच्यते। तत्रैव पूर्वभागे श्लोक 27 पृ० 86.
5. का०गु०शा०वि० पृ० 433.

यो वामनेन "मसृणत्वशब्देनोक्तः परं वामनेनोदारताशब्दगुणलक्षणे मसृणत्व-शब्दस्य प्रयोगो न विहितोऽतोऽस्य गुणस्योदारतागुणेन ग्रहणं सुसमीचीनं नैवप्रतिभति, यतोहि वामनेन शब्दगुणेषु श्लेषं विशदयन् "मसृणत्वंश्लेषः"[1], इति कथितं वर्तते नतु मसृणत्वमुदारतेतिप्रतिपादितम्, महाभारतोक्त-"विक्रमाभिहितगुणस्य" यदि वामनसम्मतेषु शब्दगुणेषु उदारतागुणेन ग्रहणमभीष्टं स्यात्तदा", विकटत्वमुदारता"[2] इतिकथनं युक्तियुक्तं प्रतिभाति। बन्धस्य यद् विकटत्वं तदेवोदारताभवति, यत्र रचनागतपदानि नृत्यन्तीव प्रतिभान्ति तत्र विकटत्वं जायते, अतो विक्रमाभिहितगुणस्याभिप्रायः—विकटत्वं प्रति प्रवर्तते।

14. शेषमनुकल्पगुणः—गुणोऽयं वामनोक्तसमाधिगुणान्तर्गतायोनिरित्यर्थस्य नामान्तर एव। यत्र अन्येषां पदानां अध्याहारस्य लक्षणस्यचावश्यकता न स्यात् स अयोनिरर्थो भवति[3]। क्रमनिर्वाहोऽप्यस्मिन् गुणे भवति।

15. वाक्यं निष्प्रयोजनं न स्यात् युक्तिशून्यं च न स्यात् एतदर्थं निष्कारण-महेतुकगुणयोश्च सत्ता स्वीकृता विद्यते। महाभारते माधुर्यश्रुतिसुखत्व-श्रव्यत्वादीनां गुणपदवाच्यानां शब्दानां प्रयोगा लभ्यन्ते[4]। मधुरं, मधुरया गिरा इत्यनेन माधुर्यगुणस्य ग्रहणं विहितम् श्रुतिसुखंश्रव्यत्वमित्यनेन दुःश्रवत्वादीनां दोषाणां परित्यागः माधर्युप्रसादसुकुमारतादीनां गुणानां सद्भावो दृश्यते। उपर्युक्तगुणविवेचनेन ज्ञायते यन्महाभारतोक्तगुणेभ्यः साहित्यशास्त्रस्य गुणविवेचनं प्रभावितं विद्यते।

नारदपुराणे गुणाः—

नारदपुराणे शिक्षानिरूपणप्रसंगे, षडज, ऋषभ, गान्धार, मध्यम, धैवत निषाद एषां सप्तस्वराणां वर्णनसमये गानस्य दशभेदाः प्रतिपादिताः[5]। रक्तं

---

1. का०लं०सू० प्रथम अ० तृतीय अधि० 11 सू०।
2. तत्रैव 1/3/23.
3. तत्रैव 2/3/7-8.
4. श्रव्यं श्रुतिसुखं चैव पावनं शीलवर्धनम्। 62-52.
   पाण्डवं प्रत्युवाचेदं स्मयन् मधुरया गिरा। म०भा० सभापर्व 8/1.
   उवाच चैनं मधुरं सान्त्वपूर्णमिदंवचः। तत्रैव 41/1.
   इदं होवाच वचनं मधुरं मधुसूदनः। म०भा० उद्योगपर्व 13/1.
5. यक्षान्निषादः प्रीणाति भूतग्रामंच धैवतः।
   गानस्य तु दशविधा गुणवृत्तिस्तु तद्यथा।।
   नारदपुराणम् द्वितीय खण्ड 43 श्लोक पृ० 224.

पूर्ण, अलंकृतं, प्रसन्नं, व्यक्तं, समं विक्रुष्टं, श्लक्ष्णं, सुकुमारं, मधुरमित्येते दशगुणाः गुणवृत्तिशब्देनोक्ताः[1]।

एषु "पूर्ण" नामाभिधाना गुणवृत्तिः कौटिल्यशास्त्रोक्तपरिपूर्णतागुणेन सह साम्यमाकलयति। प्रसन्नं, मधुरं, व्यक्तं, समं, सुकुमारमेते–पंचगुणा- भरतादिभिः स्वीकृतप्रसादमाधुर्यार्थव्यक्तिसमतासौकुमार्यगुणैःसह क्रमेण साम्यं विभ्रति।

नारदपुराणस्याऽलंकृतश्लक्ष्णाभिधेयौ द्वावपि गुणौ, क्रमेण रमणीयताया अलंकारस्य च पर्यायभूतौ स्तः। अनेन प्रतीयते यन्नारदपुराणेऽपि साहित्यशास्त्रोक्तगुणानां निरूपणं विद्यते। यद्यपि पुराणे गुणानां नामानि गानप्रकाराणां गुणवृत्तिरूपेण समुपन्यस्तानि तथापि–प्रतिपादितगुणानां श्लेषादिगुणैःसह स्फुटतया सम्बन्धः स्थापयितुं शक्यते।

विष्णुधर्मोत्तरपुराणम्–

अस्मिन्पुराणे, कान्तिलावण्यमाधुर्यगुणानां प्रयोगाः शृंगार रसे प्रतिपादिताः[2]।

अग्निपुराणेगुणमहत्वम्–

अग्निपुराणे गुणमहत्वं इत्थमेव प्रतिपादितमस्ति यथाऽरमणीयस्त्रीणां–शरीरे रत्नहारो भारस्येव कारणं भवति तथैव अलंकृतमपि माधुर्यादिगुणरहितं काव्यं प्रीतिकरं न जायते[3]। अस्मादेतत् प्रतीयते यदलंकारा गुणनिर्भराः, सति गुणेऽलंकाराउत्कर्ष हेतवोऽसतिगुणे अलंकाराः केवलं भारभूताः। एतेन गुणानामलंकारापेक्षयाधिकतरं महत्वं प्रतीयते। गुणा लालित्यस्थानीया इत्यनेन गुणानां काव्ये सौन्दर्याधायकत्वं संजायते। उपर्युक्तप्रकारेण गुणानां यन्महत्वमभिहितमस्ति तेन यद्वामनस्य काव्यशोभोत्पादकत्वगुणधर्मस्य प्रभावा

---

1. रक्तं पूर्णमलंकृतं प्रसन्नं व्यक्तं विक्रुष्टं, श्लक्ष्णं समं सुकुमारं मधुरमिति गुणास्तत्र। तत्रैव
2. तत्र यत्कान्तिलावण्यलेखामाधुर्यसुन्दरम्।
   विदग्धवेशाभरणं शृंगारे तु रसे भवेत्।।
   विष्णुधर्मोत्तरपुराणम् तृतीय खण्ड 42/1 पृ० 336.
3. अलंकृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत्।
   वपुष्यललिते स्त्रीणां हारो भारायते परम्।। अ०पु० 346/1.

अग्निपुराणेऽपि वर्तते यतोहि वामनेनापि ओजः प्रसादादिगुणरहितं काव्यं तथैव रमणीयं न भवति यथा यौवनहीनाया अङ्गनाया वपुषि भूषणानि रुचिकराणि नैव भवन्ति[1]। भोजदेवेनापि गुणरहितस्य काव्यस्य काव्यत्वनिषेधः प्रतिपादितः[2]।

गुणाः न केवलं दोषाभावरूपाः

भरतोक्तगुणानां दोषाभावमात्रत्वं निराकुर्वता अग्निना कथितमस्ति यद्दोषाभावमात्रे गुणा निरूपिता वर्तन्ते तन्न, यतः श्लेषादयो गुणा गूढार्थाद्या दोषाः पृथक् कृताः सन्ति[3]। लोकेऽपि नहि काणत्वादिदोषाणांभावे शरीरे कश्चिद् गुणः संभवति। विद्याबुद्ध्यादिगुणानांचभावे नहिकश्चित् काणत्वादि दोषो लक्ष्यते अर्थात् यथा शरीरे काणत्वादिदोषाणां, विद्याबुद्ध्यादिगुणानांच पृथक्-पृथक् स्थितिस्तथैव काव्येऽपि श्लेषादिगुणानां गूढार्थादिदोषाणां च पृथक्-पृथक् स्थितिः, दोषाः काव्यत्वविघटकाः, गुणाः काव्यत्वविधायका अतो दोषाभावे गुणव्यवहारः न समीचीनः। यथा वामनेन गुणविपर्यया दोषा[4] भवन्ति, तथैव अग्निपुराणेनापि निगदितम्। दोषाभावमात्रे गुणा इति कथनेन गुणानां केवलं निषेधरूपत्वात् महिमा अपचीयते, परं काव्ये तु गुणानां महत्त्वं स्वातन्त्र्येण—उत्कर्षकारकं वर्तते। इति अग्निपुराणे सङ्केतितं प्रतिभाति।

गुणलक्षणम्—

यः काव्ये अधिकां शोभां जनयति—असौगुणः एवं गुणस्य सामान्य-लक्षणमभिधाय सामान्यविशेषभेदेन द्वौभेदौ समुदीरितौ[5] गुणाअधिक-शोभोत्पादक धर्मा वर्तन्ते—एतद्गुणलक्षणं वामनगुणलक्षणमनुसरति। वामनेन काव्यशोभोत्पादक धर्माणां गुणत्वेन[6], अलंकाराणां चातिशयशोभोत्पादकत्वेन प्रतिपादनं कृतम्[7]।

---

1. का०सं०सू० 3/1/2.
2. सं०कं०भ० 2/59.
3. न च वाच्यं गुणो दोषो भाव एव भविष्यति।
   गुणाः श्लेषादयो दोषा गूढार्थाद्याः पृथक् कृताः।। अ०पृ० 346/2.
4. गुणविर्पयात्मानो दोषाः। का०लं०सू० 2/1/1.
5. यः काव्ये महतीं छायामनुगृह्णात्यसौ गुणाः।
   संभवत्येष सामान्यो वैशेषिक इति त्रिधा। अ०पु० 346/3.
6. का०लं०सू० 3/1/1.
7. तत्रैव 3/1/2.

सामान्यगुणस्वरूपं तद्भेदाश्चः—

सर्वसाधारणीभूतः सामान्यगुणो भवति[1], सर्वत्र समग्रासु रचनासु, सर्वेषु रसेषु च साधारणरूपेण विद्यमानं सामान्यमाचक्षते। शब्दसामान्य, अर्थसामान्य, शब्दार्थसामान्यभेदेन सामान्यगुणः त्रिविधो जायते[2]। काव्ये क्वचिच्छब्दस्य सामान्यत्वं क्वचिदर्थस्य, क्वचिदुभयस्य सामान्यत्वं दरीदृश्यते।

काव्यस्य—इदमित्यर्थे अण् प्रत्ययेन काव्यशब्दो निष्पन्नः, काव्यसम्बन्धि शब्दरूपं शरीरमाश्रयते स शब्दस्य गुणः। स काव्यस्य शब्दमयशरीरस्याश्रितो भवति। शब्दगुणाः सप्तविधा वर्तन्ते- श्लेषः, लालित्यं, गाम्भीर्यं, सुकुमारता, उदारता, सत्यं, यौगिकमिति भेदेन[3]। अग्निपुराणे शब्दगुणाः सप्तधा निरूपितास्सन्ति परं तत्र पंचानामेव शब्दगुणानां स्वरूपं प्रतिपादितं विद्यते सत्ययौगिकगुणयोः स्वरूपं नाभिहितं प्रत्युत शब्दगुणेषु—अगृहीतौजोगुणस्य लक्षणं निरूपितमस्ति। सम्भवतः सत्ययौगिकेत्यनयोर्द्वयोर्गुणयोः स्थाने अग्निपुराणकारेणोजोगुणोऽभिमतः स्यात् अनयोर्विषये निर्भ्रान्ताधारणा न कस्यापि विदुषो लक्ष्यते। अस्मिन् विषये एका अन्या शङ्का-उदेति अग्निपुराणे अर्थगुणानां, षड् भेदाः, शब्दार्थोभयगुणानां षड् भेदाः, शब्दगुणानां सप्तभेदप्रतिपादनमन्तरापि स्वरूपनिरूपण समये सत्ययौगिकगुणयोर्लक्षणे कथ नं प्रतिपादितमतः शब्दगुणानामपि षड् भेदा भवितव्याः। यदि सत्यगुणयौगिक-गुणयोरोजोगुणेन ग्रहणं स्यात्तदा शब्दगुणा षड्विधा भवन्ति। संभाव्यते यत् सत्ययौगिकी गुणयोर्ग्रहणमभिमतं स्यात्, अथवा यौगिकीगुणस्यैवौजो गुणेन ग्रहणं स्यात्तदा सत्यशब्दस्यार्थो यथार्थः स्यात्तदा अस्यार्थो यौगिकी गुणः सत्य इव समभवत्। अर्थात् येन प्रकारेण सत्यस्य सर्वत्र विजयो भवति सत्यमेव सर्वत्र प्रत्यक्षरूपेण विराजते, पुरः प्रत्यक्षायमानं सर्वं वस्तुजातं सत्यमेव वर्तते तथैव यौगिकी गुणस्यापरपर्यायभूतो आब्रह्मस्तम्बपर्यन्तं सर्वेषां पदार्थानामस्तित्वं ओजोगुणस्योपरिआधृतोऽस्ति। अस्यां दशायां शब्दगुणानामपि षड्विधत्वं भवितुर्महति। गुणाः शब्दस्य सप्तधा इत्यस्य स्थाने गुणाः शब्दस्य षड्विधा इति पाठो भवितव्यः परं षड्विधा इति पाठो न वर्तते अस्मात् सन्देह विषयः पूर्ववदेव। एवमपिसम्भाव्यते यत्—मूलग्रन्थस्याग्निपुराणस्य एष पाठः

---

1. सर्वसाधारणीभूतः सामान्य इति मन्यते।
2. शब्दार्थमुभौप्राप्तः सामान्यो भवति त्रिधा।। अ०पु० 346/4.
3. शब्दमाश्रयते काव्यं शरीरं यः स तद्गुणः।
   श्लेषो लालित्यगाम्भीर्यसौकुमार्यमुदारता।।
   सत्येव यौगिकी चेतिगुणाः शब्दस्य सप्तधा।। अ०पृ० 346/5.

कुत्रचिद् लुप्तः स्यात् अथवा मार्जितः स्यात् पश्चादन्येन केनचिद् विदुषा अवशिष्टपाठानुसारं "सत्येव यौगिकीचेति गुणाः शब्दस्य सप्तधा" इति पाठो धारितः स्यात्। डॉ० नगेन्द्रेण अग्निपुराणस्य शब्दगुणानां षड्विधत्वं परिगणितम्[1] यत् युक्तं प्रतिभाति। यावत्कालपर्यन्तं सत्ययौगिकीगुणयोः स्वरूपं न भविष्यति तावत् अग्निपुराणे शब्दगुणानां सप्त संख्या कथं स्वीकृतिं व्रजेत्। यस्य स्वरूपं समक्षं न स्यात्-तस्य गणनापि निष्फलैव प्रतिभाति। पूर्वाचार्यैरपि सत्ययौगिकीगुणयोर्लक्षणविषये न किमप्यभिहितम् येन लक्षणनिर्धारणे सौकर्यं संभवेत्।

1. श्लेषः

शब्दानां सुश्लिष्टसन्निवेशत्वात् श्लेषगुणोभवति[2]। सुश्लिष्टसन्निवेशेन पृथक्-पृथक् पदानामेकपदवत्प्रतीतिर्जायते यत्रसन्धिसौकर्यैणैकस्थाने एव वर्णानां सन्निवेशत्वादेकपदवत्प्रतीतिर्लक्ष्यते तत्राग्निपुराणकारमते शब्दश्लेषः प्रथमोगुणः। श्लेषगुणः वामनोक्तशब्दश्लेषगुणात् पूर्णरूपेण प्रभावितो विद्यते यतो वामनेन श्लेषगुणस्य लक्षणं मसृणत्वं कृतम्[3]। मसृणता तत्रैव राजते यत्र बहूनां पदानामेकपदवत्प्रतीतिर्जायते, एवं विधा प्रतीतिरग्निपुराणस्य श्लेषगुणे दृश्यते। अग्निपुराणोक्तभोजनिरूपितशब्दश्लेषस्य शब्दसाम्यमपि वर्तते[4]।

2. लालित्यम्:

यत्र व्याकरणनियमानुसारं गुणादेशादिभिः पदस्य सम्बद्धाक्षराणां सन्धिर्नस्यात्तत्र लालित्यगुणः[5]। अस्मिन् गुणे पदानि पृथक्-पृथक् सन्धि-रहितानि प्रतीयन्ते, अस्य गुणस्य माधुर्यगुणवत् समासेऽपि विरहो दृश्यते। अग्निपुराणस्य लालित्यगुणो वामनस्य पृथक् पदत्वरूपमाधुर्यगुणात् पृथक् भूतो न वर्तते[6]। भोजदेवेनापि माधुर्यगुणे पृथक्पदत्वमेव स्वीकृतम्[7]।

---

1. भारतीय काव्यशास्त्र की भूमिका पृ० 50.
2. सुश्लिष्ट सन्निवेशत्वं शब्दानां श्लेष उच्यते। अ०पु० 346/6.
3. का०लं०सू० 3/1/11.
4. सं०कं०भ० 1/66.
5. गुणादेशादिना पूर्वं पदसंबद्धमक्षरम्।
   यत्र सन्धीयते नैव तल्लालित्यमुदाहृतम्।।अ०पु० 346/7.
6. का०लं०सू० 3/1/21.
7. सं०कं०भ० 1/68.

सामान्यशब्दगुणेषु माधुर्यगुणस्य नाम अग्निपुराणकारो न जग्राह, लालित्यगुण-विवेचनात् ज्ञायते यदनेन गुणेनैव माधुर्यगुणस्य गतार्थतां स्वीचकार।

3. गाम्भीर्यम्

विशिष्टलक्षणस्य य उल्लेखः स उत्तानशब्दैर्ज्ञेयः[1] विशिष्ट्विशेषणैर्यल्ल-क्षणं लिख्यते तद्विशिष्टलक्षणोल्लेखः, असाधारणलक्षणानामुल्लेखः उच्छ्राय–शब्दैर्लेख्यः एवंविधंवर्णनं "आर्या" गाम्भीर्यगुणोपेतं कथयन्ति आर्याति-रिक्ता विद्वांसो गुणमिमं गाम्भीर्यशब्देनैव व्यवहरन्ति। विशेषतोऽस्मिन् गुणे शब्दानां प्रयोग उच्छ्रायत्वेन भवति, उच्चभावप्रतिपादकशब्दानां प्रयोगोऽभिमतः, गाम्भीर्यगुणस्यलक्षणे "शब्दताम्" इत्यस्य स्थाने डॉ० ह्वी० राघवनानुसारं सुशब्दताम् पाठो वर्तते सम्भवतः राघवनेन एष पाठः शृंगारप्रकाशोक्तसुशब्दता गुणाधारेण स्वीकृतः शृंगारप्रकाशे-सुप्तिङ् व्युत्पत्तिः सुशब्दतागुणेन कथिता[2]।

4. सुकुमारता

अनिष्ठुराक्षराणां प्रयोगेण सुकुमारता गुणो विभाति[3]। अस्मिन्[4] गुणे कोमलवर्णानां प्रयोग अपेक्षते। आचार्य दण्डिकृतसुकुमारतागुणलक्षणस्य अग्निपुराणोक्तगुणलक्षणे पर्याप्तरूपेण प्रभावो विद्यते। वामनेन "अजठरत्वं" सौकुमार्य[5] मिति गुणस्य यल्लक्षणं विहितम् तदेव लक्षणं रूपान्तरेण अग्निपुराणे समावेशितम्। साक्षात्तद्रूपेण सुकुमारतागुणस्य लक्षणं दण्डिभोजदेवयोः साम्यमाकलयति[6]।

5. औदार्यम्

श्लाघ्यविशेषणैर्युक्ता उत्तानपदता औदार्यगुणोपेता भवतीति[7]। प्रस्तुतवस्तुप्रशंसापरैर्विशेषणैरुपलक्षितं प्रशस्तार्थप्रतिपादकपदैः समन्वितं वाक्यं

---

1. विशिष्टलक्षणोल्लेखलेख्यमुत्तानशब्दकम्।
   गाम्भीर्यं कथयन्त्यार्यास्तदेवान्येषु शब्दताम्।। अ०पु० 346/8.
2. Bhojas Sringara Prakasha Vol. I, P. 328.
3. शृंगारप्रकाशः—नवमप्रकाशे पृ० 343.
4. अनिष्ठुराक्षरप्रायः शब्दतासुकुमारता।। अ०पु० 346/9.
5. का०द० 1/69.
6. का०लं०सू० 3/1/22.
   शृंगारप्रकाशः नवम प्र०पृ० 341.
7. उत्तानपदतौदार्य्ययुतश्लाघ्यैर्विशेषणैः। अ०पु० 346/9.

शब्दगतौदार्यं गुणयुक्तं वरीवर्ति। अग्निपुराणोक्त "औदार्यगुणः" कस्यचिन्मतानुसारं निरूपितौदार्यगुणस्यस्वरूपवत् "काव्यादर्शे"[1] विद्यते। काव्यादर्शस्य औदार्यगुणो "अग्निपुराणे" ईषत्परिवर्तनं सूचयति। भोजदेवेनापि उदात्तत्वगुणलक्षणं श्लाघ्यविशेषणैः स्वीकृतम्[2]। भोजेनोदारतागुणलक्षणं अस्माद्भिन्नत्वेन निरूपितम्।

ओजः

अस्य गुणस्य विषये सामान्यगुणस्वरूपे तद्भेदविवेचने च प्रदर्शितं यदौजोगुणस्य गणना सामान्यशब्दगुणनिरूपणे न विहिता। सम्भवतः सत्य-यौगिकीगुणयोरोजोगुणेनैव गतार्थता अभीष्टा स्यादिति विभावयितुं ओजोगुणस्य पृथगरूपेण स्वरूपनिर्धारणं कृतम्।

ओजोगुणः समासाधिक्ये भवति, एष गुणः पद्यादिषु जीवितत्वेन[3] वर्तमानः छन्दोबद्धकाव्यानाम् गद्यकाव्यानां चम्पूकाव्यानांच प्राणरूपेण विद्यते ब्रह्मस्तम्बमभिव्याप्य एकेन—ओजोगुणेन पुरुषपराक्रमं वर्णयितुं शक्यते। दण्डिना ओजोगुणो गद्यस्य जीवनं प्रतिपादितः, गौडा ओजोगुणस्य प्रयोगं पद्येऽपि स्वीकुर्वन्ति[4] परमग्निपुराणे पद्यस्य प्राणा ओजोगुणो निरूपितः, आदिपदेन गद्येऽपि अस्य गुणस्य सद्भावः प्रकटितः परं प्राधान्येन पद्यस्येव संकेतः कृतः।

एकस्मिन् स्थाने गद्यादिजीवितम् इति पाठो वर्तते, संभाव्यते यदेषपाठः संशोध्य लिखितः स्यात्[5]। भोजदेवेनापि समासभूयस्त्वमेवोजोगुणस्य लक्षणं कृतम् वर्तते[6]।

सम्प्रति सामान्यार्थगुणानां विवेचनं क्रियते—

अर्थगुणलक्षणम्, तद्भेदाश्च

यदा वर्ण्यमानविषयस्योत्कर्षरूपेणार्थप्रतीतिः स्यात् तत्राऽर्थगुणो भवति[7]।

---

1. काव्यादर्शः 1/79.
2. श्रृंगारप्रकाशः नवमप्रकाशे पृ० 342.
3. ओजः समासभूयस्त्वमेतत्पद्यादिजीवितम्।
   आब्रह्मस्तम्भपर्य्यन्तमोजसैकेन पौरुषम्।। अ०पु० 346/10.
4. काव्यादर्श 1/80.
5. अ०पु० काव्यशास्त्रीय भागः पृ० 83.
6. श्रृं०प्र० नवम प्र० 342 पृ०.
7. उच्यमानस्य शब्देन येन केनापि वस्तुनः।
   उत्कर्षमावहन्नर्थो गुण इत्यभिधीयते।। अ०पु० 346/11.

अग्निपुराणे अर्थगुणानां षड्भेदाः निरूपितास्सन्ति माधुर्यं, संविधानं, कोमलत्वं, उदारत्वं, प्रौढिः, सामयिकत्वं च[1]।

माधुर्यम्–

अर्थगतमाधुर्यगुणोस्तत्र भवति यत्र क्रोधेर्ष्याद्यवस्थास्वपि गाम्भीर्यगुणानुसारमुच्चस्वरेण प्रयुक्तानां पद्यानामभावः, धैर्यस्य च समावेशः स्यात्[2]। अस्मिन् क्रोधेर्ष्यादिसत्स्वपि धैर्यस्यावलम्बनं निरूपितं वर्तते, लोकव्यवहारेपि एतद्–दृश्यते, केचिज्जनाः क्रोधावस्थायामपि चातुर्येण मधुरं सम्माषन्ते स्वक्रोधं नैव व्यञ्जयन्ति अत्रापिमाधुर्यगुणलक्षण एष अभिप्रायः सूचितो वर्तते। अस्य गुणस्य काव्यगुणेषु गणना नैवोचिता। अत्रैतदपि सम्भाव्यते यदस्य गुणस्य शब्दगुणेषु गणनामविगणय्य अर्थगुणेषु गणना कृता यतोहि शब्देषु यदि क्रोधेर्ष्यादीनां प्रयोगो भवति भवेन्नाम, परमर्थे, अर्थप्रतिपादनसमये धैर्यस्यावलम्बनं वरम्। भरतेनमाधुर्य गुणलक्षणे अनुद्वेजकता प्रतिपादितासीत्[3] तदैवानुद्वेजकत्वं–अभिनवगुप्तेन वचनगतवैचित्र्यत्वेन माधुर्यं प्रतिबोधितम्[4]। भोजस्य अग्निपुराणस्य च इमौ द्वावेवगुणौ समानभावेन भावितौ वर्तते[5]।

2. संविधानम्:

अभीष्टवस्तुनः प्राप्त्यर्थं नितरां प्रयत्नः संविधानगुणो उच्यते। भोजेनार्थगुणश्लेषस्य निरूपणं संविधानसुसूत्रता एभिः शब्दैः कृतम्[6]। पुराणे तु परिकरशब्दस्य प्रयोगो वर्तते, अतोऽस्य मते कटिबद्धरूपेण कार्यसम्पादनम् संविधानाख्यो गुणो भवति। भोजेन संविधानसुसूत्रतास्वरूपश्लेषगुणस्योदाहरणे निर्दिष्टं यदेकस्मिन्नैवासने समुपविष्टौ प्रेयस्यौ प्रियतमेन एका चक्षुर्निमीलनकेलिकर्मणा अपरा मुखचुम्बनेन रंजिता, इयमेव कार्यसम्पादनार्थं–

---

1. माधुर्यं सम्बिधानं च कोमलत्वमुदारता।
   प्रौढ़िः सामयिकत्वं च तद्भेदाः षट् चकाशति।। अ०पु० 346/12.
2. क्रोधेर्ष्याकारगाम्भीर्यान्माधुर्यं धैर्यगाहिता। तत्रैव० 346/13.
3. नाट्यशांस्त्रम् 16/104.
4. पुनःपुनरप्युक्तमर्थजातं यस्माद्धेतोरपनीतमवगाहनेन वैरस्यं तद्वचनवैचित्र्यात्मकं माधुर्यमर्थगुणा वचनान्तराभिधतया हि स एवार्थो विचित्रो भवति। तत्रैव अ०न०भा०प० 1329.
5. संविधानं परिकरः स्यादपेक्षितसिद्धये। अ०पु० 346/13.
6. शृंगारप्रकाशस्य नवमे प्र०पृ० 344.

रस्यायोजना विद्यते[1]—ईदृशी योजनाएवसंविधान गुणशब्देन अग्निपुराण-कारेणोदिता। इष्टसम्पादयितुं अमानवीयशक्तेः प्रयोगेन संविधानगुणोभवति[2]। अस्य गुणस्याऽत्र स्वतन्त्रा भावना परिलक्ष्यते।

3. कोमलत्वम्:

क्लिष्टत्वदोषरूपं काठिन्यंविहाय, प्रयत्नेन शब्दविन्यासं तिरस्कृत्य, यस्यां रचनायामनायासेन मृदुतायाः समावेशो भवति सा कोमलाख्यगुणोपेता जायते[3]। अग्निपुराणोक्त एष कोमलाख्योऽर्थगुणः सामान्यशब्दगुणसुकुमारता-गुणेन सदृशोस्ति[4]। सुकुमारताशब्दगुणस्य लक्षणे अनिष्ठुराक्षरशब्दस्य प्रयोगोवर्तते, इह तु काठिन्यविनिर्मुक्तप्रयोगो वर्तते अग्निपुराणोक्तशब्दगत-सुकमारतागुणस्य तथा अर्थगतकोमलत्वगुणस्य च सूक्ष्मरूपेणायमेव भेदो वर्तते, यत् कोमलत्वगुणे विशेषेण मृदुतायाः समावेशो भवति। "कोमलत्व" गुणस्य लक्षणे यः काठिन्यस्याभावो निरूपितो वर्तते तस्य दण्डिनः सुकुमारतागुणेन केनचिदंशेन साम्यं विद्यते। भोजदेवेनापि अर्थगतसौकुमार्य-गुणलक्षणे निष्ठुरताया अभावो निरूपितो वर्तते[5]।

4. उदारत्वम्:

यत्र स्थूललक्ष्यं प्रतिपादयितुं प्रवृत्तिर्लक्ष्यते तथा आशयस्य सौष्ठवं स्फुटरूपेण प्रतीयते तत्र उदारतागुणो वरीवर्ति[6]। यदस्य गुणस्य लक्षणं भरतोक्तउदारतागुणेनांशतः साम्यमाकलयति, अनेकार्थविशेषप्रतिपादकैः सौष्ठवसंयुतैः सूक्तैश्चित्रार्थैश्च, उदात्तोपरनामोदारतागुणस्य लक्षणं कृतम्[7], अग्निपुराणे उदारत्वगुणलक्षणे समागतस्य (आशयस्याति सौष्ठवम्) अस्य पदस्य भरतोक्त—(सूक्तैः सौष्ठव संयुक्तैः) पदैः सह—अंशतः साम्यं वरीवर्ति। अस्मिन् गुणे लक्ष्ये स्थूलेऽपि अभिप्रायोऽतिरमणीयो भवतीति।

---

1. दृष्ट वैकासनसंस्थिते प्रियतमे इत्यादि—शृ०प्र०पु० 344.
2. अग्निपुराण का काव्यशास्त्रीय भाग पृ० 83.
3. यत् काठिन्यविनिर्मुक्तसन्निवेशविशिष्टता।
   तिरस्कृत्यैवमृदुता भाति कोमलतेति सा।। अ०पु० 346/14.
4. अग्निपुराण 346/9.
5. शृं०प्र० नवम प्र० पृ० 345.
6. लक्ष्यते स्थूललक्ष्यत्वप्रवृत्तेर्यत्र लक्षणम्।।
   गुणस्य तदुदारत्वमाशयस्याति सौष्ठवम्।। अ०पु० 346/15.
7. नाट्यशास्त्रम् 16/111.

5. प्रौढिः

यत्राभीष्टार्थं संपादयितुं प्रौढा युक्तयो भवन्ति सः प्रौढिनाम गुणो भवति[1], (अर्थात् स्वाभीष्टार्थस्य निर्वाहस्योपपादिका प्रौढाः युक्तयः प्रौढिगुणेनोदाहृताः) भोजेनार्थगुणप्रौढिर्विवक्षितार्थनिर्वाहे स्वीकृता[2]।

6. सामायिकत्वम्:

यत्र स्वातन्त्र्येण पारतन्त्र्येण वा बाह्येनान्तरिकयोगेन च अर्थस्य व्युत्पत्तिः प्रदर्श्यते तत्र सामायिकत्वगुणो दृश्यते[3]। अधोल्लिखितप्रकारेणास्य सामायिकत्व गुणस्याऽवस्थितिर्धारयितुं शक्यते। तन्त्रणं–तन्त्रं राष्ट्रं, स्वस्य तन्त्रं स्वतन्त्रं स्वराष्ट्रं तस्य अन्येषां तन्त्रं राष्ट्रं अन्यतन्त्रं तस्य अथवा तन्त्रं शास्त्रम् स्वतन्त्रस्य–स्वशास्त्रस्य, अन्यतन्त्रस्य अन्येषां शास्त्रस्य बाह्यान्तः, बाह्यं बहिर्भवा प्रवृत्तिः अन्तःसमाःआन्तरिकी प्रवृत्तिस्तयोर्योगतः-सम्बन्धार्थस्य व्युत्पतिर्विशिष्टा उत्पत्तिर्ज्ञानं यत्र, तत्र सामायिकगुणो भवतीति। (अर्थात् स्वदेशीयानां विदेशीयानां च विदुषां स्वेषु स्वेषु शास्त्रेषु बहिर्भवाभिः अन्तःकरण-सम्बन्धिनीभिः प्रवृत्तिभिरर्थविषयकं विशिष्टंज्ञानं सामायिकत्वं परिलक्ष्यते।

शब्दार्थोभयसामान्यगुणाः

शब्दार्थयोरुपकारकाः शब्दार्थोभयगुणाः, प्रसादः, सौभाग्यं, यथासंख्यं, प्रशस्तता, पाकः, रागः इति भेदेन च षड्विधाः प्रतिपादिताः[4]।

1. प्रसादः–प्रसिद्धार्थपदानां प्रयोगेण प्रसादगुणो भवति[5]। अस्मिन् अप्रसिद्धार्थकपदानां प्रयोगस्य निषेधो विद्यते यतः प्रसिद्धार्थकपदैर्झटित्यर्थ प्रतीतिर्जायते, सा झटित्यर्थप्रतीतिः प्रसादगुणेऽभिमतः। अग्निपुराणोक्तप्रसाद-

---

1. अभिप्रेतं प्रतियतो निर्व्वाहस्योपपादिकाः।
   युक्तयो हेतुगाम्भीर्यैः प्रौढा प्रौढिरुदाहृता।। अग्नि० पु० 346/16.
2. शृ०प्र० न० प्रकाश पृ० 347.
3. स्वतन्त्रस्यान्यतन्त्रस्य बाह्यान्तः समयोगतः।
   तत्र व्युत्पत्तिरर्थस्य या सामायिकतेतिसा।। अ०पु० 346/17.
4. शब्दार्थावुपकुर्वाणो नाम्नोभयगुणः स्मृतः।
   तस्य प्रसादः सौभाग्यं यथासङ्ख्यं प्रशस्तता।।
   पाको राग इति प्राज्ञैः षट्प्रपंचविपश्चिताः।।
5. सुप्रसिद्धार्थपदता प्रसाद इति गीयते। तत्रैव 346/19.

गुणलक्षणं दण्डिनः प्रसादात् पूर्णरूपेण प्रभावितं विद्यते[1], भोजदेवेनापि प्रसिद्धार्थ-पदतामेव प्रसादगुणस्य लक्षणं कृतम्[2]।

2. सौभाग्यम्—यस्मिन् वाक्ये वर्णनीयवस्तुनो महत्त्वं प्रतीतिजनकं स्यात्तत्र सौभाग्यगुणो राजते स सौभाग्यगुण उदारत्वगुणेनाभिधीयते[3]। एतल्लक्षणं दण्डिन उदारतागुणमनुकरोति[4]। स्वयमपि अग्निपुराणकारेण स्वीकृतं वर्तते यत् सौभाग्यगुणं विद्वांसोदारत्वमितिनामान्तरेण कथयन्ति। कुन्तकेन सुकुमार-विचित्रमध्यममार्गाणां द्वौ साधारण गुणौ निरूपितौ तयोरेकः सौभाग्यगुणोऽस्ति तस्यानुसारेण शब्दाद्युपादेयवर्गे कविप्रतिभा सावधानतया प्रवर्तते[5]। अस्मात् प्रतीयते यदग्निपुराणोक्तसौभाग्यगुणः कुन्तकस्य सौभाग्यगुणेन सह साम्यं विभर्ति।

3. यथासंख्यम्—अनुद्देशेन सामान्यस्य कथनं यथासंख्यगुणस्य लक्षणम्[6]। "शत्रु मित्रं विपत्तिं च", अत्र एषां त्रयाणामुपादानं वर्तते परमत्र जय, रञ्जय, भञ्जय, आभिः क्रियाभिः सह अनुद्देशेन सम्बन्धो जायते—शत्रुञ्जय, मित्रं रञ्जय, विपत्तिं भञ्जय इति अर्थज्ञानं पश्चाद् भवति[7]। यथासंख्यगुणेऽपि पूर्वप्रतिपादित पदार्थस्य पश्चात्क्रियादिभिर्ज्ञानं भवति। अग्निपुराणोक्त-यथासंख्यगुणो दण्ड्युक्तयथासंख्यालंकारेण साम्यं विभर्ति, यथासंख्यालंकारे पूर्वप्रतिपादितपदार्थानां यथाक्रमेण पश्चात्कथितैः पदार्थैः सह सम्बन्धो जायते[8]।

4. प्राशस्त्यम्—उचितसमये वर्णनार्हस्य कठोरस्यापि वस्तुनोऽतिमृदुलेन-शब्देनोपर्णनं प्राशस्त्यमित्युच्यते[9]। एषगुणो दण्डिवामननिरूपित-सुकुमारतागुणात् भिद्यते दण्डिवामनयोः सुकुमारतागुणलक्षणे क्रमेण अनिष्ठुर, अपारुष्यशब्दानां प्रयोगोऽस्ति[10], तत्र एतन्नैव कथितं यद्-दारुणविषयवर्णने

---

1. का०द० 1/45.
2. श्रृं०प्र० सप्तम पृ० 141.
3. उत्कर्षवान्गुणः कश्चिद्यस्मिन्नुक्ते प्रतीयते।
   तत्सौभाग्यमुदारत्वं प्रवदन्ति मनीषिणः।। अ०पु० 346/20.
4. का०द० 1/76.
5. वक्रोक्तिजीवितम् 1/55.
6. यथासंख्यमनुद्देशः सामान्यमतिदिश्यते। अ०पृ० 346/21.
7. शत्रुंमित्रंविपत्तिं च जयरञ्जयभञ्जय।
8. काव्यादर्श 2/273.
9. समये वर्णनीयस्य दारुणस्यापि वस्तुनः।
   अदारुणेन शब्देन प्राशस्त्यमुपवर्णनम्।। अ०पु० 346/21-22.
10. का०अ० 1/69 का०ल०सू० 3/2/12.

अदारुणप्रयोगोऽपेक्षते परं "अग्निपुराणे" दारुणार्थवर्णने कोमलशब्दानां प्रयोगे प्राशस्त्याख्यो गुणः स्वीकृतः।

5. पाकः—यत्र वर्ण्यविषयस्य समुन्नतापरिणतिस्स्यात्तत्र पाकगुणो विराजते। अर्थाद् यत्रोत्कृष्टरचनात्मिका परिपक्वता स्यात् तत्रायं चकास्ति[1]। पाकस्य चत्वारो भेदा अग्निपुराणकारेण स्वीकृताः। मृद्वीकपाकः, नारिकेलपाकः, अम्बुपाकश्च, अग्निपुराणे पाकस्य चातुर्विध्यम् प्रदर्शितम्[2] परं तत्र त्रयाणां पाकानां निरूपणं लभ्यते। चतुर्थपाकस्य गणना केवलं पाकशब्देन कृता स्यात् तदा चत्वारो भेदा भवन्ति। आचार्यवामनेन अर्थगतकान्तिगुणस्य निरूपणानन्तरं, रचनायां गुणानां स्पष्टत्वं परिपूर्णत्वं च यत्र दृश्यते तत्र काव्यपाको लक्ष्यते एतत् काव्यपाकएव आम्रपाकशब्देनोक्तः। अतो यदि अग्निपुराणोक्तपाक इत्यभिधीयते, इत्यत्र पाकशब्दस्यार्थः काव्यपाक एव स्यात् तदा अग्निपुराणकारस्य मते पाकस्य चत्वारो भेदा भवितुं शक्यन्ते। अन्येषां पाकानां लक्षणमनुक्त्वैव केवलं मृद्वीकापाकस्य लक्षणं कृतम्, यत्रादावन्ते च सरसत्वं भवति स मृद्वीकपाक इत्युच्यते[3]। मृद्वीकपाकेन रचनायाः सरसत्वमभीष्टम्।

6. रागः—काव्यनिर्माणेच्छया काव्ये यो विशेषो भवति स रागगुणेनाचक्ष्यते, स अभ्यासविषयीकृतः सन् स्वाभाविकीं कान्तिं (तन्नामकं गुणं) अभिव्याप्नोति[4]। अत्र रागगुणे स्वाभाविकी कान्तिः विद्यमाना भवति। सम्भवतो रागगुणलक्षणे कान्तिशब्दः कान्तिगुणार्थे प्रयुक्तः स्यात्। कविः काव्यं चिकीर्षति तस्मिन् रसाद्यर्थैर्वैशिष्ट्यं जायते। तद्वैशिष्ट्यमेव अग्निपुराणकारेण रागगुणेनाभिहितम्, स राग एव अभ्यासविषयी भूतः काव्यरचनां स्वाभाविकीं कान्तियुक्तां करोति अतएव पूर्वाचार्यैः कान्तिगुणस्य महत्त्वं स्वीकृतम्[5]। विशेषतो वामनेन औज्ज्वल्यरूपा, दीप्तरसत्वरूपा कान्तिः गुणः स्वीकृतः[6]। रागगुणस्य अग्निपुराणे त्रयो भेदाः कथिताः यथा—हरिद्रारागः, कौसुम्भरागः, नीलीरागः[7], एषां रागाणां पुराणकारेण लक्षणानि न प्रदर्शितानि परं त्रिविधविधरागनिरूपणात्

---

1. उच्चैः परिणतिः कापि पाक इत्यभिधीयते। अ०पु० 346/22.
2. मृद्वीकनारिकेलाम्बुपाकभेदाच्चतुर्विधः। अ०पृ० 346/23.
3. आदावन्ते च सौरस्यं मृद्वीकापाक एव सः। अ०पृ० 346-23.
4. काव्येच्छया विशेषो यः स राग इति गीयते।
   अभ्यासोपहितः कान्तिं सहजामपि वर्तते।। तत्रैव 346/24.
5. नाट्यशास्त्र 16/112 का०आ० 1/85.
6. का०लं०सू० 3/1/25, 3/2/25.
7. हरिद्रा चैव कौसुम्भो नीलीरागश्च स त्रिधा। अ०पु० 346/25.

प्रतीयते यद्रागभेदेन रचनाभेदोऽभिमतः स्यात्। पुराणे एकादशनिरर्थकत्वादि-दोषाणामदोषत्वं प्रतिपादितमस्ति[4]। भोजदेवेनाऽपि दोषाणामभावे **वैशेषिकगुणाः** प्रतिपादिताः, अतएवात्रापि– अग्निपुराणदृशा संक्षेपेण विवेचनं प्रदर्श्यते।

1. निरर्थकत्वदोषः समासाधिक्ये दुष्करादौ[5]।
2. गूढार्थत्वदोषः–दुष्करे स्थले[6]।
3. ग्राम्यत्वदोषः, लोके शास्त्रे च प्रसिद्धत्वात्[7]।
4. क्रियाभ्रंशः क्रियायाः अध्याहारेण[8]।
5. भ्रष्टकारकत्वदोषः–आक्षेपेणकारकस्याध्याहारत्वात्[9]।
6. विगतसन्धिदोषः कष्ठपाठात्–दुर्वचादौ[10]।
7. व्यस्तसन्धितादोषः–अनुप्रासे[11]।
8. व्युत्क्रमदोषः अर्थग्रहणे[12]।
9. विभक्तिः।
10. संख्या।
11. लिंगदोषश्चोपमानोपमेययोर्भिन्नलिंगत्वे गुणत्वं प्राप्नुवन्ति। अनेन प्रकारेण उपर्युक्तदोषाः अदोषत्वं भजन्ते[13]। एतदतिरिक्तमेकेन अनेकस्य कथनं, बहुभिर्बहूनां कथनं शुभकरं भवति[14]।

अग्निपुराणोक्तगुणानां विवेचनेन प्रतीयते यत्पुराणकारेण केषांचिद् गुणानां विवेचनं स्वातन्त्र्योद्भावनया कृतम् यथा गाम्भीर्य–अर्थगतसंविधानं, अर्थगत-सामायिकत्वं चेषां त्रयाणां गुणानां विषये स्वातन्त्र्योद्भावना दृश्यते। अग्निपुराणे

---

4. एकादशनिरर्थत्वं दुष्करादौ न दुष्यति। अ०पु० 347/24.
4. तत्रैव० 347/24.
5. तत्रैव० 347/25.
6. तत्रैव० 347/25.
7. तत्रैव० 347/26.
8. तत्रैव० 347/26.
9. तत्रैव० 347/27.
10. तत्रैव० 347/28.
11. तत्रैव० 347/28.
12. अ०पु० 347/29.
13. अ०पु० 347/29.
14. तत्रैव० 347/30.

वामनवद्गुणानां भावात्मकस्थितिः प्रदर्शिता वर्तते। यद्यपि भोजदेवस्य अग्निपुराणस्य च गुणनिरूपणे बहुष्वंशतः साम्यं विद्यते, तथापि–अनयोर्द्वयोः पार्थक्यमपि विद्यते। भोजदेवेन बाह्याभ्यन्तरवैशेषिकभेदेन त्रिविधा गुणा निरूपिताः सर्वस्य भेदस्य चतुर्विंशतिसंख्या प्रतिपादिता। पुराणे तु सर्वप्रथमं सामान्यवैशेषिकभेदेन गुणानां द्वौ भेदौ कथितौ। सामान्यभेदस्य शब्दगुणा अर्थगुणाः शब्दार्थोभय गुणभेदेन त्रैविध्यं प्रदर्शितम्। शब्दगुणाः पूर्वप्रदर्शित-विवेचनानुसारं सप्तविधाः प्रतिपादिताः, सत्य (सत्त्व) यौगिकगुणयोः स्वरूपमनभिधाय ओजोगुणे अन्तर्भावं कृत्वा षड्विधशब्दगुणानां निरूपणं कृतम्। समान्यार्थगुणानां, सामान्यशब्दार्थोभयगुणानां च षट् प्रकारा निरूपिताः वैशेषिक गुणानां भेदमप्रदर्श्य दोषनिरूपणप्रसंगे निरर्थकत्वाद्येकादशदोषाणां गुणत्वं निरूपितम्, परं वैशेषिकगुणत्वेन तेषां निरूपणं न विहितम्।

अग्निपुराणे–अर्थगतंसंविधानसामायिकत्वगुणयोः स्वतन्त्रोद्भावना दृश्यते। सामान्यशब्दगुणश्लेषस्य लक्षणं वामनस्य शब्दगुण श्लेषवद् वर्तते। शब्दगत-लालित्यगुणस्य लक्षणं वामनस्य माधुर्यगुणसदृशोऽस्ति। सुकुमारतागुणो दण्ड्युक्तसुकुमारतावद् वर्तते। औदार्यगुणो दण्डिनिरूपितोदारत्वगुणेन सादृश्यं करोति। अर्थगतोदारत्वगुणो भरतोक्तोदारतागुणेन साम्यमाकलयति। सौभाग्यार्थगतगुणः कुन्तकस्य मध्यममार्गस्य सौभाग्यगुणेन साम्यं धत्ते, यथासंख्यगुणो दण्ड्युक्तयथासंख्यालंकारेण प्रभावितो विद्यते। अन्येऽपि केचिद्गुणाः पूर्ववर्त्याचार्याणां गुणलक्षणेभ्यः प्रभाविता विद्यन्ते। पाकगुणनिरूपणे पाकस्य चत्वारो भेदाः प्रतिपादिताः परं पाकस्य तुरीयो भेदो न परिगणितो न च पाकभेदानां लक्षणानि प्रदर्शितानि। रागगुणलक्षणं वामनस्य कान्तिगुणात् प्रभावितमित्यनुमीयते।

अग्निपुराणकारस्य एतद्गुणनिरूपणं तेषां वर्गीकरणं च वैलक्षण्यमावहति भोजदेवस्य अग्निपुराणस्य च गुणविचारः साम्यमावहन्नपि भिन्नत्वेन वर्तते। एतत्कथनमतीव दुष्करं विद्यते यत् अग्निपुराणकारः भोजदेवात् पूर्ववर्ती अथवा परवर्ती विद्यते, अस्मिन् विषये तु–इतिहासकाराणां विदुषां विसंवादो विद्यते। अग्निपुराणे गुणनिरूपणप्रसंगे "आर्याः कथयन्ति प्रवदन्ति मणीषिणः" इत्यादि-प्रयोगैर्ज्ञायते यदीदृशी अग्निपुराणवत् पूर्वमपि गुणविषयिणी विचारधारा आसीदिति निराकर्तुं न शक्यते।

गुणतालिका

सामान्यम् शब्दगुणाः	अर्थगुणाः	वैशेषिकम् शब्दार्थोभयगुणाः	
श्लेषः, लालित्यं,	माधुर्य, संविधानं	प्रसादः, सौभाग्यं	
गाम्भीर्य, उदारता,	कोमलत्वं,	प्रशस्तिः	
सौकुमार्यं, सत्य,	उदारत्वं, प्रौढी,	पाकः	रागः
यौगिकी अनयोःस्थाने	सामाजिकत्वं च	मृद्वीकापाकः	हरिद्रारागः
ओजोगुणस्य लक्षणं		नारिकेलपाकः	कौसुम्भरागः
अक्षिलक्ष्यीभवति।		अम्बुपाकः	नीलीरागः

स्वीय लक्षणानुसारिवैशेषिकशब्दगुणार्थगुणशब्दार्थोभयगुणानां संख्या 19 वर्तते सत्ययौगिकीगुणयोरोजोगुणेऽन्तर्भावं स्वीकृत्य 18 संख्या भवति। पाकस्य चत्वारो भेदाः रागस्य त्रयो भेदा एषां संकलनेन 25 संख्या जायते वैशेषिकस्य। भेदानां गुणनेन 36 संख्या भवति। शुद्धभेदास्तु 18 एव वर्तन्ते।

कौटिलीयेऽर्थशास्त्रेगुणाः

कौटिल्यार्थशास्त्रे अधोलिखितप्रकारेण षड् गुणाः स्वीकृताः। 1. अर्थक्रमः, 2. सम्बन्धः, 3. परिपूर्णता, 4. माधुर्यम्, 5. औदार्यम्, 6. स्पष्टत्वम्[1]।

अर्थक्रमः—यत्र रचनायां सम्यग्रूपेण क्रमस्य निर्वाहः मुख्यार्थस्यविषयस्य च प्राथम्येन विनिवेशःस्यात्तत्रार्थक्रमोगुणः[2]। गुणोऽयं वामनप्रतिपादितस्यार्थगुण-श्लेषस्य अंशतः साम्यं करोति। श्लेषादप्यधिकं मार्गाभेदस्वरूपस्य समता-गुणस्यापि प्रातिनिध्यं विद्यते। मार्गाभेदत्वात् अपक्रमदोषस्याभावरूपोऽयमित्यपि कथयितुं शक्यते[3]।

---

1. अर्थक्रमः सम्बन्धः परिपूर्णता माधुर्यमौदार्यस्पष्टत्वमिति लेखसम्पत्। कौ०अ०शा० द्वितीय अधि० 10 अ०पृ० 120.
2. तत्र यथावदनुपूर्वक्रियाप्रधानस्यार्थस्य पूर्वमभिनिवेश इत्यर्थस्य क्रमः तत्रैव पृ० 12.
3. का०लं०सू० 3/2/4. 3/1/12.

सम्बन्धः—प्रस्तुतरचनायां कापि बाधा नोत्पद्येदितिमत्वा परवर्तिविषयस्य ग्रन्थान्तं यावत् निरूपणं सम्बन्ध गुणेनाचक्षते[1]।

परिपूर्णत्वम्—यत्रार्थस्य, पदस्याक्षरसमुदायस्य च न्यूनातिरिक्तत्वं न स्यात्तत्राऽयं गुणः। उपपत्या दृष्टान्तेन विषयस्य प्रतिपादनेन, पदोपयोगेन, शैथिल्याभावेन, यत्र विषयप्रतिपादनाय वाक्यार्थस्यावश्यकता विद्यते तत्र पदेन विषयप्रतिपादनं न स्यादित्येवं प्रकारेण परिपूर्णता गुणस्य स्थितिर्जायते[2]।

अस्य गुणस्य त्रयोंऽशाः सन्ति, पदाक्षरसमुदायस्य न्यूनातिरिक्तत्वं, हेतूदाहरणदृष्टान्तैरर्थोपवर्णना, अश्रान्तपदता च। अस्य प्रथमोंऽशो भोजदेवेन सम्मितत्वगुणेन निरूपितः[3]। द्वितीयोंऽशो दण्डिप्रतिपादितार्थव्यक्ति गुणादभिन्नो विद्यते[4]। तृतीयोंऽशो वामनस्य ओजोगुणान्तर्गतप्रौढे द्वितीय भेदस्य (वाक्यार्थेच पदाभिधा) अभावरूपोऽस्ति[5]। अस्मिन् गुणे शैथिल्यभावोऽपि भवति।

माधुर्यम्—यत्र शब्देभ्यः रमणीयार्थस्य प्रतीतिःस्यात्तन्माधुर्यम्। अस्य लक्षणस्य प्रभावो भरतादिमाधुर्यगुणे दृश्यते[6]।

औदार्यम्—अग्राम्यशब्दप्रयोगे—औदार्यगुणः स्वीकृतः[7]। आचार्यवामनेनाऽर्थ-गुणोदारतालक्षणे—अग्राम्यत्वशब्दस्य प्रयोगः कृतो विद्यते[8]। प्रतीयते यत् कौटिल्योक्तौदार्यगुणानुरूपं उदारतागुणस्य लक्षणं विहितम्। कौटिल्यात्-प्रागपि उदारतागुणाऽनुरूपा रचना विधातव्या इति रामायणे समुपलभ्यते[9]।

---

1. प्रस्तुतस्यार्थस्यानुपरोधादुत्तरस्य विधानसमाप्तेरितिसम्बन्धः। कौ०अ०शा० द्वितीय अधिक० 10 आ० पृ० 120.
2. अर्थपदाक्षराणामन्यूनानतिरिक्तता हेतूदाहरणदृष्टान्तैरर्थोपवर्णनाऽश्रान्तपदेति परिपूर्णता। तत्रैव 2/10, पृ० 120.
3. शब्दार्थौयत्र तुल्यौ स्तः सम्मितत्वं तदुच्यते। स०कं० 1/86.
4. अर्थव्यक्तिरणेयत्वमर्थस्य.....का०द० 1/73.
5. का०लं०सू० 3/2/2.
6. सुखोपनीतचार्वर्थशब्दाभिधानं माधुर्यम्। तत्रैव०
7. अग्राम्यशब्दाभिधानमौदार्यम्। कौ०अ०शा० 2/10 पृ० 120.
8. का०लं०सू० 3/2/13.
9. रामायणम् द्वितीय सर्ग 42 पद्य पृ० 7.

स्पष्टत्वम्–रचनायां प्रसिद्धशब्दानां प्रयोगेण स्पष्टत्वगुणो भवति[1]। (प्रसिद्धशब्दानां प्रयोगाऽभावात् स्पष्टार्थाऽवबोधो न जायते) अत्र स्पष्टत्व-गुणस्याभिप्रायः प्रसादगुणेन सह विद्यते।

रूद्रदाम्नः शिलालेखे गुणाः

जूनागढ़प्रान्ते रूद्रदाम्नः एकः शिलालेखः समुपलब्धः। अस्य शिलालेखस्य समयः (150 ई० सन् वर्तते) अनेन शिलालेखेन साहित्यशास्त्रस्य विकास-विषये तु बहु ज्ञायते परं साहित्यशास्त्रोक्तगुणविकासविषयेऽपि पर्याप्तज्ञानं भवति। अयं शिलालेखः पुनरूक्तशब्दाडम्बरेण युक्तोऽस्ति। अत्र (स्फुट, लघु, मधुर, चित्र, कान्त, शब्द समयोदारालंकृतगद्यपद्यमधिगत महाक्षत्रपनाम्ना नरेन्द्रकन्यास्वयम्बरानेकमाल्यप्राप्तदाम्ना महाक्षत्रपेण रूद्रदाम्ना[2]। इत्यत्र रूद्रदाम्ना षड्गुणानां प्रतिपादनंकृतमस्ति। एषु गुणेषु स्फुटनामगुणः कौटिल्योक्तस्पष्टत्वगुणस्याऽनुसरणं करोति स्फुटस्पष्टत्वगुणयोरभिप्रायः प्रसाद-गुणस्य प्रतिपादनमेवास्ति।

ह्वी राघवन् महोदयानुसारं लघुगुणोऽपि प्रसादगुणस्य साम्यं वहति[3]। शिलालेखे मधुकान्तउदारगुणाः परवर्तिकाव्यादर्शादिग्रन्थेषु माधुर्यो-दारताकान्तिगुणेभ्यः पृथक् न वर्तन्ते। शिलालेखे प्रतिपादितगुणेषु चित्र-नामाऽमिधान एको गुणः स्वीकृतः, चित्रशब्दः, वैलक्षण्यंवैचित्र्यचारुत्वं च व्यनक्ति। अस्मात् प्रतीयते यद् भरतात् प्रागपि गुणानां स्थितिर्निश्चितरूपेणासीत्, यतोहि रामायणे, महाभारते, पुराणेषु, कौटिलीये अर्थशास्त्रे रूद्रदाम्नः शिलालेखादिषु सर्वत्र गुणानां सद्भावः सम्यगवलोक्यते। इदं सत्यं यत् पूर्णरूपेण काव्यशास्त्रीयतत्वानां प्रत्यक्षाधारो भरतमुनिकृतनाट्यशास्त्र एव, एतदपि युक्तं वर्तते यद् भावस्येव–आभावो भवति–अभावादेव सद्भावोऽपि जायते, अतो गुणानां सद्भावः पूर्वं पूर्णरूपेण आसीत् परं दुःसमयान्तराले पूर्वं या गुणधारणा आसीत् सा छिन्नभिन्नतांगता। तदनन्तरं गुणानां विषये

---

1. प्रतीतशब्दप्रयोगः स्पष्टत्वमिति। कौ०अ०शा० 2/10 पृ० 120.
2. विशेषज्ञानार्थ श्री पी०पी० काणे महोदयस्य संस्कृत काव्यशास्त्रेतिहासः द्वितीय भागः पृ० 416 द्रष्टव्यः।
3. Bhoja's Sringara Prakasa - V. Raghvan.

संयोगवशात् यत् किंचिदवशिष्टं तत् पुनः प्रतिष्ठापयितुं कौटिल्यादिभिः प्रयत्नं विधाय साहित्यशास्त्रस्य समक्षं गुणानामस्तित्वं समुपस्थापितम्। रूद्रदाम्नः शिलालेखो दीर्घसमासैः समन्वितोऽस्ति उत्तरवर्त्तिग्रन्थेषु काव्यादर्शादिषु[1] दीर्घसमासादयः गद्यस्य विशेषताः स्वीकृताः तत्रौजोगुणस्याऽधिक्यं राजते। तदनन्तरं अश्वघोष, भारवि, भट्टि, माघ, भवभूतिप्रभृतिभिः प्रसिद्ध-काव्यशास्त्र प्रणेतृभिः साहित्यशास्त्रस्य गुणानां महत्वं स्वस्वकाव्येषु स्वीकृतमस्ति तेषामुपपादनमत्र निबन्धविषयात् बहिर्वर्तते, अतएवाऽस्मिन् ग्रन्थे तेषां चर्चा न कृता। एषमुपर्युक्त कवीनां विषये गुणसम्बन्धिधारणा बी० राघवन् महोदयस्य (भोजाज् श्रृंगार प्रकाशस्य) 249 पृष्ठतः 257 पृष्ठपर्यन्तं विस्तृतरूपेण ज्ञातुं शक्यते।

1. ओजः समासभूयस्त्वमेतद्गद्यस्य जीवितम्। काव्यादर्श 1/80.

पंचमोऽध्यायः

गुणविवेचनम्

संस्कृतसाहित्ये काव्यगुणस्वरूपविषये, संख्याविषये गुणस्थितिविषये च मतमतान्तराणि दृष्टिपथमायान्ति। साहित्यशास्त्राऽनुसारं एतन्नैव कथयितुं शक्यते यद् गुणाः काव्ये हेयास्सन्ति, यतोहि अलंकाररसध्वनिरीतिवक्रोक्त्यौचित्यसंप्रदायप्रवर्तकैः सर्वैराचार्यैः स्वस्वग्रन्थेषु येन केनचिद्रूपेण गुणानां महत्त्वं प्रतिपादितम्।

भरतादनन्तरं, काव्ये अलंकाराणामेव प्राधान्यं वर्तते[1], काव्यस्यात्मा "रीतिः"[2] विद्यते, वैदर्भमार्गस्य प्राणा दशगुणा[3] वर्तन्ते, रस एव काव्यस्यात्मा[4], ध्वनिः काव्यस्यात्मा[5], वक्रोक्तिरेव काव्यस्य प्राणभूतं तत्वम्[6], औचित्य मेव काव्यस्य सर्वस्वं[7] वर्तते। अनेन प्रकारेण काव्यात्मानमन्वेषयद्भिः साहित्यशास्त्रस्याचार्यैः विविधप्रकारेण साहित्यस्य वास्तविकं तत्त्वं स्वस्वमताऽनुसारं समर्थितम्, परमेतदपि सत्यं वर्तते यदेभिः सर्वैर्गुणसम्बन्धिविचाराअपि प्रतिपादिताः। गुणस्य वास्तविकसत्तानिर्धारणार्थं, गुणाश्रिता रीतिः रीतेराश्रिता गुणाः, रसस्याङ्गभूता धर्मागुणाः, गुणानां संघटनायाश्चैक्यं व्यतिरेको वा, शब्दार्थयोर्धर्माः गुणाः, गुणालंकारयोर्भेदोऽनेन विविधप्रकारेण गुणविषये पर्याप्तरूपेण ऊहापोहोऽभवत्। यद्यपि उपर्युक्तप्रकारेण गुणस्वरूपनिर्धारणविषये आचार्याणां कालक्रमेण विचारा परिवर्तिता अभूवन् तथापि काव्यगुणविषयकधारणा सर्वेषां पूर्ववर्तिपरवर्त्याचार्याणां आसीदिति निराकर्तुं न शक्यते। इदानीं गुणसामान्यलक्षणविषये श्लेषादिगुणानां विषये च विवेचनं प्रस्तूयते।

---

1. न कान्तमपि निर्भूषं विभाति वनिताननम्। भामह का०लं० 1/13.
2. रीतिरात्मा काव्यस्य, का०लं०सू० 1/2/6.
3. वैदर्भमार्गस्य प्राणाः दशगुणाः स्मृताः। का०द० 1/42.
4. वाक्यं रसात्मकं काव्यम्, सा०द० प्रथम परि० वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् अ०पु० 337/33.
5. काव्यस्यात्मा ध्वनिः, ध्व०लो० 1/1.
6. वक्रोक्तिजीवित - 1/10.
7. औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्। औचित्यविचारचर्चाऽकारिका।

भरतमते गुणस्वरूपम्–

भरतेन "नाट्यशास्त्रस्य" षोडशाध्याये गुणनिरूपणमकारि। अस्मिन् अध्याये गुणदोषयोः समाना संख्या दश एव स्वीकृता। दोषाणां विपर्यये गुणा भवन्ति[1] "इति गुणसामान्यलक्षणं भरतेन प्रतिपादितम्। गूढाद्यर्थादि दश दोषान् प्रतिपाद्य, गुणलक्षणे कथितमस्ति यद् गूढार्थादिदोषाः मया (भरतमुनिना) सम्यक् प्रकारेण कथिताः दोषाणां वैपरीत्याद् माधुर्यौदार्यनामकाः गुणा भवन्ति। भरतस्यैतावत्कथनमात्रेण गुणलक्षणं न निष्पन्नम्। यतोहि विपर्यय शब्दोऽत्र गुणानामभावात्मकत्वस्थितिं व्यनक्ति अतो दोषाणां वैपरीत्याद् गुणा वर्तन्ते इति कदापि नो वाच्यम्।

गुणलक्षणे विपर्ययशब्दस्य विचारः–

विपर्ययशब्दविषये साहित्यशास्त्रमर्मज्ञानां मतभेदो दृश्यते। अभाव, अन्यथाभाव, वैपरीत्यरूपेण त्रिविधार्था विपर्ययशब्दस्य वर्तन्ते।

विपर्ययशब्दविषये अभिनवगुप्तमतम्–

अभिनवगुप्तमते दोषविघात एव विपर्ययशब्दस्यार्थः अर्थात्-दोषविघातका गुणा भवन्तीत्यर्थः[2]। अस्मिन् मते दोषाणां विपर्यये गुणानां स्थितिः सामान्यरूपेण न भूत्वा विशेषरूपेण वर्तते। तत्र किं वैशिष्ट्यम्। दोषविपर्यये गुणानां विशेषरूपेण स्थितिर्भवति तत्र विशेषरूपता कीदृशी वर्तते इति समुत्पन्ने प्रश्ने, अभिवनगुप्तोऽचकथत् दोषाणामभावे श्रुतिसुखदं, दीप्तरसत्वं यद् भवति स विशेषरूप एव भवति। माधुर्यौदार्यं तेषां लक्षणं अंको वर्तते[3]। बहुशो यच्छ्रुतं वाक्यं, इत्यादि, माधुर्यलक्षणे अभिनवगुप्तेन कथितमस्ति यत् यस्मात्कारणाद् बहुवारं श्रुतं वाक्यं संशयविपर्ययोः आस्पदं न भवति तन्माधुर्यम्[4]। पुनः पुनरेकस्य वाक्यस्य पदस्य वा कथनं दोषकरं बोभवीति, परं यत्र पुनः पुनरुच्चारितानि

---

1. एते दोषा हिकाव्यस्य मया सम्यक् प्रकीर्तिताः (विज्ञेयाः सूरिभिर्नाटकाश्रयाः)
   गुणाविपर्ययादेषांमाधुर्यौदार्यलक्षणाः।। ना०शा०अभि०भा० 16/95.
   एत एव विपर्यस्ताः गुणाः काव्येषु कीर्तिताः। ना०शा० 17/95.
2. अथ गुणेषु प्रतिजानीते–एषां विपर्ययाद् गुणाभवन्ति एतद्दोषविघात एव गुणो भवतीत्यर्थः। ना०शा०अभि०भा० 16/95.
3. किमविशेषेण, नेत्याह माधुर्यौदार्यलक्षणमङ्को येषाम्।
   एतदुक्तं भवति–एतद्दोषविहीनं श्रुतिसुखं,
   दीप्तरसंच यदि भवति तावता गुणान्तैरलङ्कारैश्च
   हीनमपि काव्यं लक्षणयोगाव्यभिचारीत्युक्तम्। ना०शा०अभि०भा०। 6/95.
4. यदिति यस्माद्धेतोर्वाक्यं श्रुतं संशयविपर्ययोरास्पदं न भवति तन्माधुर्यम्। तत्रैव 16/104.

पदानि उद्वेजकतां न कुर्वन्ति तन्माधुर्यं भवति। अस्मिन्विषये अभिनवगुप्तेन कथिमस्ति, यद्रसमयममृतं भवति इत्यत्र नास्ति संशयलेशः, मधु अपि अत्यन्तमधुरमेव, आम्रफलमपि अत्यन्तं मधुरं भवति, परं रसानां आन्तरिकमर्मज्ञाः पक्षपातरहितं वारमेकमपि कथयन्तु यत् प्रियायाः अधरोष्ठादधिकं किमपि मधुरं वस्तु वर्तते। अपितु न वर्तते एव[1]। सर्वे जानन्ति यदत्र मधुरं किं वर्तते परमुक्तिवैचित्र्येण एतन्निश्चितं भवति यत् प्रियायाः अधरोष्ठादधिकं न किमपि वस्तु वर्तते। औदार्यगुणस्य व्याख्यांविदधता अभिनवगुप्तेन कथितं वर्तते यद् यत्र मनुष्यो भूत्वा दिव्यतया युक्तो वर्तते। करूणामयोभूत्वा शृंगारेण युक्तोऽस्ति, वीरप्रधानो भूत्वाऽपि विस्मयस्य स्थानं वर्तते, एवं प्रकारेण अद्भुततया ये पदार्था वर्णितास्सन्ति अथवा तत्तद् रसानां विभावाऽनुभावादिभिर्यत् कथनमस्ति तदौदार्यमर्थगुणो वर्तते केचिद् इमं गुणं अग्राम्यत्वमिति कथयन्ति[2]। इदमत्र निष्पन्नम् यद्दोषविपर्यये गुणानां स्थितिः विशेषरूपैव श्रुतिसुखदत्वात्, दीप्तरसत्वेन वैचित्र्यभाववशाच्च।

विपर्ययशब्दविषये कौटिल्यार्थशास्त्रमतम्—

भरतात्पूर्वं कौटिल्येन लेखसम्पत्तिरूपेण षड् गुणाः अङ्गीकृतास्तदनन्तरं लेखदोषप्रसंगे संप्लवदोषनिरूपणेकथितं यत्—अवर्गे वर्गकरणं, वर्गे अवर्गकरणं, गुणानां विपर्यासः संप्लवः[3] कथ्यते। अर्थाद् गुणानां विपर्यासेन संप्लवदोषस्य-स्थितिरायाति, अस्माद् मया सम्भाव्यते यद् भरतेन कौटिल्यार्थशास्त्रस्याऽधारेण विपरीतक्रमेण दोषविपर्यया गुणा भवन्ति इति गुणलक्षणं कृतं स्यात्। आचार्य वामनेनापि कौटिल्यसरणिमुपजीव्य (गुणविपर्यात्मानो दोषाः[4]) गुणानां विपर्यये दोषा भवन्तीति कथितम्। कौटिल्यवामनयोर्मते दोषलक्षणे साम्यं वर्तते, वास्तविकरूपेण कौटिल्योक्तार्थक्रमादिगुणानां विपर्यासे दोषाणां स्थितिः

---

1. रसवदमृतं कः सन्देहो मधून्यपि नान्यथा।
   मधु मधुरं चूतस्यापि प्रसन्नरसं फलम्।।
   सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो।
   वदतु यदिहान्यत्स्वादु स्यात् प्रियादशनच्छदात्।।ना०शा० 16/104.
2. दिव्यभावपरीतं यदिति। यत्र मानुषोचितमपि दिव्यतया, करुणादियुक्तमपि शृंगारेण, वीरतास्थानमप्यद्भुतेन वर्ण्यते। तद्भूतैर्वा विभावाऽनुभावादिभिः यदुदीरितं तत्रौदार्यमर्थगुणः। एतदेवाग्राम्यत्वमित्यन्यैरुक्तम्। ना०शा०अभि०भा० 16/110.
3. कौ०अ० शास्त्र, द्वितीय अधि 10 अध्या० पृ० 125.
4. काव्यालंकार सूत्र 2/1/1.

प्रजायते नास्त्यत्र सन्देहः। परं भरतमते अगूढार्थादिदोषाणां वैपरीत्याद् गुणानां स्थितिर्निजायते। भरतवामनयोर्गुणदोषलक्षणेऽपि महान् विरोधो विद्यते। आचार्यमम्मटेन त्रयाणां माधुर्यौजःप्रसादगुणानां भावात्मकीं सत्तामुररीकृत्य गुणानां दोषाभावात्मकसत्ता न स्वीकृता[1]।

विपर्ययशब्दविषये आधुनिक विवेचकानां मतानि–

क) विपर्ययशब्दविषये डॉ० सत्यदेवचौधरीमहोदयानां मतं सुसमीचीनमेव प्रतिभाति यत् सौन्दर्याऽभावे कुरूपता, कुरूपताया अभावे सौन्दर्यमस्ति इति नैव स्वीकर्तुं शक्यते, अनेनैव प्रकारेण, श्लेषादिगुणानां गूढार्थादिदोषाणां च परस्परं वैपरीत्यम्, अथवा अभावात्मकत्वं नैव स्वीकर्तुं शक्यते[2]।

ख) डॉ० नगेन्द्रमहोदयेन भरतोक्त गुणलक्षणे सामागतस्य विपर्ययशब्दस्य विषये प्रतिपादितमस्ति यद् भरतस्य गुणविवेचनात् एतन्नैव सिद्ध्यति यत् सर्वेषां गुणानां स्थितिः अभावात्मिका वर्तते। गुणानां कानिचिल्लक्षणानि विहाय सर्वे गुणाः निश्चयरूपेण भावात्मका वर्तन्ते, यथा समतागुणस्य स्थितिः अवश्यमेव अभाव्ात्मिका वर्तते परमुदारतासौकुमार्यौजादयो गुणाः निश्चित-रूपेण शब्दार्थसम्पत्तिसद्भावात् अभावात्मकाः कथं भवितुं शक्यन्ते, अन्यथाभावस्य, वैपरीत्यस्य च स्थितिः विलोमरूपेण भावात्मिका विद्यते[3]।

ग) मधुसूदनशास्त्रिमहोदयानां मते विपर्ययशब्दः विपरि उपसृष्ट अय्-धातुत्वात् अच् प्रत्यये सति निष्पद्यते। अतो गुणविपर्ययस्यार्थो गुणानां कार्यस्य वर्जनमथवा निग्रहं कृत्वा अभिव्याप्य ये तिष्ठन्ति तेदोषाः। दोषाणां कार्यं रसापकर्षकरणं भवति अपकर्षस्य विपर्ययः, उत्कर्षो वर्तते तद्–गुणैरेव भवति उत्कर्षस्य विपर्ययापकर्षो भवति तदपकर्षः दोषानधिवसति, इत्यत्र कार्य-भेदस्तुवर्तते एव, परं स्वरूपसंख्याः एवं च द्वयोः सत्तायामपि भेदो वर्तते[4]।

घ) डॉ० रेवाप्रसादद्विवेदीमहोदयेन प्रतिपादितमस्ति यद्दोषाणां वैपरीत्ये गुणाभवन्ति, इति भरतस्य कथनं सयुक्तिकं न प्रतिभाति, अभावस्याभावः भावरूप एव स्यादित्येषनियमोऽनिवार्यरूपेण न वर्तते। डॉ० महोदयेन

---

1. मम्मट काव्यप्रकाशः 8/72.
2. भारतीय काव्यशास्त्र पृ० 435.
3. भारतीय काव्यशास्त्र की भूमिका। पृ० 43.
4. साहित्यशास्त्रीय तत्त्वों का आधुनिक समालोचनात्मक अध्ययन। पृ० 61.

काव्यशोभोत्पादकधर्मा गुणाभवन्तीतिवामनाचार्यमतमेव समर्थितम्। यतोहि जनकस्याऽभावात्मकत्वं न स्वीकर्तुं शक्यते, अतो वामनस्य तटस्थलक्षणदृशा गुणानां भावात्मकत्वमवगन्तव्यः[1]।

ङ) "गुणा विंपर्ययादेषाम्" इति भरतमुनेः गुणविषयकलक्षणमादाय डॉ० सुशीलकुमार डे महोदयेन विपर्ययशब्दस्य विषये जैकोवी मतस्य सम्भावना कृता वर्तते। भरतेन गुणानां दोषविपर्यये यद् विवरणं प्रदत्तम् तत् सामान्य बुध्यनुरूपमेव, यतोहि दोषान्वेषणे स्वाभाविकरूपेण काठिण्यं न भवति, परं गुण निर्धारणमनायासेन न भवति। अतो दोषादतिरिक्तं गुणज्ञानं परमावश्यकम्[2]। उक्तंहिदण्डिना काव्यादर्शे गुणदोषाणांज्ञानेनैव कविरानन्दं प्राप्य कीर्त्तिमधिगच्छति[3]। गुणदोषलक्षणप्रसंगे कौटिल्येनभरतेनवामनेन च विपर्ययशब्दस्य प्रयोगः कृतः।

1. कौटिल्यमते–गुणविपर्ययाः–दोषा भवन्ति।
2. भरतमते दोषविपर्ययाः–गुणा भवन्ति।
3. वामनमते गुणविपर्यया–दोषा भवन्ति।

वास्तविकरूपेणात्रविचारणीयोऽस्ति यद् अधर्मस्य अभावोधर्मः, धर्मस्य अभावो अधर्मः, दोषाभावो गुणः, गुणाभावोदोषः इमानि धर्माधर्मगुणदोषस्वरूपाणि आत्माश्रयदोषेणअन्योन्याश्रय दोषेण च दूषितानि। अत एवंविधंलक्षणं न संगच्छते। अत्रदोषलक्षणे विपर्ययशब्दस्यार्थः विपरीत स्वरूपमेव वर्तते न तु अभावरूपोऽर्थः, अतो गुणानां विपरीतस्वरूपत्वं दोषत्वमिति निष्कर्षः[4]। अतो दोषविपरीता गुणाभवन्ति इति यत् कथितं तन्न सुसमीचीनम्। यतोहि गुणशब्दस्य दोषशब्दस्य च पृथक्-पृथक् सत्ता विद्यते। गुण आमन्त्रणे, आमन्त्रणार्थक गुणधातोः गुणरूपं निष्पद्यते, काव्ये विशेषरूपेणैषां आमन्त्रणं भवति, अस्माद् गुणाः कथ्यन्ते। अथवा गुण धातोः क प्रत्ययेकृतेसति गुणयति, उत्कृष्टोभवत्यनेनास्मिन्नर्थेऽपि गुणरूपं निष्पद्यते, येन रचना उत्कृष्टास्यात् स गुणो वर्तते।

---

1. का०लं०सू० भूमिका पृ० 26.
2. संस्कृत काव्यशास्त्र का इतिहास पृ० 16.
3. व्युत्पन्नवृद्धिरमुनाविधिदर्शितेन मार्गेणदोषगुणयोर्वशवर्तिनीभिः।
वाग्भिः कृताभिसरणो मदिरेक्षणाभिर्धन्योयुवेव रमते लभते च कीर्तिम्।।
काव्यादर्श 3/187.
4. विपरीयन्त इति विपर्ययाविपरीताः। कर्मार्थेऽच्प्रत्ययः। त एवात्मानो येषां ते विपर्ययात्मानो विपरीतस्वरूपाः। नत्वभावरूपा इत्यर्थः। का०लं०सू० 2/1/1 कामधेनु टीकायाम्।

अनेन प्रकारेण गुणानामुत्कर्षकारकत्वं सिद्धयति। दूषयति इति दोषः। दृशयन्तेऽस्मिन् दोषा इति दोषदर्शनम्[1]। अतः गुणदोषशब्दयोः अर्थदृष्टयाऽपि स्वतन्त्रा सत्तावर्तते। परं भरतोक्तगुणलक्षणं नैव फलितम्। यल्लक्षणंकृतम् तेन गुणस्वरूप निर्धारणमशक्यम्।

एतदपि युक्तियुक्तं न प्रतिभाति यद् भरतात् प्राक्–गुणसम्बन्धिनी धारणा नैवासीत्, अपितु आसीदिति गुणानामुद्भवे निगदितम्। परं एतदपि सत्यं वर्तते यद् भरतात् पूर्वं न केनचिदपि कथितम् यदेते काव्यगुणा सन्ति। काव्यगुणाः दशैते इत्युक्त्वा श्लेषादिगुणानामाधारः नाट्यशास्त्र एव इति व्यवस्थापितः। एवं प्रकारेण भामहादारभ्य अद्यपर्यन्तं गुणनिरूपणाधारो नाट्यशास्त्र एव वर्तते। भरतेन गुणानांमहत्वं अतिशयरूपेणस्वीकृतम्। यथा उदारैर्मधुरैःशब्दैरौदार्यगुणो भवति यः प्राधान्येन दीप्तरसेष्वधितिष्ठति अतः–औदार्यगुणः दीप्तप्रकाशकवर्णेष्ववतिष्ठते। तस्यानुगामी द्वितीयो माधुर्यगुणोऽस्ति। अतः उदारमधुरादिगुणयुक्तां कविः काव्यरचनां रचयेत्। मधुरादिगुणैर्विभूषिताः काव्यबन्धाः तथैवात्यर्थं शोभन्ते यथा हंसैर्विकसित पद्मैश्चतडागः शोभते[2]। एवंप्रकारेण गुणानां महत्वं स्वीकृत्य गुणालंकारयोः साम्यं स्वीकृतम्[3]। परमस्यां कारिकायाम् (एषां) शब्दः सन्देहमुत्पादयति यतोहि कारिकायां दोषस्य प्रयोगोऽपि वर्तते तदा अस्याः कारिकायाः अर्थो भविष्यति, अलंकारगुणदोषाणां च रससंश्रयं प्रयोगं पुनः वक्ष्यामि परं दोषाःरसापकर्षक हेतवः भवन्ति तदा दोषाणां रससंश्रयात्मकप्रयोगो नैव भवितुमर्हति। गुणाएव रसस्य अङ्गीभूता धर्मा वर्तन्ते न दोषा नत्वलंकाराः। अभिनवगुप्तपादैः (एषाम्) अस्य शब्दस्यार्थः (वृत्तच्छन्दःप्रभृतीनां दोषान्तानां कृतो वर्तते) तदा अस्य अर्थोभविष्यति ये दोषाणांमन्ते कथिताः तेदोषान्ताः तेषां दोषान्तानाम्,

---

1. का०लं०सू० 2/1/1 कामधेनुटीकायाम्।
2. उदारमधुरैः शब्दैस्तत्कार्यंतु रसानुगम्। ना०शा० 16/121.
   शब्दानुदार मधुरान् प्रमदाभिधेयान्।
   नाट्याश्रयेषु कृतिषु प्रयतेत कर्तुं।।
   तैर्भूषिता वहु विभान्ति हि काव्यबन्धाः।
   पद्माकरा विकसिता इव राजहंसैः। ना०शा०आ०भा० 16/12[illegible].
3. एवमेतेह्यलंकारागुणादोषाश्च कीर्तिताः।
   प्रयोगमेषां पुनर्वक्ष्यामि रस संश्रयम्। तत्रैव 16/114.

अर्थात्-गुणानां रससंश्रयात्मकं प्रयोगं कथयिष्यामीत्यर्थः। अग्निपुराणेप्युक्तम् यत् दोषाभाव एव गुणा भवन्ति एतत् कदापि न वक्तव्यम्, यतः श्लेषादयोगुणा गूढार्थाद्याः दोषाः पृथक्-पृथक् रूपेण वर्तन्ते[1]।

भरतमते गुणनिरूपणम्–

क) गुणाः काव्यशोभाविधायकाः सन्ति।

ख) दोषा गुणविघातकाः सन्ति।

ग) गुणलंकारयोर्भेदेसत्यपि अभेदोवर्तते।

घ) काव्यस्य सर्वस्वं रस एव वर्तते, रसस्य अङ्गीभूताधर्मा गुणास्सन्ति, अतोऽलंकारेभ्यो गुणानां महत्वमतिरिच्यते[2]।

ङ) अलंकाररहितं काव्यं काव्यनामभाक् भवति परं गुणशून्यं काव्यं काव्यनामभाक् न जायते।

च) समतागुणनिरूपणे भरतेन गुणालंकारयोः सादृश्यं स्वीकृतम्।

छ) अतो भरतमते गुणलक्षणं एवं निष्पन्नम्।
रसानुकूलप्रयोगात् काव्यशोभाविधायकत्वं गुणत्वम्।

भरतोक्तगुणस्वरूपप्रतिपादनानन्तरं गुणभेदानां विवेचनं प्रस्तूयते–

भरतप्रणीतनाट्यशास्त्रे नाट्यसम्बन्धिविषयाणां सम्यक्प्रकारेण निरूपणं लभ्यते। भरतेनास्य नाटयशास्त्रस्य कृते "सार्ववर्णिकं पंचमोवेदः[4] अस्य शब्दस्य प्रयोगो विहितोऽस्ति। अस्मिन् नाट्यशास्त्रे, बहूनां विषयाणां समावेशो वर्तते परं लक्षणभूषणअलंकाररसवृत्तिगुणादीनां साहित्यसम्बन्धिविषयानामपि आधारो नाट्यशास्त्र एव वर्तते। नाट्यशास्त्रे रसानां गुणादीनां निरूपणेऽपि अष्टौ

---

1. न च वाच्यं गुणो दोषोभाव एव भविष्यति।
   गुणाः श्लेषादयो, दोषाः गूढार्थाद्याः पृथक्कृताः।। अ०पु०अ० 346, श्लोक 2.
2. ना०शा०अभि०भा० 16/41-42.
3. ना०शा०अभि०भा० 16/41-42.
4. न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु।
   तस्मात् सृजापरं वेदं पंचमं सार्ववर्णिकम्।। ना०शा० प्रथम, द्वितीय अ०रा० 1/12

नाट्ये रसास्मृताः[1]। विज्ञेया सूरिभिर्नाटकाश्रयाः[2]। अनेनप्रकारेणात्र नाट्यशब्दः नाटकस्येवानुसरणं करोति। अतोऽत्र सम्भाव्यते यद्गुणानां निरूपणमपि नाटकार्थे, काव्यार्थेवा कृतं स्यात्, रससस्यापिवैशिष्ट्यं नाटकेषु भवति तत्र मार्गाणां अथवा रीतीनां प्रयोगो गुणानुसारी भवति। भरतेनापि गुणाः, रससंश्रयात्मकाः कथिताः, परवर्तिभिः आनन्दवर्धनादिभी रसेन सह गुणानांसम्बन्धः नित्यरूपेण स्वीकृतः। अतो नाटकेऽपि रसेन सह गुणानां सम्बन्धः भरतेन स्वीकृतो वर्तते। यद्यपि नाटकादृते कुत्रचिदपि रसो न वर्तते, तथापि काव्यादेव नाट्यनिर्माणं बोभवीति, अतः काव्येष्वपिरसानुप्रवेशो विद्यते[3]। भरतः मृदुशब्दानां प्रयोगस्यकृते अवादीत्, मृदुशब्दप्रतिपादनद्वारा कविः नाटकंकुर्यात्[4]। सुखार्थंमृदुशब्दोपेतं कविर्नाटकं विधीत[5]। तस्य नाटकं मुक्तकंठेन शशंस। मृदुललितपदार्थैस्सहितं गूढशब्दार्थहीनं, बहुरसकृतंनाटकं- प्रेक्षकानां योग्यं भवति[6]। अत्रापि भरतेन माधुर्यसौकुमार्यप्रसादादिगुणा- नामावश्यकता द्योतिता। चेक्रीडितादिभिः पदैर्भरतप्रयोगा अर्थात् नटोचितप्रयोगाः तथैव न शोभन्ते यथा मृगाजिनदण्डकमण्डलुगृहीतैर्द्विजैः सह गणिका न राजते[7]। अतएव नाटके औदार्यमाधुर्यादिभिः सहितं रचनां कर्तुं प्रयतेत् औदार्यमाधुर्यादिभिः समन्विताः काव्यबन्धास्तथैव विलसन्ति यथा मरालैर्विकसित पद्मैश्च तडागो भाति[8]। अतएव रचनायां कठिन शब्दानां महान् निषेधः कृतोऽस्ति[9]।

नाटके वाचिकाभिनयस्य विशेषमहत्वं भवति। तत्र एवंविधा सुकुमार रचनास्यात् येन झटित्यर्थावगतिः स्यात्। अतो वाण्यां विशेषः प्रयत्नः

---

1. ना०शा०अभि०भा० 6/16-17.
2. तत्रैव 6/16-17.
3. तत्रैव चतुर्थ अध्या० पृ० 435.
4. मृदुशब्दाभिधानं च कविः कुर्यात्तुनाटकम्। तत्रैव० 21/120.
5. मृदुशब्दं सुखार्थं च कविकुर्यात्तु नाटकम्। तत्रैव० 21/131.
6. मृदुललितपदार्थं गूढशब्दार्थहीनं इत्यादि तत्रैव० 16/129.
7. ना०शा० 16/128.
8. तत्रैव० 16/122.
9. चेक्रीडिताद्यैः शब्दैस्तु काव्यबन्धा भवन्ति ये।
   वेश्या इव न शोभन्ते कमण्डलुधरैर्द्विजैः।। तत्रैव० 21/32.

कर्तव्यः। यतोहि नाट्यस्येयं शरीररूपा वर्तते[1]। डॉ० राघवन्महोदयेनापि कथितं यद्भरतमते नाटकेषु–औदार्यमाधुर्यादि प्रकारैर्भवितव्यम्। तत्र कोमलशब्दानां सद्भावोऽकोमलानामभावः स्यात्। यतो नाटकेअभिनयः-उदार-मधुरललितमृद्वादिशब्दैः संभवो भवति[2]। अस्मात् संभाव्यते यत्-भरतमुनिना श्लेषादिदशगुणानां अथवा एषु केषांचिद् गुणानां नाटके परमावश्यकता स्वीकृता आसीत्।

भरतसम्मताः–निम्नलिखिता दशगुणा–

श्लेषः, प्रसादः, समता, समाधिः माधुर्य ओजः, पदसौकुमार्यम्, अर्थव्यक्तिः, उदारता, कान्तिश्च एतान् दश काव्यगुणान् भरतोऽचीकीर्तत्[3]।

तत्र श्लेषो यथा–

श्लेषगुणलक्षणे भरतो निर्दिशति स्वाभिलषितार्थेन अन्योन्यं सम्बद्धानां पदानां मसृणता (चिक्कणता) यत्र स्यात्-तत्र श्लेषगुणो भवति[4]। द्वितीय पद्ये श्लेषगुणस्य लक्षणे कथितोऽस्ति यत् "यः स्पष्ट रूपेण स्वभावतो विचारे च गरिमामयः स्यात् स्वयमेव अनायासरूपेण सम्यक्प्रकारेण रचितः स्यात्" स श्लिष्ट गुणो वर्तते[5]। श्लिष् आलिङ्गने धातोः श्लिष्ट शब्दोनिष्पद्यते यत्र अन्योन्यं परस्परं पदानां चिक्वणतास्यात् येन पदानि आलिंगनवत् एकपदवद्भासमानानिअभीप्सितार्थबोधयन्ति तत्र श्लेषगुणो भवति। अस्य श्लेषगुणस्य व्याख्यांकुर्वन् अभिनवगुप्तो निर्दिदेश यत् कविना समुत्प्रेक्षित-अर्थभागस्य परस्परं सम्बद्धयोजनयासम्पन्नं यत् अभीप्सितमर्थजातंवर्तते तेन प्रतिपादिता या अर्थस्योपपत्ति स श्लेष गुणो वर्तते[6]। अनेनप्रकारेण

---

1. तत्रैव० 14/2.
2. भोजाज श्रृंगार प्रकाशे पृ० 257-58.
3. श्लेषः प्रसादः, समता समाधिः माधुर्यमोजः पदसौकुमार्यम्। अर्थस्य च व्यक्ति-रुदारता च कान्तिश्च काव्यस्य गुणा दशैते। तत्रैव नाटशास्त्रे 16/96.
4. ईप्सितेनार्थजातेन सम्बद्धानां परस्परम्।
   श्लिष्टता या पदानां हि श्लेष इत्यभिधीयते।। ना०शा०अभि०भा० 16/97.
5. विचारगहनं यत् स्यात् स्फुटं चैव स्वभावतः।
   स्वतः सुप्रतिवद्धंच श्लिष्टं तत् परिकीर्त्यते।।तत्रैव० 16/98.
6. ईप्सितेनार्थजातेनेति अर्थभागनां कविसमुत्प्रेक्षिततया परस्पर संबद्धया योजनाया सम्पन्नंयदीप्सितमर्थजातं तेनोपलक्षितार्थस्योपपद्यमानस्योपपद्यमानात्मा गुणः श्लेषः। तत्रैव० 16/97, पृ० 1319.

भरतसम्मतप्रथमश्लेषगुणस्य व्याख्यांविधाय अर्थगुणेष्वस्य गणनाकृतावर्तते। तथाचास्यगुणस्योदाहरणरूपेण भरतः "दृष्ट्वैकासनसंस्थितेप्रियतमे" इत्यादिकं पद्यं जग्राह। अस्मिन्पद्ये एकासनसंस्थिते एकस्मिन्नेवसमये स्वीयनायिकायाः तत्संख्याश्च प्रसादनं (आनुकूल्यंवा) मनोरथ- मार्गात्वहिरासीत्, तथापि श्लेषवशात् कविनिवद्धवैचित्र्यभाववशाच्च एका चक्षुनिमीलनादि व्यापारेण रंजिता, अपरा मुखचुम्बन व्यापारेण प्रसादिता। अस्यपद्यस्यैवं प्रकारेणो- पादानंकृतम् येन असंभावनायाः स्थितिर्नोत्पन्ना[4]। अस्मिन्कुटिलक्रमे अप्रसिद्धवर्णनक्रमः कस्यचिदपि हृदि न समुत्पन्नः, अपितु एषक्रमः सर्वेषां हृदि सुदृढ़ोऽभूत्[1]। अत्र उदाहरणे नायिकयोरनुरागस्य घटना एवं प्रकारेण वर्णिता येन अप्रसिद्ध-वर्णनक्रमोऽपि हृदि विशतीव प्रतिभाति। आचार्यवामनेनापि श्लेषगुणस्य लक्षणं "घटना एव श्लेषो वर्तते[2]" इति कृतम्। साघटना विविधक्रियाणां क्रमेण, चमत्कारकौटिल्येन प्रशस्तवर्णनेन च युक्तिविन्यास- योगएव वर्तते। वामनोऽपि पूर्वोक्तपद्यमेव अर्थगुणंश्लेषस्योदाहरणरूपेण प्रास्तावीत्। वामनेन श्लेषगुणवृत्तौ क्रमकौटिल्यअनुल्वणत्वोपपत्तियोग एव घटना विशेषो वर्तते, तदेवश्लेषगुणोविद्यते, इति कथितम्[3]। अत्रैतत् विचारणीयमस्ति यत् प्रशस्तवर्णनत्वरूपंयद् अनुल्वणत्वं, तद्विपरीतं उल्वणत्वं भवति। अस्यैव उल्वणत्व शब्दस्य प्रयोगः अर्थश्लेष गुणव्याख्या प्रसंगे अभिनवगुप्तेन कृतः। भोजदेवेनापि वाक्यार्थश्लेष–गुणनिरूपणप्रसंगे पूर्वोक्त पद्यमेवोदाहरणरूपेण न्यस्तो वर्तते भरतमते परस्परं संबद्धानां पदानां शिलष्टता श्लेषगुणो भवतीति पूर्वमपि प्रतिपादितम्। भोजदेवमते कार्यसम्पादनार्थं यत्र समीचीना योजना भवति तत्रवाक्यार्थश्लेषो भवति[4]। उदाहरणे एकस्याः नेत्रनिमीलनेन वञ्चनं, अपरायाः बदनचुम्बनेन प्रसादनं विद्यते एतदेव कार्यसम्पादने सुसूत्रता (सुसंबद्धता) विद्यते[5]।

---

1. अत्र मनोरथातीतोऽप्येककालनायिकायुगलहृदयग्रहणलक्षणार्थस्तथोपपादितो येनासंभावनास्पदं न भवति। तेन कुटिलोप्ययंक्रमो न हृदये उल्वणत्वं भजते। मज्जति हृदये यतः सर्वस्येति। ना०शा०अभि०भा० 16/97.
2. घटना श्लेषः। कां०लं०सू० 3/2/4.
3. तत्रैव० 3/2/4 वृत्तौ।
4. तेषां श्लेष इतिप्रोक्तः संविधाने ससूत्रता। स०कं०भ० 1/78.
5. अत्रैकासनसंस्थितयोः प्रियतमयो विलासिना ह्येका नयननिमीलन केलिकर्मणा वंचिता। अन्यातु वदनचुम्बनेन रञ्जितेति सोऽयं संविधाने सुसूत्रता। श्लेषोनाम वाक्यार्थगुणः। ना०शा० 16/97.

अभिनवगुप्तेन भरतप्रतिपादितश्लेषविषयक द्वितीयश्लोकस्य व्याख्यायां वामनोक्तशब्दगुणश्लेषस्यैव समर्थनं कृतमस्ति। यथा–पदानां ईप्सितार्थ पदेषु श्लिष्टतावर्तते सन्धियोगेन अनेकपदानां प्रतीतिरेकपदवद्भवति सा एव मसृणताशब्देनोच्यते[1]।

अनेनाभिनवगुप्तकथनेन ज्ञायते यद् भरतोक्तश्लेषगुणस्य व्याख्या वामनाभिमतशब्दगुणश्लेषस्याधारेण कृता। अत्र मसृणशब्दस्य प्रयोगात् वामनानुसरणं लंलक्ष्यते[2]। हेमचन्द्रेणापि भरतोक्तश्लेषगुणस्य लक्षणं भरताऽनुसारेणैवाकारि यथा–स्वभावस्पष्टं विचारगहनंवचः श्लेषगुणो भवति[3]। भोजदेवेनापि शब्दगुणश्लेषः मसृणत्वशब्देनोपात्तः[4]।

वाग्भटेनापि पदानांश्लिष्टता एकपदवत्प्रतीतिः स्वीकृता। परं तत्र लक्षणे केवलं शब्दभेदो वर्तते[5]। एवं प्रकारेण भरतमुनेरनन्तरं प्रायः सर्वैराचार्यैः श्लेषगुणलक्षणानुरूपेणैव श्लेषगुणस्य लक्षणंकृतम्। यद्यपि अन्येषां श्लेषगुणलक्षणे शब्दभेदो वर्तते परं वास्तविकदृष्ट्या सर्वेषांकृते श्लेषगुणलक्षणनिर्धारणे भरतस्य श्लेष गुणलक्षणेनैव दर्पणस्य कार्यं कृतमस्ति। गुणानां शब्दार्थयोर्वर्गद्वये विभागः स्पष्टरूपेण आचार्यवामनेनैव कृतः। परं भरतसम्मतगुणप्रकारेभ्यो गुणानांवर्गीकरणविषये ज्ञातुंशक्यते। भरतोक्तगुणप्रकाराणां व्याख्या अभिनवगुप्तपादेनाऽपिकृता वर्तते। तेनापि शब्दगुणअर्थगुणविषये स्वविचारा व्याख्यायांप्रकटिताः। भरतेन तु गुणानां वर्गीकरणं शब्दतः नोपात्तम् परं वर्गीकरणस्यप्रतीतिर्गुणप्रकारेभ्यो ज्ञायते। अभिनवगुप्तेनापि श्लेषलक्षणस्य द्वितीयपद्यस्यप्रथमार्धे अर्थश्लेषो द्वितीयार्धभागे शब्दश्लेषः स्वीकृतोऽस्ति[6]। परं अभिनवगुप्तस्य व्याख्यानुसारं एतत् प्रतीयते यदियंव्याख्या वामनकृत काव्यालंकारसूत्रमनुसरति। काव्यपदजन्यप्रतीतिविषयो रस एव

---

1. अथशब्दगुणमाह ईप्सितार्थयोनिः पदानां श्लिष्टता परस्परं सन्धिबन्धनतयाऽनेकमेकपदमिवभाति तदेव मासृण्यमुच्यते। ना०शा० 16/98.
2. मसृणत्वं श्लेषः। का०लं०सू० 3/1/11.
मसृणत्वंहिनाम यस्मिन् सति वहून्यपिपदान्येकवद्भासन्ते। तत्रैव० वृत्तौ।
3. स्वभाव स्पष्टं विचारगहनं वचः श्लिष्टम् इति भरतः हेमचन्द्र काव्यानुशासनं चतुर्थ अ० पृ० 235.
4. स०कं०भ० 1/66.
5. श्लेषो यत्र पदानिस्युः स्यूतानीव परस्परम्। वाग्भटालंकार 3/12.
6. अन्येपठन्ति, विचारगहनं यत्स्यात् स्फुटंचैव स्वभावतः इत्यर्थश्लेषः वक्रघटनावेत्यर्थः सुप्रतिवद्ध श्लेषइति पद श्लेषः। ना०शा०अ०भा० 16/98.

वर्तते। अभिनवगुप्तमते शब्दस्यव्यापारः शब्दे वर्तते, अभिधाया व्यापारो अभिधातरि तथा प्रतिपाद्यस्य व्यापारो अर्थे वर्तते। एतेत्रयोव्यापारो अभिधेयार्थे, अभिधानशब्दे, अभिधायां च वृत्तौ अवस्थिता भवन्ति। तेषु शब्दः रसाभिव्यक्ति सामर्थ्यशीलं अर्थं प्रतिपादयति, तथा च स्वभावतः अवश्यमेव कर्णेषु संक्रमते सः रसज्ञानयोग्यतासामर्थ्यवशात् गुणशब्दस्य वाच्योऽस्ति, अनेन प्रकारेण गुणाः शब्दगुणवाच्या भवन्ति। अनेनैवप्रकारेण अर्थे यः रसाभिव्यक्ति हेतुत्वंवर्तते स अर्थगुण उच्यते[1]। अतोऽत्र भरतमते श्लेषगुणस्य शब्दार्थोभयस्थितिर्विद्यते।

प्रसादः—

सम्प्रति भरतमुनिप्रतिपादितद्वितीयप्रसादगुणस्य विषये विचारो विधीयते, इमं प्रसादगुणं दशगुणवादिनः गुणत्रयवादिनो प्राचीनाअर्वाचीनाश्च सर्वेआचार्याः स्वीचक्रुः। भरतमुनेः गुणनिरूपणाऽनुसारं—अयं प्रसादगुणः मृदुललितपदैः समग्रगुणैः साहित्यजगति विराजते। यस्मिन् स्थानेऽप्रतिपादितोऽपि शब्दः अर्थो वा काव्यशास्त्रनिपुणैर्विद्वद्भिः प्रतीतिविषयोभूयते तत्र सुखजनक शब्दार्थज्ञानात् संयोगाद्वा प्रसादगुणः कथ्यते[2]। यस्मिन्काव्ये अनुक्तौ शब्दार्थौ काव्यमर्मज्ञानांकृते आनन्दजनकौस्याताम् तत्र सा रचना प्रसादगुणनाम्ना-व्यवह्वीयते। भरतोक्तप्रसादगुणस्य व्याख्यायां अभिनवगुप्तेन स्वमतस्य-प्रतिपादनमनेनप्रकारेण कृतमस्ति यद् विद्वद्भिः अकथितोऽपि कष्टात् कल्पना-कृतेसत्यपि अव्याख्यात इव प्रतीयते परं तस्यार्थप्रयोजनं स्वतः भासते एवं विधोर्थः यः वैमल्याश्रयो वर्तते परं लक्षणया स एव वैमल्यशब्देनाऽभिधीयते। अथवा काव्यस्य अनुपादेयपदार्थानां त्यागाद् यस्य वैमल्यं स्वयमेव प्रतिभासते। यथा—जलेनसह धूलिकाणानां यद्यसंपर्कः स्यात् तदा जलं विमलंजलमित्युच्यते, तथैव अनुपयोगीनामर्थानांत्यागेन काव्ये अर्थस्य वैमल्यंभवति स एव प्रसाद

---

1. इह काव्यार्थरसा इत्युक्तं प्राक्......तत्र शब्दस्य रसाभिव्यक्तिक्षमार्थप्रतिपादकत्वं स्वतः च श्रोत्रेच संक्रान्तिमात्रं नान्तरीयकत्वातद्रसदर्शनयोग्यतापादन सामर्थ्यात् गुणवाच्यम्, आवर्तमानो द्वितीयोवर्णः पदंवा प्राक्तनवर्णपद शोभाहेतुरलंकारः। एवमर्थस्यापि यद्रसाभिव्यक्तिहेतुत्वं सोऽर्थगुणः। ना०शा०अभि०भा० 16 पृ० 1257.
2. अप्यनुक्तो वुधैर्यत्र शब्दोऽर्थोवा प्रतीयते। सुखशब्दार्थसंयोगात् प्रसादः परिकीर्त्यते। ना०शा०अभि०भा० 16/99. सुखशब्दार्थसम्बोधात् प्रसादः परिकीर्त्यते। 97-98 B. XIV 99, 101; C. 99-101. IB (शब्दार्थेसंयोगात् 2B सतुकीर्त्यते। ना०शा० काव्यमाला संस्करण 17/88.

गुणो भवति[1]। यद्यपि नाट्यशास्त्रे समागतप्रसादलक्षणे शब्दार्थयोः प्रयोगात्—अस्यगुणस्य शब्दार्थोभयविधा सत्ता प्रतीयते। परं अभिनवगुप्तेन वामनस्य प्रसादगुणलक्षणाऽनुसारं अर्थगुणरूपेण प्रसादगुणस्य व्याख्या कृता। आचार्यवामनेनापि प्रसादगुणे अर्थस्यवैमल्यं स्वीकृत्य अर्थगुणेषु प्रसादगुणस्य निरूपणं कृतमस्ति[2]। अभिनवगुप्तेनापि अनया पद्धत्या एव अर्थवैमल्यं स्वीकृत्य अर्थगुणत्वमभ्युपेत्य प्रसादस्य व्याख्या कृता यथा सवर्णा कन्यका रूपयौवनारम्भ-शालिनी एतावत्कथनमात्रेणैव, इयं परिणययोग्यावर्तते पत्नीत्वेनग्राह्या, सहधर्मचारिणीत्वेन गार्हस्थ्ययोग्या, इयमतीवहृद्या, अतएव संभोगकर्तुं योग्या, इत्यादयः सर्वेअर्थाः, विनापरिश्रमेण स्वतोऽवभासन्ते[3]। अत्र अर्थवैमल्यात् अर्थगुणः प्रसादोऽस्ति। आचार्यवामनेन शब्दगुणप्रसादे शैथिल्यंप्रतिपादित- मस्ति[4]। अभिनवगुप्तेनापि भरतसम्मतप्रसादगुणस्य व्याख्यायां व्याख्यातं वर्तते यच्छब्देषु कलामात्रसन्धिवशाद् यदि शैथिल्यं भवति तत्र शब्दगुणः प्रसादो भवति[5]। यथा—

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे।
नृपतिककुदंदत्वा यूने सितातपावरणम्।।

अस्मिन्नुदाहरणे नैरन्तर्यविहाय एकस्य पदस्य द्वितीये पदे लयो न वर्तते, नच अन्योन्यापत्तिसन्धिरस्ति। अतएवात्र शिथिलता ध्वन्यते।

एकोऽपि गुणः शोभाकारणंभवति। व्यावृत्तात्मा इत्यत्र गाढता गुणो वर्तते, ककुदंदत्वा इत्यत्र च अपरगाढत्व गुणोऽस्ति परमेष गुणः सावर्ण्यरूपेण विराजते[6]।

---

1. यत्रार्थे अनुक्तेऽपि वुधैः कष्टकल्पनया अव्याख्यातस्याप्यर्थस्य प्रयोजनं स्वयंभासते सोऽर्थो वैमल्याश्रयोऽपि वैमल्यमुपचारात् सोऽर्थोवा काव्यस्य वैमल्यशब्दवाच्याज्जलस्येव पांसुभिरसंपर्कादभवतीतिवैमल्यमर्थस्य प्रसादः। ना०शा०अभि०भा० 16/99 वृत्तौ।
2. का०लं०सू० 3/2/3.
3. ना०शा०अभि० भा० 16/99 पृ० (32).
4. का०लं०सू० 3/1/6.
5. सुखइति न प्रयत्नमपेक्षते यःशब्दो, योऽर्थो, यःसंयोगः शब्दविषय इत्यर्थः, कलामात्ररूपएव यत्र सन्धि, अत एव शैथिल्यात्मा स शब्दगुणःप्रसादः। ना०शा०अभि०भा० 16/99 पृ० 32.
6. तत्रैव० 16/99.

हेमचन्द्रः भरतसम्मतप्रसादगुणस्य व्याख्यायां व्याजहार, पृथग्रूपेण वाच्यवाचकयोः (शब्दार्थयोः) योगात् सम्बन्धात् यत्र अप्रतिपादितयोः शब्दार्थयोः ज्ञानं भवति स प्रसाद गुणो वर्तते, पदेनैव तस्यार्थस्यावगतिर्भवति एतदर्थमत्र शब्दार्थयोर्ग्रहणंवर्तते[5]। प्रथमवाग्भटः प्रसादगुणनिरूपणे प्रसादगुणस्थाने "प्रसत्तिः" शब्दं प्रायोक्षीत्, परं प्रसत्तिशब्दस्यार्थः प्रसन्नता एवकृतः पठनसमन्तरमेव यत्र अर्थावबोधो भवति स प्रसन्नता अथवा प्रसत्तिइत्युच्यते[6]। भरतमतेतु अनुक्त्वैव यत्र शब्दार्थयोः प्रतितीर्भवति तत्र प्रसाद गुणः। वाग्भटमते पठनसमकालमेव यत्रार्थज्ञानंजायते तत्र 'प्रसत्ति" अथवा प्रसादोभवति, भरतः प्रसादगुणलक्षणे शब्दार्थौउपाददौ, परं वाग्भटेनकेवलं लक्षणे अर्थस्य प्रयोगः कृतोऽस्ति इत्येवानयोर्भेदः।

समता–

साम्यस्यपर्यायहेतुभूतः भरतनिरूपितगुणेषु समताख्योतृतीयोगुणस्तत्र भवति यत्र अतिदीर्घसमासयुक्तपदानि न स्युः, निरर्थकाभिधायिपदैः या रचना दूरधिगम्या नस्यात्, यत्र समानरूपेण पदानांविन्यासः कृतोभवेत् स समताख्योगुणो विद्यते[1]। द्वितीयपद्ये समतागुणविषये "भरतमुनेर्विचारः एवं प्रकटी भवति, यत्र गुणालंकारौपरस्परं समानरूपेण भवेताम् तथा च अन्योन्यौ भूषयेताम्, गुणालंकारयोर्द्वयोः साम्येन समता गुणो भवति[2]। काव्यमालासंस्करणे प्रथमपद्ये समागतस्य "दुर्वोधनैश्च" इति पदस्य स्थाने "दुव्वोधनैश्च"[3], पाठो वर्तते। अस्यार्थोऽपि दुरधिगम्य एव भवितुर्महति। द्वितीय पद्येसदृशा इत्यस्यस्थाने, सदृशं, भूषणाः इत्यत्यस्थाने "भूषणम्", समाः स्युः समतां गता इत्यस्य स्थाने "समासात्" समता यथा समास्युः समयामता अनेन प्रकारेण पाठ भेदोऽस्ति[4]। भरतमते गुणालंकारयोः साम्यत्वेन समता गुणो भवति। गुणालंकारयोः परस्परं शोभाकरत्वंस्वीकृत्यानयोरभेदसम्बन्धोऽपि

---

5. विभक्तवाच्यवाचकायोगादनुक्तयोरपि शब्दार्थयोः प्रतिपत्तिः प्रसाद इति भरतः। पदपूर्विका तदर्थावगतिरिति शब्दार्थयोग्रहणम्। काव्यानुशासनम् अ० 4 पृ० 234.
6. वाग्भटालंकारः 3/10.
1. नातिचूर्णपदैर्युक्ता नच व्यर्थाभिधायिभिः।
दुर्वोधनैश्च न कृता समत्वात् समता मता।। ना०शा०अभि०भा 16/100.
2. अन्योन्य सदृशा यत्र तथा ह्यन्योन्य भूषणाः।
अलंकारा गुणाश्चैवसमाः स्युः समतां गताः।। तत्रैव० 16/101.
3. ना०शा० काव्यमाला संस्करण 1-98 पृ० 88.
4. 3.C.O. सदृशं, 4.C.O. भूषणम्, 5.B समाः स्युः समयामता तत्रैव० 17/98 पृ० 88.

भरतेन समतागुणत्वेन प्रतिपादितः। हेमचन्द्रः काव्यानुशासने भरतसम्मत-समतागुणस्य विषये अचकथत् य्द्गुणालंकारयोः समूहः यत्रान्योन्यं विभूषयति तत्र समता गुणस्य सद्भावो विराजते[1]।

अभिनवगुप्तेन नाटयशास्त्रोक्त समतागुणस्य व्याख्याप्रसंगेऽभिहितमस्ति यच्छब्दानां समत्वात् समतागुणो वर्तते, अनेन अतिचूर्णपदैः इत्यस्य शब्दस्यार्थः अतिशय समासयुक्तरचनायाश्चाभाव एव स्वीकृतः। अर्थात्-दीर्घसमासस्य अत्यन्तसमासस्य च विपर्यये समता गुणो भवति। अत्रोपक्रान्तमार्गस्य अपरित्यागो भवति। अभिनवगुप्तमते अयं शब्दगुणो वर्तते[2]। अनेन प्रतीयते यदभिनवगुप्तेनातिचूर्णपदस्य व्याख्या अतिशयसमासाभाव एव कृता। अत्रैतत्सम्भाव्यते यदयंवामनमेवाऽनुसरति। आचार्यवामनेनापि गद्यभेद-निरूपणप्रसंगे चूर्णगद्य भेदस्य लक्षणम् दीर्घसमासाभावमृदुपद्युक्तं च कृतमस्ति[3]। अभिनवगुप्तेन शब्दानांसमत्वात् या समतागुणस्य शब्दगुणरूपेण व्याख्या कृता वर्तते सापि वामनमेवानुसरति। यतोहि वामनेनापि शब्दगुण- समतालक्षणे मार्गस्याभेद एव समताख्यो गुणोवर्तते इत्यभिहितम्[4]। रचनायां येनरूपेणोपक्रमः कृतः स्यात् तेनक्रमेणैवोपसंहारः मांर्गाभेदो भवति, अस्यैव मार्गाभेदस्य श्लोके, प्रबन्धकाव्ये च अपेक्षा भवति। अभिनवगुप्तेन समता- 'गुणस्योदाहरणरूपेण'' गाहन्तां महिषानिपानसलिलैः इत्यादिपद्यं समुपन्यस्तम्। अस्मिन् पद्ये अवान्तरार्थ समाप्तेरनन्तरं अर्थान्तरस्योपक्रमः (छायाबद्धकदम्बकं) अनया रीत्या समास रूपेणैव कृतः। परं तथापि ''चैत्यात्कूपपतनमिव'' चूर्णपदस्य प्रयोगः कृतः। अस्मिन् पद्ये द्विपदसमासयुक्ता अतिदीर्घसमासयुक्ता रचना च न विद्यते। अतएव समताख्यो गुणः शब्दगुणत्वेन कथितः[5]।

---

1. परस्परविभूषणो गुणालंकारग्रामः समग्र इति भरतः। काव्यानुशासनम् अ० 4 पृ० 236.
2. नातिचूर्णपदैरिति। शब्दानां समत्वात्समः चूर्णपदैरसमासरचना यत्र सातिशया न भवति। अतिशयश्च प्रयोगिनमपेक्षते इति। दीर्घसमासोऽत्यन्तसमासश्च विषमता, तद्विपर्ययेन समता उपक्रान्तमार्गपरित्यागरूपेत्युक्तं भवति। ना०शां०अभि० भा० 16/100.
3. अनाविद्ध ललितपदं पूर्णम्। का०लं०सू० 1/3/24.
4. मार्गाभेदः समता। तत्रैव० 3/1/12.
5. ना०शा०अभि०भा० 16/100 पृ० 1332.

अस्यैव समतागुणस्य अर्थगुणरूपेणापि अभिनवगुप्तेन व्याख्यायां कथितमस्ति यन्निष्प्रयोजनमर्थं ये कथयन्ति ते व्यर्थाभिधायिनः शब्दा वर्तन्ते। एवंविधानां शब्दानां यत्र प्रयोगो न भवति तत्र समतागुणः—अर्थगुणतामेति। अभिनवगुप्तमते एतच्छब्दानामवैमल्यं न वर्तते यतस्तस्यनिरासः प्रसाद गुणेनेवाऽभवत् निष्प्रयोजनमर्थं शब्दाः प्रतिपादयेयुरेतन्नयुक्तियुक्तम्, यतोहि निष्प्रयोजकत्वं सर्वथा नैव भवितुमर्हति, प्रयोजनेसत्यपि दूरधिगम्योऽस्ति। अतएवोक्तम् किं दुर्वोधनैरिति यदर्थमुक्तम् तदभिधानं प्रयोजनम्। अतः समतागुणे निष्प्रयोजनताया दुर्बोधताया अभावस्य आवश्यकता बोभवीति। समतागुणस्य अर्थगुणरूपेण यत् प्रतिपादनमभिनवगुप्तेन कृतम्, तदपि वामनमनुसरति, यतः वामनेनापि अर्थगुणेषु समतागुणस्यलक्षणं विषमताया अभाव एव स्वीकृतः[1]। अतः अवैषम्येन प्रक्रमस्यअभेदः समता गुणोवर्तते। भरतः समता गुणं कविगुणालंकारयोरभेदमुरीकृत्य द्वयोर्मिथः भूषणत्व रूपेण प्रास्तावीत्। भरतेन, समतागुणलक्षणवत्, षट्त्रिंशद्भूषणेषु भूषणलक्षणस्य लक्षणे, तथाच षट्त्रिंशल्लक्षणेषु भूषणलक्षणे, गुणालंकारयोरलंकृतधर्मत्वं सौन्दर्याधानरूपत्वं च प्रतिपादितम्। समतागुणस्तु रसेन सह काव्यशोभां विदधाति। तत्र अलंकारा अतिशयकान्तिं जनयन्ति। येन गुणा अलकारान्- भूषयन्ति, अलंकाराः गुणान् भूषयन्ति, यथा रमणीयानायिका कटककुण्डलादीन् अलकारान्, विभर्ति, अलकाराः नायिकामवतंसयन्ति, नायिकायाः सौन्दर्येण अलंकाराः शोभां प्राप्नुवन्ति, अन्यथा सामान्यनायिकाऽपि कटककुण्डलादीन् अलकारान् धारयति, परं तत्र केवलं अलंकारा एव नायिकायाः शोभां वर्धयन्ति, नतु नायिकया अलकाराः शोभन्ते। एतादृशी एव स्थितिः समता गुणे गुणालंकारयोर्वर्तते, गुणास्तु रसयुक्तरचनायां सर्वत्र भवन्ति परं समतागुण- लक्षणाऽनुरूपरचनायां गुणालंकारयोः स्थितिरावश्यकी वर्तते।

समाधिः

सम्यक् प्रकारेणाधीयते ज्ञायते अर्थोऽनेनेति समाधिः, अथवा समाधीतेऽस्मिन्नर्थोऽनेनेति समाधिः। समाधिगुणस्य लक्षणे भरतमुनिना अभिहितम् यद्युपमाद्यलंकारस्य इव अथवा उपमाद्यलंकोरैरिव समाधि-

---

1. अवैषम्यं समता। का०लं०सू० 3/2/5.

गतानामर्थानां प्रयत्नेन अतिमात्ररूपेण संयोगःसमाधि नामाख्योगुणः कथ्यते[1]।

द्वितीयसमाधिगुणलक्षणे भरतेनप्रतिपादितमस्ति प्रतिभाशालिजनैर्यत्रार्थस्यवैलक्ष्यण्यं प्रतिपाद्यते तेन विशिष्टाऽर्थेन संयुक्तः समाधिगुणोभवति। अर्थात् परितः विशिष्टोऽर्थः यत्र संलक्ष्यते एवं विधेनार्थेन सम्पन्नः समाधि गुणो वर्तते[2]। अथवा उपमादिरूपे–उपदिष्टानां यत्नेन प्राप्तानामर्थानां संक्षेपत्वात् निर्णायकाः समाधिगुणं निर्निन्युः[3]। भरतसम्मतसमाधिगुणलक्षणे समागतस्य उपमाद्युपदिष्टपदात् प्रतीयते यथोपमा अलंकारे निशानायकस्य, नायिकायाः–आननेन सह साम्यं भवति, तत् साम्यं अतिमात्ररूपेण भवति। अतएव मुखे चन्द्रस्योपमादीयते, तथैवात्र समाधिगुणे वर्णनीयपदार्थस्य वर्णितपदार्थेनसह अतिमात्ररूपेण संयोगसम्बन्धस्य वर्णनं समाध्याख्यो गुणो प्रजायते। अर्थगुणोऽयं समाधि इति भरतेन शब्दतो नोपात्तम् तथापि अर्थवैशिष्ट्याद् भरतमतेप्ययंगुणोऽर्थगुण एव। अभिनवगुप्तो वामनमतानुसारमस्यगुणस्य शब्दार्थगतत्वं स्वीचकार।

आचार्यवामनः समाधिगुणस्य अर्थगुणत्वं स्वीकुर्वन् अभिदधौ यद्र्थस्य दृष्टिः समाधिर्वर्तते समाधिमूलत्वात् स समाधिशब्देनोच्यते। समाधौ चित्तस्य एकाग्रता भवति एकाग्रचित्तएव अर्थान् पश्यति[4]।

समाधिगुणविषयिकामिमांसरणीमनुसरन् अभिनवगुप्तः भरतसम्मतसमाधि गुणस्यव्याख्यायां प्रत्यपीपदत् यत् समाहित मनसा–एवविशेषतया संपाद्यमानत्वाद् विशिष्टोऽर्थः समाधिर्वर्तते, इत्युक्त्वा समाधिगुणं अर्थगुणत्वेनां-

---

1. उपमाद्युपदिष्टानां अर्थानां यत्नतस्था।
   प्राप्तानां चातिसंयोगः समाधिः परिकीर्त्यते।। ना०शा० काव्यमाला सं० 17/99 पृ० 88 तत्रैव अस्यपद्यस्य पाठभेदः अनेन प्रकारेण वर्तते–99-100 (B XVI. 103, 104, C. 101-102) I.C.
   उपमास्विहदृष्टानां 2B चापि संक्षेपात् समाधिर्निर्णयोयतः 3B. adds. det.
2. अभियुक्तैर्विशेषस्तु योऽर्थस्येहोपलक्ष्यते।
   तेन चार्थेन सम्पन्नः समाधिः परिकीर्तितः।। ना०शा० काव्यमाला संस्करण 17 पृ० 8.
3. उपमास्विह दृष्टानामर्थानां यत्नतस्तथा।
   प्राप्तानां चाति संक्षेपात् समाधिर्निर्णयो यतः।। ना०शा०अभि०भा० 16/103.
4. अर्थदृष्टिः समाधिः। का०लं०सू० 3/2/7.
   तत्रैववृत्तौ–समाधिकरणत्वात् समाधिः।

गीचकार[1]। आचार्यवामनसम्मतशब्दगुणसमाधौ आरोहाऽवरोहक्रमो भवति। अभिनवगुप्तेनाऽपि समाधिगुणे आरोहाऽवरोह क्रमं स्वीकृत्य शब्दगुणरूपतां नीतः समाधिगुणः। अस्यमते समाधिशब्दस्यार्थः "परिहारो" वर्तते, परिकीर्त्यते इत्यस्य स्थाने काव्यमाला संस्करणाऽनुसारं परिकीर्तितः पाठः स्वीकृतः। अस्यार्थः समन्तादाक्रानय उच्चारणसम्पन्नः समाधिर्विद्यते, स समाधिः आक्रान्त्या उच्चारणे आरोहाऽवरोहक्रमः आक्रान्त आक्रमणस्य गतितुल्या वरीवर्ति[2]। हेमचन्द्रेणाप्यस्यसमाधिगुणस्यलक्षणे कथितमस्ति यदर्थस्य गुणान्तरसमाधानात् समाधिर्भवति[3]। दण्डिनः समाधिगुणस्यलक्षणं[4] उपमाद्युपदिष्टानामित्यादि भरतसम्मत समाधिगुणेनसह साम्यमावहति एतद्दण्डिनो गुणविवेचने विवेचयिष्ये।

माधुर्यम्–

भरतमुनिना माधुर्यगुणस्यलक्षणेकथितमस्ति यद्वाक्यं बहुवारं श्रुतंस्यात्, तस्य पुनः पुनः प्रतिपादनेसत्यपि उद्वेजकता न भवति तन्माधुर्यमुच्यते। पुनः पुनःर्गस्यवाक्यस्यकथनेनश्रवणेन च बुद्धिः कुण्ठिता न स्यात् स माधुर्यगुणो वर्तते[5]। भरतस्य माधुर्यलक्षणे समागतवाक्यपदेन ज्ञायते यद् भरतमते माधुर्यगुणः शब्दगुणोऽस्ति, यतोहि वाक्ये शब्दानां प्रयोगो भवति। अतएवास्य गुणस्य शब्दगुणत्वप्रतिपादनमुचितम्।

अभिनवगुप्तः भरतमुनिसम्मतमाधुर्यगुणलक्षणस्य व्याख्यायां माधुर्यगुणं शब्दगुणरूपेण अर्थगुणरूपेण च अमंस्त। अभिनवगुप्तेन माधुर्यलक्षणे समागतस्य

---

1. अभियुक्तैर्विशेषस्त्विवति। यस्य द्वितीयार्थस्य अभियुक्तैः प्रतिभातिशयवद्भिः विशेषो अपूर्वः स्वोल्लिखित उपपद्यते स समाहित मनः संपाद्य विशेषत्वादर्थो विशिष्टः समाधिः। ना०शा०अभि०न०भा० 16/102.
2. शब्दगुणश्च समाधिः तमाहतेन चेति। समाधिशब्दस्ययोऽर्थः परिहार लक्षणस्तेन यः परिकीर्तितः परितःसमन्तादाक्रान्त्या उच्चारणे सम्पन्नः सच समाधिः आक्रान्त्या उच्चारणे आरोहावरोहक्रमः आक्रमणेन गतितुल्यः ना०शा०अभि०भा० 16/102.
3. अर्थस्य गुणान्तर समाधानात् समाधिरिति भरतः। काव्यानुशासनम् अ० 4 पृ० 236.
4. काव्यादर्शः 1/93.
5. बहुशो यच्छ्रुतं वाक्यमुक्तंवापि पुनः पुनः।
नोद्वेजयति यस्माद्धि तन्माधुर्यमितिस्मृतम्।। ना०शा०का०मा०सं० 100 पृ० 81.

श्रुतशब्दस्यार्थसंशयविपर्ययास्पदरूपेण च प्रतिपादितः दीर्घसमासयुक्तपदे तत्पदघटितवाक्ये च संशयविपर्ययोरास्पदं न भवति तन्माधुर्यमुच्यते[1]। भरतोक्त माधुर्यगुणलक्षणस्य अभिनवगुप्तेन एषाव्याख्या वामनाभिमतशब्दगुण माधुर्यलक्षणात् प्रभावितेन कृता। यतोहि वामनेनापि पृथक्पदत्वे एव माधुर्यगुणं स्वीकृत्य दीर्घसमासाभाव एव स्वीकृतः[2]। अभिनवगुप्तेनाऽयं गुणोऽर्थगुणरूपेणापि प्रतिपादितोवर्तते। अनेनकथितमस्ति यत् पुनः पुनः प्रतिपादितस्यार्थस्य अवगाहनेकृतेसति विरसता अपनीयते तद्वचनगतवैचित्र्ययात्मको माधुर्य-गुणोऽर्थगुण एव विद्यते[3]। अत्रवैचित्र्यशब्दस्यप्रयोगं अभिनवगुप्तः वामनसम्मत अर्थगुणमाधुर्याऽनुसारमकार्षीत्। वामनेन उक्तिवैचित्र्यात्मकमाधुर्यगुणस्य लक्षणं व्यधायि[4]। उक्तिवैचित्र्ययोदाहरणरूपेण रसवदमृतं कः सन्देहो इत्यादि पद्यं उदाहृतं वर्तते। अभिनवगुप्तेनापि इदमेवपद्यं उक्तिवैचित्र्यसमर्थनार्थं प्रास्तावि। भरतोक्तमाधुर्यगुणविषये हेमचन्द्रेण निगदितं यद्बहुवारमाकर्णितम-भिहितं वाक्यं मनसि उद्वेजकत्वं नोत्पादयति तन्माधुर्यं भरतसम्मतम्[5]।

ओजः—

युद्धसामर्थ्यशत्रुहननादिरूपपराक्रमयुक्तस्योजोगुणस्यविषये भरतेन—प्रतिपादितमस्ति। यत्र विविधसमासैर्विचित्रपदैरुदात्तस्वरैश्च युक्ता रचना संभवति तत्र ओजोगुणो विलसति[6]। ओजो गुणस्य द्वितीयलक्षणे

---

1. वहुशो यच्छ्रुतमित्यादि। यदिति यस्माद्धेतोर्वाक्यं श्रुतं संशय विपर्ययोरास्पदं न भवतीति तन्माधुर्यम्। द्राघीयसी समासे ताववश्यं भवत इति तद्विरहएव माधुर्यशब्दगुण इत्युक्तं भवति। ना०शा०अभि०भा० 16/104.
2. पृथक् पदत्वं माधर्युम्। समासदैर्ध्यनिवृत्तिपरं चैतत् का०लं०सू० 3/1/21.
3. पुनः पुनरप्युक्तमर्थजातं यस्माद्धेतोरपनीतमवगाहनेन वैरस्यं तद्वचनवैचित्र्यात्मक माधुर्यमर्थगुणः वचनान्तराभिधेयतयाहि स एवार्थो विचित्रो भवति। यथा—रसवद-मृतमित्यादि। ना०शा०अभि०भा० 16/104.
4. उक्तिवैचित्र्यं माधुर्यम्। का०लं०सू० 3/2/1.
5. वहुशो यच्छ्रुतमभिहितं वाक्यमनुद्वेजकंमनसस्तन्मधुरमिति भरतः। काव्यानुशासनम् अ० 4 पृ० 237.
6. समासवद्भिर्विविधैर्विचित्रैश्च पदैर्युतम्।
   सानुस्वारैरूदारैश्च तदोजः परिकीर्त्यते।। ना०श०अभि०भा० 16/105.

भरतेन कथितमस्ति यन्निन्दितोऽपि, हीनोपि शब्दार्थसम्पत्या उदात्तार्थाव बोधकः ओजो गुण उच्यते[1]।

नाट्यशास्त्रस्य काव्यमालासंस्करणे ओजोगुणस्य, तथा लक्षणे पाठान्तरं वर्तते[2]। भरतलक्षणमभिलक्षीकृत्य हेमचन्द्रेनास्यगुणस्य व्याख्यायां व्याख्यातं यन्निन्दितेषु तथा हीनवस्तुष्वपि शब्दार्थसम्पत्या कवयो यदुदात्तत्वं वर्णयन्ति तद् भरतमते ओजोगुणो वर्तते[3]। ओजगुणव्याख्याप्रसंगे मंगलस्यमतमपि (हेमचन्द्रेण) निरूपितमस्ति–"मंगलस्यमते" अनवगतस्य गीतस्य अहीनस्य वा वस्तुनः कविभिः शब्दार्थसम्पत्या यदनुदात्तत्वंवर्ण्यते, स ओजो न भूत्वा अनोज एव भवति, अतो "मंगलमते" अवगीतस्य हीनस्य वा वस्तुनः कविभिः यत् उदात्तत्वंवर्ण्यते स ओजो[4] गुणोस्ति।

अभिनवगुप्तेन भरतप्रतिपादितओजोगुणस्य प्रथमलक्षणस्य व्याख्यायां "विविधैः" अस्यस्थाने 'बहुभिः" पाठः स्वीकृतः, "सानुस्वारैः, अस्यस्थाने "सानुरागः", पाठः स्वीकृतः। यत्रवर्णा वर्णान्तरमपेक्षते इति सानुरागपदस्यार्थः कृतः[5]। सानुरागविषये अभिनवगुप्तो अभिदधौ यथा कश्चिदनुरागीपुरुषः स्व अनुरक्तं पुरुषमपेक्षते तथैव परस्परं सम्पृक्तवर्णोऽपि वर्णान्तरमपेक्षते, यथा मकरन्दस्य "र" वर्णः स्व गुरुत्वाय "न्द" वर्णमपेक्षते[6] एवं विधास्थितिः अन्यत्रापि ज्ञेया।

---

1. अवगीतोपिहीनोऽपि स्यादुदात्तावभासकः।
   यत्र शब्दार्थसम्पत्तिस्तदोजः परिकीर्तितम्।। तत्रैव० 16/106.
2. "अवगीतोऽपि हीनोऽपि स्यादुदात्तावभासकः।
   यत्र शब्दार्थसम्पत्तिस्तदोजः परिकीर्तितम्।। 101-102 (B. XVI 126-107); (C-103-104) IC. अवगीताऽविहोनोऽपि 2 B.O. त्तावभासकः 3B संपत्याः ना०शा०का०मा०सं० 17/101/पृ० 88.
3. तत्र अवगीतस्य हीनस्य वस्तुनः शब्दार्थसंपदायदुदात्तत्वं निषिंचन्ति कवयस्तदोजः इति भरतः। काव्यानुशासनम् अ० 4 पृ० 233.
4. अनवगीतस्याहीनस्यवा वस्तुनः शब्दार्थयोरर्थसम्पदा यदनुदात्तत्वं निषिंचन्ति कवयस्तर्हितदनोजः स्यादिति मंगलः। काव्यानुशासनम् अ० 4 पृ० 233.
5. सानुरागः अनुरक्तं यथा वर्णो वर्णान्तरमपेक्षते तत्र सानुरागमत्वम्। ना०शा०अभि०भा० '16/105.
6. विलुलित मकरन्दा मञ्जरीर्नर्तयन्ती। तत्रैव 16/105, व्याख्यायां

अभिनवगुप्तमते यस्यां रचनायां अवयवाः-शब्दाः निविडाः-सघनाश्च भवन्ति तदेव गाढत्व[1]मुच्यते। गाढत्वशब्दात् प्रतीयते यद् वर्णानामेवगढ़त्वंभवति, वर्णगाढ़त्वादेव अयं गुणः शब्दगुणतां गतः। अत्र व्याख्यायां गाढत्वशब्दस्य प्रयोगः वामनप्रतिपादितशब्दगुणंओजोऽनुसरति। यतो वामनेनापि बन्धे गाढत्वमुररीकृत्य ओजोगुणस्य निरूपणं व्यधायि[2]। वामनेन गाढत्वशब्दस्यार्थो अक्षरविन्यासः पारस्परिकसंश्लिष्टताया बन्धस्य गाढता वर्तते इति क्रोडीकृतः।

अभिनवगुप्तः—ओजोगुणस्य अर्थगुणतां इत्थं जगाद यथा रचनायां संक्षेपेन पदानिप्रयुक्तानि स्युः परं अर्थस्ययदि तत्र बाहुल्यं भवति स संक्षेपनामार्थगुणः[3], एवं च बहुभिरूदारैःपदैरेकस्यापि वस्तुनः यत्र उपनिबन्धनं क्रियते, स विस्तार-रूपोजोऽर्थ गुणः[4]। अभिनवगुप्तस्य, संक्षेपार्थगुणस्यविस्तारार्थगुणस्य च, विचारः वामनेन प्रभावितः प्रतीयते। यतोहि वामनेन अर्थगुणओजोनिरूपण प्रसंगे अर्थगतप्रौढ़िः पंचविधा प्रतिपादितास्ति। तत्र अन्यप्रकारेण अर्थस्य विस्तारः, अन्यप्रकारेण अर्थस्य संकोचः तृतीय, चतुर्थ प्रौढः प्रकारो वर्तते[5]। भरतमुनिप्रतिपादित ओजोगुणस्यायमाशयः यत्—अवगीतः शिष्टाचारः, तद्रहितोपि, शिष्टचारसुकृतिविषयरहितोपि उदात्तस्वरयुक्तः, (ताल्वादि सभागस्थानेषूर्ध्वभागे निष्पन्नोजुदात्तः) यत्र शब्दार्थौ सम्पत्तिरूपेण भवतः, एवं विधंगुणं ओजनाम्ना व्यवहरन्ति। शिष्टाचाररहितोऽपि उदात्तस्वर सहितः, शब्दार्थसम्पत्याविभूषितः, ओजोगुणः प्रशस्यते। एतद् गुणानुसारी रचना, वीरवीभत्सरौद्ररसेषु क्रमेणाधिक्यरूपेण भवतीति मम्मटेन प्रतिपादितम्[6]। तत्र केवलं दीर्घसमासाना-मुदात्तस्वराणां, कठोरशब्दानांच प्रयोगो जायते अनेनप्रकारेण ओजोगुणानुसारि रचनायाः, यो वक्ता, तद् वक्तृसकाशात् प्रतिपक्षिणोऽपि बिभ्यति।

---

1. तदेव गाढत्व मुच्यते निविडावयवतेजसा। तत्रैव 16/105.
2. गाढबन्धत्वमोजः। का०लं०सू० 3/1/5.
3. यत्र खलु समासेन संक्षेपेण युक्तानिपदानि, यत्रार्थो भूयानिति संक्षेपोनामार्थगुण ओजः। ना०शा०अभि०भा० 16/105.
4. तथा एकमपि वस्तु उदारैर्बहुभिः पदैरूपनिबध्यते विस्तारात्मकत्वमप्योजोऽर्थ गुणः। तत्रैव 16/105.
5. का०लं०सू० 3/2/2.
6. वीभत्स रौद्ररसयोस्तस्याधिक्यं क्रमेण च। काव्यप्रकाशः 8/93.

सौकुमार्यम्–

रचनायां सुकुमारताया भावः सौकुमार्यगुणस्य लक्षणाऽनुसारं भवति। सौकुमार्यगुणस्य लक्षणे भरतेन स्वमतं एवं प्रकटितम्, "या रचना सुविन्यस्त सन्धिभिः, सुखेनप्रयोक्तुं योग्यैश्शब्दैश्च समन्विता स्यात् तथा सुकुमारार्थैः संयुक्ता स्यात् सा रचना सौकुमार्यगुणयुक्ता भवति, अर्थात् परुषशब्दरहितत्वात् सुकुमारार्थसंयुक्तत्वात् सौकुमार्यगुणः कथ्यते[1]। भरतोक्तसौकुमार्यगुणविषये हेमचन्द्रेण स्वमते प्रदर्शितमस्ति यत्र शब्दार्थौ सुखजनकौस्याताम् तत्र भरतमते सौकुमार्यगुणो भवति[2]। हेमचन्द्रेण भरतमते "सौकुमार्य" गुणे शब्दार्थयोः अपारूष्यम् प्रकटितम् नतु शब्देनोपात्तम्।

भरतलक्षणाऽनुसारं ज्ञायते यत् सौकुमार्यगुणस्य शब्देअर्थे च उभयत्र-स्थितिर्वर्तते। अभिनवगुप्तः वामनप्रतिपादितअर्थगुणसौकुमार्यवत्[3] भरतसम्मत सौकुमार्य गुणे अपारूष्यं स्वीचकार। अभिनवगुप्तः कथयति यत् कुत्रचित् द्राढा, सदृकत्वादिपदेषु स्वयमेवपरूषता भवति, कुत्रचित् दर्व्याख्योर्वी विधूयते, इतिवत् सन्धिकाठिन्यात् परूषता भवति।

एतदुभयप्रकाररहितेसति सौकुमार्यगुणः शब्दगुणत्वं प्राप्नोति[4]। अस्य सौकुमार्यगुणस्यार्थगुणत्वं प्रतिपादयता अभिनवगुप्तेन कथितमस्ति यत् पदस्यार्थेपारूष्येसति–अपारूष्यरूपेण तस्यार्थस्ययन्निरूपणं तत् सौकुमार्योऽर्थ-गुणोवर्तते। यथा लोकव्यवहारे, एकाकिनः पुरुषस्य कृते परुषवर्णैः जनाः कथयन्ति यदयंवराकः एकाकीएव, इत्यस्यस्यस्थाने, अस्य देवाः सहायकाः सन्ति, इति कथनं स्यात् तदा अयमेवार्थः अपारुषो भविष्यति। अननैवप्रकारेण असौमृतः, अस्य स्थाने यदि "असौमहापथयात्री अभवत्" अथवा "यशःशेषः" इति कथनेनसौकुमार्य एव भविष्यति[5] डॉ० सुशीलकुमार डे "मते सौकुमार्यगुणो-

---

1. सुख प्रयोज्यैर्यच्छब्दैर्युक्तं सुश्लिष्टसन्धिभिः।
   सुकुमारार्थ संयुक्तं सौकुमार्यं तदुच्यते।। ना०शा०का० 17/102 पृ० 88.
2. सुखशब्दार्थसुकुमारमिति भरतः। काव्यानुशासनम् अ० 4 पृ० 237.
3. अपारूष्यं सौकुमार्यम्। का०लं०सू० 3/2/12.
4. क्वचित् पदस्य स्वयं पारूष्यं भवति....क्वचित् संहितया.... तदुभयरहितत्वं सौकुमार्य शब्दगुणः। ना०श०अभि०भा० 16/107.
5. परुषेऽपिचार्थे सुकुमारेणार्थेन या संपत्ति स्तदर्थगुणः सौकुमार्यमपारुष्यम्। एकाकिनि देवतासहाय इति, मृते यशः शेष इति, जड़े देवानांप्रियइति। तत्रैव 16/107.

दण्डिनः "समतागुणस्य अनिष्ठुराक्षरप्राय–सौकुमार्य गुणस्य साम्यं विभर्ति, अथवा वामनोक्त अजठरार्थत्व अथवा अपारूष्यानुरूपोऽस्ति। सम्भवतः कठोर वर्णानां अमंगलशब्दावल्यांश्च कथनस्य परिहारं व्यनक्ति। अतएव "मृत" इत्यस्यस्थाने "कीर्तिशेषंगत इत्यौचित्यंधत्ते, एतदेवकारणं यत् परवर्त्याचार्यैः अस्यगुणत्वमस्वीकृत्य अमंगलदोषस्य विपर्यये अस्य सत्ता स्वीकृता वर्तते। कैश्चिदश्लीलदोषान्तर्गत अस्यगुणस्य स्थितिः स्वीकृता[1]। मम्मटेनास्यगुणस्य अमंगलरूप अश्लीलदोषाभाव एव प्रतिबोधितः।

उपर्युक्तमते विचार्यते–

यदस्यगुणस्य अपारूष्यरूपे अर्थात् कठोरतायाः अभावे एव स्थितिः स्वीकार्या, नत्वमंगलविपर्यये। अमंगलदोषस्य स्थितिः तत्र भवति यत्र केवलं शब्देन अमंगलंसूचितं स्यात्, परं वास्तविकरूपेण तत्र अमंगलदायिका स्थितिर्नस्यात्। यथा "प्रससार शनैर्वायुः विनाशेतन्वि ते तदा" अस्मिन्नुदाहणे ते विनाशे शनैर्वायुः प्रससार "विनाशे अर्थात् गमने सति" नतुमरणानन्तरम्, अत्र विनाशशब्दस्यप्रयोगादेव अमंगलदायक अश्लील दोषो वर्तते, या जीवति तस्याकृते विनाशशब्दस्य प्रयोगोऽमंगलकर एव वर्तते "विनाशशब्दस्य स्थाने अविनाशे कृतेसति वाक्यं न संगच्छते। अनेनैव प्रकारेण "मृदुपवनविभिन्नो मत्प्रियायाः विनाशादित्यत्र अश्लीलरूपअमंगले विनाशात् अस्य पदस्यार्थोऽदर्शनात् वर्तते। जीवितेसति विनाश "शब्दस्य" प्रयोगः अमंगलदायकएव, परं यः मृत एव वर्तते तस्यकृते "यशः शेषः, कीर्तिशेषं गतः, इत्यभिधानं सौकुमार्यायेव वर्तते नतु अमंगलअश्लील निवारणाय। यशः शेष, कीर्तिशेष, इति प्रतिपादनेन किं मरणरूपममंगलमपसरति अपितु नापसरति। यः मृतोवर्तते तस्य कृते कीदृशं अमंगलं किं मरणाद् भिन्नमपि किमपि अमंगलं भवति। यदि मृतस्य पुरुषस्य कृते कश्चित् स्व सम्बन्धिनं पृच्छति यद्सौमृतः अस्मिन् वाक्ये श्रोतृभ्यः पारूष्यं वर्तते अनुभूयते च परं यशः शेष इति कथनेन, पूर्ववाक्यात् सुकुमारता आगच्छति, अतोऽस्य गुणस्य अमंगलरूपाश्लीलदोषस्य विपर्यये सत्ता न स्वीकार्या।

अर्थव्यक्तिः–

प्रसिद्धार्थप्रतिपादनेसमर्थस्य अर्थव्यक्तिगुणस्य विषये भरतस्यमतमित्थं

---

1. संस्कृत काव्य शास्त्रस्येतिहांसः डॉ० सुशीलकुमार डे पृ० 15.

वर्तते–यत्र रचनायां सुप्रसिद्धशब्दानांप्रयोगेन लोकव्यवहारयोग्यकर्मणां, व्यवस्थितरूपेण या क्रिया काव्ये क्रियते सोऽर्थव्यक्ति गुणो वर्तते[1]। डॉ० राघवन्महोदयानाऽनुसारं निर्णय-सागर प्रकाशने "सुप्रसिद्धाभिधानातु" अस्य स्थाने (सुप्रसिधातुनाच)[2] पाठो वर्तते। यस्यार्थः सुप्रसिद्धधातुना रचना कर्तव्या, यस्य धातोरर्थो लोकव्यवहारेऽपि व्यवस्थिता स्यात्। डॉ० सुशील कुमार डे मते भरतोक्तअर्थव्यक्तिलक्षणे लोककर्म इत्यस्यस्थाने लोकधर्म इति पाठः पठितव्यः[3]। अभिनवगुप्तमताऽनुसारं अर्थव्यक्ति लक्षणे अप्रसिद्धाभिधान पदस्यैव संगतिर्वर्तते। सुप्रसिद्धाभिधानपदस्यार्थः सर्वजनगम्य अभिधाव्यापार एव वर्तते[4], अतएवायं गुणः शब्दगुणो विद्यते। यतोहि अभिधा लक्षणा व्यंजना, व्यापारेषु अभिधाव्यापार एव एवंविधो व्यापारो वर्तते यः सरलतयासर्वजनबोध विषयोभवति। विश्वनाथेन शब्दस्य संकेतितार्थप्रतिपादने अभिधाव्यापार एव अग्रिमो अर्थात् सर्वप्रथमो व्यापरो वर्तते इत्यभिहितम्[5]। अनेनैवव्यापारेण लोकेकार्याणि व्यवस्थितानि भवन्ति। अत एव लक्षणे लोककर्मव्यवस्थिता इति प्रयोगो वर्तते। वामनमतेऽपि वर्णनीय वस्तुनः स्वभावस्य या स्पष्टता सा अर्थव्यक्ति गुणो वर्तते। परं वर्णनीय वस्तुस्वभावस्य स्पष्टता अभिधा व्यापारेण भवति नत्वन्यैर्व्यापारैः[6]। "या क्रिया क्रियते काव्ये" अत्र क्रियापद प्रयोगः सन्देहमुत्पादयति यद् धातुजन्यक्रियायाः कृते क्रियाशब्दस्य प्रयोगो वर्तते अथवा काव्यरचनायाः कृते, काव्ये क्रियाशब्दस्य प्रयोगः काव्यक्रियार्थं काव्य-रचनाप्राकरार्थमपि भवति, यथा कामसूत्रे क्रियाकल्पशब्दस्य प्रयोगः काव्यरचना-विध्यर्थेकृतः। अत्र अर्थव्यक्तिगुणलक्षणाऽनुसारं काव्यरचना प्रकार एव अभीष्टोऽस्ति। अतः सर्वजनबोधगम्याऽभिधाव्यापारेण युक्ता काव्यक्रिया (काव्यरचना) अर्थव्यक्तिगुणेन समाद्रियते। (यदि लक्षणे सुप्रसिद्ध पाठोऽपि स्वीकृतः स्यात् तदाऽपि उपर्युक्तस्थिति एव भवति यतोहि स एव सुप्रसिद्धो

---

1. सुप्रसिद्धाभिधानातु लोककर्म व्यवस्थिता।
   या क्रिया क्रियते काव्ये सार्थव्यक्ति प्रकीर्त्यते।। ना०शा०का०मा०सं० 17/10.
2. भोजाज् शृंगार प्रकाशः पृ० 260.
3. संस्कृत काव्यशास्त्रस्येतिहासः पृ० 19.
4. सुप्रसिद्धाभिधानेति। प्रसिद्धभिधानमभिधाव्यापारो यस्यां काव्यक्रियायां सार्थव्यक्तिःशब्दगुणा। ना०शा०अभि०भा० 16/108.
5. तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा। साहित्य दर्पण 2/4.
6. का०लं०सू० 3/2/14.

धातुर्भवति यस्य प्रयोगेण काव्यरचना सर्वसाधारण ज्ञानयोग्या भवति)[1] अभिनवगुप्तमते अर्थव्यक्तिगुणः प्रसिद्धार्थत्वात् अर्थगुणो वर्तते। यथा किरातार्जुनीयमहाकाव्ये यस्यार्थस्य यथा वर्णनं विद्यते सोऽर्थः तथैव लोकव्यवहार प्रसिद्धोऽस्ति[2]। अर्थव्यक्तिगुणस्य द्वितीलक्षणानुसारं भरतेन कथितं वर्तते यद् यस्यार्थस्याऽवबोधेन प्रयोगान्तरं मनसा या विविधाः कल्पनाः क्रियन्ते सोऽर्थव्यक्तिगुणः कथितः[3]। कौटिल्येन सुप्रसिद्धशब्दानां प्रयोगे स्पष्टतागुणः स्वीकृतोऽस्ति[4]। भरतेन सुप्रसिद्धाभिधाने अर्थव्यक्तिगुणः स्वीकृतः। अतः भरतप्रतिपादितअर्थव्यक्तिगुणः कौटिल्योक्त स्पष्टत्वगुणस्य-साम्यमाकलयति। यतः कौश्चिदितिहासकारैः कौटिल्यअर्थशास्त्रस्य समयो भरतमुनेः प्राक् स्वीकृतः। हेमचन्द्रेण भरतमुनेरर्थव्यक्तिगुणविषये कथितमस्ति यत्र अतादृशः स्थितोऽपि तादृशस्थित एवार्थस्य प्रतीतिः स्यात् सोऽर्थव्यक्ति गुणः[5]। हेमचन्द्रेण अर्थव्यक्तिगुणःजातिर्नामाभिधानालंकारो वर्तते इति व्याख्यायां प्रतिपादितम्[6]। अत्र जात्यलंकारस्यकृते हेमचन्द्रस्य संकेतः दण्डि- प्रतिपादित स्वभावोक्ति अलंकारस्यकृते वर्तते। यतोहि दण्डिनो मते स्वभावोक्ति- अलंकारस्य जात्यलंकारस्य च भिन्ननामव्यपदेशेसत्यपि एकस्यैवालंकारस्यकृते संकेतोविहितः[7]। अस्य स्वभावोक्त्यलंकारस्य कृते जीवानन्दव्याख्यायां कथितं वर्तते यत् पदार्थानां वैचित्र्यरूपेण विविधावस्थावर्णनेन स्वभावोक्ति अलंकारो भवति[8]। शास्त्रेष्वस्यालंकारस्यैव बाहुल्यं वरीवर्ति इत्यभिधाय दण्डिनाऽस्यअलंकारस्य सर्वत्र स्वतन्त्रासत्ता प्रतिपादिता[9]। भरतमतेऽपि

---

1. कामसूत्र अ० 1 अध्यायः 3 पृ० 84/92.
2. ना०शा०अभि०भा० व्याख्यायां 16/108.
3. यस्यार्थोऽनुप्रवेशेन मनसा परिकल्प्यन्ते।
   अनन्तरं प्रयोगस्य सार्थव्यक्तिरूदाहृता। ना०शा०का०मा०सं० 17/103.
4. प्रतीतशब्दप्रयोगः स्पष्टत्वमिति। कौटिल्य अर्थशास्त्रम् 4/10 पृ० 120.
5. यस्मिन्नतथास्थितोऽपि तथास्थितएवार्थः प्रतिभाति सोऽर्थव्यक्तिगुण इति भरतः। काव्यानुशासनम् अ० 4 पृ० 238.
6. जातिर्नामायमलंकार इति। तत्रैव अ० 4 पृ० 238.
7. स्वभावोक्तिश्च जातिश्चेत्याद्यासालंकृतिर्यथा। का०द० 2/18.
8. पदार्थानां नानावस्थास्वरूपस्य वैचित्र्येणवर्णनं स्वभावोक्तिरिति निष्कर्षः। तत्रैव० 2/8.
9. काव्यादर्शः 2/13.

अर्थाऽवबोधानन्तरं मनसा यत्र विविधार्थानां कल्पना क्रियते तत्र अर्थव्यक्ति गुणो भवति। अतो दण्डिप्रतिपादितस्वभावोक्तिरथवा जातिर्नामअलंकारेण-सदृशमेव भरतस्याऽर्थव्यक्तिगुणो विद्यते। आचार्य वामनेन यथावत् वस्तुस्वभाव-स्फुटत्वेसति अर्थव्यक्ति गुणः स्वीकृतः। दण्डिनापि जातिगुणक्रियाद्रव्यानां यथावद्वर्णनेन स्वभावोक्तिरथवा जातिर्नामअलंकारः स्वीकृतः। अतो वामनोक्त अर्थव्यक्तिगुणेन सहापि दण्डिप्रतिपादितस्वभावोक्तिअलंकारेण साम्यं वर्तते। तस्मात् मम्मटेनापि अर्थव्यक्तिगुणस्यान्तर्भावः स्वभावोक्ति–अलंकारे कृतो वर्तते।

उदारता–

उदात्त अथवा उदारतागुणस्य लक्षणे भरतेन कथितमस्ति "यत्र रचना सौष्ठवसयुतैः सूक्तैः विचित्रार्थैश्च संयुतास्यात् तत्र उदात्त गुणो भवति[1]।" अर्थात् बह्वर्थविशेषतायुक्तैः सुगमतासंयुतैः सूक्तैर्वाक्ये विचित्रता सम्पादनार्थं यद् गृहीतं स्यात् स उदात्तताचक्ष्यते। भरतेन यदेतत् कथितं सुगमसंयुतैः सूक्तैनरेकार्थविशेषैःश्चित्रार्थैर्यदुपेतं तदुदात्तम्। अनेकार्थत्वात् वैचित्र्यत्वाच्चायं-गुणो भरतमतेऽर्थगुणएववर्तते। उदारतागुणस्य द्वितीये लक्षणे भरतस्य कथनं वर्तते यत्–या रचना दिव्यभावैर्युक्तास्यात् श्रृंगाराद्भुतरसयोजनया योजिता-स्यात् तथा च विविध भावैर्विभावितास्यात् सा (रचना) उदारता गुण युक्ता[2] भवति। भरतेनास्मिन् गुणलक्षणे रचनायां श्रृंगाराद्भुतरसयोः योजना स्वीकृताऽस्ति। तथा अनेकभावसंयुक्तं, इत्यत्र भावविषये भरतेन न स्पष्टं कृतम् यत् स्थायिभावव्यभिचारिभावसात्विकभावादिषु कस्य भावस्य वैशिष्टयेन युक्ता रचना उदारता गुणं पोषयति। परमस्यगुणस्य व्याख्यायामभिनवगुप्तेन प्रतिपादितं वर्तते यन्मानवस्य योग्यो भूत्वापि, दिव्यतया समन्वितोवर्तते, करूणामयोभूत्वापि, श्रृंगारेण युक्तोऽस्ति, वीरतायुक्तोपि विस्मयस्यस्थानं वर्तते, अनेनप्रकारेण अद्भुततया पदार्था वर्णितास्सन्ति, अथवा तत्तद् रसानां विभावाऽनुभावादिभिर्यत् प्रतिपादनं स उदारता अर्थगुणोभवति अभिनवगुप्तस्य

---

1. अनेकार्थ विशेषैर्यत् सूक्तैः सौष्ठवसंयुतैः।
उपेतमिति चित्रार्थै (रू) उदात्तंतच्च कीर्त्यते।।
ना०शा०का०मा०लं० 17/104 पृ० 89.
2. दिव्यभावपरीतंयच्छृंगाराद्भुत योजितम्।
अनेकभावसंयुक्तमुदारत्वं प्रकीर्तितम्। ना०शा०अभि०भा० 16/110.

कथनं वर्तते यदुदारतागुणं केचिद् अग्राम्यत्वमिति कथयन्ति[1]। अग्राम्यत्व शब्दात् प्रतीयते यदभिनवगुप्तस्य संकेतो वामनं प्रति विद्यते। यतो वामनेनार्थगुण उदारताया, लक्षणमग्राम्यत्वमेव स्वीकृतम्[2]। कौटिल्येन अर्थशास्त्रे लेखसम्पद्-गुणेषु औदार्यगुणः स्वीकृतो वर्तते, अंस्यलक्षणमपि अग्राम्यत्वमेव[3] वर्तते यल्लक्षणं वामनसम्मतोदारता गुणस्य साम्यमाकलयति। परं अत्र सन्देहो भवति यदभिनवगुप्तेन भरतसम्मतउदारतागुणस्यव्याख्यायां ''अग्राम्यत्व-मित्यन्यैरूक्तम्'' एतत्कथनं कौटिल्यस्य कृते वर्तते, उत वामनस्य कृते यतः कौटिल्य- वामनयोऽर्थगुणउदारतागुणस्य लक्षणं समानमेव वर्तते। परमस्मान्निश्चीयते यदभिनवगुप्तेनान्येषां गुणानामपि व्याख्या वामनाऽनुसारेण कृता। ततोऽत्रापि अन्यैरूक्तम् अस्य संकेतो वामनस्य कृते एव विद्यते। अत्र तदपि सम्भाव्यते यत् कौटिल्योक्तऔदार्यगुणस्य प्रभावेन वामनः प्रभावितः स्यात्। अस्यौदार्यगुणस्य शब्दगुणत्वं स्वीकुर्वता अभिनवगुप्तेन प्रतिपादितं यत् यत्राद्भुततया वर्णनं क्रियते तथा यत्र विविधभावानां समावेशो वर्तते, तत्र औदार्यनाम शब्दगुणो भवति[4]।

अभिनवगुप्तः वामनसम्मतउदारताशब्दगुणमनुसरन् उदारतागुणे पदानां विकटत्वमंगीचकार[5]। एतद्विकटत्वं वामनसम्मतंवर्तते। यतो वामनेनोदारता गुणस्य लक्षणे विकटत्वं अर्थात् पदानां नृत्यत्वप्रायत्वं स्वीकृतम्[6]। अभिनवगुप्तेनापि भरतस्योदारता गुणस्य लक्षणं वामनसम्मत कान्त्यर्थ गुणेन सह किचिंत्साम्यमाकलयति श्रृंगाराद्भुतरसयोर्भावानां च नियोगत्वात्।

---

1. दिव्यभावपरीतंयदिति। यत्र मानुषोचितमपि दिव्यतया, करुणादियुक्तमपि श्रृंगारेण, वीरतास्थानमप्युद्भुतेन युक्तं वर्ण्यते। तद्गतैर्वा विभावानुभावादिभिः युदुदीरितं तत्रौदार्यमर्थगुणः। एतदेवाग्राम्यत्वमित्यन्यैरूक्तम्। तत्रैव 16/110.
2. अग्राम्यत्वमुदारता। का०लं०सू० 3/2/13.
3. अग्राम्यशब्दाभिधानमौदार्यम्। कौ०अ०शा० 2/10 पृ० 120.
4. यत्राद्भुतत्वेन चमत्कृतोऽर्थः। अनेकभाव संयुक्तमिति, शब्दगुणस्यलक्षणम्। ना०शा०अभि०भा० 16/110.
5. एकभाषाचित्रत्वस्यानेक ता चित्रत्वं....भरते तदुक्तं नरीनृत्यमानत्वमिति - पदानामौदार्यमिति।। तत्रैव० 16/110-111.
6. विकटत्वमुदारता। का०लं०सू० 3/1/23.

कान्तिः

काव्यशोभायाः-अपरपर्यायभूतस्य कान्तिगुणस्य काव्ये तथैववैशिष्ट्यं वर्तते यथा श्रृंगारयुक्तकथानके श्रृंगाररस्य। एतदर्थं वामनादिभिः अस्मिन्गुणेदीप्त रसत्वं स्वीकृतं वर्तते। यतो रसेनैवकाव्ये काव्यत्वमागच्छति येन मनसि श्रोत्रयोश्च आह्लादो भवति। अतएवोक्तम् भरतेन यस्यशब्दरचनायाः प्रयोगेन मनसि श्रोत्रयोश्च प्रसन्नता भवति तत्र भरतमते कान्त अथवा कान्ति[1] गुणो वर्तते। अस्मिन् गुणे शब्दरचना ईदृशी स्वीकृता वर्तते यया आह्लादोजायते। अस्माद् भरतमते शब्दरचना प्राधान्येन कान्तगुणः शब्द-गुणतां प्राप्नोति।

कान्तिगुणस्य द्वितीयलक्षणे भरतमुनिना कथितमस्ति यथेन्दुर्मनसः श्रोत्रयोश्चाह्लादकारणं वर्तते तद्वत् या रचना लीलाद्यर्थैः समन्विता स्यात् सा कविभिः कान्तिगुण संज्ञया व्यवहृता[2]। अमरकोशाऽनुसारं लीलाशब्दस्यार्थः श्रृंगारभावाज्जाता क्रिया वर्तते[3]। अस्यार्थानुसारं यथा इन्दुः स्त्रीणां कृते लीलाद्यर्थान् अर्थात् (श्रृंगारभावाज्जाता इति श्रृंगारभावजा तांश्रृंगारभावजां क्रियामुत्पादयति एवं भूतो यो लीलाद्यर्थो मनः श्रोत्रंचाह्लादयति स कान्ति गुणो वर्तते। "हेमचन्द्रेण" कान्तिगुणस्य लक्षणविषये प्रतिपादितमस्ति यो मनसः श्रोत्रयोश्चाह्लादकारणं भवति स कान्त गुणो वर्तते[4]। अभिनवगुप्तेनास्य-गुणस्य व्याख्यायां व्याख्यातमस्ति यो मनसः कर्णयोश्च विषयोऽस्ति मन आह्लादयति तथा श्रृंगाररसविभावस्वरूपं लीलादिचेष्टाअलंकारैः सुशोभितं यत् काव्यार्थस्वरूपं तत् कान्तिगुणयुक्तं वर्तते। गुणोऽयं अन्यैः–दीप्तरसत्वशब्देन अभिधीयते[5], "अन्यैः इति शब्देन अत्रवामनस्य कृते संकेतो विद्यते। यतः आचार्य वामनेन अर्थगुणेषु कान्तिगुणस्य लक्षणे दीप्तरसत्वं[1] निरूपितं वर्तते।

---

1. योमनः श्रोत्रविषयः प्रसादजनकोभवेत्।
   शब्दबन्धोप्रयोगेण सकान्त इति भण्यते।। ना०शा०अभि०भा० 16/113.
2. यन्मनः श्रोत्रविषयमाह्लादयति हीन्दुवत्।
   लीलाद्यर्थोपपन्नांवा तां कान्तिं कवयो विदुः।। ना०शा०अभि०भा० 16/112.
3. हेलालीलेत्यमी भावाः क्रियाः श्रृंगार भावजाः। अ०को०ना०वर्गः 31/32.
4. श्रोत्रमनः प्रह्लादजननं कान्तं भरतः। का०अनु० 4/239.
5. यन्मनोविषयमाह्लादयति यथा श्रृंगारादि विभावरूपं लीलादिचेष्टा सुन्दरं काव्यार्थ रूपं तत्कान्ति गुणयुक्तं तदेव दीप्त रसत्वमित्युक्तमन्यैः विभावादीनां दीप्तत्वमितियावत्। ना०शा०अभि०भा० 16/112.

वामनोदाहृत पद्यएव अभिनवगुप्तेनाप्युदाहृतम्। (प्रेयान् सोयमागतः इत्यादि) अत्र रत्यनुभावयो औत्सुक्यव्यभिचारिभावयोश्च दीप्ततावर्तते। अत एव अयं गुणोऽभिनवगुप्तमते अर्थ[2]गुणोऽस्ति। अयं गुणः श्रोत्रविषयीभूतः सन् आह्लादयति अतः शब्दगुणोप्ययं गुणः[3]। गुणानां विवेचनाऽनुसारं भरतमते– प्रसादो माधुर्यसमता, ओजः, एतेचत्वारो शब्दगुणाः सन्ति। अर्थव्यक्तिः उदारता, समाधिः, इमे त्रयोगुणाः अर्थगता वर्तन्ते। श्लेषः कान्तिः सौकुमार्यम्, इमे शब्दार्थोभयगुणा विद्यन्ते।

गुणत्रयनिरूपकः प्रथमाचार्यो भामहः–

भरतादनन्तरं साहित्यशास्त्रस्येतिहासे गुणानां स्वरूपविवेचनमाचार्य भामहविरचित "काव्यालंकारस्य द्वितीयपरिच्छेदे लभ्यते। अस्मिन्-वैशिष्टयेनालंकाराणां निरूपणं वरीवर्त्ति। अनेन माधुर्यओजप्रसादानां एषांत्रयाणां गुणानांनिरूपणं कृतमस्ति। भामहो गुणस्वरूपं न निर्धारितवान्। अस्य गुणधारणा भरतादतीवभिन्नत्वेनविद्यते। भरतोक्तदशगुणेषु केवलमुपर्युक्तास्त्रयो गुणा भामहेन निरूपिताः। एषां लक्षणान्यपि मौलिकोद्भावनया भिन्नानि सन्ति। आनन्दवर्धनात् प्राक् गुणत्रयनिरूपणस्य प्राथम्यं भामहस्यैव वर्तते। गुण- त्रयवादिभिर्गुणा रसाश्रिताः स्वीकृताः। परं भामहेन अस्मिन् विषये न किमप्यभिहितम्।

नाटयशास्त्रे भरतमुनिना, काव्यादर्शेदण्डिना च माधुर्य लक्षणे एवं प्रसादगुण लक्षणे समासाभावस्य निरूपणं न कृतम्, केवलमोजोगुणलक्षणे समासाधिक्यं प्रदर्शितम्[4]। परं भामहेन माधुर्यप्रसादयोर्लक्षणे समस्तपदानां प्रयोगो निन्दितः[5]। डॉ० रेवाप्रसाद द्विवेदी महोदयेन काव्यालंकारसूत्रस्य प्रस्तावनायां कथितमस्ति यद् भामहेन गुणानांविषये तथैव अरुचिः प्रतिपादितास्ति यथा मालत्या-

---

1. का०लं०सू० 3/2/15.
2. अत्रहीर्ष्याख्यस्य रत्यनुभावस्य औत्सुक्यस्वाभावास्य च दीप्तत्वमित्यर्थगुणः ना०शा०अभि०भा० 16/112 व्याख्यायां।
3. श्रोत्रविषयीभूतमिव यदाह्लादिकाव्यं तत्कान्तिर्नाम शब्दगुणः। तत्रैव
4. नाट्यशास्त्रम् 16/77 - 16/104 काव्यादर्शः 1/45 - 1/51.
5. भामहकाव्यलंकारः 2/1-3.

(मल्लिकायाः) अरुचिर्वसन्ते वर्तते[1]। माधुर्यप्रसादौ-अभिलषन्तौ धीधना रचनायां समस्तपदानां प्रयोगं न कुर्वन्ति[2]। समासः समासधिक्यता च माधुर्य-प्रसादयोर्विघातको भवति। माधुर्यप्रसादयोर्नियमं विधाय ओजोगुणविषये प्रतिपादितं यत् केचिज्जना-ओजोगुणमभिलषन्तो बहूनिपदानि समस्यन्ति[3]। अत्र केचित् पदेन ओजोगुणप्रतिपादने स्वकीया अरुचिरभिव्यक्ता। माधुर्यलक्षणे भामहेन निर्दिष्टं काव्ये या रचना श्रुतिसुखदा अथवा श्रुतिकटुत्वदोषरहिता- स्यात्, अनतिसमस्ता स्यात्, एवं विधा रचना मधुरंकाव्य मुच्यते[4]। उपर्युक्त गुणविवेचनात् ज्ञायते यद् भामहेन त्रयोगुणा रचनाश्रितास्सन्तीति स्वीकृतम्।

प्रसादगुणे भामहेन निरूपितमस्ति "यस्यार्थो विदुष आरम्य स्त्री बालपर्यन्तं स्पष्टतया अववासते सः प्रसादो भवति[5]।" भामहेनास्मिन्गुणनिरूपणे माधुर्यौज प्रसादानां कृते गुणशब्दस्योल्लेखो न कृतः। अलंकारनिरूपणप्रसंगे "भाविकत्व" कृते गुणशब्दस्योल्लेखो भामहेनाकारि। भाविकत्वगुणास्तत्र जायते यत्र भूत, भविष्यत्पदार्थाः प्रत्यक्षवद् दृश्यन्ते[6]। भाविकत्वगुणस्य हेतुरूपेणार्थस्य चित्रणं उदात्तत्वं अद्भुतत्वं, कथायाः स्वाभिनीतता एवं च शब्दानां स्वच्छता च भामहः प्रतिपादितवान्[7]। दण्डी "भाविकं" अलंकारेषु अजीगणत्। महाकाव्य नाटकाख्यादय प्रबन्धाभवन्ति। प्रबन्धेषु चमत्कृत्याधायकोधर्मविशेषो यः कविभावः, तं भाविकालंकारेण कवयः कथयन्ति। (भावः कवेरभिप्रायः ततः प्रवृत्तं भाविकम्) अलंकारः प्रबन्धगतो वर्तते, यतोहि कविभावो ग्रन्थस्याद्यन्तं यावद् वरीवर्त्ति। कविभावप्रधान एष अलंकारोऽपि प्रबन्धान्तर्गत एव भविष्यति[8]।

---

1. का०लं०सू० प्रस्तावनायाम् पृ० 23.
2. माधुर्यमभिवाच्छन्तः प्रसादंच सुमेधसः।
   समासवन्तिभूयांसि न पदानि प्रयुंजते। भा०का०लं० 2/1.
3. केचिदोजोऽभिधित्सन्तः समस्यन्ति वहून्यपि। भा०का०लं० 2/2.
4. श्रव्यंनातिसमस्तार्थं काव्यं मधुरमिष्यते। भा०का०सं० 2/3.
5. अविद्वदङ्गनाबालप्रतीतार्थं प्रसादवत्। तत्रैव० 2/3.
6. भाविकत्वमितिप्राहुः प्रबन्ध विषयं गुणम्।
   प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः।। तत्रैव० 3/53.
7. चित्रोदात्ताद्भुतार्थत्वं कथायाः स्वाभिनीतता।
   शब्दानाकूलताचेति तस्य हेतुं प्रचक्षते।। तत्रैव० 3/54.
8. तद्भाविकमितिप्राहुः प्रबन्धविषयं गुणम्।
   भावः क्वेरभिप्रायः काव्येष्वासिद्धि संस्थितः।। काव्यादर्शः 2/364.

विश्वनाथअप्पयदीक्षितादिभिरपि भूतभविष्यदद्भुतपदार्थाणां प्रत्यक्षवद् अनुभवेकृतेसति भाविकअलंकारोप्यङ्गीकृतः[1]। एभिर्भाविकत्वस्य गणना गुणेषु न कृता। डॉ० ए०वी० कीथ महोदयेन भामहमते स्वमतमित्थं व्यवस्थापितम्– दण्डिनः गुणानांदशसंख्यां खण्डयितुं, भामहेनत्रयोगुणा स्वीकृताः[2]। पी०वी० काणे महोदयेन भामहस्य पश्चात्–दण्डीसमयः स्वीकृतः, काणेमतं स्वीकृत्यकीथ मतं प्रमाणितं न भवति।

1. यद्यपि संक्षिप्तरूपेण भामहेन गुण निरूपणं विहितम्, तथापि ध्वनि सिद्धान्तात् प्राक् गुणत्रयनिरूपणस्य प्राथम्यं भामहस्यैव।
2. माधुर्यप्रसादौजोगुणनिरूपणे गुणशब्दस्य प्रयोगो न कृतः।
3. श्रव्यत्वअनतिसमस्तत्वरूपेण माधुर्यगुणस्य द्विविधं वैशिष्टयं प्रतिपादितम्।
4. प्रसादे पदानामसमस्तत्वं सौकर्येणार्थस्य प्रतीतिश्च प्रतिपादिता।
5. केचिदित्यनेनपदेन ओजोगुणस्वीकारे स्वकीया अरुचिप्रदर्शिता।

दण्डिनो गुणस्वरूपम्–

आचार्यदण्डिना वैदर्भमार्गस्य प्राणभूते गुणनिरूपणप्रसंगे गुणस्वरूपं न प्रतिपादितम्। तथापि प्रतिपादितगुणधारणयापर्याप्तरूपेण गुणस्वरूपं ज्ञातुं शक्यते। आचार्यदण्डिना काव्यादर्शे वैदर्भगौडमार्गयोस्तथा श्लेषादि दश-गुणानामतीव विचित्रप्रकारेण वैचित्र्यं प्रतिपादितम्।

दण्डीमते रचनाविविधा भवन्ति। तेषु विविधप्रकारेषु वैदर्भगौडीयौ[3] वर्ण्येते। अस्मात् प्रतीयते यदत्र मार्गशब्दो रीतिशब्दस्यापरपर्यायो वर्तते। वैदर्भगौडमार्गयोर्मध्ये एकस्यापिमार्गस्य सामान्यलक्षणं न कृतम्। मार्गशब्दस्य प्रयोगः रीत्यर्थमेव वर्तते। यतः सरस्वतीकण्ठाभरणेऽपि कथितमस्ति यत् वैदर्भादयः पन्थाः काव्येमार्गशब्देनोच्यन्ते[4]। रीयन्ते परम्परया गच्छन्ति अनयेति

---

1. साहित्यदर्पण 10/93 कुवलयानंदः पृ० 161.
2. Dr. A.B. Keith, History of Sanskrit Literature, p. 382.
3. अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।
   तत्रवैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ। का०द० 1/40.
4. वैदर्भादि कृतः पन्थाः काव्येमार्ग इतिस्मृतः।
   रीङ्गताविति धातोः साव्युत्पत्या रीतिरुच्यते। स०कं०भ० 2/27.

करणसाधनोऽयं रीतिशब्दो मार्गपर्यायः[1]।

अत्र दण्डिना स्फुटंभणितम् यद् द्वयोर्मार्गयोर्द्वौ सम्प्रदायौ परस्परं भिन्नभूतौस्तः अनयोः स्वरूप निरूपणं कृतम्। अवान्तरप्रभेदाः कविभेदात् अनन्त संख्याकाः सन्ति तेषां स्वरूपवर्णनमसम्भवमेव। दण्डिनाकथितं कवयो बहवो वर्तन्ते, यथा एकेन कविना यस्य कस्यचिद् मार्गस्य गुणस्य वा लक्षणं कृतम् तथैवान्यः कविरपि लक्षणं कुर्यात् एतन्नैव निश्चितम्। अनेन प्रकारेण द्वयोमार्गयोः परिचयमभिधाय तदन्तरं श्लेषादिदशगुणानां नामान्यभिधाय[2], एते दशगुणा वैदर्भमार्गस्य प्राणाः सन्ति, एषां गुणानां वैपरीत्यं गौडमार्गे दृश्यते इति स्वमतं स्थापितम्[3]।

दण्डिनः समक्षं अन्येऽपि मार्गा आसन् तेषां वर्णने तेन असामर्थ्यं प्रकटितम्। यत् पांचाललाटदेशवासिभिः कविभिर्येषां मार्गाणां निरूपणं कृतमस्ति, सकलकविस्थितान्तेषां भेदा वक्तुं न शक्यन्ते, अन्येम्यो मार्गेभ्यो वैदर्भगौड-मार्गौ पृथक् भूतौस्त[4]ः यथा—इक्षुक्षीरगुड़ादीनां माधुर्ये महान् भेदो भवति, तथैव, देशानामानन्त्यात् मार्गाणां (रचनाप्रकाराणामपि) आनन्त्यम्। इति हेतोरनिर्वचनीयतया विशेषरूपेण भेदद्वयमेव प्रतिपादितम्[5]। सर्वेषांमार्गाणां भेदनिरूपणंतु सरस्वत्यापि वक्तुं न शक्यते। एषां विपर्ययः। प्रायो दृश्यते गौडवर्त्मनि। इत्यस्मिन् कारिकारियां समागतस्य प्रायःशब्दस्य वैशिष्टयं इत्थं वर्तते "प्रायः शब्देन अर्थव्यक्त्यौदार्यसमाध्यादयो गुणा उभयोवैदर्भ गौडमार्ग-योर्भवन्ति[6]।" काव्यांगप्रक्रियायां प्रायः शब्दस्य विषयेऽपि इत्थमभिहितमस्ति यदर्थव्यक्तिःऔदार्यसमाधिः रूपाणां, एषां त्रयाणां गुणानां (वैलोम्यं) दण्डिकृत काव्यादर्शे नावलोक्यते। अन्येषां गुणानां वैलोम्यं इत्थं वर्तते यथा—

---

1. सुकुसुमप्रतिभः काव्यादर्शः प्रथमपरिच्छदे पृ० 27.
2. श्लेषः प्रसादो समता माधुर्यं सुकुमारता।
   अर्थव्यक्तिरूदारत्वमौजः कान्ति समाधयः।। का०द० 1/41.
3. इति वैदर्भ मार्गस्य प्राणा दशगुणास्मृताः।
   एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि।। तत्रैव 1/42.
4. इति मार्गद्वयं भिन्नं तत्स्वरूप निरूपणात्।
   तद्भेदास्तु न शक्यन्ते वक्तुं प्रति कवि स्थिताः।। तत्रैव 1/101.
5. इक्षु क्षीर गुडादीनां माधुर्यस्यान्तरं महत्।
   तथापि न तदाख्यातुं सरस्वत्यापि शक्यते।। तत्रैव० 1/102.
6. प्रायः शब्दः अर्थव्यक्त्यौदार्य समाध्यादयो गुणा उभसाधारण इति दशर्यति। का०अ०तरुण वाचस्पति टीकायाम् पृ० 74.

श्लेषस्य–शैथिल्यं, प्रसादस्य–व्युत्पन्नत्वं, समतायाः....वैषम्यं, माधुर्यस्य वर्णानुप्रासः, सौकुमार्यस्यदीप्तत्वं, गद्यगत ओजसः–पद्यगतमोजः, तथा कान्तिगुणस्यात्युक्ति विलोमरूपोऽस्ति। एवं प्रकारेण श्लेषादिदशगुणानां, वैदर्भगतरूपं तथा गौडीगत सकलरूपभेदेन सप्तदश संख्या जायते[1]। काव्यादर्शस्य हृदयंगमटीकानुसारं प्रायः इति शब्देनैतज्ज्ञायते यत् सर्वेगुणा गौडमार्गे विपर्ययभूता न सन्ति अपितु अर्थव्यक्तिः समाधिः, औदार्यं एते त्रयो गुणाः उभयमार्गयोः समानरूपेण विराजन्ते। अतएव केषांचिद्गुणनां विपर्ययो गौडमार्गे दृश्यते, केषांचिद् गुणानामुभयत्र समाना स्थितिः[2]। यथा–ग्राम्यत्वं उभयत्र वैदर्भीगौडी रीत्यो अत्यावश्यकरूपेण परिहार्यदोषः स्वीकृतः[3]। दण्डिनोऽलंकार लक्षणे अलंकार शब्दः सामान्यार्थे प्रतिपादितः[4]। येषां गुणानां वैदर्भमार्गेप्राणत्वं स्वीकृतं तेषामेव गुणानामलंकारनाम्ना व्यपदेशः कृतः।

स्वभावोख्यानोपमादयो अलंकारा द्वयोर्वैदर्भगौडमार्गयोः साधारणालंकारत्वेन निरूपिता, परं गुणरूपा अलंकाराः केवलं वैदर्भमार्गे एव भवन्ति[5]–इति प्रदर्शयितुं गुणानामपि अलंकार व्यपदेशः कृत इति। अतः काव्ये गुणानां विशिष्टं स्थानं वर्तते। परं स्वभावाख्यानोपमाद्यलंकाराः काव्ये अप्राधान्येन विचरन्ति। अस्याः कारिकायाः प्रसंगे तरुणवाचस्पतिना कथितं यत्, पूर्वं श्लेषादयोदशगुणा इत्युक्तं, कथं ते अलंकारा उच्यन्ते, इति चेत्। शोभाकरत्वं हि अलंकारलक्षणम्, तल्लक्षण योगात् तेप्यलंकारा गुणा अलंकार एव इत्याचार्याः। "ततः श्लेषादयो गुणात्मकालंकारा पूर्वमार्गप्रभेददर्शनाय उक्ताः, इदानीं मार्गद्वयसाधारणा अलंकारा उच्यन्ते[6]। दण्डिकृतकाव्यलक्षणात्[7] वैदर्भगौडमार्गयोर्निरूपणाच्चापि गुणानां अनल्पं महत्वं प्रकटी भवति। वाच्यलक्ष्यव्यङ्ग्यभेदैर्विविधार्थैः रंसयुक्ता पदावली काव्यस्यशरीरमस्ति, एवं-

---

1. काव्यांग प्रक्रिया पृ० 322.
2. का०द० द्वितीय परिच्छेदः पृ० 38.
3. प्रायो ग्रहणं साकल्य निर्वृत्यर्थं तेन अर्थव्यक्त्यौदार्य समाधिगुणा उभयमार्गतुल्य इति गम्यते। का०द० द्रष्टव्य सं०क०शा०डा० कुमारशीला, पृ० 74.
4. काव्यशोभाकरान् धर्मानलंकारान् प्रचक्ष्यते। का०द० 2/1.
5. काश्चिन्मार्ग विभागार्थ मुक्ताः प्रागप्यलं क्रियाः।
   साधारणमलंकार जातमन्यत् प्रदर्श्यते।। का०द० 2/3.
6. सं०का०शा० इतिहासादुद्धृतः (डॉ० सुशील कुमार डे पृ० 78).
7. शरीरं तावदिष्टार्थव्यवच्छिन्नपदावली। का०अ० 1/10.

विधलक्षणसमन्वितेकाव्ये काव्यभेदप्रवर्तकेषु तेष्वेव विविधमार्गेषु वैदर्भगौडभार्गयोः क्रमेण, सुकुमारविकटरचनाप्रकारेण भेदः स्फुट एव। एवं विधायां रचनायां गुणा आत्मस्थानीया वर्तन्ते। भरतदण्डिनोर्गुणस्वरूप विषये पार्थक्यमस्ति भरतेन दोष विर्ययाः गुणा भवन्ति इति गुणलक्षणं कृतम्, दण्डिना गुणानां विपर्ययः गौडमार्गे दृश्यते इत्यभिहितम्। जयशंकरत्रिपाठिनो मते मार्गशब्दः- दण्डिसमये काव्यस्य पर्याय आसीत्।

समुद्रगुप्तस्य प्रयाग अभिलेखे (अध्येयः सूक्तमार्गः)[1] अस्यार्थः पठनीय सूक्तकाव्य एव क्रियते। गुणानां महत्वं स्वीकुर्वन् आचार्यदण्डी व्याजहार यत् काव्ये गुणानामलंकाराणां च सद्भावेऽपि दोषयुक्तारचना त्याज्या भवति यतः सुन्दर शरीरमपि एकेनैव कुष्ठचिह्नेन घृणास्पदं भवति, अतो काव्ये दोषाः सर्वथा हेयाः[2]। अनेन काव्ये गुणोपादानं दोषहानं सर्वथा युक्तियुक्तं प्रतिभाति।

दण्डिमते अयं निष्कर्षः–

1. श्लेषादयो दशगुणा वैदर्भमार्गस्य जीवनभूताः सन्ति। काव्यमार्गो गुणैर्विना–अकिंचनः।
2. दण्डिमते गुणा वैदर्भमार्गस्यप्राणभूता धर्मा वर्तन्ते यतोहि मार्गानुसारं शब्दार्थमयी रचना भवति। वैदर्भादयोमार्गा रचनायां प्रकारविशेषा जायन्ते एष रचनाप्रकारो रीति अथवा शैली इति नाम्नाऽख्यायते। अनुमोदितरीत्या रचनाया वैशिष्टयं प्रजायते तस्यां रचनायां गुणा आत्मस्थानीया भवन्ति शब्दार्थभूतेन वपुषा आत्मनोऽस्तित्वं वैशिष्टयेन जाजायते।
3. स्वभावख्यानोपमाद्यलंकारा द्वयोर्मार्गयोरलंकाराः सन्ति परं गुणभूता अलंकारा केवलं वैदर्भमार्गस्य विशिष्टा अलंकारा वर्तन्ते।
4. दण्डीमते गुणा अपि अलंकारा एव वर्तन्ते। वास्तविकरूपेण दण्डिना काव्यशोभाकराणां सर्वेषां काव्यतत्वानां कृते अलंकारव्यपदेशः कृतः।

---

1. हिस्टारीकल एण्ड लिट्रेरी इक्रिप्शनस् पृ० 1. जयशंकर त्रिपाठी कृत दण्डी एवं संस्कृत काव्यशास्त्रस्य इतिहास दर्शनाद्धृतः। पृ० 130.
2. तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन।
   स्याद्वपुः सुन्दरमपि श्वित्रैकेन दुर्भगम्। का०द० 1/7.

5. दण्डीभरतयोः गुणसामान्यक्षणेऽतीववैषम्यं दृश्यते। भरतादधिकं किंचिदनुकूलंलक्षणं दण्डिनाकृतम्। दण्डिनागुणसामान्य लक्षणं न विहितम्। प्रतिपादितमार्गगुणधारणयाऽप्रत्यक्षरूपेण गुणस्वरूप विषये पर्याप्तज्ञानं भवति।

आचार्यदण्डीप्रतिपादितदशगुणानां विवेचनम्—

तत्रादौ श्लेषो यथा—

यस्मिन्वाक्ये शैथिल्यं अंशतोपि न स्यात् तद्वाक्यं श्लेषगुणयुक्तं भवति[1]। शैथिल्यरहितारचना श्लेषगुणयुक्ता भवति। शिथिलं = अनुत्कटमपि, अस्पृष्टशैथिल्यं = न स्पृष्टं प्रकाशितं, शैथिल्यं यस्य तत् अर्थात् शिथिले सत्यपि येन रचनाविशेषेन शैथिल्यं न लक्ष्यते तादृशं काव्यात्मकं वाक्यं श्लिष्ट गुणोपेतं भवति[2]। रचनायां शैथिल्यं तत्र जायते यत्र अल्पप्राणावर्णास्युः। (वर्गाणां क–च–ट–त–प–ग–ज–ड–व–ङ–ल–ण–न–म–य–र–ल वर्णा अल्पप्राणबाह्यप्रयत्नसंज्ञकाभवन्ति)[3] एभिरक्षरैर्रचितायां रचनायां शैथिल्यं संभवति। शैथिल्ययुक्ता रचना श्लेषगुणे ग्राह्या न भवति। महाप्राणाक्षरै[4] ख–छ–ठ–थ–फ–घ–झ–ढ–ध–भ–श–ष–स–ह वर्णैः संयुक्ताक्षरैश्च समन्विता रचना–श्लेषगुण प्रत्यायिका जायते इति दण्डीमतम्।

दण्डीकृतश्लेषगुणस्य लक्षणं पूर्ववर्तिभरतस्य श्लेषगुणलक्षणात् भिन्नं विद्यते। अयंगुणो दण्डीमते शैथिल्याभावे भवति। श्लेषगुणस्य लक्षणं शब्दश्लेषरूपेण कृतम् नत्वर्थरूपेण। भरतमुनिकृतश्लेषगुणलक्षणस्यप्रतिरूपं दण्डीकृतश्लेष–गुणलक्षणे न दृश्यते। वैदर्भमार्गे एव श्लेषगुणस्य सद्भावोऽवलोक्यते गौडमार्गेऽस्याभावो दृश्यते। यतोहि गौडाअनुप्रासानुरूपां शैथिल्यरचनां बहुमन्यन्ते वैदर्भास्तु गाढबन्धतां स्वीकुर्वन्ति[5]।

---

1. श्लिष्टमस्पृष्ट शैथिल्यमल्पप्राणाक्षरोत्तरम्। का०द० 1/43.
2. का०द० स्वोपज्ञं सौभाग्यवती, विवृत्या सनाथया कुसुमप्रतिमाख्यया व्याख्या समुद्भावितः। 1/43, पृ० 29.
3. लघुसिद्धान्तकौमुदी–संज्ञा प्रकरणम् पृ० 6.
4. तत्रैव०।
5. अनुप्रासधियागौडैस्तदिष्टं बन्धगौरवात्।
   वैदर्भैर्मालतीदाम लङ्घितं भ्रमरैरिति। का०द० 1/44.

प्रसादः–

वाक्ये यस्मिन्नेतादृशानां शब्दानां प्रयोगः स्यात् ये श्रवणसमनन्तरमेव स्वार्थान् प्रकटयेयुः तादृशं वाक्यं प्रसादाख्यगुणोपेतं भवति[1]। प्रसादलक्षणे "प्रसिद्धार्थस्य" पदस्य प्रयोगोवर्तते तस्यायमभिप्रायः "एकस्यपदस्य यदिद्वावर्थौ वर्तेते परं तत्र एकोऽप्रसिद्धोऽर्थो विद्यते तमप्रसिद्धार्थं विहाय प्रसादगुणस्य स्थितिर्जायते। निहतार्थत्त्वदोषरहितं[2]अर्थप्रत्यायकंवाक्यं प्रसादगुणयुक्तं भवति। अस्य विवेचनानुसारं प्रसादगुणस्य एतद् लक्षणं भविष्यति, प्रसिद्धार्थक-पदप्रयोगेणार्थ प्रतीतौ चेतः सन्तोषापादको (धर्मः) गुणः प्रसादः।

भरतानुमोदित[3]प्रसादगुणेनसह दण्डीकृतप्रसादगुणस्य साम्यं वर्तते। गौडमार्गप्रवर्तकारचनायां यदि समासकारणात् गाढबन्धता स्यात्–तदा निहतार्थत्वदोष सत्वेऽपि तत्काव्यं वैचित्र्यमावहतीति स्वीकुर्वन्ति। अस्माद् विपरीतंमतं वैदर्भाणां विद्यते। अप्रसिद्धार्थ प्रतिपादकाः शब्दा यदि व्युत्पत्ति युक्तास्स्युस्तदा तेषां शब्दानां गौडमार्गे प्रयोगो वरीवर्ति[4]। अस्मिन् प्रसादगुणे श्रवणमात्रेणार्थप्रतीतिप्रत्यायकानां शब्दानां प्रयोगोऽपेक्षते। अस्मात्-हेतोः शब्दगुणः प्रसादः। प्रसादगुणस्यलक्षणे दण्डिना अर्थस्पष्टतायां ध्यानमाकर्षितम् अतोऽयमर्थगुणः। शब्दार्थोभयगुणोऽयं प्रसादः। वाग्भटेनापि.झटित्यर्थोप- स्थापकत्वं यत् प्रसत्तिः स प्रसाद गुणेनाभिमतः[5]। ध्वनिवादिभिराचार्यैरर्थव्यक्ति गुणस्य प्रसादएवान्तर्भावः कृतो वर्तते[6]।

समता–

काव्यसङ्घटनायां येन रूपेणोपक्रमः स्यात् तेन क्रमेणेवोपसंहारो जायेत यदि तदा समताख्यो गुणो भवति उपक्रमोपसंहारयोः समाना रचना समतागुणयुक्ता भवति। पदानांरचना 'बन्ध' इति नाम्नोच्यते। मृदु–स्फुट–मध्यम भेदेन बन्धास्त्रिविधा भवन्ति। दण्डी मृदु–स्फुट मध्यम बन्धेषु वर्णानां विन्यासमेव कारणं प्रतिपादितवान्।

---

1. प्रसादवत् प्रसिद्धार्थमिन्दोरिन्दीवरद्युति।
   लक्ष्मलक्ष्मीं तनोतीति प्रतीति सुभगंचः।। का०द० 1/45.
2. निहतार्थ यदुभयार्थमप्रसिद्धेऽर्थे प्रयुक्तम्। का०प्र० सप्तम उल्ला० पृ० 269.
3. ना०शा० 16/99.
4. व्युत्पन्नमिति गौडीयैर्नाति रूढ मपीष्यते। का०द० 1/46.
5. वाग्भटालंकारः 3/10.
6. काव्यप्रकाशः अष्टमोल्लासः पृ० 391.

मृदुवर्णविन्यासेन मृदुबन्धो जायते। तत्र कोमलापरपर्याया मृदुवर्णाः ह्रस्व स्वराः वर्गाणां अन्त्याक्षराणि, दन्त्यव्यंजनानि च कोमलानि भवन्ति। एषांवर्णानां प्रयोगेण रचना मृदुबन्धशब्देनाख्यायते। दीर्घस्वरैः, ओष्ठ्यवर्णैः तथा ठ–ड–ष–ख वर्णैः समन्विता रचना स्फुटबन्धशब्देनाख्यायते। यस्यां रचनायां मिश्रितवर्णानां विन्यासो भवति तत्र मध्यमपदबन्धोभवति। अनेन प्रकारेण समासरहिते मृदुबन्धे वैदर्भीरीतिः स्वीकृता। दीर्घसमासे विकटबन्धे गौडी रीतिः अंगीकृता, समासाभावे उत अल्पसमासयुक्ते मध्यमबन्धे पांचाली रीतिरभिमता–अनेन प्रकारेण बन्धानां त्रैविध्यात् समताख्यो गुणस्त्रिविधः प्रतिपादितः[1]।

भरतमुनिना समतागुणस्य यल्लक्षणं कृतम् तस्मादभिन्नं लक्षणं दण्डिना विहितम्। भरतेन दुर्बोधशब्दानामभावेन, दीर्घसमासवर्जितेन गुणालंकारयोः समानप्रयोगेण च समताख्यो गुणः स्वीकृतः। मृदुस्फुटमध्यमबन्धविषये किमपि संकेतो न कृतः[2]। अस्य गुणस्य विषये दण्डिनोऽभिप्रायः एवन्नैवासीत् यद बन्धस्य आदितोऽन्तपर्यन्तं एकस्या रीत्याआधारेण समाना रचनास्यात्। एकस्यारीत्याआधारेण समग्रेप्रबन्धे समाना रचना कर्तुं न पार्यते। रचनायां साम्यं एकस्मिन् पद्येऽपि भवितुं शक्यते।

प्रबन्धे तु विविधानां रसानां, गुणानामलंकाराणां च प्रयोगोभवति तत्तदनुसारेणैव वैदर्भ्यादिरीतीनां प्रयोगः कर्तव्यः, वीर-वीभत्सादि रसेषु ओजोगुणा नुसारिणी गौडीरीत्याधारेण रचना करणीया भवति, तत्र यदिवीरादिरसेषु एकस्यापि रसस्य चतुर्भिरथवा पंचभिश्र्लोकैर्न्यूनाधिकैर्वा वर्णनं कर्तव्यं स्यात् तदा येनरूपेण तत्रोपक्रमः कृतः तेनैवक्रमेणोपसंहारोऽपिस्यात्। मम मतेतु दण्डिनः एतदेवाभिप्रायो वर्तते नतु समग्रे प्रबन्धे समानस्तरीया रचना भवति, समग्रे प्रबन्धे रसानुसारिणी रचना मृदु–स्फुट–मध्यम बन्धैर्विधीयते। अत एकस्यारीत्याऽनुसारेणसमग्रे प्रबन्धे रचना भवितुं न शक्यते। काव्यादर्शे यान्युदाहरणानि मृदु–स्फुट–मध्यमयोनि समता गुणस्य उदाहृतानि तानि पृथक्-पृथक् प्रबन्धाद् गृहीतानि परं तेषु प्रबन्धेषु समग्रारचना तादृशी न वर्तते। इति हेतोरेतदवगन्तव्यं यद्देशभेदेन मार्गाणां यद्विभाजनंकृतमस्ति तेषु मार्गेषु प्राणभूता ये गुणातेषामनुसारिणी रचना तत्तद् गुणभाग् भवतीत्यर्थः।

---

1. समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः।
   बन्धामृदुस्फुटोन्मिश्र वर्ण विन्यास योनयः।। का०द० 1/47.
2. ना०शा० 16/100-101.

अतो दण्डीमते एकस्मिन्नेव पद्ये मृदु एवं विकटा रचना न स्यात्; इमौ-द्वावेव बन्धौपरस्परंविरुद्धौवर्तेते गौडीरीतिप्रवर्तका द्वयोर्बन्धयोर्वैषम्यम-प्यभिलषन्ति। यतोहि गौडा आनुप्रासप्रियाभवन्ति ते–परस्परविरुद्ध मृदुस्फुट-बन्धयोः रचनामपि प्रभूतामामनन्ति। वैदर्भीरीतिप्रिया अनुप्रासं नचाधिकं स्वीकुर्वन्ति तेतु येनरूपेण पद्यस्यरचना स्यात् तेनैव उपसंहारोऽपि स्यादित्यामनन्ति।

एष गुणो मृदुबन्ध–स्फुटबन्ध–मध्यमबन्धेषु आधारितोऽस्ति। बन्धेशब्दानां प्रयोगो जायते। अतो वैशिष्टयेनास्यगुणस्य स्थितिः शब्दगुणेषु स्वीकर्तव्यः।

माधुर्यम्–

आचार्यदण्डिना रसस्य पृथक् सत्ता न स्वीकृता रसवदाद्यलंकारेष्वेव रसानांनिरूपणं कृतम् येन रसस्यप्राधान्यता अपचिता, माधुर्यगुणे तस्यान्तर्भावोऽकारि।

रसवत्काव्यं मधुरं भवति[1], दण्डिना एतल्लक्षणं माधुर्यगुणस्यविहितम्। माधुर्यगुणलक्षणात् प्रतीयते यद्दण्डी समयपर्यन्तं प्राक्तनैराचार्यैरेतन्नि-निश्चितमासीत् येनप्रकारेण शब्दालंकारा अर्थालंकाराश्च रसमुपकुर्वन्ति तथैव गुणाअपि। परमर्वाचीनैराचार्यैर्गुणाः रसधर्मावर्तन्ते इति प्रतिपादितम्। आचार्यदण्डिना माधुर्यगुणलक्षणे रसात्मकमेवमाधुर्यं भवतीति निगदितम्। माधुर्य गुणस्य यादृशंलक्षणं दण्डिना कृतं तादृशं लक्षणं पूर्ववर्ति परवर्त्याचार्येषु न केनापि कृतम्। दण्डीकृत माधुर्यगुणस्य लक्षणं वैचित्र्यमावहति माधुर्यगुणस्य रसात्मकतायां दण्डिना हेतुः प्रतिपादितः (वाचि वस्तुन्यपि रसस्थितिः) शब्देऽर्थे च व्यञ्जकत्वसम्बन्धो भवति। अस्मात्कारणाद् रसव्यञ्जकवर्णरचनाशालित्वं अथवा रसव्यञ्जकार्थरचनाशालित्वं माधुर्यं भवति।

हेमचन्द्रोऽपि दण्डीमतं प्रस्तुवन् रसवन्मधुरंभवतीति निजगाद[2]। अन्यैराचार्यैरनुप्रासालंकारस्य भेदेषु श्रुत्यनुप्रासस्य एको भेदोऽपि स्वीकृतः[3] दण्डिना माधुर्यगुणनिर्धारणे स्ववैलक्ष्यण्यं प्रकटितम्। दण्डीमते श्रुत्यनुप्रासं गौडा नाद्रियन्ते, परं वैदर्भीरीतिप्रवर्तकाअनुप्रासादपि अधिकं श्रुत्यनुप्रासस्यादरं कुर्वन्ति। अस्मिन्विषये वैदर्भगोडयोरुचिभेदस्य कारणं विद्यते। अस्य भेदे-

---

1. माधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः।
   येनमाद्यन्ति धीमन्तो मधुनेव मधुव्रताः। का०द० 1/51.
2. तस्माद्रसवन्मधुरम्–का०शा०अ० 4 पृ० 237.
3. उच्चार्यत्वाद्यनेकत्र स्थाने तालुरदादिके।
   सादृश्यं व्यंजनस्यैव श्रुत्यनुप्रास उच्यते। सा०द० 10/5.

किमपि तत्वं नास्ति[1]। दण्डिना माधुर्यगुणस्य द्वौभैदो निगदितौ। तत्रैको यथा माधुर्यं अग्राम्यता। द्वितीयो यथा–श्रुत्यनुप्रासं मांधुर्यम्। प्रथमभेदे ग्र्वेऽलंकारा अर्थेरसस्याधानं कुर्वन्ति परं–अर्थे रसपुष्टेर्भारं अग्राम्यता एव बिर्भोर्ति[2]।

अतो वैशिष्टयेन ग्राम्यत्वदोषो माधुर्यगुणस्यप्रतिबन्धकः। अलंकार-सहितोऽग्राम्ययुक्तो रसव्यञ्जकोऽर्थोऽर्थगतमाधुर्यगुण एव वर्तते। द्वितीयभेद-श्रुत्यनुप्रासमाधुर्यविषये दण्डीमतं एतद् वर्तते यत् कण्ठताल्वादिसमान-स्थानोच्चार्यमाणानां व्यञ्जकवर्णानां सादृश्येन श्रुत्यनुप्रासो भवति। अतो यस्मिन् पदसमुदाये कण्ठताल्वादिस्थानजन्यवर्णानां सादृश्यं भवति तत्र श्रुत्यनुप्रासो जायते। एष श्रुत्यनुप्रासो रसव्यञ्जको वर्तते[3]। द्वितीयो भेदो माधुर्यव्यञ्जकवर्णैर्भवति अतोऽयं शब्दगुणः।

आचार्य दण्डी भाविकालंकारस्य गुणेषु गणनां कृतवानिति पूर्वं प्रतिपादितम्। परमनेन श्रुत्यनुप्रासः साक्षान्माधुर्यगुणलक्षणे माधुर्यगुणरूपेण स्वीकृतः। इतः पूर्वं भरतमुनिना माधुर्यगुणस्य शब्दार्थोभयरूपेण सत्ता स्वीकृतासीत्। एतदत्र सम्यगालक्ष्यते यद्दण्डिना भरतमुनिकृतमाधुर्यगुणस्य- लक्षणानुसारं माधुर्यगुणस्य लक्षणं कृतम् तत्र भरतमुनिकृत माधुर्यगुण- लक्षणेऽनुप्रासस्य प्रयोगो न विद्यते बहुवारं श्रुतं कथितं च यद्वाक्यं उद्वेजजनकं न भवति तन्माधुर्यम् अथवा संशयविपर्यययोरास्पदं न भवति तद् वाक्यमपि माधुर्यगुणोपेतं जायते। श्रुत्यनुप्रासेपि एवंविधारचनाभवति। अतएव तत्रापि दण्डिना माधुर्यगुणः स्वीकृतः। माधुर्यगुणलक्षणे "मधुरं रंसवदित्युक्त्वा" रसवत्यां रचनायां माधुर्यगुणः स्वीकृतः। ततो रसवदाद्यलंकारनिरूपणे रसवत्वस्य– अलंकारत्वं प्रतिपादितम्। अस्यसन्देहस्य निराकरणं दण्डिना इत्थमेवकृममस्ति, ग्राम्यत्वदोषाऽभावेसति वाक्यंरसवद्भवति समन्वितरसव्यंजकअलंकारादिसद्भावो माधुर्यगुण–रूपेणाभिमतम्, न केवलं रसमात्रं माधुर्यं प्रतिपादितम् रसवदाद्यलंकारेष्वष्टौरसा रसवदाद्यलंकारत्वेन कथिताः[4]।

---

1. इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः।
   अनुप्रासदपि प्रायो वैदर्भैरिद मिष्यते।। का०द० 1/54.
2. कामं सर्वोप्यलंकारो रसमर्थे निषिंचतु।
   तथाप्यग्राम्यतेवैनं भारं वहतिभूयसा।। का०द० 1/62.
3. मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः।
   येनमाद्यन्ति धीमन्तो मधुनेव मधुव्रताः।। का०द० 1/51.
4. वाक्यस्याग्राम्यतायोनिर्माधुर्येदर्शितो रसः।
   इहत्वष्टरसायत्ता रसवत्तास्मृतागिराम्।। का०द० 2/202.

सुकुमारता–

दण्डीमते (निष्ठुराक्षराणि श्रुतिकटुत्वदोषेभवन्ति) श्रुतिकटुत्वदोषविरहे, कोमलवर्णानांप्रयोगे सुकुमाराख्यो गुणो भवति। सुकुमारतागुणस्यलक्षणे प्रायः इति शब्देनैतत् स्पष्टीकृतं यत् सुकुमारता गुणयुक्तेकाव्ये सर्वत्रैवानिष्ठुराक्षराणि स्युरिति नैष नियमः अपितु सुकुमारतागुणे एकस्य द्वयोर्वा परूषाक्षरयोः प्रयोगेण न काचिद् हानिः कोमलाक्षराणां मध्ये कदाचित् परूषाक्षराणां विन्यासोपि भवितुमर्हति[1]। कोमलाक्षराणांप्रयोगेण बन्धेशैथिल्यं संजायते। दण्डिनाऽनिष्ठुराक्षराणां प्रयोगेणास्यगुणस्य शब्दगुणत्वं स्वीकृतमितिज्ञायते। दण्डिनः पूर्ववर्तिना भरतेन अनायासप्रयुक्तैः शब्दैः सुकुमारार्थ सम्पन्ना रचना सौकुमार्यगुणोपेता भवतीत्यभिहितम्। अस्यगुणस्य शब्दार्थोभयगतत्वं स्वीकृतम्[2]। विश्वनाथोऽस्यगुणस्यान्तर्भावं कुर्वन् श्रुतिकटुत्वदोभाषाभावमिमंगुणं स्वीचकार[3]।

अस्य गुणस्योदाहरणरूपेण ''मण्डलीकृत्य बर्हाणि'' इत्यादि पद्यं समुपन्यस्तम्[4], अस्योदाहरणविषये दण्डिना निरूपितमस्ति यदत्र रसात्मक-चमत्कार भावोऽस्ति, नाप्यत्रकश्चिदलंकारः तथाप्यस्य रचना सुकुमारता-गुणानुसारेण कृता या मनुजानां चेतांसि मुष्णातीवप्रतिभाति[5]। अस्य सुकुमारतागुणस्य विपर्ययो निष्ठुरत्वं उत् दीप्तत्वं विद्यते। अतएव गौडकविभिः कष्टेनोच्चार्यमाणंपदं काव्ये प्रयुज्यते[6]। अतएव गौडाः सौकुमार्यस्योपेक्षां विदधति।

अर्थव्यक्तिः–

अर्थंव्यनक्ति स्फुटीकरोतिति अर्थव्यक्तिः। यस्मिन् वाक्ये विवक्षितार्थं ज्ञातुं अध्याहारादिकष्टकल्पनांविनैव वाक्यार्थबोधे सर्वेशब्दाः (यावदर्थस्तावान्-

---

1. अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते।
   बन्धशैथिल्यदोषस्तु दर्शितः सर्व कोमले।। का०द० 1/69.
2. ना०शा० 16/107.
3. सा०द० 8/12.
4. मण्डलीकृत्यवर्हाणि कण्ठैर्मधुरगीतिभिः।
   कलापिनः प्रनृत्यन्ति काले जीभूतमालिनि।। का०द० 1/70.
5. इत्यनूर्जित एवार्थो नालंकारोऽपि तादृशः।
   सुकुमारतयैवैतदारोहति सतांशिरः।। तत्रैव 1/71.
6. दीप्तमित्यपरर्भून्मा कृच्छ्रोद्यमपि बध्यते।
   न्यक्षेनक्षपितः पक्षः क्षत्रियाणां क्षणादिति।। तत्रैव 1/72.

शब्दः) इति नियमेन अपेक्षितार्थान् प्रत्याययन्ति तस्मिन् वाक्ये रचनायां वां–अर्थव्यक्तिर्नाम गुणो भवति[1]। अर्थव्यक्तिर्द्वयोर्वैदर्भगौडमार्गयोर्गुणो वर्तते। गौडवैदर्भमार्गयोरेकस्मिन्नपिमार्गे नेयार्थवाक्यस्य सम्मानं न भवति[2]।

अस्यगुणस्य लक्षणे अर्थस्य यदनेयत्वं तदर्थव्यक्ति इति व्याख्यातम्। अनेयत्वशब्दस्यार्थः नेयार्थत्वदोषाभाव एव वर्तते। नेयार्थत्वदोषस्तत्रभवति यत्र न्यायपरिहारेण कविः स्वेच्छया अर्थस्यकल्पनां करोति। नेयार्थत्व दोषदूषितारचना अर्थव्यक्तिगुणानुरूपा न भवति। रूढेः अथवा प्रयोजन कारणाल्लक्षणा भवति, आभ्यां द्वाभ्यां हेतुभ्यां विना यदि कश्चित् लाक्षणिक शब्दस्य प्रयोगंकुर्यात् तदा नेयार्थत्वदोषो भवति, कवेः व्युत्पत्ति रूपसामर्थ्याभावात् नेयार्थत्वमिति फलितोऽर्थः। अतएवार्थव्यक्तिगुणे दण्डिनो नेयार्थत्वस्याभावो निरूपितः[3]। यादृशोऽर्थ इष्यते तादृशस्पष्टार्थप्रतिपादनत्वात् तावान् शब्दस्य प्रयोगः अर्थव्यक्तिर्भवति अस्मात् शब्दार्थगतोऽयं गुणः। दण्डिनः परवर्तीकाले ध्वनिवादिभिरस्य गुणस्यान्तर्भावः प्रसादगुणे स्वभावोक्तयलंकारे कृतः[4] तत् तेषां विवेचने एव प्रदर्शयिष्यते।

उदारत्वम्–

दण्डीमतानुसारमुदारताख्योगुणः काव्यस्य जीवनं विद्यते। वर्णनीयस्य प्रशंसाप्रतीतिकरस्य लोकोत्तरचमत्कारस्य प्रतीतिः यत्रस्यात्तद्वाक्यमुदारता-गुणोपेतं भवति। काव्यस्य प्रयोजनं चमत्कार एव वर्तते। अतएव तत्र काव्यरचना प्रकार एव (काव्यरीतिरेव) उत्कृष्टा भवति[5]। काव्ये गौडाअपि चमत्कृतिं कामयन्ते। अत उभयमार्गगतोऽयं गुणः।

---

1. अर्थव्यक्तिरनेयत्वमर्थस्य का०द० 1/73.
2. नेदृशंबहुमन्यन्ते मार्गयोरूभयोरपि।
   नहि प्रतीतिः सुभगा शब्दन्याय विलङ्घिनी।। का०द० 1/75.
3. सा०द० 7 परि० पृ० 230.
   सा०द० 7 उल्ला० पृ० 274.
4. सा०द० 8 उल्ला० पृ० 392.
   सा०द० 8 परि० 11 कारिका।
5. उत्कर्षवान् गुणः कश्चित् यस्मिन्नुक्ते प्रतीयते।
   तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः।। का०द० 1/76.

अस्यगुणस्योदाहरणे दण्डी कथितवान् हे राजन् ! यः कश्चित् याचकः दीनभावेनभवतामाननं पश्यति, असौ पुनः याचकरूपेण कस्यचिदन्यस्यमुखं नावलोकयति। अस्मिन्नुदाहरणे राज्ञो दानस्योत्कर्षः प्रतिपादितोऽस्ति। अतोऽत्र उदारताख्यो गुणः स्वीकृतः[1] | अस्यगुणस्यविषये डॉ० शंकरदेव अवतरे महोदयस्य कथनमस्ति यत् परवर्तिभिः ध्वनिवादिभिराचार्यैः यः वस्तुध्वनिः अलंकारध्वनिश्च–स्वीकृतस्तस्यैव कथनमुदारत्वगुणे दण्डिना कृतम्[2]। वस्तुत एतन्मतं सुसमीचीनमेवप्रतिभाति, अस्योदारत्वगुणस्यपश्चात् ध्वनिवादीनां आचार्याणां समये वस्तुध्वनिअलंकारध्वनिरूपेण गणना अभूत्। अत्रैतन्नैव कथयतुं शक्यते यत् परवर्तिभिः आचार्यैःदण्डीकृतउदारत्वगुणमवलोक्य वैपरीत्येन गुणोऽयं वस्तु ध्वनित्वेन एवं अलंकारध्वनित्वेन स्वीकृतः स्यात्। आचार्यदण्डीकृत उदारत्वगुणो भरतमुनिप्रतिपादितउदारत्वगुणलक्षणात् प्रभावितोऽस्ति। भरतेन मनुष्ययोग्यो–भूत्वापि दिव्यतयायुक्तोऽनेकभावसंयुक्तो विविधविधातिविचित्रार्थोपेतोदारत्व गुणो भवतीति कथितम्। भरतदृष्ट्या अस्य गुणस्य शब्दार्थोभयात्मकता वर्तते[3]।

दण्डिना उदारतागुणस्यार्थगुणेषु सत्ता स्वीकृतास्ति। परं स्वमते उदारत्व गुणस्य लक्षणं प्रतिपाद्य केषाचिन्मते उदारत्वलक्षणमनेनप्रकारेण कथितम् यत्र प्रंशसनीयैर्विशेष्रणैर्युक्तं वाक्यं भवति तत्र उदारता गुणोभवति[4]। यदि दण्डिनास्वमतप्रतिपादनानन्तरमन्येषांमतमस्यविषये प्रतिपादितम् इतो ज्ञायते सम्भवतोयदस्यगुणस्य दण्डिना उभयात्मकत्वमभिमतं स्यात्।

ओजः

समासबाहुल्येन ओजोगुणः स्वात्मानं बिभर्ति वैदर्भमार्गानुसारमस्य गुणस्यसत्ता गद्यकाव्ये भवति परं गौडमार्गे गद्यकाव्यवत् पद्यकाव्येपि ओजो गुणानुसारिणी रचना लक्षते। अस्यगुणस्य स्वीकृतौ द्वयोर्वैदर्भगौडमार्गयोः सहमतिर्विद्यते, भेदस्य कारणमत्रैतदेवाऽस्ति यद् गौडाः काव्ये विकटबन्धं बह्वामनन्ति। अतएव गौडैर्गद्यात्मके काव्ये समासबाहुल्यस्वरूपस्यास्य

---

1. अर्थिनां कृपणां दृष्टिस्त्वन्मुखे पतितासकृत्।
   तद्वस्थापुनर्देव नान्यस्य मुखमीक्षते।।
   इतित्यागस्य वाक्येस्मिन्नुत्कर्षः साधुलक्ष्यते।
   अनैनेव पथान्यच्च समानन्याय मूह्यताम्।। तत्रैव० 1/77-78.
2. काव्यांग प्रक्रिया पृ० 323.
3. ना०शा० 16/10-111.
4. श्लाध्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते। का०द० 1/79.

गुणस्य रचना आद्रियते। वैदर्भास्तु आजोगुणानुरूपेण गद्यकाव्य एव रचनां स्वीकुर्वन्ति, पद्यकाव्येतु ते समासबाहुल्यरूपं ओजोगुणं न मन्यन्ते[1]। आचार्यदण्डयनुसारं समासबाहुल्ये पद्येऽपि गौडाओजस्विन्या वाण्याः प्रयोगं कुर्वन्ति। वैदर्भीरीतिं बहुमन्यमानाः कवयोऽनाकुलत्वं, सुखोच्चार्यत्वं, ओजोगुणमभिलषन्ति[2]। दण्डिना अस्यगुणस्य गौडमार्गे वैदर्भमार्गे च स्थितिः प्रदर्शिता दण्डीमते प्रतीयते यदयंगुणः शब्दरूपत्वात् समासबाहुल्यरूपत्वाच्च शब्दगुणः।

नाट्यशास्त्रेप्रतिपादितस्य ओजोगुणस्य प्रभावः दण्डीप्रतिपादितओजोलक्षणेऽपि विद्यते। यतोहि भरतेन विविधैः समासैर्विचित्रैरूदारैश्चपदैः शब्दगुण ओजः प्रतिपादितः[3]।

भरतमते—ओजोगुणस्य द्वितीयलक्षणानुसारमस्यगुणस्य उभयात्मकताप्यस्ति[4]। अभिनवगुप्तेन शब्दार्थसम्पत्या, उदात्तार्थावभासक ओजोनाम—अर्थगुणः स्वीकृतः[5]। ओजोगुणस्य स्वरूपनिरूपणावसरे दण्डिनः कथनंवर्तते यत्-दीर्घवर्णानांह्रस्ववर्णानां, आधिक्येनअल्पत्वेन—मिश्रणेन च ओजोगुणो विविधविधो भवति। कुत्रचिन्महाप्राणवर्णानामपेक्षया, अल्पप्राणवर्णानामाधिक्यं भवति।

क्वचित् केवलं महाप्राणवर्णानां प्रयोगो भवति। कुत्रचिदुभयेषां वर्णानां मिश्रणं भाति। अनेन प्रतिपादितविधानुसारेण अवान्तरभेदैः सह ओजोगुणो नानात्वं भजते। अस्य गुणस्य या विविधरूपता विद्यते सा गद्यप्रबन्धेषु, चम्पूविरूदादिषु च लक्ष्यते[6]। भरतेनास्य गुणस्य विस्तारात्मकत्वसंपेक्षात्मकत्व रूपेण द्वौ भेदावुदीरितौ वर्तेते[7]।

---

1. ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्।
 पद्येप्यदाक्षिणात्यानामिदमेकं परायणम्। का०द० 1/80.
2. इतिपद्येऽपि पौरस्त्या बध्नन्त्योजस्विनीर्गिरः।
 अन्येत्वनाकुलं हृद्यमिच्छन्त्योजो गिरांयथा।। का०द० 1/83.
3. ना०शा० 16/105.
4. ना०शा० 16/106.
5. यत्र खलु समासेन—संक्षेपेन युक्तानिपदानि यत्रार्थो भूयानितिः संक्षेपोनामार्थ गुण ओजः। ना०शा०अभि०भा० 16/106.
6. तद्‌गुरूणां लघूनांच बाहुल्याल्पत्व मिश्रणैः।
 उच्चवच प्रकारं तद् दृश्यमाख्यायिकादिषु। का०द० 1/81.
7. ना०शा० 16 पृ० 1332.

कान्तिः—

यो लोकप्रसिद्धस्यार्थस्यानतिक्रमणकारणात् सर्वलोकप्रियःस्यात्तथा आपामरप्रसिद्धार्थस्य प्रयोगात् सर्वेषांजनानांकृते चमत्कारोत्पादकस्स्यात् स कान्तिनाम गुणो भवति। अस्यगुणस्याधिक्यं लौकिकोपचारेषु प्रशंसायुक्त वाक्येषु च भवति[1]। कुशलप्रश्नप्रियालापादिप्रस्तावेषु एवं याथातथ्येन वस्तूनां निरूपणेषु—अस्यगुणस्य सद्भावो भासते। वार्ताभिधान कान्तिगुणस्योदाहरणे सज्जनचरणारविन्दरेणुना गृहे सौभाग्यातिशयस्य वर्णनं लोकव्यवहार-प्रसिद्धमस्माद्धेतोऽत्र वार्ताभिधान कान्तिनामको गुणः[2]।

द्वितीयोदाहरणे स्तनयोर्वणनं प्रस्तुतम्, वर्धमानयोः स्तनयोअतिपीनोत्तुङ्ग-वर्णनं च लोकप्रसिद्धानुसारेणैव विहितम्। अत एव यथास्थितवस्तुनिरूपणत्वेन कान्तिनामार्थगुणो[3] विभाति। हेमचन्द्रेणातिशयोक्त्यलंकारस्याभावमात्रेणास्य कान्तिनामगुणस्य सद्भावः प्रतिबोधितः[4]। यस्मिन् वाक्ये लोकप्रसिद्धस्यार्थस्य वर्णनं विद्यते तत् सर्वजनगम्यं भवति। एवंविधेषुवर्णनेषु दण्डी कान्तिगुणं अनुमनुते। प्रतिपादितकान्तिनामगुणलक्षणानुसारं काव्यं लोकव्यवहारनिपुणानां कृते मनोरमं विद्यते[5]। दण्डीमतानुसारं योऽर्थो लोकप्रसिद्धिमुल्लङ्घ्य कविप्रतिभया कल्पितोऽत्युक्तिपूर्णः स्यात्, तादृशेनार्थेन गौडा अतितरां तुष्यन्ति[6]। वैदर्भैरादृतः प्रसिद्धार्थवर्णनात् अस्य कान्तिगुणस्य अर्थगुणेष्वेवगनाकर्तुं पार्यते।

समाधिः—

यदा लोकमर्यादानुसारमप्राकरणिक वस्तुनो योधर्मः स प्रकृतेवस्तुनि यदि—

---

1. कान्तं सर्वजगत् कान्तं लौकिकार्थानतिक्रमात्।
   तच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते।। का०द० 1/85.
2. गृहाणि नामतान्येव तपोराशिर्भवादृशः।
   संभावयति यान्येव पावनैः पादपासुंभिः।। का०द० 1/86.
3. अनयोरनवद्याङ्गि स्तनयोर्जृम्भमानयोः। अवकाशो न पर्याप्तस्तव बाहुलतान्तरे।। का०द० 1/87.
4. सेयमतिशयोक्तेयन्त्रणा न पुनर्गुणान्तरमिति। काव्यानुशासनम् पृ० 138.
5. इति सम्भाव्यमेवैतद्विशेषाख्यान संस्कृतम्।
   कान्तं भवति सर्वस्य लोक यात्रानुवर्तिनः। का०द० 1/88.
6. लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः।
   योऽर्थ स्तेनाति तुष्यन्ति विदग्धानेतरे जनाः।। तत्रैव 1/89.

आरोप्यते तदा समाधिनामगुणस्य स्थितिर्जायते[1]। आचार्यदण्डिन एतत्कथनं वर्तते यन्नयनयोर्निमीलनोन्मीलन व्यापारो भवति, तं व्यापारं पद्मसंकोचविकास-शब्देनाभिधानं समाधिगुणस्य लक्षणम्। आचार्यवामनेन उपर्युक्तदण्डिकृत समाधिलक्षणानुसारं वक्रोक्त्या लक्षणं कृतम्, सादृश्येन कृता लक्षणा वक्रोक्तिर्भवति[2], अर्थात् अप्रस्तुतधर्माणां यदि प्रस्तुतविषये आरोपः स्यात्तदा एवंविधे वाक्ये वक्रोक्त्यलंकारस्य सद्भावो भवति। वाग्भटेनापि दण्डिकृत-समाधिगुणलक्षणानुरूपं समाधिगुणस्य लक्षणं कृतमस्ति[3]। आचार्यमम्मटेन समाधिलक्षणानुसारं साध्यवसानालक्षणा स्वीकृता विद्यते[4]। अस्यां लक्षणायामपि उपमानेनारोपविषयस्योपमेयस्य निगरणं क्रियते। काव्यादर्शस्य "कुसुमप्रतिभा" व्याख्यायां निरूपितमस्ति यद्धर्मस्य समारोपे सति समाधि गुणस्य स्थितिरायाति। धर्मिणः समारोपे तु–अतिशयोक्त्यलंकारो[5] भवति। दण्डिमतानुसारं समाधिगुणस्य अर्थगुणेषु गणनां कर्तुंपार्यते, यतोहि अप्रस्तुतार्थस्य प्रस्तुतेऽर्थे आरोपोऽस्मिन् गुणे भवति।

यदा लक्षणया शक्त्या निष्ठ्यूत–उद्गीर्णवान्ताद्याः शब्दाः प्रयुक्ता भवन्ति तदा वाक्ये ग्राम्यतादोषो आपतति परमेते शब्दाः यदा गौणी लक्षणया प्रयुक्ता भवन्ति, तदा सहृदयमनोहरा जायन्ते[6]। निष्ठ्यूताद्याः शब्दा मुख्यार्थमुत्सृज्य गौणीवृत्या यदि अन्यार्थस्य बोधं कारयन्ति तदा सहृदयमनोहरा जायन्ते अनया दृष्टया दण्डिमते शब्दगुणोऽपि स्वीकर्तव्यः, परमस्य गुणस्य यदर्थगुणत्वं प्रतिपादितम्, तदधिकं सुसमीचीनं भाति। न केवलमेकस्य धर्मस्य समारोपे समाधिगुणः, अपितु गुणक्रियारूपाणां नानाधर्माणां समारोपेऽपि वाक्यं समाधिगुणोपेतं भवति[7]।

---

1. अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना।
   सम्यगाधीयते यत्र स समाधिः स्मृतो यथा।। तत्रैव 1/93.
2. सादृश्याल्लक्षणा वक्रोक्तिः। का०लं० सू० 4/3/8.
3. ससमाधिर्यदन्यस्य गुणोऽन्यत्र निवेश्यते। वाग्भटालंकार 3/11.
4. विषय्यन्तः कृतेऽन्यस्मिन् सास्यात् साध्यवसानिका। का०प्र० 2/11.
5. धर्मस्य समारोपे एवायं गुणः। यत्र तु धर्मिणः समारोपस्तत्र "अतिशयोक्तिरलंकार इत्यनयोर्भेदः। काव्यादर्शकुसुमप्रतिभाव्याख्या, द्वितीय परि० पृ० 69-
6. निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्।
   अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते।। का०द० 1/95
7. युगपन्नैकधर्माणामध्यासश्च स्मृतो यथा। तत्रैव 1/97.

समाधिगुणस्य वैशिष्ट्यं काव्यादर्शे प्रतिपादितमस्ति यदयं गुणः चमत्काराधायकत्वात् काव्यस्य जीवनंवर्तते, एनं गुणं विदर्भगौडसम्प्रदायस्य च कविसमूहोऽनुसरति। अनेन प्रकारेणैतदनिष्पन्नं यत् समाधिगुणः काव्यस्य सर्वस्वं वर्तते[1]।

आचार्यदण्डिप्रतिपादितगुणानां विवेचनात् प्रतीयते येषां दशगुणानां यानि लक्षणानि भरतेन प्रतिपादितानि तेषामेव दशगुणानां लक्षणनिर्धारणे काव्यादर्शे पार्थक्यं दृश्यते। सर्वेषां गुणानां लक्षणेषु पार्थक्यं न विद्यते तथापि केषांचिद् गुणानां लक्षणानि भरतोक्तगुणलक्षणेषु सादृश्यमावहन्ति। अत्रैतदपि ज्ञेयम् यद् भरतमुनिनिरूपितगुणलक्षणेभ्य आचार्यदण्डिकृतगुणलक्षणेषु पार्थक्यमधिकं विद्यते।

दण्डिना गुणानां शब्दगतअर्थगतरूपेण स्पष्टतया एतन्निर्देशो न कृतः यदैते अर्थगुणास्सन्ति अथवा एते शब्दगुणाः, परं निरूपितगुणधारणया लक्ष्यते यद्दण्डिमतेऽपि, शब्दार्थशब्दार्थोभयरूपेण गुणानां वर्गीकरणं कर्तुं पार्यते यथा–

1. श्लेषगुणस्य वैदर्भमार्गे एव सद्भावो भवति गौडमार्गे अस्य अभावोदृश्यते[2] शैथिल्याभावात्। एवंच महाप्राणवर्णानां प्रयोगादयं शब्दगुणः[3]।
2. श्रवणमात्रेण येभ्यः शब्देभ्योऽर्थप्रतीतिः स्यात् स प्रसादः शब्दगुणः[4]। प्रसादगुणस्य लक्षणे दण्डिना प्रसिद्धार्थबोधकानां शब्दानां प्रयोगः स्वीकृतः, अतोऽयमर्थगुणः, प्रसादगुणविषये वैदर्भानां गौडानां चापि स्वीकृतिर्वर्तते।
3. मृदु, स्फुट, मध्यमबन्धानुसारेण समतागुणः स्वीकृतो विद्यते[5] बन्धस्तु शब्दायत्तो भवति, अतोऽस्य गुणस्य स्थितिः शब्दगुणेषु वर्तते।

---

1. तदेतत्काव्यसर्वस्वं समाधिर्नाम यो गुणः।
   कविसार्थः समग्रोऽपि तमेनमनुगच्छति। का०द० 1/100.
2. काव्यादर्श 1/44.
3. तत्रैव० 1/43.
4. तत्रैव० 1/45.
5. तत्रैव ० 1/47.

4. ग्राम्यतारहित[1] रसव्यञ्जकोऽर्थ[2] प्रतिपादिनात् अर्थगुणोयं माधुर्यम्। श्रुत्यनुप्रासानुकूल[3] माधुर्यव्यञ्जकवर्णानां प्रयोगेन शब्दगुणोऽपि वर्तते।
5. अस्मिन्गुणे अनिष्ठुराक्षराणां[4] प्रयोगो भवति अस्माद्दण्डिमते शब्दगुणेष्वस्य सुकुमारतागुणस्य गणना कर्तव्या। गौडा रचनायां कष्टेनोच्चार्यमाणानां पदानां प्रयोगं कुर्वन्ति अतएव गौडा निष्ठुराक्षराणां प्रयोगेऽस्य गुणस्य स्थितिं स्वीकुर्वन्ति[5]।
6. यादृशस्यार्थस्यावश्यकता स्यात् तादृशशब्दप्रयोगेण अर्थव्यक्तिगुणस्य स्थितिर्जायते। अभिलषितस्यार्थस्य कृते तदनुसारं शब्दप्रयोगेसति शब्दार्थगतोऽयंगुण इति स्वीकर्तुं शक्यते, परमस्य गुणस्य लक्षणेऽर्थस्य यदनेयत्वं तदर्थव्यक्तिः स्वीकृतः[6], लक्षणे शब्दस्य प्रयोगो न कृतः अस्माद्धेतोरस्य गुणस्य अर्थगुणता एव स्वीकर्तव्या नेयार्थत्वस्यअभावे वैदर्भगौडमार्गाभ्यामादृतोऽयं गुणः[7]।
7. दण्डिमते उदारत्वगुणो हि अर्थगत एव वर्तते[8], परं कस्यचिन्मतं समुपन्यस्यास्यगुणस्य शब्दगताधारणाऽपि प्रकटिता[9]। काव्ये प्रशंसनीयैर्विशेषणैर्गौडा अपि चमत्कारविशेषमभिलषन्ति अतोभय-मार्गगतोऽयं प्रतिभाति।
8. वैदर्भा ओजोगुणस्य सत्तां केवलं गद्यमहाकाव्येष्वेव स्वीकुर्वन्ति[10] परं गौडा गद्यपद्यात्मके काव्ये चोभयत्रास्य सत्तां स्वीकुर्वन्ति[11]। दीर्घसमासैर्विकटबन्धत्वादयं गुणः शब्दगतो वर्तते।
9. प्रसिद्धार्थवर्णनाद् वैदर्भैरादृतोऽर्थगतोऽयं कान्तिगुणः[12]।

---

1. काव्यादर्श 1/52.
2. तत्रैव० 1/51.
3. तत्रैव० 1/54.
4. तत्रैव० 1/69.
5. तत्रैव० 1/72.
6. तत्रैव० 1/73.
7. तत्रैव० 1/75.
8. तत्रैव० 1/76.
9. तत्रैव० 1/79.
10. काव्यादर्श 1/80.
11. तत्रैव० 1/83.
12. तत्रैव० 1/85.

10. समाधि गुणेऽप्रकृतार्थस्य प्रकृतार्थे–आरोपो भवति अस्मादर्थगुणोऽयं समाधिः[1]। अस्मिन् गुणे निष्ठ्यूताद्याः शब्दाः मुख्यार्थंविसृज्य गौणीवृत्त्या यदा अन्यार्थस्य प्रतीतिं कारयन्ति तदा सहृदय- हृदयाह्लादकरा जायन्ते[2]। अनेनास्य गुणस्य शब्दगतत्वमप्यङ्गीकर्तुं पार्यते। परमयं गुणोऽर्थगतएव समीचीनः प्रतिभाति।

अनेनैतल्लिखितुं शक्यते यद्दण्डिमतेऽधोलिखिता गुणाः शब्द, अर्थ, शब्दार्थोभयरूपेण स्वीकर्तुं पार्यन्ते।

शब्दगुणाः	अर्थगुणाः	शब्दार्थोभयगुणाः
प्रसादः, श्लेषः, समता, सुकुमारता, ओजः, उदारता, कस्यचिन्मते नतु दण्डिमते शब्दगुणः	कान्तिः, समाधिः	माधर्युम्, अर्थव्यक्तिः

वैदर्भमार्गस्य गुणाः–प्रसादः, समता, सुकुमारता, कान्तिश्च।

गौडमार्गस्य गुणाः–केवलमोजः सतिशैथिल्ये श्लेषोऽपि।

उभयमार्गगता गुणाः–माधुर्यम्, उदारता, अर्थव्यक्तिः, समाधिश्च।

दण्डिकृतगुणानां लक्षणानुसारं येषां गुणानां गौडमार्गे वैपरीत्यं भवति तेषां गुणानां लक्षणानुसारं वैपरीत्यं निम्नलिखितप्रकारेण वर्तते–

श्लेषगुणस्य विपर्ययः	शैथिल्यम्
प्रसादगुणस्य विपर्ययः	व्युत्पन्नत्वम्
समतागुणस्य विपर्ययः	वैषम्यम्
सकुमारतागुणस्य विपर्ययः	दीप्तत्वम्
कान्तिगुणस्य विपर्ययः	अत्युक्तिः
अर्थव्यक्तिगुणस्य विपर्ययः	नेयार्थत्वम्
माधुर्यगुणस्य विपर्ययः	अमाधुर्यम्

वैदर्भमार्गसमर्थकस्य दण्डिनो मते माधुर्यस्य वैपरीत्यममाधुर्यमेव भविष्यति, यतोहि गौड़ाः शब्दाडम्बरमभिलषन्ति एष शब्दाडम्बरो वैदर्भाणां कृतेऽमाधुर्यमेव वर्तते परं गौडानां कृते एतदेव माधुर्यं भवति अतः यद् यस्मै रोचते तत्-

1. तत्रैव० 1/93.
2. तत्रैव० 1/95.

तस्यकृते माधुर्यं भवति। डॉ० सुशीलकुमार डे महोदयेनापि उपर्युक्तप्रकारेणैव गुणानां वैपरीत्यं निरूपितमस्ति।[1] दण्डिना सर्वप्रथमं वैदर्भमार्गस्य प्राणभूतत्वेन गुणानां निरूपणं कृतम् अत्र मार्गशब्दरीत्यापरपर्याया एव वर्तते पदानां संघटनं रीतिरित्युच्यते[2] तत्र प्राणस्वरूपा गुणा भवन्ति। दण्डिनः परवर्त्तिना ''वामनेन'' समग्रगुणयुक्ता वैदर्भी रीतिर्भवतीति निगदितम्[3]। यद्गौडमार्गे गुणानां वैपरीत्यं तद्वैपरीत्यं वैदर्भमार्गे दोष एव वर्तते परं गौडमार्गे तु तद्वैपरीत्यं गुणकरमेव। वैदर्भमार्गस्य ये गुणा वर्तन्ते ते एव गौडमार्गस्य गुणाः स्युः एतन्नैवावश्यकं भवति यतोहि एकमेव मतं सर्वेभ्यो रोचेत एतन्नैव युक्तियुक्तं तत्र पार्थक्यमपि भवितुं शक्यते, दोषोपि कुत्रचिद् गुणरूपेण परिवर्तितो भवतीति।

आचार्यवामनसम्मतं गुणस्वरूपम्—

भामहंविहाय दण्डिभरतयोर्मते गुणानां संख्या दश आसीत् परं एतन्नैव निर्धारितमासीत् यत् के शब्दगुणाः केचार्थगुणाः, भरतेन दण्डिना च केषांचिद् गुणानां शब्दधर्मत्वं, केषाचिदर्थधर्मत्वं चाप्रत्यक्षरूपेण स्वीकृतमासीत् परं स्फुटतया शब्दार्थगुणविषये पृथग्रूपेण न किमप्यभिहितम्। भामहेनार्थः शब्दस्य समकक्षरूपेण स्वीकृतः, शब्दार्थयोर्वर्गद्वयस्य गुणालंकारयोश्च विश्लेषणमावश्यकमासीत्। पूर्वोक्तगुणानां दशसंख्यां द्विगुणीकृत्य विंशति-संख्यां समुपस्थाप्य वामनः दशशब्दगुणान् दश अर्थगुणांश्च स्वीचकार। वामनात्पूर्वं गुणानां विषये भरतेन दण्डिना च स्वीया विचारधारा प्रकटिता वर्तते परमनयोर्मते गुणस्वरूपं न सुस्पष्टं भवति। सर्वप्रथमं गुणानां स्वरूपं वामनेनैव निर्धारितम्। वामनस्य कथनं वर्तते यद् येषां गुणानां विपर्ययाः दोषा भवन्ति तेषां गुणानां विचारार्थं गुणविवेचनाऽधिकरणं प्रारभ्यते[4]। भरतेन दोषविपर्यया[5] गुणाः, इति प्रतिपाद्य गुणनामभावात्मकस्थितिः, प्रदर्शितासीत्। परं वामनेन गुणानां विपरीतस्वरूपा दोषा इत्यभिधाय गुणानां भावात्मकस्थितिः प्रदर्शिता[6]। काव्यशोभोत्पादकधर्मा ओजःप्रसादादयो

---

1. सं०का०इ० पृ० 81.
2. सर०द० 9/1.
3. का०लं०सू० 2/11.
4. का०लं०सू० 3/1 पृ० 82.
5. ना०शा० अभि०भा० 16/95.
6. का०लं०सू० 2/1/1.

गुणाः सन्ति[4]। अनेन प्रकारेण गुणसामान्यस्वरूपमभिधाय वामनो गुणस्वरूप निर्धारणे सर्वप्रथमस्थानमधिगतवान्।

काव्यशोभोत्पादकगुणाः, शब्दार्थयोर्धर्मा भवन्ति तैरेव काव्यं शोभातिशयं पुष्णाति केवलमलंकारा गुणं विना न शोभाधायकाः, प्रत्युत भारभूताः, परं गुणा अलंकारैर्विनाऽपि काव्ये शोभां जनयन्ति। अग्निपुराणेऽपि गुणं विना अलंकारा, लालित्यं विना भूषणमिव भारभूतत्वेनोपन्यस्ताः[1] एतेन गुणानां काव्ये अनिवार्य स्थानत्वं प्रकटीभवति। काव्ये गुणैः उत्पत्स्यमाना या शोभा तत्रालंकारा अतिशयशोभोत्पादकधर्मा वर्तन्ते[2]। "तु" शब्देनात्र गुणालंकारयोर्भेदं प्रदर्श्य गुणानां वैशिष्ट्यं प्रतिपादितम्। आचार्यदण्डी गुणान् अलंकारेष्वेवाजीगणत् परं वामनो हि गुणालंकारयोर्भेदं पुस्फोट। वास्तविकरूपेण गुणा रीतिनिष्ठाः सन्ति परं उपचाराच्छब्दधर्माः कथिताः। गुणालंकारयोर्भेदस्य किं कारणमित्यस्मिन् विषये गोपेन्द्रत्रिपुरहरभूपालेन विवेचनशब्दस्य द्विधाव्याख्या कृता, परपदार्थेभ्यो विभजनं, समानजातीयेभ्यो विभजनं च। इममेवार्थं गोपेन्द्रः, अन्ययोगव्यवच्छेदायोगशब्दाभ्यामपि व्याचष्टे। अन्ययोगव्यवच्छेदप्रसंगे प्राप्ते गुणालंकारेभ्यो भेदः प्रदर्श्यते। अयोगव्यवच्छेदे प्रदर्शनीयेऽलंकारेष्वलंकारलक्षणसंगति प्रदर्श्यते।

गुणशब्दस्य प्रवृत्तौ निमित्तं तु अयोगोन्ययोगव्यवच्छेदश्च वर्तते। पूर्वोक्तप्रथमसूत्रे प्रतिपादितकैवल्येनेतिपदेन व्याहरति। गुणानामभावे कैवल्येन तेषामलंकाराणां काव्ये शोभा न भवति। अयोगव्यवच्छेदानुसारं अलंकारैर्विनाऽपि ओजःप्रसादादयो गुणाः काव्ये शोभोत्पादका भवन्ति[3]। दण्डिमते वैदर्भमार्गस्य प्राणा दशगुणा वर्तन्ते, परं वामनेन प्रत्युत रीतिरेव काव्यस्यात्मा[4] अस्ति—इति कथितम्। गोपेन्द्र मते रीतौ गुणा भवन्ति, येन सा वाङ्मधुधारा क्षरति, अतः स रीतिरुच्यते[5]।

---

4. काव्यशोभाकर्तारो धर्मा गुणाः। का०लं०सू० 3/1/1.
1. अलंकृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत्।
   वपुष्यललिते स्त्रीणां हारोभारायतेपरम्।। अ०पु० 346/1.
2. तदतिशयहेतवस्त्वलंकाराः। का०लं०सू० 3/1/2.
3. तत्रैव० कामधेनुटीकायाम्। 3/1/1.
4. रीतिरात्माकाव्यस्य। का०लं.सू० 1/2/6.
5. रीणन्ति गच्छन्त्यस्यां गुणा इति, रीयतेक्षरत्यस्यां वाङ्मधुधारेतिवारीति। का०लं०सू० 1/2/6 कामधेनुटीकायाम्।

का नाम रीतिरितिजिज्ञासायां वामनेन कथितम् विशिष्टपदरचना रीतिर्वर्तते[1]। तत्र किं वैशिष्ट्यं वर्तते इति तत्र गुणात्मरूपएव विशेषो वर्तते[2] इति रीतेर्वैशिष्ट्यं गुणैर्भवति, अतो रीतिभ्यः गुणा विशिष्यन्ते अर्थात् गुणं विना रीतेर्नकिमपि महत्वं वरीवर्ति। दण्डिना वैदर्भमार्गस्य प्राणा दशगुणा अंङ्गीकृताः, वामनेन समग्रगुणयुक्ता वैदर्भी[3] रीतिः कथिता, समग्रगुणयुक्तत्वाद् वामनेन मुक्तकण्ठेन वैदर्भीरीत्याऽनुमोदनं[4] कृतम्। वामनेन स्वल्पगुणत्वाद् गौडीपांचाल्योर्ग्रहणं न कृतम्[5]।

आचार्यदण्डिना काव्यशोभोत्पादकधर्माणां कृते अलंकारशब्दस्य प्रयोगः कृत आसीत्। एवं च गुणा विशिष्टा अलंकारास्सन्ति सामान्यालंकारा उपमादयो वर्तन्ते इति निर्णीतमासीत्[6]। परमाचार्यवामनो गुणानां विशेषमहत्त्वं स्वीकुर्वन् काव्यस्य नित्यधर्माः गुणा वर्तन्ते इति अचकथत्। उपमाद्यलंकारास्तु काव्येअनित्यधर्मास्सन्ति इति वामनः क्रोडीकृतवान्[7]। गुणानामावश्यकत्वं प्रतिपादयता वामनेन ओजःप्रसादादिशुद्धगुणैः समन्वितं काव्यं यमकोपमाद्यलंकारराहित्येऽपि, कटककुण्डलाद्यलंकारशून्याया युवत्याः शुद्धरूपसदृशं सहृदयहृदयानां कृते अत्यन्तं रूचिकरं भवति। परमोजः प्रसादादिगुणैः शोभायमानं काव्यमुपमाद्यलंकारैर्विभूषितं अत्यन्तानन्ददायकं- जायते। यदि काव्यमोजःप्रसादादिगुणैरहितं स्यात्, तदा युवत्या यौवनशून्य शरीरमिव नैव शोभाधायकं लक्ष्यते।

अत एव काव्ये गुणानां नित्यत्वं प्रतिपादितम्[8]। यतस्तैर्विना काव्यं न विभाति।

निम्नलिखितप्रकारेण वामनमते गुणस्वरूपविषये एष निष्कर्षो वर्त्तते।

1. गुणस्वरूपनिर्धारणस्य गुणानां नित्यताप्रतिपादनस्य रीतेर्गुणात्मवैशिष्ट्यकथनस्य गुणालंकारयोर्भेदप्रतिपादनस्य गुणानां शब्दार्थयोर्वर्गद्वये विभागस्य च आचार्यवामनस्येवाग्रणीयता विद्यते।

---

1. विशिष्टपदरचना रीतिः। तत्रैव 1/2/7.
2. विशेषोगुणात्मा। तत्रैव० 1/2/8.
3. समग्रगुणा वैदर्भी। का०लं०सू० 1/2/11.
4. तासां पूर्वे ग्राह्या गुणसाकल्यात्। 1/2/14.
5. न पुनरितो स्तोकगुणत्वात्। 1/2/15.
6. काव्यशोभकरान् धर्मानलंकारान् प्रचक्षते।
   ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति।। का०द० 2/1.
7. का०लं०सू० 3/1/1, 3/12, 3/13.
8. पूर्वेनित्याः तत्रैव० 3/1/3.

2. केवलमलंकारा गुणसाहचर्याभावात् काव्ये शोभां जनयितुं न समर्थाः।
3. ओजः प्रसादादयो गुणा अलंकारैर्विनाऽपि कान्तिं जनयितुं समर्थाः।
4. युवत्या यौवनशून्यशरीरमिव गुणरहितं काव्यं न शोभते।
5. समग्रगुणैर्युक्ता वैदर्भीरीत्यनुसारं रचितं काव्यं काव्यनामभाग् भवति।
6. गुणाः शब्दार्थयोर्धर्मा वर्तन्ते।
7. वैदर्भीरीत्या काव्यशोभोत्पादकत्वं शब्दार्थयोर्धर्मवत्त्वं च गुणत्वम्।
8. गुणाः काव्यस्यात्मस्थानीया वर्तन्ते।

आचार्यवामनेन पूर्वाचार्यनिरूपितगुणानामेव निरूपणं कृतम् ते एव गुणाः शब्दार्थयोर्वर्गद्वये विभक्ताः। परं गुणगणनायां पूर्ववर्त्त्याचार्याणां क्रमो नैव गणितः। वामनः ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारताऽर्थ व्यक्तिकान्तयो बन्धगुणाः। अनेनप्रकारेण गुणगणनां गणयामास[1]।

वामनाचार्यप्रतिपादितशब्दगुणानां विवेचनम् यथा—

ओजः—

पदरचनायां यन्निविडत्वं तद् वामनमते ओजोऽभिधानः शब्दगुणो वर्तते। रचनायां संयुक्तवर्णानां प्रयोगेण गाढता भवति, अर्थात् रचनायां यत्र गाढत्वं तिष्ठति, यत्र वर्णानां विन्यासस्य च पारस्परिकसुश्लिष्टता स्यात्तत्र ओजो गुणो विराजते[2]।

वामनेन ओजोगुणलक्षणे पदानां गाढबन्धत्वं स्वीकृतम्, इतः पूर्वं भरतमुनिना समासयुक्तैः सानुरागोदारैर्बहुभिः पदैः यत् काव्यं तदोजोगुणयुक्तं भवतीति निगदितम्[3]। अभिनवभारत्यां सानुरागस्योदाहरणे "विलुलितमकरन्दा मञ्जरीर्नर्तयन्ति" इत्यत्र "र" शब्दो "द" शब्दं "स्व गुरूत्व हेतवे "कामयते "न" शब्दः "र्त" शब्दं "य" इत्ययं "न्तो" शब्दं "न्तो" इत्ययं शब्दाऽन्ते गुरूत्वात् स्वविश्रान्तिजनितकालोपचयलभ्यं गुरुत्वं नाकांक्षतीति द्वितीय पादपाठं समानान्तरमेवापेक्षते। "विलुलितमधुधारामञ्जरीर्लोलयन्तः" इत्यत्र धारायाः "धा" शब्दः "रा" इत्यस्य लोलस्य "लौ" शब्दः ल इत्यस्य स्वाभाविकीम् अपेक्षां करोति एवं विधोऽर्थगतः 'ओजो' गुणो भवति[4]। ओजोगुणलक्षणविषये काव्यालंकारसूत्रस्य कामधेनुटीकायां निर्दिष्टं यद् पदरचनाया "गाढ़त्वं"

---

1. का०लं०सू० 3/1/4.
2. गाढबन्धत्वमोजः। तत्रैव० 3/1/5.
3. ना०शा० 16/105.
4. तत्रैव० अभिनव भारत्याम् 16/105 पृ० 1331.

सुवर्णशलाकावयवसदृशनिविडत्वरूपेण रचनानिर्माणे संयुक्ताक्षराणि वर्गाणां प्रथमद्वितीयतृतीयचतुर्थप्रथमतृतीयवर्गाणां संयोगे जिह्वामूलीयोपध्मानीयैः समासैश्च तरतमभावेन अवस्थितानि कारणानि भवन्ति[1]।

हेमचन्द्रो वामनमतं समुपस्थापयन्नाह यत् तिसृणां रीतीनामोजः साधारण गुणो वर्तते, केवलं गौडमार्गस्यैवौजो, गुणः, इति स्वीकारोक्तिर्नैवोचित्यमावहति। अनेन प्रकारेण हेमचन्द्रो दण्डीकृतौजोगुणलक्षणविषये अरूचिं प्रकटयामास[2]। आचार्यवामनेन पूर्वाचार्यनिरूपितगुणानामेव निरूपणं कृतम्।

प्रसादः—

यत्र रचनायां शैथिल्यं भवति तत्र प्रसादाख्यो गुणो बोभवीति[3]। वर्णानां यत्र परस्परं संश्लिष्टता न भवति तत्र शैथिल्यं विद्यते। आचार्यवामनेन ओजोगुणस्य लक्षणे बन्धस्य शिथिलत्वमभिहितम्। गुणविपर्यये तु दोषस्य स्थितिः स्वाभाविकी विद्यते, अनेन ज्ञायते यदौजोगुणस्य विपर्ययरूपोऽयं प्रसादः दोष एव वर्तते, परमस्य निराकरणार्थं वामनेन प्रतिपादितम्, यदा शैथिल्यस्य गाढत्वेन सह संमिश्रणं भवति तदैव प्रसादगुणस्य सत्ता भवति[4]। केवलं शैथिल्यं प्रसादगुणस्य लक्षणं न वर्तते, अपितु शैथिल्यं दोषकरमेव। विपरीत स्वभावयोर्गाढत्वशैथिल्ययोः संप्लवः (संमिश्रणम्) कथं भविष्यतीति निराकर्तुं वामनेन प्रतिपादितमस्ति। यथा रत्नविशेषज्ञानां कृते रत्नानां वैशिष्ट्यं अनुभवसिद्धं भवति, तथैव शैथिल्यगाढत्वयोर्मिश्रणमनुभवसिद्धमेव वर्तते[5]।

अस्मिन् विषये एतदपि प्रतिपादितमस्ति यत् करुणरसप्रधाननाटकेषु परस्पर विरुद्धयोः सुखदुःखयोर्मिश्रणं यथा अनुभवसिद्धमस्ति तथैव विरुद्ध-स्वरूपयोः ओजःप्रसादगुणयोर्मिश्रणमनुभवसिद्धं वर्तते इति[6]। वामनमते ओजः-

1. का०लं०सू० कामधेनुटीकायाम् पृ० 86.
2. रीतित्रयेप्योजसः साधारणत्वाद् गौडीयनिर्देशो न युक्तिमानिति वामनो मंगलश्च। का०शा० अ० 4 पृ० 233.
3. शैथिल्यप्रसादः। का०लं०सू० 3/1/6.
4. गुणः संप्लवात्। तत्रैव० 3/1/7.
5. स त्वनुभवसिद्धः। तत्रैव० 3/1/9.
6. करुणप्रेक्षणीयेषु संप्लवः सुख-दुखयोः।
   यथाऽनुभवतः सिद्धस्तथैवोजः प्रसादयोः।। का०लं०सू० 3/1/9.

प्रसादगुणयोर्न केवलं संप्लवोऽनुभवसिद्धोऽपितु साम्योत्कर्षावपि अनुभव सिद्धौ वर्तेते [1]। अनयारीत्या ओजःप्रसादगुणयोः संप्लवः त्रिविधो भवति।

1. क्वचिद् ओजःप्रसादयोः साम्यं दृश्यते।
2. कुत्रचित् प्रसादापेक्षया ओजोगुणस्योत्कर्षो जायते।
3. कर्हिचिद् ओजोगुणस्यापेक्षया प्रसादस्योत्कर्षो विद्यते।

ओजःप्रसादगुणयोः "संप्लव" विषये हेमचन्द्रमते पदरचनायां गाढत्वं शैथिल्यं च गुणरूपेण नैव स्वीकर्तुं शक्यते। ओजोगुणस्य विपर्यये प्रसाद गुणो न स्वीकर्तव्यः।

मिथः विरुद्धभावयोरेकत्र संप्लवः वामनेन अनुभवसिद्धः प्रतिपादितः। अस्मिन् विषये हेमचन्द्रानुसारं यत् करूणरसस्यानुभूतौ सुखात्मक दुःखात्मकभावानामनुभूतिर्गाढत्वशैथिल्ययोश्च संप्लवो नोचितः, तत्र दृष्टान्तो वर्तते यत्र सर्वप्रथमं प्रेक्षकः करुणरसप्रधाननाटकेषु दुःखात्मकभावानामनुभवं करोति, तदनन्तरं सुखस्यानुभवं विदधाति, परमोजःप्रसादयोर्युगपदेवावस्थितिः प्रदर्शिता विद्यते। वास्तविकरूपेण सर्वे रसाः सुखकारकाःस्सन्ति। अनेन प्रकारेण द्वयोर्विरुद्धभावयोः सत्तां साधयितुं "करुणप्रेक्षणीयेषु इत्यादिदृष्टान्ते निराधार एव प्रतीयते[2]।

श्लेषः–

आचार्यवामनेन शब्दगुणश्लेषस्य लक्षणे अभिहितमस्ति, शब्दानां या मसृणता सा श्लेषगुणरूपेणाभिधीयते[3]। मसृणताशब्दस्यार्थे वृत्तावेवं प्रतिपादितम्, यत्र बहूनि पदानि एकपदवत्प्रतीयन्ते, सा मसृणता शब्देनाभिधीयते।[4] रचनायां

---

1. साम्योत्कर्षौच। तत्रैव० 3/1/10.
2 ओजोविपर्ययात्मा कथं गुण इति। गाढत्वं संप्लुतशैथिल्यमेव गुणइतिचेत् परस्परविरोधित्वाद् गाढत्वशैथिल्ययोः कथमेकत्र सन्निवेशः संभवतीति। अनुभवादेव विरोधप्रतिषेध इति चेत्। यदाह करुणप्रेक्षणीयेषु संप्लवः। सुख-दुःखयोः। सेयं दृष्टान्तस्यैव तावत्सिद्धिः। दृष्टान्तविघातश्च दार्ष्टान्तिकमपि प्रतिहन्ति। तथाहि सामाजिकजनो नाट्यकर्मणि करुणरसवासितचेताः। प्रथमं दुःखातिमात्र प्रयोगवैशारद्येन च पश्चात्सुख्यति। ओजः प्रसादयोः पुनर्युगपदेवानुभवप्रतिज्ञा। यदि च तत्त्वं विवेच्यते तदा सर्वेषामपि रसानां प्रतीतिश्चमत्कारसारत्वात्सुखरूपैवेति दृष्टान्त एव न संगच्छते। हे०चं०का०शा० अ० 4, पृ० 234.
1. मसृणत्वं श्लेषः। का०लं०सू० 3/1/11.
2. मसृणत्वंनाम यस्मिन्सति बहून्यपि पदान्येकपदवद्भासन्ते। यथा अस्त्युत्तरस्यां दिशि देवतात्मा इत्यादि। तत्रैव० 3/1/11 वृत्तौ।

बहूनां पदानां एकपदवत्प्रतीतिस्तदेव भवति, यदा रचनायां शैथिल्यस्याभावः स्यात्। दण्डिनाऽपि शैथिल्यरहितः श्लेषगुणः स्वीकृतः[1]। अनेन ज्ञायते यद् वामनस्य श्लेषनामशब्दगुणो दण्डीकृतश्लेषगुणात् प्रभावितो वर्तते।

यद्यपि लक्षणे प्रयुक्तानां शब्दानां वैषम्यं दृश्यते परम् अर्थेतु किंचित् साम्यं प्रतीयते। वामनस्य शब्दगुणौजसः, शब्दगुणश्लेषस्य किमपि महदन्तरं नावलोक्यते। "कामधेनुटीकायाम्" शब्दश्लेषस्य, विपर्ययविसन्धिवाक्यदोषाणाञ्च विश्लेषात्मा भेदः प्रतिपादित[2]। श्लेषगुणे अनल्पानां पदानां समासो न जायते, वास्तविकरूपेण ते व्यस्ता भवन्ति परं समस्तवदावभासन्ते[3]। अभिनवगुप्तो वाक्ये विद्यमानानि मिथः सम्बन्धान्वितानि पदानि एकपदवद् भासेरन् इत्येवं श्लेषगुणमंगीचकार[4]।

समताः—

मार्गाभेदः समतागुणोवर्तते[5]। यया रीत्या रचनाया उपक्रमः स्यात् तया रीत्येव तस्यनिर्वाहः समताख्यो गुणो वरीवर्ति। एष गुणो मुक्तकादारभ्य सम्पूर्ण प्रबन्धपर्यन्तं विराजते।[6] अस्य गुणस्योदाहरणरूपेण "अस्त्युत्तरस्यां दिशिदेवतात्मा" इत्यादिपद्यमुदाहृतम्, अस्य पद्यस्यादौ "अस्ति" तथा अन्ते "स्थितः" वर्तते, कर्तृवाचकादारभ्य कर्तृवाचकेनैव समाप्तिं नीतः, अतोऽत्र समता गुणो विभाति।[7] श्लेषगुणहेतवे इदमेवपद्यमुदाजहार। वामनो मार्गभेदस्यापि एकं प्रत्युदाहरणं प्रास्तावीत्, अस्मिन्नुदाहरणे "त्यजमन्युमञ्जसा" इत्यत्र कर्तृवाचकेनोपक्रमः कृतः परमुत्तरार्धे "त्वयालुप्तविलासमास्यते" इत्यत्र त्वया आस्यते इति भाववाच्येन समापनं विहितम्, अतोत्रमार्गभेदोवर्तते। समतायां तु मार्गाभेदो भवति, समतागुणस्य अभावस्वरूपत्वादत्र दोष एव लसति।[8] वामनात् प्राक्

---

1. का०द० 1/43.
2. का०लं०सू० 3/1/11 पृ० 90.
3. यत्र हि व्यासेऽपि समासवदवभासः स श्लेषः। तत्रैव 3/1/11 का०धे०टी०
4. ना०शा०अभि०भा० अ० 16 पृ० 1319.
5. मार्गाभेदः समता। का०लं०सू० 3/1/12.
6. येन मार्गेणोपक्रमस्तस्याऽत्याग इत्यर्थः श्लोके प्रबन्धेवेति पूर्वोक्त मुदाहरणम्। तत्रैव० का०लं०सू० 3/1/12 वृत्तौ।
7. अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयोनाम नगाधिराजः।
   पूर्वापरौ तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः।।
   कु०स० 1/1, का०लं०सू० 3/1/11.
8. प्रसीद चण्डी त्यजमन्युमञ्जसा जनस्तवायं पुरतः कृताज्जलिः।
   किमर्थमुत्कम्पितपीवरस्तनद्वयं त्वयालुप्तविलासमास्यते।।
   का०लं०सू० 3/1/12.

दण्डिनाऽपि समतागुणस्य लक्षणमुक्तप्रकारेण कृतमासीत्। अतोऽत्र स्पष्ट रूपेण – एतदभिधातुपार्यते यद् वामनस्य समतानामकः शब्दगुणो दण्डीकृत समतागुणोऽनुरूपो विद्यते।[1]

समाधिः—

या रचनाऽरोहाऽवरोहक्रमेण रचिता स्यात् सा समाधि गुणोपेता भवति।[2] वामनमते आरोहादवरोहं प्रति, अवरोहात्—आरोहं प्रति रचिता रचना समाधिगुण-युक्ता भवति।[3]

कामधेनुटीकायामस्यगुणस्य द्वैविध्यमभिहितम्। दीर्घादिगुर्वक्षराणां प्राचुर्यादारोहस्य स्थितिरायाति, ह्रस्वाक्षराणां शैथिल्यादवरोहो भवति, तत्– आरोहाऽवरोहः, क्वचिदारोहपूर्वकावरोहः, कुत्रचिदवरोहपूर्वक आरोह इति।[4] अस्य गुणस्यारोहावरोहविषये वामनस्येदं मतमस्ति यत् समाधिगुणलक्षणे य आरोहावरोहस्य क्रमः प्रतिपादितः स पूर्वनिरूपितौजोगुणे आरोहतां, प्रसादगुणे अवरोहतां श्रयति, तत् किमर्थसमाधिगुणस्य पृथक्सत्तायाः स्वीकरणं, अतः समाधिगुणः पृथग्रूपेण न मन्तव्यः।[5] समाधिगुणस्य पृथगस्तित्वे वामनेनोक्तम् यद् ओजप्रसादयोर्नित्यं सहैवावस्थितिः, परमारोहावरोहयोः सर्वदा पृथगस्तित्वं भवति, अर्थात् आरोहावरोहौ ओजःप्रसादरूपौ न विद्येते।

समाधिगुणस्य सत्तायां शंकाकलितायां वामन-एवमपाकरोति यत् समाधिगुणे—ओजप्रसादयोर्द्वयोर्गुणयोः सम्मिश्रणं भवति, नद्याः प्रसरन्त्या द्वाभ्यां धाराभ्यामिव द्वावेवोजप्रसादगुणौ समाधिगुणे मिश्रितरूपेण विद्येते।[6] ओजः प्रसादयोरारोहावरोहक्रमस्य एकान्तिकं पूर्णतथ्यं न विद्यते, आरोहा-वरोहयोरभावेऽपि ओजप्रसादौ भवितुमर्हतः। आरोहावरोहयोः क्रमेण ओजसः प्रसादस्य च सार्वत्रिकी स्थिति र्विद्यते[7], तस्मात् समाधिगुणस्य

---

1. का०द० 1/47.
2. आरोहावरोहक्रमः समाधिः। का०लं०सू० 3/1/13.
3. आरोहावरोहयोः क्रम आरोहावरोहक्रमः समाधिः परिहारः। आरोहस्यावरोहे सतिपरिहारः, अवरोहस्याऽवरोहे सतीति। तत्रैव 3/1/13 पृ० 91.
4. का०लं०सू० 3/1/13 पृ० 92.
5. न पृथगारोहावरोहयोरोजः प्रसादरूपत्वात्। तत्रैव० 3/1/14.
6. न संपृक्तत्वात्। तत्रैव० 3/1/15.
7. अनैकान्त्याच्च। का०लं०सू० 3/1/16.

पृथगस्तित्वं वामनेन सम्यक्प्रकारेण साधितम्। यद्येवं कथनं स्यात् यदोजः प्रसादयोः कस्मिंश्चिद्भागे तीव्रावस्थायां सत्यां क्रमेणारोहावरोहो भवति तदा समाधि गुणस्य पृथगस्तित्वे न काप्यनुपपत्तिः।[1]

ओजः प्रसाद गुणयोरारोहावरोहक्रमस्य निश्चितस्थितिविशेषो निमित्तापेक्षयैव वर्तते।[2] आरोहावरोहयोर्निमित्त एव समाधि गुणः प्रोच्यते।[3] आरोहावरोहयोः क्रमः समाधिगुणस्य लक्षणम्, लक्षणे समागतस्य क्रमशब्दस्यार्थो गौणी **लक्षणया** निमित्तार्थपरक एव विद्यते उत आरोहावरोहयोः क्रमंविधातुं समाधिगुणं पृथग् रूपेण मन्यते।[4] आरोहावरोहयोः क्रमिकोद्बोधनंतु पाठस्य धर्मा वर्तते नतु काव्यगुणस्य, तस्मात् काव्यगुणेषु अस्य गणना नैव भवितुमर्हति। इतिशंकामपाकर्तुं वामनः स्वमतं प्रस्तुवन्नाह यदेते गुणाः पाठधर्मा न वर्तन्ते, सर्वत्र—पाठमात्रे अदृष्टत्वात्, यद्येते गुणाः पाठधर्माः स्युस्तदा—विशेषतानपेक्षयैव पाठमात्रे प्रतीयेरन्, परं स्पष्टरूपेण नैवाऽवभासन्ते, अतो विशेषापेक्षया विशेषाणां गुणरूपत्वात् गुणानां सत्ता स्वीकर्तव्यैव।[5] अभिनवगुप्तेन समाधिगुणस्य व्याख्यायां प्रतिपादितमस्ति यद्—यस्यकवेः प्रतिभा सहजा भवति तस्य वाण्यां आरोहाऽवरोहस्य निर्वाहो जायते। परं प्रतिभाया अभावात् अन्धपुरुषस्य चरणन्यासवत् पदयोजनायां आरोहावरोहयोः क्रमो न भवति।[6] अनेन वामन मतमेव पुष्यति यद् आरोहावरोहक्रमः न केवलं पाठधर्मोऽपितु काव्यगुणोऽस्ति।

माधुर्यम्:—

वामनेन शब्दगुणमाधुर्यस्य लक्षणं पृथक्पदत्वं प्रतिपादितम्।[7] रचनायां या पदानां पृथक्ता भवति, सा माधुर्यगुणेनोच्यते। अस्मिन् गुणे समासदैर्घ्याभावः प्रतिबोधितः।[8]

---

1. ओजः प्रसादयोः क्वचिद् भागे तीव्रावस्थायां ताविति चेदभ्युपगमः। तत्रैव० 3/1/17.
2. विशेषापेक्षित्वात्तयोः। का०लं०सू० 3/1/18.
3. आरोहावरोहनिमित्तं समाधिराख्यायते। तत्रैव० 3/1/19.
4. क्रमविधानार्थत्वाद्वा। तत्रैव० 3/1/20.
5. न पाठधर्माः सर्वत्रादृष्टेः। 3/1/28.
6. ना०शा०अभि०भा०अ० 16 पृ० 1327.
7. पृथक्पदत्वं माधुर्यम्। का०लं०सू० 3/1/21.
8. समासदैर्घ्यनिवृत्तिपरं चैतत्। तत्रैव० वृत्तौ पृ० 96.

वामनो माधुर्यगुणलक्षणे भरतदण्डिनोरेकतरमपि नानुससार, परं भामहस्य माधुर्यगुणलक्षणादयं गुणः प्रभावितो विद्यते, यतोहि भामहेन दीर्घसमासाभावादेव माधुर्यनामको गुणः स्वीकृतः।[1]

आचार्यवामनेन यल्लक्षणं माधुर्यगुणस्य कृतम्, तल्लक्षणं हेमचन्द्रेण न समर्थितम्। समासस्थलेऽपि माधुर्यगुणो भवतीति पृथक् पदत्वरूपं माधुर्यं युक्तम्, तन्न समीचीनम्[2]।

सौकुमार्यम्–

वामनमते अपारूष्यमेव सौकुमार्यगुणो भवति[3]। रचनायां यत्र पारूष्य राहित्यं स्यात्तत्र सौकुमार्यगुणस्य सद्भावो भवति, एष गुणः श्रुतिकटुत्व दोषाभावे एव स्वसत्तांप्रकटयति। वामनात् पूर्वं दण्डिनापि कोमलाक्षरैः श्रुतिकटुत्वदोषरहिताक्षरैश्चास्य गुणस्य सद्भावः स्वीकृत आसीत्[4]। अस्मात् प्रतीयते यद्दण्डिस्वीकृतसुकुमारतागुणादाचार्यवामनस्य सौकुमार्यनाम गुणः प्रभावितोऽस्ति। हेमचन्द्रेणास्य गुणस्य विषयेप्यभिहितम् यच्छ्रुतिकटुत्वदोषाभावे सौकुमार्यनाम गुणो न गुणरूपतामेति, अपितु माधुर्यस्यापरप्रकार एव वर्तते।[5]

उदारता–

रचनायां यत्र विकटत्वं स्यात्तत्र उदारताख्यो गुणो राजते।[6] यस्यां रचनायां पदानि नृत्यन्तीव प्रतिभान्ति तदेव विकटत्वं भवति।[7] गोपेन्द्रत्रिपुरहरभूपालेन क्रमेण वर्धमानानां पदानां विकटत्वं प्रतिपादितम्। पदस्य प्रथमाद्यक्षरांणां पदान्तरेऽपि चेत् तद्वत्सादृश्यं स्यात् तत्र विकटत्वं जायते। अस्य गुणस्योदाहरणरूपेण पद्यमेकमुदाहृतम्[8], अस्मिन्पद्ये प्रथमपादे "स्व" इत्येकाक्षरेण तदनन्तरं "चरण" इत्यत्र त्र्यक्षरैः, विनिविष्ट इत्यत्र चतुरक्षरैर्वैचित्र्यमस्ति, रकारसकारयो प्रयोगेणाधिकवैचित्र्यं सरीसर्ति अतोऽत्र पदानां लीलायमानत्वं विद्यते।

---

1. श्रव्यं नाति समस्तार्थं काव्यं मधुरमिष्यते। भामह का०लं० 2/3.
2. समासेऽपि माधुर्यस्यदर्शनात्। हे०चं० काव्यानुशासनम् अ० 4, पृ० 237.
3. अजठरत्वं सौकुमार्यम्। का०लं०सू० 3/1/22.
4. अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते। का०द० 2/69.
5. सोऽयं श्रुतिकटुत्वदोषाभावो न गुणः। माधुर्यप्रकार एवायम्। हे०चं०का०शा० अ० 4, पृ० 238.
6. विकटत्वमुदारता। का०लं०सू० 3/1/23.
7. यस्मिन् सति नृत्यन्तीव पदानीति, जनस्य वर्णनभावना भवति तद्विकटत्वम् तत्रैव० 3/1/23 वृत्तौ।
8. स्वचरणविनिविष्टैर्नुपुरैर्नर्तकीनां, झणिति रणितमासीत् तत्र चित्रं कलं च। तत्रैव० का०लं०सू० 3/1 पृ० 97.

भोजेन विकटाक्षरैर्विरचितो बन्ध औदार्यगुणोभवतीत्यभिहितम्[1]। उदारता गुणलक्षणे वामनो भरतदण्डिनौ नानुसार। हेमचन्द्रो अस्य गुणस्य ओजो-गुणातिरिक्तत्वं न स्वीचकार।[2]

अर्थव्यक्तिः—

वामनेन अर्थव्यक्तिगुणलक्षणे निर्दिष्टम् यदर्थस्य स्पष्टप्रतीतेः कारणमर्थव्यक्तिगुणो वर्तते।[3] अस्मिन्गुणे एवंविधानां शब्दानां प्रयोगो भवितव्योयैर्झटित्यर्थावगमः स्यात्[4]। अनेनैतत् फलितम् यत् स्पष्टार्थ प्रतीति-हेतुत्वमर्थव्यक्तित्वम्।

भरतप्रतिपादितार्थव्यक्तिगुणस्य प्रभावो वामनोक्तार्थव्यक्तिगुणे न संलक्ष्यते परं दण्डीकृतार्थव्यक्तिगुणस्य प्रभावः केनचिदंशेन अवश्यमेव वर्तते। दण्डिकृतार्थव्यक्तिगुणस्य लक्षणे स्फुटो वर्तते यदर्थस्य नेयत्वं तदर्थ-व्यक्तिः।

यत्र सर्वेशब्दा वाक्यार्थबोधे अभीष्टार्थान् स्पष्टतया प्रतिपादयन्ति तत्रार्थव्यक्तिगुणः प्रजायते।[5] मम्मटविश्वनाथादिभिः अस्यगुणस्य प्रसादगुणेनैव-परिग्रहोऽकारि।[6] हेमचन्द्रोऽपि वामनोक्तार्थव्यक्तिगुणं प्रसादगुणादभिन्नममंस्त।[7] परं वामनस्यार्थव्यक्तिप्रसादगुणयोर्भिन्नत्वं लक्ष्यते। कामधेनुटीकानु-सारमस्यार्थव्यक्तिगुणस्य विपर्ययोऽसाधुत्वमप्रतीत्वमनर्थकत्वमन्यार्थत्वं, नेयार्थत्वं, गूढार्थत्वादय इमे दोषा वर्तन्ते।[8] पदप्रयोगसमकालमेव यत्रार्थस्य प्रतीतिः स्यात् तत्र अर्थव्यक्तिगुणोजायते। पदप्रतीतेः प्रागर्थस्य प्रतीतिर्न भवति, परमस्मिन् गुणे पदोच्चारणे सति—अर्थस्य प्रतीतिस्तस्मात् प्रागेव जात इत्यनुभूतिः स्यात्—तत्र कान्तिशब्दगुणो वर्तते।[9]

---

1. विकटाक्षरबन्धत्वमार्यैरौदार्यमुच्यते। स०कं० 1/70.
2. सोऽयमीषद्समृणोऽनुप्रासभावो न गुणः। ओजःप्रकार एवायम् हे०चं० काव्यानुशासनम् अ० 4 पृ० 238.
3. अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः। का०लं० सू० 3/1/24.
4. झटित्यर्थप्रतीतिहेतुत्वं स गुणोऽर्थव्यक्तिरिति। तत्रैव० 3/1/24 वृत्तौ।
5. अर्थव्यक्तिरनेयत्वमर्थस्य। का०द० 1/73.
6. प्रसादेनार्थव्यक्तिर्गृहीता। का०प्र० 8/72 पृ० 391.
   अर्थव्यक्तेः प्रसादाख्यगुणेनैव परिग्रहः। सा०द० 8/11.
7. सोऽयं प्रसादादभिन्न इति वामनीयाः। हे०चं०का०शा० अ० 4 पृ० 238.
8. अस्य च विपर्ययः अपाध्वप्रतीतानर्थकान्यार्थनेयार्थगूढार्थयतिभ्रष्टक्लिष्टत्व सन्दिग्धाऽप्रयुक्तानि। का०लं०सू० कामधेनुटीकायाम् 3/1/25.
9. पश्चादिवगतिर्वाचः पुरस्तादिव वस्तुनः।
   यत्रार्थव्यक्तिहेतुत्वात् सोऽर्थव्यक्तिः स्मृतो गुणः। तत्रैव०

कान्तिः—

रचनायां यदौज्ज्वल्यमथवा नवीनत्वं वामनमते तत्कान्तिर्नाम शब्दगुणः।[1] यत्र रचनायां नूतनत्वं स्यात् तत्रैव कान्तिगुणस्य सद्भावो भवति, अन्यथा औज्ज्वल्यरहिता रचना पुराणच्छायेब प्रतिपादिता[2] अर्थात् तस्यां रचनायां प्राक्तनरचनायाच्छाया भवति। रचनायां यन्नवीकृतत्वं भवति, तदेव कान्तिगुण-शब्देनाख्यायते, चमत्कृत्याभावे तस्या रचनायाः प्राचीनचित्रत्वप्रीतिर्भवतीति वामनस्याशयः।[3]

कान्तिगुणस्योदाहरणे प्रतिपादितं विद्यते यद् हरिणीनां नेत्रपङ्क्तिभिर्वनाली प्रान्तं पुष्पगुच्छैर्युक्तः प्रतीयते इत्यत्रार्थस्याभिनवत्वं वर्तते। अत एवेदं पद्यं कान्तिगुणस्योदाहरणत्वेन उदाहृतम्[4]। हेमचन्द्रेणास्मिन् विषये कथितमस्ति यत् औज्ज्वल्यमेव कान्तिगुणस्य लक्षणं स्यात्तदौज्ज्वल्ययोगेन ओजोगुणस्य कान्ति गुणे अन्तर्भावो भविष्यति, अस्यां स्थितौ ओजोगुणस्य पृथगस्तित्वं न भविष्यति।[5]

कामधेनुटीकायां प्रतिपादितमस्ति, औज्ज्वल्यं तत्र लसति यत्र 'पत्र' स्थाने "विसलय" शब्दस्य "जलधौ" स्थाने "अधिजलधि" इत्यस्य, 'राज्ञः', स्थाने "राजनी" इति शब्दस्य, कमलमिव इत्यस्यस्थाने "कमलायतम्" इत्यादिशब्दानां प्रयोगः स्यात्[6]। इत्यादिभिर्ललितशब्दप्रयोगैः कान्तिगुणः काव्ये देदीप्यते। भरतदण्डिनोः कान्तिगुणलक्षणेन सदृशं लक्षणं वामनेन न विहितम्, यतोहि वामनेनौज्ज्वल्यताया अभावे कान्तिगुणमस्वीकृत्य पुराणच्छाया इव प्रतिपादिता। चेत् वामनेन भरतदण्डिवत् कान्तिगुणस्य लक्षणं कृतंभवेत्— तर्हि तस्य लक्षणस्यापि पुराणच्छायैव प्रतीतिर्भवति, अत एवात्र गुणे औज्ज्वल्यपदंनिधाय नवीनतामुत्पाद्यौज्ज्वल्यं कान्तिरिति लक्षणं विहितम्। वामनो गुणानामवश्यकत्वं प्रतिपादयन् व्याजहार, यदैते गुणाः केवलं स्वसंकल्पनामात्रसारा न वर्तन्ते, अपितु काव्ये गुणनामानुभूतिर्भवति, अत एवेषां गुणानां सहृदयं संवेद्यत्वाद- विद्यमानत्वं न शोभते, गुणानामस्तित्वस्य प्रतिषेधो नैव कर्तुं पार्यते।[7] यद्येते गुणाः सहृदयमात्रगम्याः सन्ति, तदा

---

1. औज्ज्वल्यं कान्तिः। तत्रैव०
2. बन्धस्यौज्ज्वल्यत्वं नाम यदसौ कान्तिरिति। यदभावे पुराणच्छायेत्युच्यते। का०लूं०सू० 3/1/25.
3. औज्वल्यं कान्तिरित्याहुर्गुणं गुणविशारदाः।
   पुराणचित्रस्थानीयं तेन बन्ध्यं कवेर्वचः।। तत्रैव० 1/3 पृ० 99.
4. कुरङ्गी नेत्राली स्तवकितवनाली परिसरः। का०लं०सू० 3/1/25.
5. तदिदं माधुर्यसाधारणमिति वामनीयाः काव्यानुशासनम् अ० 4, पृ० 239
6. का०लं०सू० कामधेनुटीकायाम् 3/1 पृ० 100.
7. नाऽसन्तः संवेद्यत्वात्। तत्रैव० 3/1/26.

असार्वजनीना भविष्यन्ति, केवलं सहृदयेषु गुणानां प्रतीतिर्भ्रान्तिमूलैव न स्यादित्यपाकर्तुं वामनेन स्वमतं प्रतिपादितम्। गुणज्ञानां ज्ञानगम्ये सत्यपि एतेगुणा भ्रान्तिमूला नैवभवितुमर्हन्ति, यद्यपि एते गुणाः सकलसहृदय-संवादभाक्त्वात् असार्वजनीनाः सन्ति, तथापि अबाधितत्वान्नगुणा भ्रान्तिमूलकाः[1]। अतो गुणानामस्तित्वं नैवापाकर्तुं शक्यते। एषामोजः प्रसादादिगुणानामस्तित्वं सर्वत्र–पाठमात्रे न वर्तते। यद्येतेगुणाः पाठधर्माःस्युस्तर्हि विशेषतामपेक्ष्यैव सर्वत्र पाठमात्रे एषां प्रतीतिर्भवितव्या[2], परं सर्वत्र एषां गुणानां प्रतीतिर्नैव भवति, अतो विशेषापेक्षया विशेषाणां गुणरूपत्वाद् गुणानामावश्यकत्वं स्वीकर्तव्यमेव[3]।

रचनायां यदि काचिद् विशेषता भवति, तदा सा विशेषता गुणरूपैव विद्यते। हेमचन्द्रेण यदोजः, प्रसादः, माधुर्यं, साम्यमौदार्यमेषां पंचानां गुणानां पाठधर्मत्वं प्रतिपादितम्[4] तन्न सुसमीचीनं प्रतिभाति, सर्वत्र रचनायां गुणानां स्थितिर्नैव भवति, अतो हेमचन्द्रात् प्राक् यद्वामनेनोक्तं तदेवयुक्तियुक्तम्।

वामनप्रतिपादितार्थगुणानां विवेचनम्–

आचार्यवामनेन ये शब्दगुणाः स्वीकृताः त एव ओजः प्रसादादयोऽर्थ गुणरूपेण प्रतिपादिताः[5] परं तेषां लक्षणेषु पार्थक्यं दृश्यते।

तत्रादौ ओजो यथा–

अभिधेयार्थस्य या प्रौढ़िः स एंव ओजो नाम अर्थगुणो वर्तते[6]। सेयं प्रौढिः वामनेन पंचविधा कथिताऽस्ति।[7]

1.पदार्थे वाक्यस्य प्रयोगोऽर्थात् एकस्मात् पदात् प्रतिपादनीयमर्थं प्रत्याययितुं वाक्यस्य रचना।

2. वाक्येन प्रतिपाद्यार्थंबोधयितुं पदस्य प्रयोगः।
3. अन्यप्रकारेणार्थस्य विस्तारः।
4. अन्यप्रकारेणार्थस्य संक्षेपः।

---

1. न भ्रान्ताः निष्क्रमत्वात् का०लं० सू० 3/1/27.
2. न पाठधर्माः सर्वत्रादृष्टेः। तत्रैव० 3/1/28.
3. विशेषापेक्षया विशेषाणां गुणत्वाद् गुणाभ्युपगम एवेति। तत्रैव 3/1/28 वृत्तौ।
4. हे०चं०का०शा० अ० 4, पृ० 240.
5. त एवार्थ गुणाः। का०लं०सू० 3/1/1.
6. अर्थस्य प्रौढिरोजः। तत्रैव० 3/2/2.
7. पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा।
प्रौढिर्व्याससमासौच साभिप्रायत्वमेव च।। का०लं० सू० 3/2/2 वृत्तौ
उक्तेः प्रौढपरिपाकः प्रोच्यते प्रौढिसंज्ञया। सं०क०भ० 1/77.

5. असाधारणोद्देश्यपूर्त्यर्थं साभिप्रायत्ववर्णनम्। अनेन प्रकारेण अर्थगुणौजोनिरूपणप्रसङ्गे वामनेन अर्थगत प्रौढ़ेः पंचभेदाः प्रतिपादिताः सन्ति।

भोजदेवेन प्रौढिगुणलक्षणे कथितमस्ति यद् वाक्यस्य गाम्भीर्यरूपेण या परिपक्वावस्था सा प्रौढिनाम्ना व्यवह्रियते।[1] हेमचन्द्रः अर्थगुणौजमपाकर्तुं प्रायतिष्ट, अर्थगता प्रौढिः केवल वैचित्र्यमात्रं तनोति वामनः साभिप्रायत्वमोजसो यन्निरूपणमकारि हेमचन्द्रेण तदपुष्टार्थत्वदोषः प्रतिपादितः[2]। एतन्मतं न सुसमीचीनं प्रतिभाति। मुख्यार्थस्यानुपकारित्वादपुष्टार्थत्वदोषप्रसङ्गः समायाति, परं साभिप्रायत्वं तु मुख्यार्थस्योपकारित्वादपुष्टार्थत्वदोषेण नैव दूषितो भवति। कामधेनुटीकायामपि साभिप्रायत्वस्य विपर्ययोऽपुष्टार्थत्वदोषः प्रतिपादितः।[3]

प्रसादः–

अर्थस्य या स्पष्टता सा अर्थगुणप्रसादगुणोपेता भवति।[4] अर्थस्य यद् वैमल्यं प्रयोजकपदमात्रेण भवति, तदेव प्रसादोऽर्थगुण इति वामनमतम्[5]। अर्थवैमल्यस्य तथा पंचमप्रौढ़ेः साभिप्रायत्वस्य परस्परं भेदो विद्यते यथा "सतिविगलिबन्धे केशहस्ते" इत्यादिपद्ये कृशाऽङ्गया इत्यत्र च अर्थस्य वैमल्यं तु विद्यते परं साभिप्रायत्वस्याभावो वर्तते, अनेनैव प्रकारेण "अबन्ध्यकोपस्य निहन्तुरापदाम्, इत्यादौ साभिप्रायत्वं तु वर्तते परमर्थवैमल्यस्याभावो वर्तते एवं साभिप्रायत्वस्यार्थवैमल्यस्य च भेदोऽस्ति।[6]

अस्य दण्डिकृतप्रसादगुणेन सह वामनप्रतिपादितार्थगुणप्रसादस्य साम्यं विद्यते, यद्यपि लक्षणे शब्दानामन्तरं वर्तते, परमर्थे तु साम्यमेव लक्ष्यते।[7] अभिनवगुप्तेन भरतप्रतिपादितप्रसादगुणस्य व्याख्यायां अर्थस्यवैमल्यमेव

---

1. इति या प्रौढिरोजस्तद्वैचित्र्यमात्रम्। हे०चं०का०शा०अ० 4 पृ० 234.
2. साभिप्रायत्वं चौजोऽपुष्टार्थत्वं दोषमात्रं न गुणः। तत्रैव०
3. अस्य च विपर्ययो व्यर्थमपुष्टार्थं च। अपुष्टार्थस्य दोषत्वं नापुष्टार्थत्वात्। का०लं०सू० 3/2 पृ० 105.
4. अर्थवैमल्यं प्रसादः। का०लं०सू० 3/2/3.
5. अर्थस्यवैमल्यं प्रयोजकमात्रपरिग्रहः प्रसादः। तत्रैव० 3/2/3 वृत्तौ
6. न च पंचमप्रौढिप्रसादयोः को भेद इति वाच्यम्। तयोः परस्परपरिहारेण दर्शनात्। यथा रतिविगलितबन्धे केशहस्ते इत्यादौ कृशाऽङ्गया इतिपाठे वैमल्येऽपि, न साभिप्रायत्वम् अबन्ध्यकोपस्य निहन्तुरापदा, इत्यादौ साभिप्रायत्वेऽपि नार्थ वैमल्यम्। तत्रैव० 3/2/3 कामधेनुटीकायाम्।
7. प्रसादवत् प्रसिद्धार्थमिन्दोरिन्दीवरद्युतिः। का०द० 41/45.

प्रसादगुणस्यस्थितिः स्वीकृता। यथा धूलिकणैरसंपर्काज्जलं वैमल्यशब्दवाच्यं तथैवानुपयोगिपरिवर्जनादर्थवैमल्यं प्रसादो भवति।[1]

श्लेषः–

वामनमते घटना श्लेषार्थगुणो वर्तते[2]। क्रमःकौटिल्यंअनुल्वणत्वंउपपत्तिभिः, एभिश्चतुर्भिर्योगैरेव घटना इत्याख्यायते[3] सा घटना श्लेषार्थगुणो वर्तते। बहूनां क्रियाणां क्रमः (संततिः) क्रमशब्देनोच्यते। वैदग्ध्यपूर्णचमत्कृतिः कौटिल्यशब्देनाभिधीयते। प्रतीयते यदैतत् कौटिल्यं वक्रोक्ति अलंकारादभिन्नं वर्तते। कुन्तकेन वैदग्ध्यपूर्णं यत् कथनं तदेव वक्रोक्तिर्भवति इत्यभिहितम्।[4] रत्नेश्वरेण घटना विषये अङ्कितं यद् यस्य वाक्यस्यार्थोऽघटितोवर्तते, तस्य वाक्यार्थस्य बुद्धिचातुर्येनघटनं घटना इत्युच्यते।[5] हेमचन्द्रेण वामनोक्तार्थ श्लेषो वैचित्र्यमात्र एव प्रतिपादितः।[6]

समताः–

अवैषम्यं समतानामार्थगुणः,[7] अर्थात् प्रक्रमस्याभेद एव समता[8]। अनेन लक्षणेन एतत्प्रतीयते यदयंगुणः प्रक्रमभङ्गदोषाभाव एव वर्तते। "कामधेनुटीकायाम्" प्रक्रमस्याभेदेसति समता गुणः स्वीकृतः।[9] वामनानन्तरं भोजराजेन समतागुणस्य वामनवल्लक्षणं कृतम्।[10] अर्थगुणसमताया द्वितीय लक्षणे वामनेन कथितम् यत् सुगमत्वमेव–

---

1. यत्रार्थे अनुक्तेऽपि वुधैः कष्टकल्पनया अव्याख्यातस्याऽप्यर्थस्य प्रयोजनं स्वयंभासते सोऽर्थो वैमल्याश्रयोऽपि वैमल्यमुपचारात् सोऽर्थोवाकाव्यस्य वैमल्यं स्वयं जानंश्चानुपयोगि परिवर्जनात्। वैमल्यशब्दवाच्याज्जलस्यैव पांसुभिर-संपर्कादि्भवतीति वैमल्यंमर्थस्य प्रसादः। ना०शा०अभि०गा० 16/99.
2. घटना श्लेषः। का०लं०सू० 3/2/4.
3. क्रमकौटिल्यानुल्वणत्वोपपत्तियोगो घटना। स श्लेषः। तत्रैव० 3/2/4 वृत्तौ।
4. वक्रोक्तिरेव वैदग्धय भङ्गीभणिति रुच्यते। व०जी० 1/10.
5. कौटिल्यमुक्तमघटमानास्येव वाक्यार्थस्य वृद्धिचातुर्येण घटनेति वाक्यार्थः। स०कं०रत्नेश्वर टीकायाम् 11/78 पृ० 112.
6. संविधानकभवं वैचित्र्यमात्रमिदं न गुणः। हे०चं०का०शा० अ० 4, पृ० 235.
7. अवैषम्यं समता। का०लं०सू० 3/2/5.
8. अवैषम्यं प्रक्रमाभेदः समता। तत्रैव० वृत्तौ।
9. अवैषम्यं प्रक्रमा भेद इति। प्रक्रमस्याभेदो भेदाभावः तत्रैव० कामधेनुटीकायाम्।
10. अवैषम्यंक्रमवतां समत्वमिति कीर्तितम्। सा०कं०भ० 1/79.

अवैषम्योऽस्ति। यत्र सुगमतया अर्थावगतिः स्यात् स समता, अर्थ गुणः।[1] समतागुणस्य प्रथमलक्षणं अपक्रमदोषवैपरीत्ये स्वीकृतम्। द्वितीयलक्षणं क्लिष्टत्व दोषाभाव एव वर्तते।[2] वामनस्याभिप्रायानुसारं यत्र रचनायां साम्यंस्यात् तत् साम्यं सुखेन यदि प्रतीयेत् तत्र समताख्यो गुणो भवति।

समाधिः—

अर्थस्यदृष्टिः समाधिगुणोपेता भवति[3]। अस्यगुणस्य विषये वामनेन स्वमतं इत्थं प्रकटितमस्ति। अर्थस्य दर्शनमेव अर्थदृष्टिर्विद्यते।[4] एकाग्रचेतसैवार्थदर्शनं भवति यथा योगिनः एकाग्रचेतसा समाधौतल्लीनो भूत्वा ईश्वरस्य प्रत्यक्ष दर्शनं कृत्वा आनन्दमनुभवन्ति अस्मादेव कारणात् समाधीयते अस्मिन्निति समाधि इत्युच्यते अनेनैवप्रकारेण चित्तस्यैकाग्रतादशायांअर्थदर्शनं भवति स एव वामनमते समाधि अर्थगुणः।

यस्यार्थस्य दर्शनं समाधिगुणे भवति सोऽर्थोऽयोनिः, अन्यच्छाया योनि रूपेण द्विविधो विद्यते। अयोनिरर्थे अन्यकविरचिताया, रचनायाः प्रभावो न भवति अपितु चित्ताऽवधानेनैव स योनिरूपोऽर्थो निष्पद्यते। अन्यच्छायायो-निरुपेऽर्थेऽन्यकाव्यस्य छायाभवति अन्यकविभिः प्रतिपादित अर्थाधारेणयोऽर्थः प्रकाशितः सोऽर्थो अन्यच्छायायोनिरूपो विद्यते[5]।

यस्यार्थस्यदर्शनं समाधिगुणो विद्यते सोऽर्थोऽपि व्यक्तसूक्ष्मभेदेन द्विविधः[6]। सूक्ष्मार्थस्याऽपि भाव्यवासनीयभेदेन द्वैविध्यम्[7]। शीघ्रनिरूपणेन योऽर्थो ज्ञायते सोऽर्थो भाव्यः, चेतस एकाग्रतादशायां, ध्यानेन, अवधानेनवा योऽर्थो ज्ञायते—असौ वासनीयोऽर्थो भवति[8]। अस्य अर्थगुणसमाधिगुणस्य विषये वामनेन यत् स्वीयं मतं समुपन्यस्तम् तादृशं मतं पूर्ववर्ती आचार्यैर्न प्रकटितम्, यद्यपि अस्यगुणस्य

---

1. सुगमत्वंवाऽवैषम्यमिति। का०लं०सू० 3/2/6.
2. अस्य विपर्ययः क्रमादपक्रमं, क्लिष्टत्वंच। तत्रैव० कामधेनुटीकायाम्।
3. अर्थदृष्टिः समाधिः तत्रैव० 3/2/7.
4. अर्थस्य दर्शनं दृष्टिः। समाधिकारणत्वात् समाधिः। तत्रैव
5. अर्थोद्विविधोऽयोनिरन्यच्छायायोनिर्वा। तत्रैव० 3/2/8.
6. अर्थोव्यक्तः सूक्ष्मश्च। का०लं०सू० 3/2/9.
7. सूक्ष्मो भाव्यो वासनीयश्च। का०लं०सं० 3/2/10.
8. भावकानामवधानमात्रेण विमर्शो विभावना। तद्योन्यो भाव्यः। सहृदयसद्व्यवहार-समुल्लसित संस्कारसम्पन्नो योऽवधानप्रकर्षस्तेन गम्यो वासनीयः। तत्रैव० 3/2/10 वृत्तौ।

वैशिष्टयं दण्डिना प्रतिपादितमासीत् यदयं गुणः काव्यस्य सर्वस्वं वर्तते।[1]। वामनानन्तरं पण्डितेन्द्रजगन्नाथेन समाधि गुणः काव्ये अथवा रचनायां न स्वीकृतः अपितु कविगतं काव्यस्य कारणं स्वीकृतम्।[2] दर्शनशास्त्रे जीवात्म परमात्मनोरैक्यं समाधि शब्देनोच्यते तत्रापि परमात्मरूपार्थस्य समाधानं सम्यग्ध्यानयोगेन एकीभावः सम्भवति द्वयोः शब्दयोरर्थस्यसमाधानेन जीवात्मनः समाधानेनचातीव सामीप्यं दरीदृश्यते तेन अत्रापि अर्थगुणे समाधिशब्दः चरितार्थोऽभवत्।[3] यथा समतावस्थायां जीवात्मनोऽवस्थितिर्ब्रह्मणि सम्भवेत् एकाग्रचेतसाचार्थदर्शनं जायेत् इदं द्वयमपि समाधिशब्देन निगद्यते।

माधुर्यम्—

यदुक्तेर्वैचित्र्यं स माधुर्यमर्थगुणः।[4] वर्ण्यमानविषयस्योत्कर्षप्रतिपादनार्थं भङ्‌यन्तरेणयत् कथनं तदुक्तिवैचित्र्यात्मकमर्थमाधुर्यं भवति[5]। अभिनवगुप्तेन अर्थगतमाधुर्यगुणस्य व्याख्यायां कथितमस्ति यद् बहुवारं कथितस्यार्थस्यावगाहने कृतेसति येन वैरस्यं दूरीभवति तद्वचनगत वैचित्र्यस्वरूपं माधुर्यं वर्तते।[6] दण्डिना रसवद्वाक्यंमाधुर्यगुणयुक्तंप्रतिपादितमासीत्,[7] रसेनैव वाक्ये वैचित्र्यं जायते, रसयुक्तं वाक्यं पौनः पुण्येन श्रुत्वा सहृदया नोद्वेजयन्ति तेन प्रतीयते यद्रसात्मकवैचित्र्यमादाय वामनेन उक्तेर्यद्वैचित्र्यं तदेवमाधुर्यमिति कथितम्। वामनानन्तरं पण्डितराज जगन्नाथो माधुर्यगुणलक्षणे साक्षात् 'वैचित्र्यशब्दं प्रयुयोज।[8]

---

1. का०द० 1/100.
2. अवर्णित पूर्वोऽयमर्थः पूर्ववर्णितच्छायोवेतिकवेरालोचनं समाधिः। समाधिस्तु कविगतः काव्यस्य कारणं नतुगुणः, प्रतिभाया अपि काव्यगुणत्वापत्तेः। रसगङ्‌गाधरः प्रथमानन पृ० 250-254.
3. समाधिसमतावस्था जीवात्मपरमात्मनोः।
ब्रह्मण्येव स्थितिर्या सा समाधिःप्रत्यगात्मनः।। पा०यो०द० पृ० 675.
4. उक्तिवैचित्र्यं माधुर्यम्। का०लं०सू० 3/2/11.
5. वर्ण्यमानस्यार्थस्य प्रकर्षप्रतिपाद्ये भङ्‌गयन्तरेणोक्तिरुक्तिवैचित्र्यम्। तत्रैव० 3/2/11 कामधेनुटीकायाम्।
6. पुनः पुनरप्युक्तमर्थजातं यस्माद्धेतोरपनीतमवगाहनेन वैरस्यं तद्ववचन वैचित्र्यात्मकं माधुर्यमर्थगुणः वचनान्तराभिधेयतया हि स एवार्थो विचित्रो भवति। ना०शा०अभि०भा० 16/104 व्याख्यायाम्।
7. मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः। का०द० 1/51.
8. एकस्या एवोक्तेर्भङ्‌यन्तरेण पुनः कथनात्मकमुक्ति वैचित्र्यं माधुर्यम् रसगङ्‌गाधरः। प्रथम आननम् पृ० 244.

सौकुमार्यम्—

वामनमते पारुष्यस्य अभाव एव—सौकुमार्यनामार्थगुणः[1] अर्थादमङ्गलातङ्कदायी वर्ण्यमानार्थे यदपारुष्यं तदेव सौकुमार्याख्यगुणोपेतं भवति[2]। यथा—असौमृत—इति पारुष्य शब्द स्थाने यशः शेष इति पारूष्याभाव युक्तस्य शब्दस्य प्रयोगः, "एकाकी" इत्यर्थं प्रत्याययितुं देवताद्वितीयः इति शब्दस्य प्रयोगः, परमात्मा एव सहायको यस्य अस्यवाक्यप्रयोगः, अथवा गच्छ इति परूषार्थं बोधयितुं स्वकीयं कार्य साधय[3], इत्यादयः प्रयोगाः पारूष्यरहिताः सौकुमार्यगुणोपेता भवन्ति। गुणोऽयं श्रुतिकटुत्वदोषाभावेऽपि स्वीकर्तुं शक्यते। परं यदत्र अमङ्गलसूचकातङ्कदायिनां अर्थानां यदपारूष्यमभिहितम् तत्तु अश्लीलत्वदोषाभावे एव भवितुं पार्यते। अतोऽस्य गुणस्य विपर्ययोऽश्लीलत्व दोष एव।[4] वास्तविकरूपेण भरतदण्डिनोः सौकुमार्यगुणेन सह वामनोक्त सुकुमारतागुणस्य साम्यं विद्यते केनचिद्दंशेनैव तत्र भेदः कर्तुं शक्यते। भरतेन सुकुमारतालक्षणे सुखेन प्रयोगयोग्यानां शब्दानां अथवा सुकुमारार्थयुक्तानां शब्दानां प्रयोगेण सौकुमार्यगुणः कथितः[5]। अभिनवगुप्तेनाप्यस्य गुणस्य व्याख्यायां व्याख्यातं यत् पदार्थाः घरूषाअपिस्युः परं सुकुमारतया निरूपणीयेनार्थेन या सम्पत्तिस्तदेवार्थगुणोऽपारूष्यरूपा सुकुमारता।[6]

आचार्यदण्डिना अनिष्ठुराक्षरैः श्रुतिकटुत्वदोषाभावेनास्य गुणस्य सत्ता स्वीकृता विद्यते।[7] हेमचन्द्रेण अमङ्गलरूपाश्लीलत्वदोषाभाव एव सुकुमारता प्रतिपादिता नतु गुणः अपितु पर्यायोक्त्यालंकारान्तर्गतएव सुकुमारतागुणस्य स्थितिर्विद्यते। यतोहि पर्यायोक्त्यलंकारे प्रकारान्तरेण व्यङ्यार्थ एव अभिधीयते।[8]

---

1. अपारुष्यं सौकुमार्यम्। का०लं०सू० 3/2/13.
2. परुषे अमङ्गलातङ्कदायिन्यर्थे वर्णनीये यदपारुष्यं तत् सौकुमार्यमिति लक्षणार्थः। का०लं०सू० 3/2/12 कामधेनुटीकायाम्।
3. यथा मृतं, यशः शेषमित्याहुः। एकाकिनं देवताद्वितीयमिति। गच्छेति साधयेति। का०लं० सू० 3/2/12 वृत्तौ।
4. अस्य गुणस्य विपर्ययोऽश्लीलत्वम् तत्रैव० 3/2/12 का०धे०टी०।
5. ना०शा० 16/107.
6. तत्रैव० अभिनवभारत्याम्।
7. अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते। का०द० 1/69.
8. सोऽयममङ्गलरूपाश्लीलत्वादोषाभावो न गुणः। यदि वा उक्ति विशेषः पर्यायोक्तालङ्कार विषय एवासौ। हे०चं०का०शा० अ० 4, पृ० 236.

उदारताः—

ग्राम्यत्वदोषाभावे—उदारतानामार्थगुणो वामनाभिप्रेतः।[1] ग्राम्यत्वप्रसंगेऽपि ग्राम्यत्वाभाव एव अग्राम्यत्वमुदारतोच्यते।[2] ग्राम्यार्थे वक्तव्ये तत्र यदौचित्येन प्रतिपादनं भवति सोदारता वर्तते।[3] नायंगुणो भरतप्रतिपादितोदारतागुणात् तथा दण्डेरूदारतालक्षणात् प्रभावितः।

हेमचन्द्रेणापि उदारतागुणः दोषाऽभाव एव प्रतिबोधितः।[4] आचार्यवामनानुसारं अस्योदारता गुणस्यायमभिप्रायो यद् ग्राम्यार्थोऽसभ्यार्थोभवति। अतोऽस्य ग्राम्यार्थप्रतिपादनेऽपि यत्रानुकूल्यं राजते तत्रैवौदार्यगुणो भवति।

अर्थव्यक्तिः—

वस्तुनः स्वभावस्य वा स्फुटता सोऽर्थव्यक्तिर्गुणो भवति।[5] वर्ण्यमान वस्तूनां स्वभावस्य या स्फुटता सा अर्थव्यक्तिगुणोपेता वर्तते।[6] आचार्य वामनस्यार्थव्यक्तिगुणः प्रत्यक्षरूपेण नैव परमप्रत्यक्षरूपेण दण्डीकृतअर्थव्यक्तिगुणान्न भिद्यते। यतोहि वामनेन वस्तुस्वभावस्फुटत्त्वमर्थव्यक्तिगुणे प्रतिपादितम्। वामनात् प्राक् दण्डिनार्थस्य यदनेयत्वं सोऽर्थव्यक्तिगुणः इति प्रतिपादितम्। अर्थस्य अनेयत्वं तदैव भवति यदा किमपिवस्तु यादृशंस्यात् तस्य तथैव कथनं स्यात् नोचेत् नेयार्थत्वदोषस्य सद्भावोभवति। नेयार्थत्वदोषे तु न्यायपरिहारंकृत्वा कविः स्वेच्छया कल्पितार्थस्याभिधानं करोति। यदि स्वेच्छयाऽर्थस्य कल्पना नकृता स्यात् तदा न्यायस्यापरिहारात् वस्तुस्वभावस्फुटतैव भवति, सा स्फुटता वामनमते अर्थव्यक्तिगुणो वर्तते।

कान्तिः—

आचार्यवामनेन यत्र रचनायां रसानां दीप्तिर्भवति तत्र कान्तिनामार्थगुणः स्वीकृतः[7]। शृंगारादयो रसा दीप्ताः सन्ति यस्यां रचनायां, स दीप्तरसउच्यते,

---

1. अग्राम्यत्वमुदारता। का०लं०सू० 3/2/13.
2. ग्राम्यत्वप्रसंगे अग्राम्यत्वमुदारता। 3/2/13 वृत्तौ।
3. अत्र कन्ये ! कामयमानं कान्तं कामयस्वेति वक्तव्ये ग्राम्यार्थे यदौचित्येन प्रतिपादनं सोदारता। तत्रैव०
4. काव्यानुशासनम् अ० 4, पृ० 238.
5. वस्तुस्वभाव स्फुटत्वमर्थव्यक्ति। का०लं०सू० 3/2/13.
6. वस्तूनां भावानां स्वभावस्य स्फुटत्वं यदसावर्थव्यक्तिः। तत्रैव० वृत्तौ।
7. दीप्तरसत्वं कान्तिः। का०लं०सू० 3/2/15.

तस्य दीप्तरसस्यभावः कान्तिगुणो वर्तते।[1] अनेनप्रकारेण आचार्यवामनः कान्तिगुणस्यातीव वैलक्षयण्यं प्रतिपादितवान्। रसस्य–पृथग् लक्षणं वामनः न चकार परं कान्तिगुणेरसस्यानिवार्यत्वं स्वीकृत्य रसमनुमुमुदे। आचार्य दण्डीकृतमाधुर्यगुणे,[2] तथा वामनप्रतिपादितकान्तिनामार्थगुणे उभयत्र-रसस्यास्तित्वं दृश्यते।

भामहेन रसस्यास्तित्वं रसवदाद्यलंकारेषु स्वीकृतम्,[3] तदनन्तरं दण्डिनापि रत्यादिभिस्स्थायिभावैर्यद्रमणीयकमाख्यानं भवति स रसवदालंकारो भवतीति कथितम्।[4] माधुर्यगुणस्य लक्षणेऽपि रसवद्वाक्यं मधुरं भवतीति निगदितम्। रसस्य माधुर्यगुणस्य च पृथगस्तित्वं विद्यते। यतोहि गुणः रसमुपकरोति अतो रसस्वरूप एव माधुर्यगुण इति, कथं प्रतिपादितम् अस्य समाधानाय, दण्डिना एवं कथितमस्ति "यदा शब्दे, अर्थे, चोभयत्र व्यञ्जकतया रसो भवति तदा रसव्यञ्जकार्थशालित्वएव माधुर्यगुणस्यलक्षणं विद्यते।[5] तदनन्तरं वामनेन दीप्तरसत्वं कान्तिगुणो वर्तते इत्यभिहितम्। शृंगारादयो सर्वेरसा दीप्ताः सन्ति तैरेव रचनायां उत्कर्षो भवति तदेव कान्तिनाम। अर्थगुणः। हेमचन्द्रो वामनोक्तकान्तिगुणं खण्डयितुं प्रयतितवान् परं तस्य पक्षो न क्षोदक्षमः[6]। अर्थगुणनिरूपनानन्तरं वामनो गुणानामावश्यकत्वं एवं स्वीचकार गुणानां स्पष्टत्वं परिपूर्णत्वं काव्यपाक इत्युच्यते अयंकाव्यपाक आम्रपाकेनोप- मिताः।[7]

यस्यां रचनायां सुपतिङ्संस्कारसारं विद्यते तत्र वस्तुगुणः क्लिष्टत्वं भजते सः काव्यपाकः वृन्ताकपाक इत्युच्यते यस्मात् कवयः जुगुप्सन्ते।[8]

---

1. दीप्तारसाः शृंगारादयोयस्य स दीप्तरसः। तस्य भावो दीप्तरसत्वं कान्तिः। तत्रैव० वृत्तौ पृ० 116.
2. मधुरं रसवद्वाचिवस्तुन्यपि रसस्थितिः। का०अं० 1/51.
3. रसवद्दर्शित स्पृष्ट शृंगारादि रसं यथा। भामह०का०लं० 3/6.
4. रसवद्रसपेशलम् का०द० 2/275.
5. का०द० 1/51.
   वाचि शब्दे वस्तुनि–अर्थेवापि रसस्थितिः व्यञ्जकतयासम्बन्धः तेन वाक्यस्य रस व्यञ्जकवर्ण रचनाशालित्वं, रसव्यञ्जकार्थयुक्तत्वं वा माधुर्यमिति सिद्धम्। तत्रैव० 1/51 कामधेनुटीकायाम्।
6. हे०चं० का०शा० अ० 4, पृ० 240.
7. *गुणस्फुटत्व साकल्यं काव्यपाकं प्रचक्षते।*
   चूतस्यपरिणामेन स चाऽयमुपमीयते।। का०लं०सू० 3/2/15.
8. सुप्तिङ्संस्कारसारं यत् क्लिष्टवस्तु गुणं भवेत्।
   काव्यं वृन्ताकपाकं स्याज्जुगुप्सन्ते जनास्ततः।। तत्रैव०

यस्मिनकाव्ये दशशब्दार्थगुणनां अभावो भवति, सा दशगुणविरहशून्या रचना निरर्थका भवति एवंविधा वाणी विचारयोग्या न भवति।[1] एवञ्चायमत्र निष्कर्षः—

1. आचार्यवामनेन सर्वप्रथमं गुणानां शब्दार्थयोवर्गद्वये विभाजनं कृतम्।
2. परस्पर विरोधिनोरोजःप्रसादयोर्द्वयोर्गुणयोः परस्परमवस्थितिः प्रदर्शिता।
3. अर्थगुणओजोगुणस्यलक्षणावसरे अर्थस्यप्रौढि एव ओजोगुणस्य लक्षणं प्रतिपादितम्ः एवं च प्रौढेः पंचभेदाः सर्वप्रथमं प्रदर्शिताः।
4. श्लेषगुणः क्रमः कौटिल्यम्, अनुल्वणत्वउपपत्ति रूपेण स्वीकृतः।
5. अयोनिअन्यच्छायायोनिरूपेणसमाधिः गुणः स्वीकृतः। एवं च यस्यार्थस्य-दर्शनं समाधिः सोऽर्थोव्यक्तसूक्ष्मरूपेण द्विविधः प्रतिपादितः सूक्ष्मार्थस्यापि भाव्यवासनीय भेदेन द्वैविध्यं प्रतिपादितम्।
6. माधुर्यउदारताकान्तिगुणानां निरूपणे स्वातन्त्र्यरूपेण नवीनोद्‌भावना प्रकटिता।

आनन्दवर्धनमते गुणस्वरूपम्—

अंगीभूतरसस्याश्रया गुणा, येऽङ्गभूतशब्दार्थावाधितिष्ठन्ति ते कटक कुण्डलादिवत्—अलंकारा[2] भवन्ति। गुणस्वरूपनिरूपणे अनेन गुणा रसाश्रया-भवन्ति अलंकाराः शब्दार्थावाश्रित्यतिष्ठन्तीत्युक्त्वागुणालंकारयोर्भेदः प्रतिपादितः। यथा शूरतावीरतादयादाक्षिण्यादयोगुणाः शरीरान्तर्भूत आत्मनि विद्यमानाः तमुत्कर्षयन्ति, तथैव माधुर्यओजप्रसादाः प्राधान्येन अंगीभूते रसे विद्यमाना रसस्यैवोत्कर्षवर्धयन्ति।[3] आनन्दवर्धनेन भरतदण्डीवामनप्रमुखानां स्व पूर्ववर्त्याचार्याणां गुणस्वरूपनिर्धारणे संख्याने च एकस्याप्याचार्यस्य प्रत्यक्षरूपेण गुणविषयिनी धारणा न स्वीकृता। गुणलक्षणनिर्धारणे तु सर्वेभ्यो भिन्नत्वमंगी-कृतम्।

---

1. *गुणानां दशतामुक्तो यस्यार्थस्तदपार्थकम्।*
   दाडिमानि दशेत्यादि न विचारक्षमं वचः।। तत्रैव०
2. तमर्थमवलम्बन्तेयेऽङ्गिनं ते गुणाः स्मृताः।
   अंगाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत्।। ध्व०लो० 2/29.
3. ये तमर्थं रसादिलक्षणमङ्गिनं सन्तमवलम्बन्ते, ते गुणाः शौर्यादिवत् वाच्य वाचक लक्षणान्यङ्गनि ये पुनराश्रिताः, तेऽलंकारामन्तव्याः कटकादिवत्। 2/29 वृत्तौ पृ० 115.

गुणस्वरूपविषये एतदपि सम्भाव्यते यदानन्दवर्धनेन गुणलक्षणे (अंगीभूत-रसस्यधर्माः गुणा वर्तन्ते) एषा धारणा अंशतो नाट्यशास्त्रादेव गृहीता स्यात्। यतोहि भरतमुनिना–नाट्यशास्त्रे दशगुणानां निरूपणानन्तरं प्रतिपादितं यद्दोषगुणालंकाराः मया कथिताः सम्प्रति एषां रससंश्रयात्मक प्रयोगं-कथयिष्यामि[1]। पूर्ववर्तिषु गुणनिरूपकेष्वाचार्येषु–एकैवाचार्योभामहो विद्यते येन त्रयाणांगुणानां निरूपणं कृतम्, परं भामहेन यथा त्रयाणां गुणानां स्वरूपं प्रदर्शितम् न तथा आनन्दवर्धनेन। भामहेन माधुर्यगुणलक्षणे सामासाभावः स्वीकृतः[2], आजोगुणलक्षणे बहूनांपदानां समस्तता प्रतिपादिता,[3] प्रसादगुणेऽनति-समस्तपदानां प्रयोगाय- निर्देशः[4] कृतः। परं आनन्दवर्धनेन द्रुतिदीप्त्यादिरूपेण गुणानां स्वरूपं प्रतिपादितम्।

आचार्यवामनेन रीतिरेवकाव्यस्यात्मा[5] इत्युक्त्वा रीतेर्महत्वमंगीकृत्य रीतेराश्रिता गुणाः प्रतिबोधिताः। संघटनाश्रितागुणाः अस्यमतस्य खण्डनं विधाय गुणाश्रिता संघटना इत्युक्त्वा गुणानामत्यन्तंमहत्वं स्वीकृतमानन्द[6] वर्धनेन। वामनेनापि विशिष्टानांपदानांरचना रीतिर्भवतीत्यत्र वैशिष्टयं प्रतिपादयता, विशेषस्तु गुणात्मकतैव प्रतिपादिता।[7]

रचनायां रीतौ वा यदात्मकता भवति स एव गुणशब्देनोच्यते। परं आनन्दर्धनः स्पष्टरूपेण रीतेराश्रयत्वं विच्छिद्य, रीतेर्गुणाश्रयत्वं निरूपयामास। गुणनिरूपकः प्रथमाचार्यो भामहएव वर्तते परं गुणानां रसधर्मत्वं सर्व प्राथम्येन आनन्दवर्धनेन स्वीकृतम्। मतमिदमानन्दवर्धनानन्तरं सर्वमान्यमवर्तत। दण्डी–प्रतिपादितमाधुर्यगुणस्य, वामनोक्तकान्तिगुणस्य च प्रभावो ध्वन्यालोके रसस्वरूपनिर्धारणे वर्तते इति अन्यथा कर्तुं न शक्यते।

माधुर्यम्–

गुणानां रसधर्मत्वे आनन्दवर्धनो माधुर्यलक्षणं व्याहरन् शृंगार एव सर्वेषां

---

1. एवमेते ह्यलङ्कारा गुणोदोषाश्च कीर्तिताः।
   प्रयोगमेषांच वक्ष्यामि रससंश्रयम्।। ना०शा० 16/114.
2. भामहकाव्यालंकार 2/1.
3. तत्रैव० 2/2.
4. तत्रैव० 2/3.
5. रीतिरात्माकाव्यस्य – का०लं०सू० 2/6.
6. गुणानाश्रित्यतिष्ठन्ती माधुर्यादीन्व्यनक्तिसा। रसान्, ध्व०लो० 3/62.
7. का०लं०सू० 2/8.

रसानामपेक्षयाऽत्यधिकाह्लादजनकत्वान्मधुर इत्युच्यते (मधुर रस इत्युच्यते) शृंगारान्वितं रसमयं काव्यमाश्रित्य माधुर्यगुणस्तिष्ठति।[1] अह्लादजनकत्वाच्छृंगारोरसएव माधुर्यगुणयुक्तः प्रतीयते। परं शृंगारप्रधानं शब्दार्थयुक्तशरीरं यस्य, तच्छब्दार्थयुक्तंशरीरं यस्य, तच्छब्दार्थयुक्तं काव्यं स्वाश्रयाभिव्यंजकत्वरूप परम्परयासम्बन्धेन माधुर्यगुणवदिति कथ्यते।[2] अन्येषांरसानामपेक्षया रतिःस्थायिभावविशिष्टः शृंगाररस एव आपामरकीटपर्यन्ते अतिशयरूपेण आनन्दजनकत्वात् चित्तस्य द्रवीभावं करोति। अतएव शृंगारः साक्षान्माधुर्यगुणयुक्तः प्रतीयते, शृंगार रसस्याभिव्यंजकशब्दार्थयुक्ते काव्ये–उपचारेणैव माधुर्यगुणस्य व्यवहारोभवति।[3]

माधुर्यगुणलक्षणे परः प्रह्लादनः इति शब्दस्य अभिनवगुप्तमते एवमर्थोनिष्पद्यते, सम्पूर्णतिर्यक्देवमनुष्यादयो यावत्यो जातयोऽस्मिन् संसारे वर्तमानास्सन्ति तासु समग्रजातिषु अविच्छिन्नरूपेण वासना रतौभवति, एषारतिरूपावासना वीतरागाणांहृदयेष्वपि स्वचमत्कारमाविर्भावयति, तेन शृंगाररसः मधुरो भवतीत्यभिहितम् प्रकारान्तेण, यथा ज्ञानवतः, ज्ञानशून्यस्य स्वस्थस्याथवा अस्वस्थस्य जिह्वायां शर्करादयोरसाः स्वात्मानं मधुररसंप्रति प्रत्येकमाकर्षयन्ति।[4] अतएव रतिस्थायिभावोविद्यते यस्य एवंविधः शृंगाररसो मधुरो जायते। माधुर्यगुणलक्षणे तन्मयंकाव्यमाश्रित्य माधुर्यगुणः शृंगारादिरसानामेवोपचारेण मधुररसाभिव्यंजकयोः शब्दार्थयोः कृतेऽपि "माधुर्यगुण" इत्यस्य शब्दस्य व्यवहारो भवति। शब्दार्थयोर्मधुरशृंगारादि रसानामभिव्यक्तेः

---

1. शृंगार एव मधुरः परः प्रह्लादनो रसः।
   तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति।। ध्व०लो० 2/30.
2. शृंगार एव रसान्तरापेक्षया मधुरः प्रह्लादहेतुत्वात्–प्रकाशनपरः। शब्दार्थतया काव्यस्य स माधुर्य लक्षणो गुणः।। तत्रैव० द्वितीय उ० पृ० 116.
3. रतेरापामरमाकीटंच प्रमोदातिशयमयत्वं प्रसिद्धेस्तत्सारस्य शृंगारस्य सुतरां तत्वमिति माधुर्यनामागुणो यद्यपि सक्षात्तत्रैव तिष्ठति, तथाऽपि शृंगार व्यंजकशब्दार्थयोरप्युपचारेण प्रतितिष्ठितो भवतीति व्यंजकत्त्वेन गुणवत्ता शब्दार्थयोर्वर्तत एव। तत्रैव० 2/30.
4. रतौहि समस्तदेवतिर्यङ्नरादि जातिष्वविच्छिन्नैव वासनास्त इति न कश्चित्तत्र तादृन्यो न हृदयसंवादमयः। रतेरपि चमत्कारोऽरत्येव। अतएव मधुर इत्युक्तम्। मधुरोहि शर्करादिरसो विवेकिनोऽविवेकिनोवा, स्वस्थस्यातुरस्य वा झटिति रसना निपतितस्तावदभिलपणीय एव भवति। ध्वन्योक लोचन, पृ० 452.

सामर्थ्य एव माधुर्यनाम्ना अभिधीयते ।[1]

अस्य गुणस्य स्थितिर्विप्रलम्भश्रृंगारे करूणरसे च उत्तरोत्तरमाधिक्ये भवति, कारणमेतदेव-विद्यते यत् क्रमेण विप्रलम्भश्रृंगारेकरुणे च मनोऽधिकमार्द्रतां प्राप्नोति ।[2] माधुर्यस्य स्थितिविषये अभिनवगुप्तस्य कथनं वर्तते यत् सम्भोग-श्रृंगारापेक्षया विप्रलम्भश्रृंगारः ततोप्यधिकः करूणरस आर्द्रतांयाति अर्थात् सहृदयस्य चेतः आर्द्रतादशायां स्वाभाविककाठिन्यं क्रोधादुत्पन्नं दीप्तत्वं, विस्मयहासादुत्पन्नं रागत्वं परित्यजतिसति अधिकमार्द्रं भवति, करुणावस्थायांतु मनो अधिकमुत्तरोत्तरक्रमेणार्द्रतां याति[3]। यदि करुणरसेऽपि मनसआर्द्रता भवति तत्रापि माधुर्यं विद्यते तदा किमर्थं आनन्दवर्धनेन श्रृंगार एव मधुर इत्यत्र एवकारेण केवलं श्रृंगार रसएव माधुर्यमभिहितम् एवकार कथनेन रसान्तरस्य व्चवच्छेदो न भवति। अर्थात् करुणरसे माधुर्यस्य निषेधो न विद्यते। अपितु आत्मभूतस्यरसस्यैव माधुर्यादयोगुणा भवन्ति उपचारेण शब्दर्थयो-धर्मा भवन्ति एतदेव एवकारेण प्रकाश्यत इति अभिनवगुप्ताशयः[4]। पूर्ववर्त्याचार्येभ्यो ध्वनिकारेण अत्यन्तं वैलक्ष्यण्यं प्रकटितम् अस्य माधुर्यस्य गुण लक्षणे दण्डिनोमाधुर्यगुणस्य प्रभावः समालोक्यते।

आचार्यभामहेन माधुर्यगुणलक्षणे श्रव्यत्वं, अनतिसमस्तत्वं व्याहृतमासीत् ।[5] तस्य खण्डनं कुर्वता आनन्दवर्धनेन कथितं यत् श्रव्यत्वं दीर्घसमासाभावत्वं च ओजोगुणेऽपि संलक्ष्यते ।[6]

---

1. वस्तुतो माधुर्यं नाम श्रृंगारादे रसस्यैव गुणः। तन्मधुर रसाभिव्यंजकयोः शब्दार्थयोरूपचरितं, मधुरश्रृंगार रसाभिव्यक्ति समर्थता शब्दार्थयोर्माधुर्यमिति लक्षणम्। तत्रैव० पृ० 453.
2. श्रृंगारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्।
   माधुर्यमार्द्रतांयाति यतस्तत्राधिकंमनः।। ध्वं०लो० 2/31.
3. सम्भोग श्रृंगारान्मधुरतरोविप्रलम्भः ततोऽपि मधुरतमः करुण इति तदभिव्यंजनकौशलं शब्दार्थयोर्मधुरतरत्वं मधुरतमत्वं चेत्यभिप्रायेणाह श्रृंगार इत्यादि। आर्द्रतमिति। सहृदयस्य चेतः स्वाभाविक मनाविष्टत्वात्मक काठिन्यं क्रोधादि दीप्तत्वरूपं विस्मय हासादि रागित्वंच त्यजतीत्यर्थः। तत्रैव० पृ० 454-455.
4. ननु करुणेऽपि यदि मधुरिमास्ति तर्हि पूर्वकारिकायां श्रृंगार एवेत्येवकारः किमर्थः। उच्यते, नानेन रसान्तरं व्यवच्छिद्यते, अपित्वात्मभूतस्य रसस्यैव परमार्थतो गुणा माधुर्यादयः उपचारेणतु शब्दार्थयोरित्येवकारेणद्योत्यते। तत्रैव० लोचने पृ० 455.
5. श्रव्यंनाति समस्तार्थं वाक्यं मधुर मिष्यते। भा०क०लं० 2/3.
6. श्रव्यत्वं पुनरोजसोऽपि साधारणमिति। ध्व०लो० पृ० 117.

ओजः–

काव्येविद्यमाना रौद्रादयो रसा दीप्त्याज्ञायन्ते। तां दीप्तिमभिव्यक्तुं शब्दार्थौ निमित्तभूतौस्तः। शब्दार्थौ आश्रित्य ओजोगुणो व्यवस्थितो भवति।[1] दीप्ति विषये अभिनवगुप्तेन कथितमस्तियद्दीप्तेः एष स्वभावो वर्तते यत्सा पाठकानां, दर्शकानांश्रोतृणांच हृदयं विकसितं, विस्तृतं, प्रज्वलितंच करोति। दीप्तिरेका ईदृशी चित्तर्वृति वर्तते यस्यां विकासविस्तारप्रज्वलनरूपाः इमास्तिस्रा अवस्थाः सम्मिलिता विद्यन्ते; प्राधान्येन सादीप्ति ओजः शब्देनोच्यते। रौद्रादयो रसाः दीप्तिमुत्पादयन्ति, त एव कारणानिभवन्ति। तेभ्यः समुत्पन्नमास्वादस्वरूपं कार्यमेव दीप्त्यापरनाम्नी विशिष्टप्रकारा चित्तवृत्तिर्भवति। दीप्तिस्वरूपचित्तवृत्या रौद्रादयोरसा अन्यरसेभ्यः पृथग्भूताः प्रतीयन्ते। अतो रौद्रादयोरसाः कारणानिभवन्ति तेषां कार्यं ओज एव भवति।[2] रौद्रादिपदेन नात्र वीराद्भुत-रसयोरपि ग्रहणं भवति। दीर्घसमासैर्संघटितारचना ओजोगुणं व्यनक्ति।[3] न केवलं दीर्घसमासयुक्ता रचनाएव ओजोगुणंप्रकाशयति अपितु समासाभावेऽपि झटित्यर्थप्रत्यायकैश्शब्दैरपि प्रसादगुणयुक्तपदैरुद्धतार्थोऽपि ओजो गुणस्य अथवा रौद्रादिरसानां दीप्तिं प्रकाशयति।[4] चिरन्तनैराचार्यैः समास बाहुल्यम् ओजो गुणस्यलक्षणं कृतमासीत्।[5] परवर्ती भोजदेवेनापि समास दैर्ध्यादेवास्यौजोगुणस्यस्वरूपं निर्धारितमासीत्,[6] परं ध्वनिकारेण पूर्ववर्तीनामोजो-गुणविषयकं मतमस्वीकृत्य समासेसत्यपि समासाऽभावेपि च रौद्रवीराद्भुत रसेष्वस्य सत्ता प्रतिपादिता।[7]

---

1. रौद्रादयोरसादीप्त्या लक्ष्यन्ते काव्यवर्तिनः।
तद्व्यक्तिहेतुशब्दार्थावाश्रित्यौजो व्यवस्थितम्।। ध्व०लो० पृ० 117.
2. दीप्तिः प्रतिपत्तुर्हृदये विकासविस्तारप्रज्वलनस्वभावा। साच मुख्यतया ओजश्शब्दवाच्या। तदास्वादमया रौद्राद्याः, तया दीप्त्या आस्वाद विशेषात्मिकया कार्यरुपया लक्ष्यन्ते रसान्तरात्पृथक्तया। तेनकारणे कार्योपचारात् रौद्रादिरेवौजः शब्दवाच्यः। तत्रैव० लोचने पृ० 457-58.
3. तत्प्रकाशनपरः शब्दो दीर्घसमासरचनाऽलङ्कृतंवाक्यम्। तत्रैव० दीधितिविवृतौ, पृ० 119.
4. तत्प्रकाशनपरश्चार्थोऽनपेक्षित दीर्घसमासरचनाः प्रसन्नवाचकाभिधेयः। ध्व०लो० पृ० 119.
5. ना०शा० 16/105, भा०का०लं० 2/2, दण्डी का०द० 2/80.
6. स०कं०भ० 1/71, पृ० 94.
7. ध्व०लो० 2/32.

प्रसादः—

आनन्दवर्धनानुसारं काव्यस्य सर्वेषु रसेषु सामान्यतया यत् समर्पकत्वं स एव प्रसादगुणेनाभिधीयते।[1] शब्दार्थयोर्स्वच्छता प्रसादगुणोपेता भवति। एष गुणो माधुर्यौजवत् कस्यचिद्रसस्यशब्दस्यार्थस्यचापेक्षां विनैव, सर्वेषु रसेषु समग्रासु रचनासु च साधारणतया तिष्ठति प्राधान्येन व्यंग्यरसादीनामपेक्षयैव व्यवस्थितोऽवगन्तव्यः।[2] काव्ये ईदृग्गुणस्यावश्यमेव प्रयोगोभवितव्यः येन काव्यं सहृदयेषु व्याप्तंस्यात्। स तु प्रसाद गुण एव भवितुमर्हति, यथा शुष्ककाष्ठे अनतिचिरेण अग्निप्रवेशोभवति अथवा प्रक्षालितेवस्त्रे जलं सद्य एव व्याप्तं भवति तथैव प्रसादगुणयुक्तंकाव्यं सहृदयहृदयंव्याप्य स्वात्मानं प्रत्याकर्षति। सादृश्यसम्बन्धेन लक्षणयोपचारेण वा या झटिति व्यंगयार्थस्य प्रत्यायिका शब्दार्थयोर्विशेषता सा प्रसाद गुणेन व्यवह्रियते।[3] आनन्दवर्धनदृशा प्रसाद गुणस्य काव्ये सर्वत्र साम्राज्यं वरीवर्ति। यतोहि काव्ये प्रसादगुणेनैव रसानां व्यंजकत्वं भवति।[4]

राजशेखरमतेगुणविवेचनम्—

काव्यमीमांसायां राजशेखरः भिन्न-भिन्नकाव्यविषयनिरूपकानाचार्यानुल्लिलेख। तत्र काव्यगुणोपादाननिरूपकाचार्यस्य उपमन्योर्निर्देशः कृतोऽस्ति[5]। उपमन्युः काव्यपुरुषस्य अष्टादशशिष्येषु एकः प्रसिद्धो गोत्र प्रवर्तकऋषि, आसीत्, येन गुणोपादाननिरूपणमकारि। परमुपमन्योर्गुणनिरूपणं कालकवलितत्वात् अस्माकं समक्षं न वर्तते येन राजशेखरस्य गुणविषयिनी धारणा प्रतीतिपथवतरेत्। अनेन पदवाक्यविवेकोख्यस्य चतुर्थोऽध्याये

---

1. समर्पकत्वं काव्यस्य यत्तुसर्वरसान् प्रति।
   स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः।। तत्रैव० 2/33.
2. प्रसादस्तु स्वच्छताशब्दार्थयोः। स च सर्वरससाधारणो गुणः सर्व रचना साधारणश्च व्यंग्यार्थापेक्ष्यैव मुख्यतया व्यवस्थितोमन्तव्यः। तत्रैव० 121.
3. सपर्कत्वं सम्यगर्पकत्वं हृदयसंवादेनप्रतिपतृन् प्रति स्वात्मावेशेन व्यापारकत्वं शुष्ककाष्ठाग्निदृष्टान्तेन। अकलुषोदकदृष्टान्तेनच तदकालुष्यं प्रसन्नत्वं नाम सर्वं रसानां गुणः। उपचारात्तु तथाविधे व्यंग्येऽर्थे यच्छब्दार्थयोः समर्पकत्वं तदपि प्रसादः। ध्व०लो०लोचने पृ० 465.
4. च शब्दोऽवधारणे। सर्वरससाधारण एव गुणः। स एवच गुण एवंविधः। सर्वायेयं रचना शब्दगताचार्थगताच समस्ताचासमस्ता च तत्रसाधारणः। तत्रैव० पृ० 166.
5. गुणोपादानिकमुपमन्युः काव्यमीमांसा पृ० 4 अ० 1.

श्यामदेवस्यमतं समुद्धरता काव्य रचनायां समाधेः परमावश्यकता प्रतिपादिता। समाधिशब्दस्यार्थो मनस एकाग्रता विद्यते समाहितमनस्कएव सूक्ष्म विषयानां चिन्तनं कर्तुं पारयति। सरस्वत्या रहस्यमधिकंगाम्भीर्ययुक्तमवर्णनीयंचवर्तते, तत् शास्त्रमर्मज्ञानामतीवचतुराणां धीधनानां ज्ञानस्य विषयोऽस्ति तस्य प्राप्त्युपायो, ज्ञानपूर्णचेतसो समाधिरित्यभिधीयते।[1]

यायावरीयेन समाधिः, आन्तरिकःप्रयत्नः प्रतिपादितः[2]। भरतेन अर्थ वैलक्ष्यण्येन विशिष्टार्थसम्पन्नः समाधिगुणो भवतीत्युक्तम्।[3] दण्डिनाऽर्थ गुणसमाधिनिरूपणावसरे निर्दिष्टं यत् समाधिगुणः काव्ये अत्यन्त–चमत्कारोत्पादकत्वात् काव्यस्य जीवनाधायकोऽस्ति।[4] आचार्य वामनेन कथितं यत्र समाहितचेतसाऽर्थस्यदर्शनं जायते स समाधि गुणो विद्यते।[5] एषा मुपर्युक्ताचार्यानां समाधिगुणेन सह राजशेखरस्य कविरहस्ये समाधिनिरूपणं प्रभावितमस्तीति प्रतीयते। राजशेखरः केवलं समाधिनिरूपणमकारि, न समाधि, गुणस्य। तथापि निरूपितसमाध्यनुसारं ज्ञायते प्राचीनोक्ताचार्याणां समाधिगुणाद् राजशेखरेण निरूपितो समाधिर्न भिद्यते। वाक्यप्रकारनिरूपणावसरे राजशेखरेण गुणाऽलंकार रीत्युक्त्योपेतयोः शब्दार्थयोर्ग्रन्थने गुणालंकार रीतिउक्तीनां प्रयोगः प्रदर्शितः येन सा रचना सहृदयानां श्रोतृणांच कृते अकर्षिका भवति इत्यत्र गुणपदप्रयोगात् राजशेखरमते गुणानामनिवार्यत्वं प्रकटी भवति।[6]

"देवानामुदारवचनानिभवन्ति" इति शेखरेण यदभिहितम्, तत् पूर्ववर्त्याचार्यणामुदारगुणमभिलक्ष्य उदारशब्दस्य प्रयोगः कृत इति सम्भाव्यते।[7] यतः श्रृंगाराद्भुतानुप्रासादिभिः सह उदारशब्दस्यप्रयोगउदार गुणं व्यनक्ति।

---

1. काव्यकर्मणि कवेः समाधिः परं व्याप्रियते, इति श्यामदेवः। मनस एकाग्रता समाधिः। समाहितं चित्तमर्थान् पश्यति। उक्तंच–
   सारस्वतं किमपितत्सुमहारहस्यं, यद्गोचरे च विदुषां निपुणैकसेव्यं।
   तत्सिद्धये परमयं परमोऽभ्युपायो, यच्चेतसो विदि बेद्यविधेः समाधिः। का०मी० अ० 4, पृ० 27.
2. समाधिरान्तरः प्रयत्नो वाह्यप्रयत्नस्त्वभ्यासः। तत्रैव पृ० 27.
3. ना०शा० 16/102.
4. का०द० 1/100.
5. का०लं०सू० 3/2/7.
6. गुणालंकार रीत्युक्ति शब्दार्थग्रथनक्रमः।
   स्वदते वसुधां येन वाक्य पाकः स मां प्रति।। का०मी० अ० 4, पृ० 50.
7. समासव्याससंदृब्धं श्रृंगाराद्भुत सम्भृतं।
   सानुप्रासमुदारंच वचः स्यादमृताशिनाम्। का०मी० अ० 7, पृ० 74.

पाठप्रतिष्ठायां द्वयोर्गुणयोरनेनप्रकारेण प्रतिपादनमवलोक्यते यत् प्रसादगुणयुक्ता कविता मन्द्रस्वरेण, ओजोगुणयुक्तारचना उच्चस्वरेण, उभयगुणमयी रचना गम्भीरस्वरेण, तथा तारस्वरेण पठनीया।[2] माधुर्यगुणस्य संकेतोऽनेनप्रकारेण कृतमस्ति ललितस्वरं, काक्वासमन्वितं, सुव्यक्तार्थाऽनुसारं विरामयुक्तं मधुरध्वनिना पृथक्कारैः पठनं प्रशंसनीयं भवति।[3] अत्र श्रुतिसुखद शब्दस्यप्रयोगः कृतो विद्यते तन्माधुर्यव्यंजकैर्वर्णैरेव जायते, राजशेखरः गम्भीरत्वं, सरसत्वं, तारमन्द्रस्वरयोः सम्यग्निर्वाहः, संयुक्ताक्षरेषु च लावण्यं इमान् चतुरः पाठगुणान् निरूपयामास।[4]

आचार्यकुन्तकः—

मार्गत्रयनिरूपणम्—

कुन्तकेन काव्यलक्षणे समागतस्य बन्धपदस्य द्वे लक्षणे प्रतिपादिते। वैशिष्टयेन वर्णानांपदानां च सन्निवेशेन या रचना रचिता भवति सैव कविकर्म व्यापारेण सुशोभिता बन्ध इत्युच्युते।[5] स बन्धो वाच्यवाचकेन सौभाग्य लावण्ययोः परिपोषको भवति।[6] तस्मिन् बन्धे एतादृशीयोग्यता वर्तते यया काव्यमर्मज्ञा आह्लादिताः संभवन्ति।[7] वक्रोक्तिजीवितकारः काव्यस्य सामान्यलक्षणमभिधाय विशेषलक्षणस्य विषयंवक्तुं सुकुमारविचित्रमध्यम भेदेन त्रींन् मार्गान् अभ्यधात्।[8] मार्गनिरूपणे रीतिनां नामग्रहणं न चकार।

---

2. प्रसन्नेमन्द्रयेद्वाचं तारयेत्तद्विरोधिनि।
   मन्द्रतारौ च रचयेन्निर्वाहिणी यथोत्तरम्। का०मी० अ० 7, पृ० 82.
3. ललितं काकुसमन्वितमुज्वलमर्थवशकृतपरिच्छेदम्।
   श्रुति सुख विविक्त वर्णं कवयः पाठे प्रशंसन्ति।। तत्रैव० अ० 7, पृ० 83.
4. गम्भीरत्वमनैश्वर्यं निर्व्यूढिस्तारमन्द्रयोः।
   संयुक्तवर्णलावण्यमिति पाठगुणाः स्मृताः। तत्रैव० अ० 7 पृ० 83.
5. वाच्यवाचक सौभाग्य लावण्य परिपोषकः।
   व्यापारशाली वाक्यस्य विन्यासो बन्ध उच्यते। क०जी० 1/22.
6. सौभाग्यं प्रतिभासरंम्भफलभूतं चेतन चमत्कारित्व लक्षणम्, लावण्यं सन्निवेश सौन्दर्यम्, तयोः परिपोषकः। तत्रैव० पृ० 93 वृत्तौ
7. तत्रैव० 1/23.
8. संप्रति तत्र ये मार्गाः कविप्रस्थान हेतवः।
   सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः।। तत्रैव० 1/24.

मार्गाणामध्ययनेन प्रतीयते यद्रीतीनां स्थाने एव कुन्तकेन प्रकारान्तरेणमार्गाणां निरूपणं कृतम्। अस्मात्प्रतीयते यद् भरतादारभ्य वामन पर्यन्तं गुणविषयिनी-धारणा भामहं विहाय सर्वेषामाचार्याणां समानाऽसीत्। भरतेन दण्डिनाच स्पष्टरूपेण गुणानां शब्दार्थमयी धारणा न निरूपिता, गुणलक्षणेभ्यः शब्दार्थमयी धारणा ज्ञायते। आचार्यवामनेन स्फुटतया गुणानां शब्दार्थयोर्वर्गद्वये विभाजनं कृतम्। तदनन्तरमानन्दबर्धनेन संघटनाश्रितानां गुणानां मतमस्वीकृत्य गुणानां रसाश्रयत्वं स्वीकृतम्। कुन्तकेनातीववैलक्ष्यण्येन कवीनां काव्यस्य कारणभूताः त्रयोमार्गाः निरूपिताः। मार्गत्रयनिरूपणं कवेः स्वभावाधारेण कृतमस्ति। सुकुमारशक्त्योपपन्नः कविः सुकुमारकाव्य निर्माणे प्रयतते, विचित्र प्रकृत्योपेतः कविर्विचित्रकाव्यं निर्माय प्रस्तौति, मध्यमस्वभावोपेतो मध्यमकाव्यस्य निर्माणं करोति।[1] एषु त्रिषु काव्येषु न कश्चिदपि उत्तममध्यमाधमभेदेन विभज्यतेऽपितु सहृदयहृदयाह्लादकरत्वात् सर्वाणि काव्यानि रमणीयानि भवन्ति।[2] एषु त्रिषु काव्येषु सहृदयहृदयाह्लादनस्य सामर्थ्यं भवति। काव्ये त्रयएवमार्गा भवन्ति न एकः, न द्वौ, न चत्वारः, इति कथनेन प्रतीयते यत् कुन्तको वैदर्भीगौडी, पांचालीरीतिनामनुमोदनमकरोत्।[3] परं रीतेर्नामग्रहणं न कृत्वा विच्छित्या मार्गाणां निरूपणं निरूपयामास। काव्यमीमांसायां देशविशेषाधारेण रीतीनां यत्स्थापनं विद्यते तन्मतं निराकृत्य कविस्वभावाधारेण मार्गत्रयनिरूपणं चकार।[4]

---

1. कविस्वभावभेदेनिबन्धनत्वेन काव्यप्रस्थान भेदः समंजसतां गाहते। सुकुमार-स्वभावस्य कवेस्तथाविधैवसहजाशक्तिः समुद्भवति, शक्तिशक्तिमतोरभेदात् तथाच तथाविध सौकुमार्य रमणीयां व्युत्पत्तिमाबध्नाति। ताभ्यांच सुकुमारवर्त्मनाभ्यासतत्परः क्रियते। तथैव चेतस्मात् विचित्रः स्वभावो यस्यकवेस्तद्विदाह्लादकानि काव्य लक्षणकरणप्रस्तावात् सौकुमार्यव्यतिरेकिणां वैचित्र्येण रमणीयएव, तस्य च काचिद्वैचित्रैव तदनुरूपाशक्तिः समुल्लसति। व०जी० वृत्तौ० प्रथम उन्मेषः पृ० 99.
2. तदेवमेतेकवयः सकलकाव्यकरणकलापकाष्ठाधिरूढिरमणीयं किमपि काव्यमारभन्ते, सुकुमारं विचित्रमुभयात्मकंच। त एव तत्प्रवर्तन निमित्तभूतामार्ग इत्युच्यन्ते। तत्रैव० प्रथम उन्मेषः पृ० 100.
3. तत्रतस्मिन् काव्ये मार्गाः पन्थानस्त्रयः संभवन्ति। न द्वौ न चत्वारः, स्वरादि संख्यावत्तावतामेव वस्तुतस्तज्ज्ञैरुपलम्भात्। तत्रैव०। म०उ० पृ० 96.
4. तत्रैव०। म०उ० पृ० 100.

सुकुमारमार्गः—

1. सुकुमारमार्गो, दोषरहितप्रतिभया प्रस्फुरितशब्देनार्थेन च सहृदय-हृदयाह्लादनसामर्थ्याद् रमणीयो भवति।[1]
2. अस्मिन्मार्गे अप्रयत्नेनैवाऽलंकाराणां प्रयोगो जायते।
3. कविशक्त्या समुल्लसनीयपदार्थानां रमणीयस्वभावएव सौन्दर्यं प्रस्तौति, तस्य सौन्दर्यस्यसमक्षं अन्यकाव्येषु विद्यमानं व्युत्पतिजन्य-कौशलमपचीयते।
4. श्रृंगारादिरसानां रहस्यं ये सहृदया जानन्ति तेषां मनो रमणीय-वाक्यविन्यासयोग्यं भवति।
5. कविकौशलेन सादृश्यंकर्तुं न पार्यते तस्य सौन्दर्यं विधातुश्चातुर्येण निर्मितसृष्टेरुत्कर्षतुल्यं दृश्यते।
6. यत् किमपि विचित्रंभवति तत्सर्वं कविप्रतिभया एव निर्मितं परिलक्ष्यते।

सुकुमारमार्गस्य माधुर्यगुणः—

यस्मिन् वाक्ये प्राचुर्येण समस्तानि पदानि न भवन्ति, मनोहारिणि पदानां विन्यासएव यत्र जीवनाधायकं तत्वमस्ति तत् सुकुमारमार्गस्य प्रथमोगुणो[2] वर्तते। सुकुमारमार्गस्य माधुर्यगुणलक्षणेऽसमस्तपदस्य प्रयोगः प्राचुर्यार्थस्य बोधकोऽस्ति[3]।

समस्तपदानां प्रयोगेऽपि अस्यगुणस्यसत्ता भवितुं शक्यते परं समस्तपदानां प्रयोगः प्राचुर्येण न स्यात् अन्यथा सुकुमारस्य सौकुमार्यमपचितोभविष्यति। उक्तगुणलक्षणे समागतस्य "मनोहारिपदविन्यासजीवितम्" अस्यपदस्य विषये कुन्तकः स्पष्टीकृतवान् यद् यानि सहृदयहृदयाह्लादकराणि, श्रवणमनोहराणि अर्थमनोहराणि च सुपतिङ्पदानि, तेषांपदानां रचनावैचित्र्य एव जीवनाधायिका-

---

1. अम्लानप्रतिभोद्भिन्ननवशब्दार्थबन्धुरः।
   अयत्नविहितस्वल्प मनोहारि विभूषणः। व०जी० 1/25, 2/3/4/5/6 तत्रैव० 1/26/27/28/29.
2. असमस्तमनोहारि पंद विन्यास जीवितम्।
   माधुर्यं सुकुमारस्य मार्गस्य प्रथमो गुणः।। तत्रैव० 1/30
3. अमस्तशब्दोऽत्र प्राचुर्यार्थः न समासाभाव नियमार्थः। तत्रैव० वृत्तौ 1/30.

रचना सुकुमारमार्गस्थेन माधुर्यगुणेन विभूषिता विभाति।[1] असमस्तमनोहारि-पदविन्यासवैचित्र्यमेवाऽस्य माधुर्यगुणस्य जीवनं विद्यते। आचार्यभामहेन, माधुर्यगुणसमन्वितायां रचनायां श्रुतिसुखदत्वं, दीर्घसमासाभावत्वंच प्रतिपादितम्।[2] कुन्तकः सुकुमारमार्गस्य माधुर्यगुणलक्षणे यत् श्रुतिरम्यत्वं, अर्थरमणीयत्वं असमस्तत्वं च निरूपितवान् तदसंदिग्धंत्वं, प्रतीयते। भामहस्य माधुर्यगुणस्यप्रभावः कुन्तकस्य सुकुमारमार्गस्य माधुर्यगुणे वर्तते। आचार्यवामनेनापि शब्दगुणमाधुर्यस्य लक्षणं पृथक् पदत्वरूपेणकृतम्; तत् पृथक्पदत्वं समासाभावे एव भवितुमर्हति येन ज्ञायते वामनस्य पृथक् पदत्वं कुन्तकेन समासाभावेन स्वीकृतम्।[3] कुन्तकेन माधुर्यगुणलक्षणेयदर्थ- रमणीत्वमङ्गीकृतम् तद्वामनस्यार्थगुणउक्तिवैचित्र्यात्मक माधुर्यगुणस्य समतां बिभर्ति।[4] अस्मिन् गुणे अनतिसमस्तत्वंश्रुतिरम्यत्वंपदविन्यासवैचित्र्यं यदभिहितम् तेनास्य गुणस्य शब्दगुणत्वं प्रतीयते। माधुर्यलक्षणे यदर्थरमणीयत्वं कथितम् तदस्यार्थगुणत्वमभिव्यनक्ति।

सुकुमारमार्गस्य द्वितीयः प्रसादगुणः—

काठिन्येनविना रसवक्रोक्तिविषयकाभिप्रायप्रतिपादको, झटित्यर्थप्रत्यायकः सुकुमारमार्गस्यद्वितीयोगुणः प्रसादो वर्तते।[5] कुन्तकेनास्यप्रसादगुणस्यपरमार्थः समासाभावः, प्रसिद्धार्थप्रतिपादिनम्, अर्थेनसह साक्षादव्यवहितसम्बन्धः, समासेसत्यपि, अनायासेन अर्थप्रत्यायकसमासयुक्तताचेति कथितः। लक्षणे समागतस्याकूतशब्द विषये प्रतिपादितम्, तात्पर्यार्थस्य विच्छित्तौ आकूत शब्दस्योपदानं वर्तते अनायासेन रमणीयतात्पर्यार्थप्रतीतिकारकःप्रसाद गुणो विद्यते।[6]

---

1. असमस्तानि समासवर्जितानि मनोहारीणि हृदयाह्लादकानि श्रुतिरम्यत्वेनार्थ-रमणीयत्वेन च यानि पदानि सुप्तिङन्तानि तेषां विन्यासः सन्निवैशवैचित्र्यं जीवितं सर्वस्वंयस्य तत्तथोक्तं माधुर्यनाम सुकुमारलक्षणस्य मार्गस्य प्रथमः प्रधानभूतोगुणः। व०जी० 1/30 वृत्तौ।
2. भामहकाव्यालंकार 2/3.
3. का०लं०सू० 1/1/21 वृत्तौ।
4. का०लं०सू० 3/2/11.
5. अकलेशव्यञ्जिताकूतं झगित्यर्थसमर्पणम्।
   रसवक्रोक्ति विषयंयत्प्रसादः स कथ्यते। व०जी० 1/31.
6. अत्र पदानामसमस्तत्वं प्रसिद्धाभिधानत्वम् अव्यवहित सम्बन्धत्वं समाससद्भावेऽपि गमकसमास युक्तताच परमार्थः। "आकूत" शब्दस्तात्पर्यविच्छित्तौ च वर्तते। तत्रैव० वृत्तौ पृ० 114.

कुन्तकात्पूर्वं प्रसादगुण लक्षणेऽत्यधिकपदानां समास निषेधो भामहेनापि कृत आसीत्। अतः, सुकुमारमार्गस्य प्रसादगुणलक्षणे समासाभावरूपा कुन्तकस्यधारणा भामहस्य प्रसादगुणलक्षणाद् अपरिचिता नैवासीत्।[1] भरतमुनिकृतप्रसादगुणलक्षणे विद्यमानस्य "सुखशब्दार्थसंयोगात्"[2] अस्य पदस्य प्रभावः कुन्तकनिरूपितसुकुमारमार्गस्य प्रसादगुणे दृश्यते। कुन्तक लक्षणे "अक्लेश व्यञ्जित" इत्यत्र भरतोक्त प्रसादगुणस्य विशेषतः सुखशब्दार्थ संयोगादस्य प्रभावो विद्यते।[3]

अभिनवगुप्तेनापि नाटयशास्त्रे प्रसादगुणे कष्टकल्पनाया अभाव एव प्रतिबोधितः। झटित्यर्थसमर्पणं कृच्छ्रेण न भवति सुखेन तत्रैव शब्दानां प्रतीतिर्जायते यत्र–समासाभावः स्यात्, तेभ्यः शब्देभ्यो अनायासेन तत्रैवार्थ प्रतीतिर्भवति यत्र कष्टत्वदोषाभावः स्यात् भरतकृतप्रसादगुणलक्षणात् कुन्तकस्य प्रसादगुणः पृथग् भूतोनास्ति।

सुकुमारमार्गस्य तृतीयोगुणः–

वर्णानां वैचित्र्ययेण विन्यासस्य या शोभा तया लक्षितः अत्यन्तसंक्षेपेण अनधिकप्रयत्नेन सुबन्तादिपदानां संयोजनेन च बन्धस्य सौन्दर्यं लावण्य गुणेनाभिधीयते।[4] कुन्तकमते यच्छब्दार्थ सौकुमार्येण रमणीयसंघटनायाः शोभा लावण्यगुणेनोच्यते।[5] भरतोक्त सौकुमार्यगुणस्य प्रभावः कुन्तकस्य लावण्यगुणे दृश्यते, भरतेन सुखप्रयोजकैर्शब्दैः सुकुमारार्थसंयुक्तायां रचनायां सौकुमार्यगुणः स्वीकृत आसीत्।[6] कुन्तकात् पूर्वं राजशेखराय पाठगुणेषु लावण्यनाम गुणो भृशमरोचत्।[7]

---

1. भामहकाव्यालंकार 2/1.
2. ना०शा० 16/99.
3. ना०शा०अभि०भा० 16/99 पृ० 1321.
4. वर्णविन्यासविच्छित्तिपदसंधानसंपदा।
   स्वल्पया बन्धसौन्दर्यं लावण्यमभिधीयते।। व०जी० 1/32.
5. तदयमत्रार्थः शब्दार्थसौकुमार्य सुभगः संनिवेशमहिमा लावण्याख्यो गुणः कथ्यते। तत्रैव० वृत्तौ पृ० 117.
6. ना०शा० 16/107.
7. का०मी० अ० 7, पृ० 83.

सुकुमारमार्गस्य चतुर्थो गुणः

आभिजात्यम्–

श्रुतिमधुरः (हृद्यार्थस्पर्शसुखदः, प्रकृत्या मासृण्यकान्तियुक्तो बन्धो, आभिजात्य गुणेनाभिधीयते।[1] आभिजात्यगुणो भरतस्य माधुर्यगुणेन सह साम्यं धत्ते। हेमचन्द्रेण भरतमतमुद्धरता निगदितं यो बहुवारं श्रुतं कथितं वा वाक्यं मनसोऽनुद्वेजकरं भवति तन्माधुर्यगुणोपेतंजायते,[2] भरतेन माधुर्यगुणलक्षणे मनसो यदनुद्वेजकत्वमभिहितं[3] तदेवानुद्वेजकत्वं कुन्तकेनाऽभिजात्यगुण लक्षणे "सुस्पर्शमिवचेतसा" एभिः शब्दैः स्वभावतः स्निग्धकान्तियुक्त आभिजात्याख्यो गुणः कथितः। अतः कुन्तकस्य आभिजात्योनामगुणो भरतस्य माधुर्यगुणेन सह साम्यमाकलयति।

विचित्रमार्गस्यवैशिष्टयम्–

1. विचित्रमार्गे कवेः प्रथमोल्लेखसमये शब्दार्थयोरुक्तिवैचित्र्यरूपा वक्रता प्रस्फुरितेव प्रकाशते।[4]
2. मालायांमणीनामिव विविधैरलंकारैरलंकृता रचना विचित्रमार्गे भवति।[क.]
3. येनप्रकारेण रत्नाद्यलंकाराः स्व छटाभि रमण्याः शरीरं विभूषयन्ति, तथैव उपमाद्यलंकाराः स्वातिशयसौन्दर्येणालंकार्यं प्रकाशयन्ति।[5]
4. विचित्रमार्गस्य कविर्नूतनवर्णनमकृत्वैव पुरातनवर्णनं विदधाति परं सोऽपि उक्तिवैचित्र्येणाऽपूर्वसौन्दर्यमभिव्यनक्ति।[6]
5. विचित्रमार्गेऽन्यप्रकारेण वर्णनीयं किमपि वस्तुजातं, महाकवेरतिशय प्रतिभोन्मेषवशात् स्वप्रतिभानुरूपमन्यवैलक्ष्यण्येन शोभातिशयं पुष्णाति।[7]

---

1. श्रुतिपेशलताशालि सुस्पर्शमिव चेतसा।
स्वभावमसृणच्छायमाभिजात्यं प्रचक्षते।। व०जी० 1/33.
2. वहुशोयच्छ्रुतमपि वाक्यमनुद्वेजकं मनसस्तन्मधुरमिति भरतः। हे०चं०का०शा० अ० 4 पृ० 237.
3. ना०शा० 16/104.
4. कुन्तक व०जी० 1/34.

क. तत्रैव० 1/35.

5. तत्रैव० 1/36-37.
6. तत्रैव० 1/38.
7. तत्रैव० 1/39.

6. शब्दार्थशक्तिभ्यामतिरिक्तं व्यंग्यरूपानिर्वचनीयवाक्यार्थस्य प्रतीयमानता अस्मिन् विचित्र मार्गे उपनिबद्धाभवति।[1]
7. पदार्थानां सरलाभिप्राययुक्तः स्वभावोऽलौकिकवैचित्र्येणैधते।[2]
8. विचित्रमार्गे वेक्रोक्तेर्वैचित्र्यं प्राणरूपेणाभिव्याप्य रचनाऽतिशयेन समुल्लसति। ईदृशोविचित्रमार्गोऽतिदुःसंचरणीयोऽस्ति यस्यावलम्बनं कृत्वा विदग्धाःकवयोः महाकाव्यानि रचयामासुः। अस्मिन् मार्गे कवेरनवधानता लेशमात्रेणापि न भवितव्या, यथा सुभटानां मनोरथा असिधारा मार्गेण प्रयान्ति, (अर्थात् असिधारामार्गेण गन्तुं प्रवृत्तानां मनोरथानां म्लानतासम्भाव्यते तथैवाऽस्मिन् विचित्रमार्गे रचनायां कविरनवधानतां न कुर्यात्। संग्रामे कदाचित्-म्लानता सम्भाव्यते परमसिधारामार्गे म्लानता न सम्भवा, अत्र कुन्तकस्यायमाशयः यदन्येषु मार्गेषु कविः कदाचिदनवधानतां कुर्यात् तदा करोतुनाम, विचित्र मार्गे असिधारा मार्गवत् अत्यन्तसावधानताया आवश्यकता भवति।[3]

विचित्रमार्गस्य गुणा नाम्ना सुकुमारमार्ग सदृशा सन्ति परं तेषां लक्षणानि सुकुमारमार्गगुणेभ्यो भिद्यन्ते।

विचित्रमार्गस्य माधुर्यगुणः–

विचित्रमार्गस्य माधुर्यगुणे वैचित्र्योत्पादकानां पदानां प्रयोगो भवति तथा शैथिल्यंविहाय वाक्यरचना रमणीयतायाः साधनमस्ति।[4] अस्मिन् वैचित्र्य प्रतिपादकशब्दानां प्रयोगेण शैथिल्याभावे माधुर्यगुणः स्वीकृतः। आचार्यदण्डिना अस्पृष्टशैथिल्ये श्लेषगुणः स्वीकृत आसीत्[5]। कुन्तकेन विचित्रमार्गस्य माधुर्य लक्षणमपि शैथिल्याभावे निरूपितः। अतोऽनयादृशा दण्डिनोश्लेषगुणः, कुन्तकस्य विचित्रमार्गस्य माधुर्यगुणः साम्यमाकलयति।

विचित्रमार्गस्यप्रसाद गुणः–

कुन्तकेन कथितमस्ति यदस्मिन्मार्गे "कविमार्गे प्रसिद्धः" किंचिदोजः-

---

1. व०जी० 1/40.
2. तत्रैव० 1/41.
3. तत्रैव० 1/42-43.
4. वैदग्ध्यस्यन्दि माधुर्यं पदानामत्र वध्यते।
   याति यत्यक्त शैथिल्यं बन्धबन्धुरताङ्गताम्।। तत्रैव० 1/44.
5. का०द० 1/43.

स्पृशन्, असमस्तानांपदानां सन्निवेशमयः प्रसादगुणो दृश्यते।[1] सुकुमारमार्गस्य प्रसादगुणाद् विचित्रमार्गस्यप्रसादगुणे एतदेवाधिक्यं विद्यते यदस्मिन् गुणे ओजोगुणस्यापि किंचित्संस्पर्शो दरीदृश्यते अर्थात् विचित्रमार्गस्य प्रसाद गुणः किंचितसमासयुक्तैः पदैः प्रचुररूपेण प्रायः संलक्ष्यते अन्यत्समग्रं लक्षणं सुकुमारमार्गस्य प्रसादगुणानुरूपं भवति।[2] कुन्तकात् प्राग् आचार्यवामनेन शब्दगुणप्रसादनिरूपणावसरे ओजोमिश्रितशैथिल्यं स्वीकृतमासीत्[3]। अतोऽस्य शब्दगुणप्रसादस्य प्रभावः कुन्तकोक्त प्रसादगुणे विद्यते।

कुन्तकेन स्वयमपि वृत्तौ चिरन्तनानामोजोगुण संस्पर्शे यदुल्लेखः कृतः तद्वामनस्य प्रसादगुणं प्रति वर्तते।[4] यत्र विचित्रमार्गे एकस्मिन्नेववाक्ये व्यंग्यार्थसमर्पकानामन्यावान्तरवाक्यानामपि पदानामिव परस्परान्वित प्रकारेण निवेशः क्रियते तत्र वाक्यविन्यासस्याऽपूर्वशोभोत्पादकः प्रसादगुणस्यापरः प्रकारो वर्तते[5]।

विचित्रमार्गस्य ''लावण्य'' गुणः—

कुन्तकमते परस्परं संश्लिष्टैरलुप्तविसर्गान्तैः संयोगात् पूर्वं ह्रस्वपदानां प्रयोगेण विचित्रमार्गस्य लावण्यगुणो भवति।[6] अस्य गुणलक्षणाधरेण एतत् कथयितुं शक्यते यदितः पूर्वं वामनेन श्लेषगुणनिरूपणावसरे बहूनांपदानां एकपद- वत्प्रतीतिः मसृणशब्देन प्रतिपादितासीत्।[7] कुन्तकेन वामनस्य मसृणता ''पदैः प्रीतैः परस्परम्'' एभि शब्दैर्निरूपिता। अतः केनचिदंशेन वामनस्य शब्दश्लेषः कुन्तकोक्तविचित्रमार्गस्य लावण्यगुणश्च द्वावेव समानौ वर्तेते।

---

1. असमस्तपदन्यासः प्रसिद्धः कविवर्त्मनि।
   किंचिदोजः स्पृशन् प्रायः प्रसादोऽप्यत्र दृश्यते।। व०जी० 1/45.
2. तदयमत्रपरमार्थः पूर्वस्मिन् प्रसादलक्षणे सत्योजः संस्पर्शमात्रमिहाभिधीयते। तत्रैव० वृत्तौ। पृ० 143.
3. को०लं०सू० 3/1/6.
4. तथाविधत्यौजसः समासवतीवृत्तिः ओजः शब्देन चिरन्तनैरुच्यते। व०जी० वृत्तौ पृ० 143.
5. गमकानि निबध्यन्ते वाक्ये वाक्यान्तराण्यपि।
   पदानीवात्रकोऽप्येष प्रसादस्यापरः क्रमः।। तत्रैव० 1/46.
6. अत्रालुप्त विसर्गान्तैः पदैः प्रोतैः परस्परम्।
   ह्रस्वैः संयोग पूर्वैश्च लावण्यमतिरिच्यते।। व०जी० 1/47.
7. का०लं०सू०. 3/1/11.

विचित्रमार्गस्याभिजात्यो गुणः—

विचित्रमार्गस्याऽभिजात्याख्यो गुणः नाधिककोमलकान्तियुक्तो भवति, नाधिकं काठिन्यं विभर्ति, अपितु सहृदयानन्दकरः कविप्रौढोक्त्या निष्पन्नो भवति,[1] सहृदयाह्लादकरः कवेश्चातुर्येणसंम्पादितो विद्यते।[2] कविप्रौढोक्तिमात्रेण निष्पन्नोऽयं गुणो आनन्दवर्धनोक्तार्थशक्त्युद्भवध्वनिभेदकविप्रौढोक्त्या साम्यमावहतीति प्रतीयते।[3]

माधुर्यप्रसादलावण्याभिजात्याख्या गुणा एव विचित्रमार्गे कश्चिद पूर्वातिशयेन परिपुष्यन्ति।[4]

मध्यममार्गस्य स्वरूपम्—

1. मध्यममार्गे कविप्रतिभाजन्ये व्युत्पत्यादिजन्ये सौन्दर्यस्योत्कर्षेण वैचित्र्यसौकुमार्ये सौकुमार्यविचित्रमार्गयोः शोभासाम्येन मिश्रितेभूत्वा शोभेते।[5]
2. अस्मिन् मध्यमेमार्गे पूर्वोक्तचतुर्णांगुणानां समूहः सुकुमारविचित्र मार्गयोः कान्तिसंयुक्तः मध्यमावृत्तिमाश्रित्याऽतिशयेन बन्धसौन्दर्यं पुष्णाति।[6]
3. अस्मिन् मार्गेपूर्वोक्तद्वयोर्मार्गयोः संपदः अहमहमिकया साम्येन निवसन्ति। एवंविधो विविधरुचिमनोऽनुकूलो मध्यमोमार्गो वर्तते।[7]
4. कवयोऽस्य मध्यममार्गस्याश्रयणंविधाय काव्यरचनां कुर्वन्ति, सहृदयाः एवंविधानां काव्यानामध्ययनेनालौकिकानन्दं प्राप्नुवन्ति।[8]

---

1. यन्नातिकोमलच्छायं नाति काठिन्यमुद्वहत्।
आभिजात्यंमनोहारि तदत्र प्रौढिनिर्मितम्।। कु०व०जी० 1/48.
2. अत्रास्मिन् तदाभिजात्यं यन्नाति कोमलच्छायं नात्यन्त मसृणकान्ति नातिकाठिन्य मुद्वहन्नातिकठोरतां धारयत् प्रौढि निर्मितं सकल कविकौशलं सम्पादितं सन्मनोहारि हृदयरञ्जकं भवतीत्यर्थः। तत्रैव० पृ० 148.
3. ध्व०लो० 2/24.
4. आभिजात्यप्रभृतयः पूर्वमार्गोदिता गुणाः।
अत्रातिशयमायान्ति जनिताहार्यसंपदः।। व०जी० 1/110.
5. तत्रैव० 1/49.
6. तत्रैव० 1/50.
7. तत्रैव० 1/51.
8. तत्रैव० 1/52.

अस्यमध्यममार्गस्य चतुर्णां गुणानां लक्षणानि यत् पृथकत्वेननिर्दिष्टानि तस्य कारणं एतदेव विद्यते यत् कुन्तकेन मध्यममार्गः उभयात्मकमार्गत्वेन स्वीकृतः, अर्थात् सुकुमारविचित्रमार्गयोर्गुणानां यानि लक्षणानि प्रतिपादितानि तान्याश्रित्योभयात्मकेन मार्गेण मध्यममार्गः प्रवर्तते।[1] कुन्तकेन कथितं मध्यम मार्गस्यादरंकुर्वाणः केचित्कवयो मध्यममार्गमाश्रित्य काव्य रचनां कुर्वन्ति। यतस्ते कवयः रमणीयवस्तु व्यसनिनो भवन्ति।[2] मध्यममार्गमाश्रित्य मातृगुप्त, मायुराजमञ्जीरादिकवीनां काव्यानि सुकुमारविचित्रमार्गयोर्मिश्रितानि रसमयानि शोभन्ते। अतो मध्यममार्गस्य वैचित्र्यं तत्रैव द्रष्टुं पार्यते।[क]

मध्यममार्गस्यौचित्यगुणः—

आचार्यकुन्तकः सुकुमारविचित्रमध्यममार्गाणां माधुर्यप्रसादलावण्याभिजात्याख्यानामसाधारणगुणानां स्वरूपनिरूपणानन्तरमौचित्यसौभाग्याख्यौ द्वौ साधारणगुणौ निरूपितवान्। तत्र औचित्यंयथा येन गुणेनात्यन्तस्फुटरूपेण पदार्थस्यमहत्वं परिपोष्यते, तथा औचित्यप्राणाकुन्तकमते औचित्यं गुणो वर्तते।[3] औचित्येनैवाऽलंकाराणां न्यंसनं शोभते। कुन्तकेनौचित्यगुणस्य यन्निरूपणंकृतम् तेनप्रतीयते यत् पूर्वाचार्यैर्निरूपितस्य विशेषत आनन्दवर्धनाचार्यस्यौचित्यात् प्रभावितोभूत्वा औचित्यगुणस्य स्थापना कृता। आनन्दवर्धनेन रसौचित्यविषये—औचित्यस्य महत्वं स्पष्टरूपेणाङ्गीकृतमासीत्।[4]

येन केनचिद्रूपेण पूर्वाचार्यैरौचित्यस्य प्रतिपादनं कृतमासीत् परं कुन्तककाले वैशिष्ट्येन औचित्यं पल्लवितं फलितंचावर्तत। औचित्यगुणस्य द्वितीयलक्षणे

---

1. कीदृशोमध्यमः उभयात्मकः। उभयमनन्तरोक्तं मार्गद्वयमात्मा यस्येति विग्रहः। व०जी० 1/24 वृत्तौ।
2. अत्रैतस्मिन् केचित् कतिपये सादरास्तदाश्रयेण काव्यानि कुर्वन्ति। यस्मात् अरोचकिनः कमनीयवस्तुव्यसनिनः। तत्रैव० वृत्तौ पृ० 154.

क. तत्रैव० पृ० 154.

3. आञ्जसेन स्वभावस्य महत्वं येन पोष्यते।
प्रकारेण तदौचित्यमुचिताख्यान जीवितम्। तत्रैव० 1/53.
4. अनौचित्यादृते नान्यद्रस भङ्सगस्य कारणम्।
प्रसिद्धौचित्य बन्धस्तु रसस्योपनिषत्परा। ध्व०लो० पृ० 780.

कुन्तकेन प्रतिपादितं विद्यते यत्र वक्तुः श्रोतुश्च रमणीयतातिशययुक्तेन स्वभावेन अभिधेयवस्तु आच्छदितंभवेत् तत्राप्यौचित्य गुणो भवति।[1]

सौभाग्यगुणः—

यत्र शब्दाद्युपादेयसमूहे यदर्थं कविसंबन्धिनी प्रतिभा अनन्यमनस्कतया प्रवृत्ता भवति तत्र काव्यस्य सौभाग्यगुणो राजते।[2] काव्ये अर्था विच्छित्तिजनका रमणीयतायां सहृदयाह्लादकरा भवितव्याः। तस्य काव्यस्यार्थाः तदैवाह्लादकरा जायन्ते यदा कविः सावधानतया काव्यसंवन्धिनीप्रतिभायाः प्रयोगं करोति। अस्मिन् गुणे याथातथ्येन वस्तुस्वभावप्रतिपादकानांशब्दानां प्रयोगो विशेषतयाऽपेक्षते। इतः पूर्वमर्थस्यावधानतया यद्दर्शनं तत् समाध्यारव्यगुणत्वेन आचार्यवामनेन निरूपितमासीत्[3] अस्मात् प्रतीयते यद्वामनस्यार्थसमाधिगुणस्य प्रभावः कुन्तकस्य सौभाग्यगुणे वर्तते। सौभाग्यगुणो न केवलं प्रतिभामात्रेण सिध्यति अपितु अभ्यासव्युत्पत्यादिभिः सम्पादनीयो भवति। कुन्तकेन द्वितीयलक्षणे एतत्कथितम् यत् समस्तशक्तिव्युत्पत्तिअभ्यासस्वरूपाणां संपत्तीनां स्फुरणेन साधयितुंयोग्यो लोकोत्तरानन्ददायकः काव्यस्य अद्वितीय प्राणः सौभाग्यगुणो वर्तते।[4] तत्रैव तस्यावश्यकतां निरूपयताकाव्यस्यात्मतत्वरूपेणायं गुणः प्रतिपादितः।

लोकोत्तरानन्दकरं, सहृदयहृदयाह्लादकरं यद्भवति तत्सर्वंकुन्तकेना-स्मिन्गुणे निहितम्। औचित्यसौभाग्यगुणयोर्विषयं प्रदर्शयता कुन्तकेन यदौचित्य सौभाग्याख्यो द्वावेव गुणौ सुकुमारविचित्रादित्रयाणांमार्गाणां पदवाक्य, प्रबन्धेषु निवसत इत्यभिहितम्।[5]

1. कुन्तकस्य गुणविवेचनेन प्रतीयते यदनेन स्वकीयमौलिकोद्भावनया गुणानां निरूपणं कृतम्।

---

1. यत्र वक्तुः प्रमातुर्वा वाच्यं शोभातिशायिना।
   आच्छाद्यते स्वभावेन तदस्यौचित्यमुच्यते।। व०जी० 1/54.
2. इत्युपादेयवर्गेऽस्मिन् यदर्थं प्रतिभाकवेः।
   सम्यक् संरभतेतस्य गुणः सौभाग्यमुच्यते।। वी०जी० 1/55
3. का०लं०सू० 3/2/7.
4. सर्वसंपत्परिस्यन्दसंपाद्यं सरसात्मनाम्।
   अलौकिकचमत्कारकारि काव्यैक जीवितम्।। तत्रैव० 1/56.
5. एतत्त्रिष्वपि मार्गेषु गुणद्वितयमुज्वलम्।
   पदवाक्यप्रबन्धानां व्यापकत्वेन वर्तते। व०जी० 1/57.

2. अनेन रीतीनांस्थाने सुकुमारविचित्रमध्यममार्गाणां प्रतिपादनं विहितम्।
3. मार्गलक्षणेभ्यो ज्ञायते यद् वैदर्भीगौडीपांचालीरीतीनां कृते कुन्तकेन मार्गशब्दस्य प्रयोगः कृतः।
4. सर्वेषांमार्गाणां माधुर्यप्रसादलावण्यआभिजात्याख्याश्चत्वारो गुणा निरूपिताः।
5. सुकुमारमार्गस्य ये गुणा सन्ति त एव विचित्रमार्गस्यापि वर्तन्ते परं तेषां लक्षणानि पृथक् सन्ति।
6. मध्यममार्गस्य लक्षणमुक्त्वा केवलं चतुर्णां गुणानामुदाहरणानि प्रदत्तानि न तेषां लक्षणानि निरूपितानि। मध्यममार्गस्य गुणानां लक्षणविषये कुन्तकस्यकथनमस्ति यन्मध्यममार्गः सुकुमारविचित्रमार्गयोर्गुणानां लक्षणानुसारं भवति। अत एवोभयात्मकमार्गत्वेन मध्यममार्गः कथितः।
7. कुन्तकस्यैते गुणाः परवर्तिभिराचार्यैर्न स्वीकृता न च संकीर्तिताः। येन प्रकारेण परवर्त्याचार्यैर्निरूपितानां दशगुणानां एवं च भामहेन अथवा आनन्दवर्धनाचार्येण निरूपितानां त्रयाणां गुणानां समर्थनमभूत् न तथा कुन्तकस्य मार्गत्रयान्तर्वर्तिनां चतुर्णां गुणानां। सम्भवतः कुन्तकेन यन्मार्गत्रयान्तर्वर्तिचतुर्णांगुणानां निरूपणं कृतम् तत्परवर्तिभिर्नाङ्गीकृतम्, इदमेव कारणं विद्यते यद् रसस्याऽङ्गिभूत धर्मान् त्रीन् गुणान् प्रति परवर्त्याचार्याः आकृष्टाः समभूवन्।

भोजदेवमते गुणानामनिवार्यत्वम्–

भोजदेवः काव्ये पदे, वाक्ये, वाक्यार्थेषु च दोषाणामग्रामह्यत्वं प्रतिपादयन्– अलंकारयुक्तमपि गुणहीनं काव्यं श्रव्यं न भवति गुणलंकारयोर्योगे तदपेक्षया गुणयोग एव प्रमुख इति व्याजहार।[1] वाह्यआभ्यन्तरवैशेषिक भेदेन कविसम्मताः त्रिविधा गुणा भवन्ति।[2] एषु त्रिषु प्रकारेषु यथा–युवत्याअवयवरूपाः सौन्दर्यादयोगुणा बाह्याभवन्ति। शीलवैदग्ध्यभाग्यसौभाग्यदय आन्तरिका

---

1. एवं पदानां वाक्यानां वाक्यार्थानांच यः कविः।
दोषान्हेयतयार्वेत्ति सकाव्यं कर्तुमर्हति।।
अलंकृतमपिश्रव्यं न काव्यं गुणवर्जितम्।
गुणयोगस्तयोर्मुख्यो गुणालंकारयोगयोः।। स०कं०भ० 1/58-59.
2. त्रिविधाश्च गुणाः काव्ये भवन्ति कविसंमताः।
बह्याश्चाभ्यन्तराश्चैव ये च वैशेषिका इति।। तत्रैव० 1/7.

भवन्ति। ये दोषस्थितित्वेऽपि आश्रयविशेषाद् गुणत्वमाश्रीयन्ते तै वैशैषिकाः। अनेनैव प्रकारेण काव्यशरीरेऽपि ये शब्दार्थावाश्रित्यतिष्ठन्ति ते अन्वयादिवत् बाह्यगुणत्वेन प्रतीयन्ते। येऽर्थमाश्रित्य सौशील्यादिवत् ज्ञायन्ते ते आभ्यन्तरिकाः। प्रमातृविशेषाद् ये उपाधेर्दोषा गुणत्वेनोच्यन्ते ते वैशेषिकाः।[1]

भोजदेवात् पूर्ववर्तिसमये गुणानां शब्दार्थमयी भावनाऽसीत्। आचार्यवामनेन स्पष्टरूपेण गुणानां शब्दार्थयोर्वर्गद्वये विभाजनं कृतमासीत्। भोजदेवेन शब्दार्थयोर्वर्गद्वयातिरिक्तं वैशेषिक गुणवर्गस्य स्थापना कृता।

पूर्ववर्त्याचार्याणां गुणानां दशसंख्या, भोजदेवेन न स्वीकृता प्रत्युत बाह्य शब्दगुणानांमान्तरिकार्थगुणानां, वैशेषिकदोषगुणानां च चतुर्विंशति चर्तुविंशतिः संख्या स्वीकृता। अनेन प्रकारेण भोजदेवस्य गुणानां संख्या 24 + 24 + 24 = 72 द्विसप्ततिर्भवति। भोजदेवेन वाक्यदोषगुणा, वाक्यार्थदोषगुणा अपि प्रतिपादिताः सन्ति। तेषां संकलनेन भोजदेवस्य गुणसंख्या 24 + 24 + 24 = 72 + 24 + 24 = 120 विंशत्युत्तरशतं वर्तते। सम्प्रति बाह्याभ्यन्तरिक वैशेषिकगुणानां विवेचनं क्रियते।

बाह्यशब्दगुणाः—

बाह्यशब्दगुणाना संख्या निम्नप्रकारेण चतुर्विंशतिर्वर्तते—

1. श्लेषः	2. प्रसादः	3. समता
4. माधुर्यं	5. सुकुमारता	6. अर्थव्यक्तिः
7. कान्तिः	8. उदारता	9. उदात्तत्वं
10. ओजः	11. और्जित्यम्	12. प्रेयान्
13. सुशब्दता	14. समाधिः	15. सौक्ष्मं
16. गाम्भीर्यं	17. विस्तरः	18. संक्षेपः

3. बाह्याः शब्दगुणास्तेषु चान्तरास्त्वर्थ संश्रयाः।
वैशेषिकास्तु ते नूनं दोषत्वेऽपि हि ये गुणाः। तत्रैव० 1/61.
अयमेव च गुणालंकारयोर्विषेषो यद्गुणोपादाने नियमोऽलंकारयोगेतु कामचार इति गुणाश्चयुवत्याः शरीरेषु त्रिविधास्तदर्थिनामादरातिशय–हेतवो भवन्ति बाह्या आन्तरा वैशेषिकाश्च। तत्रान्ववायवयौरूपलावण्यादयो बाह्याः शीलवैदग्ध्य महाभाग्यसौभाग्यदयश्चान्तरः। ये तुदोषाअप्याश्रयविशेषाद्युपाधेर्गुणत्वमाश्रीयन्ते ते वैशेषिकाः। **श्रृं०प्र० नवम प्र० पृ० 340.**

19. संमितत्वं	20. भाविकत्वं	21. गतिः
22. रीतिः	23. उक्तिः	24. प्रौढिः[1]

पूर्वोक्तचतुर्विंशतिगुणेषु दशगुणाः त एवसन्ति ये इतः पूर्वं दशगुण निरूपकाचार्यैः स्वीकृता आसन्। चतुर्दशगुणानां भोजदेवो नूतनां कल्पनां विदधौ। तेषां चतुर्दशगुणानां नामानि इत्थमेवसन्ति उदात्तता, और्जित्यं, प्रेयः, सुशब्दता, सौक्ष्म्यं, गाम्भीर्यं, विस्तरः, संमितत्वं, संक्षेपः भाविकत्वं, गतिः, रीतिः, उक्तिः, प्रौढिः। एषु चतुर्दशगुणेषु भोजदेवः प्रेयो भाविकादि अलंकारान् गुणरूपेण मेने।

श्लेषः—

भोजदेवमते सुश्लिष्टपदता श्लेषगुणस्य लक्षणं वर्तते,[2] पदानां भिन्न स्थितौसत्यामपि पदानां एकपदवद् यदि प्रतीतिर्भवति तदा सा एव सुश्लिष्टपदता श्लेषाख्यः शब्दगुणः। भोजदेवेन श्लेषगुणे या सुश्लिष्टपदता प्रतिपादिता सा आचार्यवामनस्य शब्दगुणश्लेषेन सह पूर्णरूपेण सादृश्यं बिभर्ति। यतो वामनेन मसृणत्वस्यार्थो बहूनां पदानामेकपदवत्प्रतीतिः कृतो विद्यते।[3] अस्मात् प्रतीयते यदयंगुणः शैथिल्याभावे स्वीकृतः, शैथल्याभावे दण्डिनापि श्लेषगुणस्य लक्षणं कृतमासीत्[4]।

प्रसादः—

येषां प्रसिद्धार्थपदानांमर्था विख्याताः स्युः तथा येषांमर्थः अनायासेन प्रतीतिपथमवतरेत् स प्रसाद गुणो भवति।[5] प्रसादगुणलक्षणाद् ज्ञायते यदिदं लक्षणं भोजदेवः पूर्णरूपेण दण्डिनः काव्यादर्शात् जग्राह। प्रसादगुण लक्षणे दण्डिनाऽपि प्रसिद्धप्रदानां प्रयोग एव स्वीकृत आसीत्।[6]

---

1. सरस्वतीकण्ठाभरणे 1/63-5.
   श्रृंगारप्रकाशे नवम प्र० पृ० 341.
2. गुणः सुश्लिष्टपदता श्लेष इत्यभिधीयते। स०कं०भ० 1/66.
   सुश्लिष्टपदताश्लेषः। श्रृ०प्र० नवम प्र० पृ० 341.
3. मसृणत्वं नाम यस्मिन् सतिबहून्यपि पदान्येकपदवद्भासन्ते। का०लं०सू० 3/1/11.
4. का०द० 1/43.
5. प्रसिद्धार्थपदत्वं यत्सप्रसादो निगद्यते। स०कं०भ० 1/66.
   प्रसिद्धार्थपदता प्रसादः। श्रृ०प्र० नवम पृ० 341.
6. प्रसादवत् प्रसिद्धार्थम् — का०द० 1/45.

समता—

समतागुणे मृदुप्रस्फुटउन्मिश्रितवर्णैःर्बन्धविधानं प्रवर्तते। अस्मिन् गुणे साम्येन यत् कथनं तदेव समता गुणयुक्तं वर्तते।[1] भोजदेवमते उपक्रमादारभ्य समाप्तिपर्यन्तं, मृदु–स्फुट–मिश्रवर्णानां यद्विधानं तस्य निर्वाहेसति समता गुणो विभाति। आचार्यदण्डीकृतसमतागुणस्य लक्षणेनसह भोजदेवस्य समतागुणस्यलक्षणं अक्षरशः प्रभावितं विद्यते। दण्डिनाऽपि मृदुस्फुटमध्यम एष्वन्यतमा यदि रचनाक्रियते तेनैवप्रकारेण रचना निर्वाहः समतागुणत्वेन प्रतिपादित आसीत्।[2] अतः समतागुणस्य लक्षणं, दण्डीवामनयोः सुतरां साम्यं साध्नोति।

माधुर्यम्—

पदानां पृथक् स्थितिसत्वे भोजदेवेन माधुर्यगुणः स्वीकृतः।[3] अस्य माधुर्यगुणस्योदाहरणं प्रस्तूय तेन कथितमस्ति सन्धेरभावत्वादेव पदानि भिन्नतां भजन्ति तेनैव माधुर्यगुणो वर्तते।[4] सरस्वतीकण्ठाभरणस्य स्वरूपानन्दभाष्ये सन्धिअभावविषये लिखितमस्ति यन्माधुर्ये समासदैर्घ्यं भोजदेवाऽभिमतं न वर्तते भोजस्तु संहितामपि न स्वीकरोति[5]। यतोहि वर्णानामत्यन्तसामीप्ये संहिता भवति।[6]

वामनेन तु समासाभावे पृथक्पदत्वे माधुर्यगुणोऽङ्गीकृत आसीत्। वामनेनास्मिन्गुणे समासाभाव एव स्वीकृतः।[7] वामनस्य पृथकपदत्वं भोजदेवेन माधुर्य-गुणे स्वीकृतम्; परं "पृथकपदत्वं" अस्यपदस्यार्थः संहिताया अभाव एव प्रतिबोधितः।

---

1. यन्मृदु प्रस्फुटोन्मिश्रवर्णबन्धविधिं प्रति।
   अवैषम्येन भणनं समता साभिधीयते।। स०कं०भ० 1/67.
   मृदुस्फुटोन्मिश्रवर्णबन्ध नामवैषम्यं समता। शृ०प्र० नवम प्र० पृ० 341.
2. समंबन्धेष्वविषमं ते मृदुस्फुटमध्यमाः। का०इ० 1/47.
3. या पृथकपदता वाक्ये तन्माधुर्यमिति स्मृतम्। सं०कं०भ० 1/68.
   पृथकपदता माधुर्यं। शृं०प्र० नवम प्र० पृ० 341.
4. अत्र पदेषु संहिताभावात्पृथकपदत्वेन माधुर्यम्। सं०कं०भ० 1 पृ० 88.
5. स्वरूपानन्दभाष्य। सं०कं०भ०। पृ० 89.
6. परः सन्निकर्षः संहिता। लघुसिद्धान्तकौमुदी। 1/4/109 पृ० 8.
7. पृथक्पदत्वं माधुर्यम्। का०लं०सू० 3/1/20.

सौकुमार्यम्–

भोजदेवमतेऽनिष्ठुराक्षराणांप्रयोगेन सौकुमार्यगुणो वरीवर्ति।[1] लक्षणे प्रायः शब्देनैतत्कथितं यद्स्मिन्गुणे आधिक्येन परुषवर्णानां प्रयोगो न भवितव्यः। वाक्ये यद्याधिक्येन परुषवर्णानां प्रयोगोऽभविष्यत्तदा सुकुमारतागुणस्य सद्भावो नाभविष्यत्। आचार्यदण्डिना अनिष्ठुराक्षराणामभावे सुकुमारता गुणस्य लक्षणं कृतमासीत्।[2] तदनन्तरं वामनेनापि पारूष्यरहितायां रचनायां सौकुमार्यगुणः स्वीकृतः।[3] अस्मादेतद् ज्ञायते यद् भोजदेवस्य सुकुमारतागुणविषयिणी धारणा स्वान्त्र्यंनैवावहति।

अर्थव्यक्तिः–

यस्मिन् वाक्ये सर्वेषामभीप्सितार्थानां वाचकानि पदानि स्युस्तथा यत्रार्थ-प्रतीतावध्याहारादीनां आवश्यकता न स्यात्तत्र अर्थव्यक्तिगुणो भवति।[4] एषोऽर्थव्यक्तिगुणो दण्डीकृत अर्थव्यक्तिगुणान्तर्गत नेयार्थत्वदोषाभावरूप एव वर्तते।[5] दण्डिनाप्यर्थव्यक्तिगुणोऽध्याराहारादिकल्पनाविरह एव शब्दगुणत्वेन स्वीकृतः।

कान्तिः–

भोजमते काव्ये बन्धस्य यदुज्वलत्वं सा कान्तिरुच्यते।[6] बन्धस्यौज्वल्यं तदैव भवति यदा किचिंन्नूतनत्वमुपकल्प्य वर्ण्यते। उज्वलता विषये रत्नदर्पण व्याख्यायां कथितमस्ति यत् कान्तवर्णानुप्रासोऽपि कान्त एव भवति।[7] कान्त वर्णस्योदाहरणं भोजदेवेन यदुदाहृतम् तस्मिन्ननुप्रासस्यौज्वल्यमपि लक्ष्यते। एषगुणो वामनस्य कान्तिगुणादभिन्नः। तेनापि रचनाया उज्वलता कान्ति गुणेन निरूपिता।[8]

औदार्यम्–

विकटाक्षरैर्रचितोबन्धः औदार्यगुणोपेतो भवति।[9] विकटाक्षरशब्दस्यार्थविषये

---

1. अनिष्ठुराक्षरप्रायं सुकुमारमिति स्मृतम्। सं०कं०भ० 1/68.
2. काव्यादर्शः 1/69.
3. का०लं०सू० 3/1/22.
4. यत्रसंपूर्णवाक्यत्वमर्थव्यक्तिं वदन्तिताम्। सं०कं०भ० 1/69.
5. का०द० 1/73.
6. यदुज्वलत्वं बन्धस्य काव्ये सा कान्तिरुच्यते। सं०क० 1/69.
7. कान्तवर्णानुप्रासोऽपि कान्तएवभवतीतिमत्वानुप्रासोत्कट मुदाहरतिनिरानन्द इति। सं०कं० रत्नदर्पणव्याख्यायम्। परि० पृ० 92.
8. औज्ज्वल्यं कान्तिः। का०लं०सू० 3/1/25.
9. विकटाक्षरबन्धत्वमार्यैरौदार्यमुच्यते। सं०कं०भ० 1/70.

भोजेन पदानां नृत्यत्वमेव स्वीकृतम्। अस्मिन् गुणेऽपि किञ्चिन्नूतनत्वं न लक्ष्यते अपितु वामनस्येवोदारतागुणस्यरूपान्तरोयम् भोजदेवस्यौदार्यगुणः। वामनेनाऽपि बन्धस्य विकटत्वमुदारता गुणस्यलक्षणं समङ्कितम्।

उदात्तत्वं—

श्लाध्यविशेषणानांयोग उदात्तत्वगुणो वर्तते।[1] अस्मिन्गुणे श्लाध्यत्व विशेषणैः सहृदयहृदयावर्जनस्य क्षमता द्योतिता भवति। भरतेन उदारतागुणस्य यल्लक्षणं विहितमासीत् तस्मिन्लक्षणे विविधविधार्थविशेषप्रतिपादकैश्शब्दै-रतिविचित्रार्थैर्युक्त उदारताख्योगुणः प्रतिपादितः[2]। दण्डिना भरतोक्तोदात्तता-गुणानुरूपं श्लाध्यैर्विशेषणैरुदारता नाम गुणः कथितः।[3] भोजदेवेनोदात्तत्वगुण निरूपणे दण्डी मतमेव समुपन्यस्तम्। अनेनप्रकारेण भरतेन उदारता गुणस्य द्वे लक्षणेऽभिहिते एकस्मिन्नुदारत्व शब्दस्य प्रयोगो वर्तते द्वितीये उदात्तशब्दस्य प्रयोगो विद्यते। भरतोक्तोदारतालक्षणाधारेण भोजदेवः औदार्य, उदात्तत्वमिति गुणद्वयमकल्पयत्।

ओजः—

भोजदेवेन समासस्याधिक्ये ओजो गुणः स्वीकृतः।[4] एतल्लक्षणं दण्डीकृत ओजोगुणस्य लक्षणमनुसरति।[5] असमासत्वदोषगुणनिरूपण प्रसंगे कथितमस्ति यदत्यधिकैः समस्तपदैः ओजोगुणो भवति; स दीप्तार्थेषु प्रयुज्यते। परमेतद्विपरीतं असमस्तत्व दोषो जायते यदि समस्तपदानि दीप्तानिस्युस्तदा दोषो नैव वरीवर्ति।[6]

---

1. श्लाध्यैर्विशेषणैर्योगो यस्तु सा स्यादुदात्तता। सं०क०भ० 1/70.
   श्लाध्य विशेषण योग उदात्तत्वम्। शृं०प्र० नवम प्र० पृ० 342.
2. ना०शा० 16/11.
3. का०द० 1/79.
4. ओजः समासभूयस्त्वम्। सं०कं०भ० 1/71 पृ० 94.
5. का०द० 1/80.
6. ओजः समासभूयस्त्वं तद्दीप्तार्थेषुबध्यते।
   विपर्ययोऽस्याः समस्तं तद्दीप्तं चेन्नदोषभाक्। सं०कं०भ० 1/32.

और्जित्यम्–

बन्धस्य या गाढता सा एव और्जित्याख्यगुणेन व्यवह्रियते।[1] और्जित्य गुणस्यलक्षणं वामनस्य ओजोगुणलक्षणानुसारं विद्यते।[2] "रत्नदर्पणव्याख्यायां" प्रतिपादितं यत् सन्दर्भस्य महाप्राणता गाढत्व शब्देनोच्यते। यत्र महाप्राणतायाः सन्निवेशोभवति तत्र और्जित्यगुणोराजते महाप्राणाताशब्दस्यार्थः महाप्राणवर्णानां प्रयोगो नैवास्ति, अपितु क्रमेण ईदृशानां वर्णानां विनिवेशो वाक्येस्यात् यैर्मध्येऽवरोधो जायेत्।[3]

प्रेयः–

चाटूक्तिभिः परेषांकृते प्रियाख्यानव्याख्यानमिति प्रेयो गुणः[4]। आचार्य दण्डिना वक्तुः श्रोतुर्वा प्रियतरभावस्याभिव्यक्त्या प्रीतिविशेषकरं यदाख्यानं तत् प्रेयोनामाऽलंकारो भवतीति प्रतिपादितम्।[5] अतो भोजस्य प्रेयोनाम गुणो दण्डीकृत प्रेयो अलंकारस्यैव नामान्तरं वर्तते। परं भोजेन प्रेयोगुणे चाटूक्त्या सन्निवेशः आधिक्येन कृतः।

सुशब्दता–

व्याकरणशास्त्रोक्तसुबन्ततिंङ्न्तशब्दानां व्युत्पत्तिः सुशब्दतागुणो भवति।[6] इतः पूर्वं वृन्ताकपाकनिरूपणावसरे वामनेन कथितमासीत् सुबन्ततिंङ्न्तयोः संस्कारमात्रं सारं यस्यांरचनायां स्यात् तेन वस्तुगुणः क्लिष्टो भवति, येभ्यः कवयो विभ्यति[7]। परं भोजदेवेन एतद्विपरीतं सुबन्ततिंङ्न्तानां व्युत्पत्तिर्गुणत्वेनाभिहिता।

---

1. और्जित्यं गाढबन्धता। तत्रैव० 1/71.
2. का०लं०सू० 3/1/5.
3. उर्जितो महाप्राणस्तस्य भाव और्जित्यं तत्र सन्दर्भस्य–महाप्राणता गाढत्वमन्तरा विलम्बितनयादभिः प्रयोगैः कुण्डिलत्वम्। सं०कं०भ० रत्नदर्पण व्याख्यायाम् पृ० 96.
4. प्रेयः प्रियतराख्यानं चाटूक्तौ यद् विधीयते। सं०कं० 1/71.
5. प्रेयः प्रियतराख्यानं इत्यादि–का०द० 2/275.
6. व्युत्पत्तिः सुप्तिङ्ां यातु प्रोच्यते सा सुशब्दता। सं०कं०भ० 1/72.
7. सुप्तिङ्संस्कारसारंयत् क्लिष्टवस्तु गुणं भवेत्।
   काव्यं वृन्ताकपाकंस्याज्जुगुप्सन्ते जनास्ततः। का०लं०सू० पृ० 117.

समाधिः—

यत्र कविना अन्यधर्मोऽन्यत्रारोप्यते अर्थात् अप्रस्तुतपदार्थस्य धर्मः प्रस्तुत-वस्तुनि आरोप्यते स समाधिगुणो वर्तते।[1] भोजदेवस्य समाधिगुणस्य- लक्षणं साक्षाद्दण्डीप्रतिपादित समाधिगुणस्य प्रतिबिम्बितं विद्यते।[2]

सौक्ष्म्यम्—

यस्माकस्माच्चिदपिवाक्याद् वाच्यार्थ (सामान्यार्थ) प्रतीत्यनन्तरं तस्मादेव यद्यन्यार्थस्य प्रतीतिर्जायेत तत्र शब्दानां सौक्ष्म्यगुणो भवति।[3] अस्मिन् सौक्ष्म्यगुणे शब्देभ्यो वाच्यार्थाद्यतिरिक्तमन्यार्थस्य प्रतीतिः स्वीक्रियते। सूक्ष्मरूपेणार्थ-प्रतीतेर्कारणं सौक्ष्म्यगुणो वर्तते। अत्रैतत्कथनीयमस्ति यद् भोजदेवेन शब्दगुणेषु पञ्चदशसौक्ष्मगुणविवेचनपर्यन्तं द्वयोः प्रेयसौक्ष्मगुणयोः स्वतन्त्रोद्भावनया-निरूपणं कृतम्, प्रेयोगुणेऽपि एकैवशब्दस्योद्भावना स्वतन्त्ररूपेण प्रकटिता। "अन्तः सत्रजल्परूपत्वशब्दस्य "चेष्टाविशेषरूपोऽर्थो विद्यते। सोऽर्थो यदि कुशाग्रमतिभिरेव संलक्ष्यते तदा दण्डीरूद्रटयोः सूक्ष्मालंकारात् भोजदेवस्य सौक्ष्मगुणोऽभिन्नत्वेन विद्यते।[4]

गाम्भीर्यम्—

अस्मिन् गाम्भीर्यगुणलक्षणे "ध्वनिमता" शब्दस्यप्रयोगो, व्यंग्यार्थस्य प्रतीतिं कारयति। भोजदेवस्य एष अभिप्रायो विद्यते, "यत्र व्यञ्जनाख्या वृत्या अन्यार्थस्य-प्रतीतिस्यात्तत्र गाम्भीर्य गुणः संभवति।[5]"

रत्नदर्पणव्याख्यायां ध्वननंध्वनिर्व्यजंनात्माव्यापारः"। स द्विविधः शब्दध्वनिः, अर्थध्वनिश्च। येन शब्द एव ध्वन्यते स शब्दध्वनिरभिमतइति केचित्, तन्न। शब्दस्यैव ध्वन्यतानङंगीकारात्। तस्माच्छब्दाश्रितं ध्वननं शब्दध्वनिरर्थाश्रितंचार्थध्वनिरिति वक्तव्यम्। प्रभूतध्वनिसबद्धपदकदम्बकस्य

---

1. समाधिः सोऽन्यधर्माणां यदन्यत्राधिरोपणम्। सं०लं०भ० 1/72.
   अन्यधर्मस्यान्यत्रारोपणं समाधिः। शृं० प्र० नवम प्र० पृ० 343.
2. का०द० 1/93.
3. अन्तःसंजल्परूपत्वं शब्दानां सौक्ष्ममुच्यते। सं०क० 1/73.
   शब्दानामन्तः संजल्परुपता सौक्ष्म्यम्। शृं०प्र० पृ० 343.
4. का०द० 2/260, अलंकार सर्वस्व। का० 76 पृ० 647.
5. ध्वनिमत्तातु गाम्भीर्यम्। सं०क०भ० 1/73.

गाम्भीर्यम्।[1] अथवा ध्वनयतीति ध्वनिः शब्दात्मको यत्रास्ति पदसमुदायस्तद्-गाम्भीर्यम्।

आनन्दवर्धनेन ध्वनिसिद्धान्तस्य स्थापना कृतासीत्। तस्य ध्वनिसिद्धान्तस्य गुणरूपेण यत् प्रतिपादनंकृतम् तदौचित्यं न धत्ते।

विस्तरः–

विस्तारेण विषय प्रतिपादनपूर्वकं स्वल्पैरेव शब्दैः यमभिप्रायं कथयितुं शक्यते तस्य–अभिप्रायस्य व्यासेनकथनं 'विस्तर' नाम गुणो विद्यते।[2] भोजदेवस्य विस्तराख्यो गुणः वामनस्य प्रौढेः प्रथमभेदात् भिन्नो नास्ति। वामनेनार्थगुण ओजसो निरूपणाऽवसरेऽर्थस्य प्रौढिः पंचविधा निरूपितासीत्[3] अतः पदार्थेवाक्यरचना इति प्रौढेः प्रथमभेदस्यापरः प्रकारो विस्तरगुणः।

संक्षेपः–

यत्र संक्षेपेणवर्णनं क्रियते तत्र संक्षेप गुणो भवति।[4] एषगुणः विस्तराख्य गुणस्य वैपरीत्ये दृश्यते, गुणोऽयं अर्थगुण ओजसः प्रौढे श्चतुर्थप्रकारादभिन्नः।[5]

"शृंगारप्रकाशेऽपि" समासेन प्रतिपादनम् संक्षेपगुणस्य लक्षणं कृतम्।[6]

संमितत्वम्–

यावन्तोअर्थाअपेक्षिता भवन्ति तावतांपदानामभिधानेन संमितत्व शब्दगुणो लसति।[7] वर्ण्यमानविषयानांवर्णनं विस्तरगुणे विस्तरेण क्रियते, संक्षेपगुणे विस्तृत विषयस्य संक्षेपेणवर्णनं भवति, परं संमितत्वगुणे नाधिकैः स्वल्पैर्वा-शब्दैर्वर्णनंप्रजायते अपितु अर्थानुसारं तावन्मात्रशब्दानां प्रयोगोऽपेक्षते।

भोजदेवेनाऽस्मिन् गुणे तुलायां स्थापितवस्तूनां सेटकादीनां परिमाणवत्–शब्दार्थयोस्तुल्यत्वेन संमितत्वगुणो भवति, इत्यभिहितम्।[8] अस्मिन् गुणे

---

1. स०कं०भ० रत्नदर्पण व्याख्यायाम्। पृ० 101.
2. व्यासेनोक्तिस्तु विस्तरः। सं०कं०भ० 1/73.
3. का०लं०सू० 3/2/2.
4. समासेनाभिधानं यत्स संक्षेप उदाहृतः। सं०कं०भ० 1/73.
5. का०लं०सू० 3/2/2.
6. समासाभिधानं संक्षेपः। शृं०प्र० नवम प्र० पृ० 343.
7. यादवर्थपदत्वं च संमितत्वमुदाहृतम्। सं०कं०भ० 1/74.
8. अत्रार्थस्य पदानां च तुलाविधृतवत्तुल्यत्वेन संमितत्वम्। सं०कं०भ० पृ० 104.

अर्थादधिकपदानां प्रयोगो नैवापेक्षते। अस्यगुणस्य विषये भोजदेवस्याभिनवाधारणा अक्षिलक्ष्यीभवति।

भाविकत्वम्–

भावानुसारं वाक्ये पदानां प्रयोगः भाविकत्वशब्दगुणो वर्तते।[1] पूर्ववर्तिभिराचार्यैःर्भाविकत्वालंकारस्य प्रबन्धविषयकगुणत्वेन निरूपणं विहितम्,[2]। भोजेन तु साक्षात् गुणत्वेनास्यालंकारस्य निरूपणं कृतम्।

पूर्ववर्त्याचार्याणां भाविकालंकारस्य प्रबन्धविषयकगुणविषयिणीधारणा "सरस्वतीकण्ठाभरणे" साक्षात्–गुणरूपेण व्यवस्थिता। आचार्यदण्डिना महाकाव्यनाटकाख्यायिकादिषु चमत्कृत्याधायकगुणविशेषः कवेर्भावः भाविकालंकारो भवतीत्यभिहितम्। यतोहि कवेर्भाव आसिद्धिसमाप्तिपर्यन्तं तिष्ठति। अतः प्रबन्धगतोऽयमलंकारः। भोजदेवेन भाविकत्वगुणलक्षणे वाक्यशब्दस्य प्रयोगः कृतो विद्यते नतुप्रबन्धशब्दस्य। अतोऽत्र कथयितुं शक्यते यद् भोजदेवस्य भाविकत्वगुणः प्रबन्धगतो न वर्तते, अपितु वाक्यगतएव। अस्य गुणस्य लक्षणं शब्दगुणेषु कृतम्।

"रत्नदर्पण व्याख्यायां" उद्बुद्धेषु हर्षादिभावेषु चेतो निमज्जति तदा विविधा उक्तिभेदाः समुत्पद्यन्ते त एव भोजदेवेन भाविगुणेनोक्ताः।[4] शृंगारप्रकाशे साभिप्रायेनयत् कथनं तदेव भाविकत्वगुणः[5], अस्यगुणस्योदाहरणरूपेण "दृष्टिं हे प्रतिवेशिनि" इत्यादिपद्यमुदाहृतम्, एतन्निदर्शनं साहित्यदर्पणे अर्थशक्त्युद्भवस्योदाहरणरूपेण गृहीतम्। अस्मिन्नुदाहरणे भाविपरपुरुषोपभोगजनखक्षतादि गोपनरूपं वस्तुमात्रंव्यज्यते, अत्र यद्भावानां गोपनं तदेव शृंगारप्रकाशे भाविकत्व गुणेनोक्तम्।

---

1. भावतो वाक्यवृत्तिर्या भाविकं तदुदाहृतम्। सं०कं०भ० 1/75.
2. भाविकत्वमितिप्राहुः प्रबन्धविषयं गुणम्।
   तद्भाविकमितिप्राहुः प्रबन्धविषयं गुणम्।
   भावः कवेरभिप्रायः काव्येष्वासिद्धिसंस्थितः। का०द० 1/364
   "काव्येष्वस्यव्यवस्थितिः"
3. हर्षादि भावितचेतसोहिवीचिप्राया उक्तिभेदाः प्रादुर्भवन्ति यैरप्रत्यूहमेव भावोऽभिव्यज्यते तदिदयुक्तं या भावतो वाचःकाव्यरूपायाः प्रवृत्तिर्निष्पत्तिः सैव भाविकम्। सं०कं०भ० रत्नदर्पण व्याख्यायां पृ० 106.
4. साभिप्रायोक्तिर्भाविकत्वम्। शृं०प्र० नवम प्र० पृ० 347.
5. स०द० चतुर्थ परि० पृ० 135.

ध्वनिवादिनामाधारेणैव अद्य काव्यस्यकाव्यत्वं वर्तते। रसेष्वेव गुणानामन्तः भावे स्वीकृते सति अथवा कान्तिगुण एव गुणानांरसानाचान्तःभावे स्वीकृते सति समग्रा गुणविषयिणी व्यवस्था समूलोन्मूलतामेष्यति। वामनेन गुणानां विपर्यये दोषाणां प्रतिपादनं कृतम्, नतु दोषवैपरीत्ये गुणानाम्, परं मम्मटेन दोषवैपरीत्ये गुणानां खण्डनं कृतम्। एतदपि सम्भवति यन्मम्मटेन दोषविपर्ययो गुण इति भरत गुणलक्षणात् संकेतंप्राप्य वामनस्य गुणानामन्तर्भावंकर्तुं योजना सुनियोजिता याद्य पर्यन्तं सर्वमान्याऽतिष्ठत्। समुचितप्रकारेण मम्मटेन वामनोक्त शब्दार्थगुणानामन्तर्भावो प्रदर्शितः, परं भरतोक्तानां तथा दण्डयोक्त गुणानामन्तर्भाव विषये न किमप्यभिहितम्। यया रीत्या गुणानामन्तर्भावः प्रदर्शितः तया पद्धत्या भरतोक्तश्लेषगुण प्रथमलक्षणस्य,[1] समतायाः प्रथमलक्षणस्य,[2] उदारतायाः प्रथमलक्षणस्य,[3] समाधिगुणस्य प्रथमलक्षणस्य,[4] अन्तर्भावो न सम्भवः। अनैनेव प्रकारेण दण्डयोक्तप्रसादगुणस्य समाधिगुणस्य च,[5] अन्तर्भावो न युज्यते।

दण्डयोक्तमाधुर्यौजोगुणयोः पृथक् सत्ता विद्यते।[6] भरतदण्डुयक्ताना मेभ्योऽन्येषां गुणानांमन्तर्भावो मम्मटरीत्या भवितुं शक्यते। दण्डयोक्तार्थव्यक्ति गुणस्य स्वभावोकत्यालंकारेण ग्रहणं भवति, अथवा नेयार्थत्वदोषा भावरूपोऽर्थव्यक्तिः गुणः।[7]

गतिः—

आरोहावरोहवक्रमो भोजमते गत्याख्यो गुणो वर्तते।[8] अस्मिन् गुणे छन्दःसु स्वराणां य आरोहावरोहो भवति स एव गतिगुणेनाचक्षते। एष गुणो वामनस्य आरोहावरोहक्रम रूपस्य समाधिगुणस्य सदृश एव विद्यते।[9] अस्यगुणस्य

---

1. ना०शा० 16/97.
2. तत्रैव० 16/100.
3. तत्रैव० 16/110.
4. तत्रैव० 16/102.
5. का०द० 1/45-93.
6. तत्रैव० 1/51-80.
7. तत्रैव० 1/73.
8. गतिर्नाम क्रमो यः स्यादिहारोहावरोहयोः। कं.कं० 1/75.
9. का०लं०सू० 3/1/13.

श्रृंगारप्रकाशे यल्लक्षणं भोजदेवेन कृतम् तदुपर्युक्त गतिलक्षणाद् भिन्नम् "श्रृंगारप्रकाशेतु" एकस्मादर्थादर्थान्तरस्य प्रतीतिर्गतिगुणस्य लक्षणं विहितम्[1]। अतो भोजमतेऽपि एतन्निश्चेतुं न पार्यते यद् गतिगुणस्यलक्षणमारोहावरोहक्रमे वरीवर्ति। अस्यगुणस्य सम्भवतो भोजस्य परिष्कृतलक्षणं–आरोहावरोहस्य क्रम एवस्यात्। यतोहि छन्दःसु स्वराणामारोहावरोहो जायते स आरोहावरोह एव गतिगुणत्वेनोच्यते।

रीतिः–

भोजदेवमते उपक्रमस्य निर्वाहो रीतिगुणो भवति[2]। आचार्यदण्डिनाऽपि काव्यसंघटनासु मृदुस्फुटमध्यमभेदेन अवैषम्यं स्वीकृतमासीत्[3]। एवं च वामनेनार्थगुणसमता निरूपणे निर्दिष्टं येन मार्गेण रचनायाः प्रारम्भः स्यात् तेनैव मार्गेणोपादनं समता गुणः।[4] दण्डीवामनयोः समतागुणलक्षणात् भोजदेवस्य रीतिगुणस्यलक्षणं साम्यमाकलयति।

उक्तिः–

विशिष्टं कथनं कविभिरूक्ति शब्देन अभिहितम्। भोजदेवेन सा उक्ति विशिष्टाभणिति श्शब्दगुणरूपेण निरूपिता।[5] कविः स्वप्रतिभासामर्थ्यात् यस्यकस्यचिदपिविषयस्य अलौकिकत्वेन वर्णनं कुर्वन् काव्ये चमत्कारमादधाति चमत्काराभावात् कावेरुक्तिः साधारणवाक्यत्वेनोपतिष्ठते अत एव भोजदेवमते कवेर्विशिष्टा उक्ति गुणत्वं प्राप्नोति।

प्रौढिः–

उक्तेः परिपाको भोजमते प्रौढिगुणो वर्तते।[6] प्रौढिगुणलक्षणे समागतस्य पाकशब्दस्य विषये रत्नदर्पणव्याख्यायां वाक्यस्यपाकः प्रौढिगुणत्वनोच्यते, यदा कवेः रचनायां परिपक्वता भवति तदैव रचना पाकमयी जायते। तत्र येषांशब्दानांप्रयोगः कृतो विद्यते तेषांशब्दानां स्थाने पर्यायत्वेन

---

1. श्रृं०प्र० नवम प्र० पृ० 347.
2. उपक्रमस्य निर्वाहो रीतिरित्यभिधीयते। सं०कं०भ० 1/76 पृ० 107.
3. का०द० 1/47.
4. का०लं०सू० 3/1/12.
5. विशिष्टाभणितिर्यास्यादुक्तिं तां कवयो विदुः। सं०कं० 1/76.
6. उक्तेः प्रौढः परीपाकः प्रोच्यते प्रौढिः संख्या। तत्रैव० 1/77.

अन्यशब्दानां प्रयोगः नैवकर्तुं शक्यते।[1] एतत् कवेः सामर्थ्यं वर्तते यदसौ स्व चातुर्येण वाक्ये येषांशब्दनांप्रयोगं करोति स प्रयोगः उचित एव प्रभवति। तेषांशब्दानां प्रयोगोऽन्यथाकर्तुं नैव पार्यते। कवेरेषा परिपक्वता पाकशब्देनाभिधीयते। आचार्यवामनेनार्थगुणनिरूपणेअर्थस्य प्रौढ़िरोजो गुणो वर्तते इत्यभिहितम्।[2] तदनन्तरं गुणानां स्फुटत्वंपूर्णत्वंच काव्यपाकनाम्ना अभिहितम्।[3]

राजशेखरेणाऽपि कथितमस्ति यद् वारमेकं प्रयुक्ताः शब्दा यदि पर्याय परिवर्तनं न सहन्ते तदा शब्दपाको भवति।[4] अस्मिन्पाकविषये अवन्तिसुन्दर्या मतं वर्तते यत् गुणालंकाररीत्युक्तीनामनुसारं शब्दार्थयोर्निबन्धनं वाक्यपाको संजायते।[5]

राजशेखरमते यत्र पदानां परिवर्तनस्यावश्यकता न स्यात् तत्र शब्दपाकोभवति।[6] एवं प्रकारेण पाकार्थं स्पष्टयन् नवपाकानां निरूपणं कृतं विद्यते। अस्यैवपाकस्य भोजदेवेन प्रौढिगुणस्य यदुदाहरणं वर्तते तस्मिन्नुदाहरणे नालिकेरपाकोवर्तते।[7] नारिकेर पाक आदितोऽन्तपर्यन्तं मधुरोभवति।[8]

भोजदेवस्याभ्यन्तरिकार्थगुणानां विवेचनम्–

भोजदेवः यान्बाह्यांश्चतुर्विंशतिशब्दगुणान् प्रतिपादितवान् त एवार्थ गुणास्सन्ति, परं तानि लक्षणानि शब्दगुणेभ्यः, पृथक् भूतानीतिनिर्दिदेश। सम्प्रति तेषामर्थगुणानां विवेचनं क्रियते।

---

1. उक्तेर्वाक्यस्यायं पाकः सा प्रौढिः। शब्दानां पर्यायपरिवर्तासहत्वं पाकः स०कं० रत्नदर्पणव्याख्यायां पृ० 110.
2. का०लं०सू० 3/2/2.
3. तत्रैव० पृ० 117.
4. यत्पदानित्यजन्त्येव परिवृत्तिसहिष्णुतां।
   तंशब्दन्यायनिष्णाताः शब्दपाकं प्रक्ष्यते।। का०मी० पृ० 50.
5. गुणालंकाररीत्युक्तिशब्दार्थग्रथनक्रमः।
   स्वदते सुधियां येन वाक्यपाकः स मां प्रति। तत्रैव० पृ० 50.
6. कार्यानुमेयतया यत्तच्छब्दनिषेधः परं पाकोऽभिधाविषयस्तत्सहृदयप्रसिद्धिसिद्ध एव व्यवहारांगमसौ इति यायावरीयः। तत्रैव० पृ० 50.
7. तथा चैतद्वाक्यं नालिकेरपाक इत्युच्यते। सं०कं०भा० पृ० 109.
8. आद्यन्तयोस्वादु–नालिकेरपाकमिति। का०मी०भा० पृ० 52.

श्लेषः–

संविधानेसुसूत्रता श्लेषगुणो भवति।[1] यत्र किमपिकार्यं कर्तुं सौन्दर्येण विधाननिरूपणंस्यात्तत्रोक्तगुणः प्रतिभाति।

एतत्–श्लेषगुणस्य लक्षणं वामनस्यार्थगुणश्लेषगुणानुरूपं वर्तते। वामनेन घटनाश्लेष इत्युक्त्वा, सा घटना क्रमकौटिल्यअनुल्वणत्वउपपत्तियोगभेदैः पंचविधा निरूपिता।[2] रत्नदर्पणव्याख्यानुसारं भोजदेवोऽपि संविधानशब्देन वामनोक्तघटनां स्वीकरोति।[3]

प्रसादः–

शब्दानामनुपादानेऽपि स्पष्टरूपेणार्थप्रतीतौ अर्थगुणः प्रसाद एव कारणं वर्तते।[4] अस्मिन् गुणेऽनुच्चारितेशब्देप्यर्थप्रतीतिर्भवतीति। भोजदेवस्य प्रसादगुणस्यैतल्लक्षणं भरतस्य वामनस्य च प्रसादगुणलक्षणात् प्रभावितो विद्यते[5]। यतः भरतेन अनुक्त्वैव शब्दस्याथवा अर्थस्य बोधात् प्रसाद गुणः स्वीकृतः अनेनैवप्रकारेण अर्थस्य वैमल्येसति वामनेन "प्रसाद" गुणस्य निरूपणं कृतम्।[6]

समत्वम्–

वर्णनीयविषयाणां क्रमाभेद एव समतानामार्थगुणः।[7] येनक्रमेणार्थस्य वर्णनं युक्तियुक्तं स्यात्तस्य क्रमस्यापरित्यागात् समतागुणो भवति। आचार्य वामनेन अवैषम्यमेव समतागुणस्य लक्षणं लक्षितमासीत्।[8] भोजदेवेनापि समतागुणस्यलक्षणं वामनोक्तसमतागुणस्यलक्षणानुसारंविहितम्। एष गुणः प्रक्रमाभेद एव वर्तते।[9]

---

1. तेषां श्लेष इति प्रोक्तः संविधाने सुसूत्रता। स०कं०भ०
2. का०लं०सू० 3/2/4.
3. तथाच क्रमेण कौटिल्येनानुल्वणतया उपपत्या योजनमर्थस्य श्लेष इति तत्र संविधानंक्रमानुल्वणत्वेन सूत्रशब्देनोपात्ते स्व पदेन कौटिल्यमुक्तमघटमानस्येव वाक्यार्थस्य वुद्धिचातुर्येण घटनेति वाक्यार्थः। सं०कं० रत्नदर्पण व्या० पृ० 112.
4. यत्तु प्राकट्यमर्थस्य प्रसादः सोऽभिधीयते। सं०कं०भ० 1/79 पृ० 112.
5. ना०शा० 16/99.
6. का०लं०सू० 3/2/3.
7. अवैषम्यं क्रमवतां समत्वमिति कीर्तितम्। सं०कं० 1/79.
8. का०लं०सू० 3/2/5.
9. का०लं०सू० कामधेनुटीकायाम्। पृ० 108.

माधुर्यम्–

क्रोधादिवर्णने तीब्रतायाअभाव एव भोजमते, माधुर्यनामार्थगुणोऽस्ति।[1] एतन्माधुर्यगुणस्यलक्षणमतीव वैलक्षण्यं धत्ते। सर्वप्रथममर्थगतमाधुर्यगुणस्य लक्षणं अन्येषामाचार्याणांमते प्रतिपादितम्, तेषां नामानि भोजदेवेन न निरूपितानि येषां–आचार्याणां माधुर्यगुणलक्षणानि साहित्यशास्त्रे सन्ति तेषुलक्षणेषु ईदृशं लक्षणं न कुत्रापि दृश्यते यत्र क्रोधादिवर्णने तीव्रताया अभावो माधुर्यमिति, भोजदेवाभिमतअर्थगता माधुर्यगुणस्य धारणा अग्निपुराणस्य माधुर्यगुणे द्रष्टुं पार्यते, येन अग्निपुराणस्य स्थितिकालो भोजदेवात् प्राग् वर्तते। तस्मान्-निश्चप्रचमेव भोजदेवस्येयंधारणा अग्निपुराणानुसारिणी लक्ष्यते। अग्निपुराणे क्रोधेर्ष्यादिदशायां धैर्यधारणं माधुर्यमिति लक्षितमस्ति।[2] स्वकार्यसिद्धये क्रोधेर्ष्यादीन् दोषान् विहाय पुरुषोऽन्यैसह मधुरं बदति, परमेतन्मधुरं व्यक्तौ तिष्ठति सम्भवतो भोजदेवेन रचनास्वप्यभीप्सितकार्य सिद्धर्थं नाटकादिष्वस्य-गुणस्य प्रयोगः स्वीकृतो भवेत्।

सौकुमार्यम्–

भोजदेवमते–अनिष्ठुरत्वं सौकुमार्यनाम्नोऽर्थगुणस्य लक्षणंवर्तते।[3] कोमलप्रसंगे सम्प्राप्ते स्वात्मनि कठोरताया अभावएव सुकुमारता। आचार्यदण्डिना कठोर वर्णानामभाव एव अनिष्ठुराक्षर शब्दस्यार्थः स्वीकृत आसीत्।[4] वामनेन परुषेऽर्थेसत्यपि अपारुष्यप्रयोगे सौकुमार्यगुणो निरूपितः।[5] परं भोजदेवस्यार्थगत सौकुमार्यगुणस्य लक्षणमाभ्यांभिन्नं विद्यते।

अर्थगत''सौकुमार्य''गुणस्य यदुदाहरणं लक्ष्यते तस्मिन्नुदाहरणे शिरीषपुष्पसदृशीकोमलांगी सीता त्रिचतुराणि पदानि यदा रामेणसह वनं गतवती तदा अयोध्यानगर्याः समीपे एव अधुना कियद्गन्तव्यं इति वारंवारमुक्त्वा रामस्यचक्षुषी प्रथमवारं अश्रुपूर्णे कृतवती अर्थाद् रामः गदगद्वाष्पलोचनः समभूत।[6] अत्र कोमलांग्याः सीतायाः शरीरं दृष्ट्वा रामस्य अश्रुप्रवाह एव सुकुमारता विद्यते। शृंगारेकरुणे च स्वस्य तन्मयता सौकुमार्याख्योगुणो भवति।

---

1. माधुर्यमुक्तमाचार्यैः क्रोधादावप्यतीव्रता। सं०कं०भ० 1/80 पृ० 114.
2. क्रोधेर्ष्याकार गम्भीर्यान्माधुर्यं धैर्य गाहिता। अ०पु०अ० 346/13 पृ० 502.
3. अनिष्ठुरत्वं यत्प्राहुः सौकुमार्यं तदुच्यते। सं०कं०भ० 1/80.
4. का०द० 1/69.
5. का०लं०सू० 3/2/12.
6. अत्र सीतायाः पुरीपरिसरेऽपि कियदस्तिगन्तव्यमिति वचनं शृण्वतो रामस्य शिरीष मृदुतदंगावलोकनेनाश्रुणोऽवतारः सौकुमार्यमाह। सं०कं०भ० पृ० 115.

अर्थव्यक्तिः–

वर्ण्यमानविषयस्य साक्षात्स्वरूपकथनमर्थगतः "अर्थव्यक्ति" गुणोऽस्ति।[1] अस्मिन् गुणे वर्ण्यमानस्य तद्वत्ता भवति। अस्यगुणस्य लक्षणं वामनोक्त अर्थव्यक्तेरर्थगुणाद् भिन्नं न विद्यते।[2]

कान्तिः–

श्रृंगारादिरसानां दीप्तत्वं, कान्तिनाम्नोर्थगुणस्य लक्षणम्।[3] एतत् कान्तिगुणस्य लक्षणमपि वामनाभिमतअर्थगतकान्तिगुणस्य लक्षणानुसरणं करोति।[4] "श्रृंगारप्रकाशेतु" पूर्णरूपेण अर्थगतकान्तिगुणस्य लक्षणंलभ्यते यो वामनाशयं निवेदयति।[5]

उदारत्वम्–

भूत्युत्कर्ष "उदारता" अर्थगुणस्यलक्षणं वर्तते,[6] अस्मिन् गुणे सम्पत्याः प्रकर्षेण लोकोत्तरंचित्रणं भवति। भोजदेवस्यैषगुण आचार्यदण्डयुक्त उदात्तालंकारस्य साम्यमावहति, उदात्तालंकारे अभिप्रायस्यविभूतेर्वातिशयेन महत्वंवर्ण्यते।[7] भोजेनाप्यतिशयेन सम्पत्योत्कर्ष उदारत्वगुणेनाभिहितः। श्रृंगारप्रकाशे उदारत्वगुणस्य लक्षणं विभावोत्कर्षः स्वीकृतम्।[8] भूत्युत्कर्ष "उदारता" गुणस्य लक्षणं कृतम्, इति द्विविधावुद्धिः, एकत्रोदारत्वगुणलक्षणे दण्डयुक्तोदात्तालंकारस्याधारः स्वीकृतः अन्यत्र उदारत्वगुणाभावेलंकार दोषोऽङ्गीकृतः।[9] एवं उदारत्व गुणविषये भोजदेवेन सन्दिग्धविचारः प्रस्तुतः।

---

1. अर्थव्यक्तिः स्वरूपस्य साक्षात् कथनमुच्यते। सं०कं० 1/81.
2. वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः। का०लं०सू० 3/2/14.
3. कान्तिर्दीप्तरसत्वं स्यात्। सं०कं०भ० 1/81.
4. का०लं०सू० 3/2/15.
5. श्रृं०प्र० नवम प्र० पृ० 345.
6. भूत्युत्कर्ष उदारता। स०कं०भ० 1/81.
7. आशयस्य विभूतेर्वा यन्महत्वमनुत्तमम्।
   उदात्तनामतंप्राहुरलंकारमनीषिणः।। का०द० 2/300.
8. विभावोत्कर्ष उदारता। श्रृं०प्र० नवम प्र० पृ० 345.
9. यस्तुरीतेरनिर्वाहादौदार्यस्य विपर्ययः।
   वाक्यंतदनलंकारमलंकार विदोविदुः।। सं०कं०भ० 1/41.

उदात्तत्वम्–

अभिप्रायस्योत्कर्ष "उदात्तत्व" गुणत्वेनोच्यते।[1] एष गुणोऽपि दण्डयुक्त उदात्तालंकारस्य सादृश्यं धारयति।[2]

ओजः–

अनेकार्थेषु वक्तुनिश्चयात्मक निरूपणमर्थगुणओजसो लक्षणम्।[3] निश्चयः अध्यवसायो भवति तत्स्वरूपकं ज्ञानमोजोगुणस्य लक्षणम्। अत्र वक्ता स्वाभिमतं पोषयति। लोकेऽपि स्वमतसमर्थनार्थं जना बलेन स्ववार्तां कथयन्ति, तद्वदेव काव्येऽपि यदि स्वमतं द्रढयितुं निश्चयात्मकबुध्या वैशिष्टयेन प्रतिपादनं भवति तत्र ओजगुणो विराजते। अस्यौजसो निरूपणे भोजदेवस्य स्वतन्त्रोद्भावना विद्यते।

और्जित्यम्–

भोजदेवः प्रौढाहंकारमर्थगुणं–और्जित्येन निरूपितवान्।[4] रचनायां अहंकारद्योतकोक्तीषु अर्थगत और्जित्यगुणो भवति, यस्मिन्नाख्याने प्रौढरूपेण अहंकारोऽभिव्यक्तो भवति तत्र ऊर्जस्विनाम अलंकार दण्डिना स्वीकृत आसीत्।[5] ऊर्जस्विअलंकारलक्षण वद् भोजोऽपि और्जित्यगुणस्य लक्षणं चकार। रूढाहंकार शब्दस्य प्रयोगः-ऊर्जस्विअलंकारलक्षणे तथा और्जित्यगुणलक्षणे उभयत्र विद्यते। अत एष गुणः-ऊर्जस्वि–अलंकारस्य पूर्णतः प्रातिनिध्यं करोति।

प्रेयः–

भोजः अर्थस्याभीष्टत्वं प्रेयोगुणस्यलक्षणं कृतवान्।[6] बहुषुपदार्थेषु कस्यचिदेकस्य पदार्थस्यातिशयेन समर्थनं अर्थगतप्रेयोगुणस्यलक्षणं विद्यते। तेनास्य गुणस्य यदुदाहरणमुदाहृतम्, तस्मिन् रसामृतादाम्रमाधुर्यात् प्रियायाः

---

1. आशयस्य य उत्कर्षस्तदुदात्तत्वमिष्यते। तत्रैव० 1/82.
2. का०द० 2/300.
3. ओजः स्वाध्यवसायस्य विशेषोऽर्थेषु योभवेत्। सं०कं०भ० 1/82.
3. अध्यवसायो निश्चयस्तत्र विशेषः पूर्ववत् तत्रैव० र०द०व्या० पृ० 119.
4. रूढाहंकारतौर्जित्यम्। सं०कं०भ० 1/83.
5. ऊर्जस्वि रूढाहंकारं। का०द० 2/275.
6. प्रेयस्त्वर्थेष्वभीष्टता। सं०कं०भ० 1/83.
   अर्थस्याभीष्टता प्रेयः। शृं०प्र० नवम प्र० पृ० 346.

अधरोष्ठस्य माधुर्यमतिरिच्यते। अत्र वहुषु पदार्थेषु मधुरेषुसत्सु प्रियाया अधरोष्ठ एव मधुरतरत्वेनोक्तः। अतोऽत्र एकस्यैवोष्ठविशेषस्य अभीष्टत्वकथनेन उक्तगुणो वर्तते। वामनेन यदुक्तिवैचित्र्यात्मक माधुर्यगुणस्योदाहरणमुदाहृतम्,[1] तदेवोदाहरणं भोजेन प्रेयोगुणस्योपन्यस्तम्। भोजेन वामनस्य उक्तिवैचित्र्यात्मक माधुर्य- गुणस्योदाहरणमुररीकृत्य तल्लक्षणं प्रेयोगुणस्य न कृतम्।

सुशब्दता–

दारुणार्थप्रतिपादकानां शब्दानां स्थाने अदारूणार्थबोधकशब्दानां प्रयोगः सुशब्दतागुणो भवति।[2] आतंकदायकाशुभप्रसंगेसम्प्राप्ते तत्रादारूणार्थ प्रतिपादकानां शब्दानां पर्यायत्वेन न्यसनं सौशब्द्यम् भवति। तस्य भाव एव सुशब्दता गुणोभवति। सौशब्दयात्–अस्यगुणस्यशब्दगुणत्वं न शंकनीयम् यतो मुख्यार्थस्यपरिवर्तनात् मृद्वर्थेष्वेव व्यञ्जकशब्दानां प्रयोगोऽपेक्षित्वादत्रार्थ गुणोऽस्ति।[3] भोजराजस्य सुशब्दतार्थगुणो वामनस्यार्थगतसौकुमार्यगुणात् पार्थक्यं नैवाकलयति। वामनोऽपि परुषार्थस्थाने अपरुषार्थप्रयोगे सौकुमार्य गुणमचीकीर्तत्।[4]

समाधिः–

आचार्येण अर्थगुणस्यास्य समाधिगुणस्य लक्षणे व्याजावलम्बनत्वं प्रतिपादितम्।[5] लोकेऽपि स्वकार्यसिद्धर्थमथवा स्वभावान् कथयितुं जनैर्व्याजावलम्बनं क्रियते तद् व्याजावलम्बनं व्यक्तिनिष्ठं भवति। अत्रतुभोजदेवः काव्यस्यसमाधिगुण लक्षणे व्याजावलम्बनं निरूपयामास। भोजस्यैषसमाधिगुणः, अर्थदृष्टि स्वरूपेण वामनस्य समाधिगुणेन साम्यं नैवाकलयति।[6] अस्मिन् समाधिगुणे भोजस्य स्वतन्त्रोद्भावना दृश्यते।

---

1. का०लं०सू० 3/2/11.
2. अदारुणार्थपर्यायोदारुणेषु सुशब्दता। सं०कं० 1/83.
3. साच मुख्यार्थव्यतिक्रमस्य वाक्यार्थत्वान्नशब्द गुणः। तत्रैव० र०द०व्या०पृ० 12
4. का०लं०सू० 3/2/12.
5. व्याजाबलम्बनंयत्तु स समाधिरितिस्मृतः। सं०कं०भ० 1/84.
6. का०लं०सू० 3/2/7.

सौक्ष्म्यम्–

सूक्ष्मार्थदर्शनं सौक्ष्म्यगुणोऽस्ति।[1] अस्मिन् गुणे सूक्ष्मार्थस्य दर्शनं भवति– असौ सूक्ष्मोऽर्थः कुशाग्रवुद्धया ज्ञायते।[2] एष सूक्ष्मोऽर्थः- वाच्यार्थादभिन्नत्वेन प्रतीयते वामनेनैकाग्रमनसार्थस्य सद्दर्शनं समाध्याख्योऽर्थगुणोनिरूपितः।[3] भोजेनाऽपि श्रृंगारप्रकाशे सूक्ष्मार्थदृष्टिः सौक्ष्म्यगुणेनाभिहिता।[4]

गाम्भीर्यम्–

भोजदेवेन शास्त्रार्थेसव्यपेक्षत्वेऽर्थगत गाम्भीर्यगुणस्य प्रतिपादनं कृतम्।[5] यदा सामान्यभाषायां प्रयुक्ताः शब्दाः कस्मिंश्चित् शास्त्रविशेषे विशिष्टार्थं बोधयन्ति तदा ते पारिभाषिका भवन्ति। यदि तेषामेवशब्दानां प्रयोगो लौकिक काव्यभाषायां जायते तर्हितेषां शास्त्रीयार्थ एव अपेक्षितत्वात् काव्यार्थे महत्वं धारयति तस्यांदशायां सामान्योर्थोऽपि गाम्भीर्ययुक्तो जायते।[6] अग्निपुराणेऽप्यस्यगुणस्य निरूपणं विद्यते।

विस्तरः–

अर्थस्य विकासो विस्तराख्यो गुणो भवति।[7] अस्मिन्गुणे प्रतिपाद्यविषयस्य विविधप्रकारेण व्यासेन कथनं संभवति। गुणोऽयं वामनाचार्य निरूपितार्थगत-ओजसो प्रौढेस्तृतीयभेदव्यासवद् वर्तते। प्रौढेस्तृतीयभेदे अन्यप्रकारेणार्थस्य विस्तारो वरीवर्ति। एष व्यासप्रकार एव भोजदेवेन विस्तर गुणेनाभिहितः।[8]

---

1. सौक्ष्ममित्युच्यते तत्तु यत्सूक्ष्मार्थाभिदर्शनम्। सं०कं०भ० 1/84.
2. सूक्ष्ममित्यादिवाक्यैकगोचरोऽर्थः कुशाग्रीय वुद्धितयासूक्ष्मस्तस्य दर्शनमुपाय वैलक्षणयात्तत्तद्विशेषवतः प्रत्यक्षायमानता। सं०कं०र०द०व्या० पृ० 12.
3. का०लं०सू० 3/2/7.
4. सूक्ष्मार्थ दृष्टिः सौक्ष्म्यम्। श्रृं०प्र० नवम प्र० पृ० 346.
5. शास्त्रार्थ सव्यपेक्षत्वं गाम्भीर्यमभिधीयते। सं०कं० भ० 1/85.
6. एकपुरुषार्थ प्रयोजनक पदार्थव्युत्पादनं विधिनिषेधव्युत्पत्ति फलकं शास्त्रं तदर्थसव्यपेक्षत्वम्। तदुक्त प्रक्रिया निरूपणाधीन निरूपणत्वं वाक्यार्थस्य गाम्भीर्यम्। तत्रैव० र०द०व्या० पृ० 124.
7. विस्तरोऽर्थ विकासः स्यात्। तत्रैव० 1/85.
8. का०लं०सू० पृ० 102-103.

संक्षेपः—

भोजेनार्थस्यसंवृतिः संक्षेपगुणत्वेन निरूपितः।[1] अस्मिन्गुणे विस्तर गुणात् विपरीता स्थितिः प्रजायते। विस्तरगुणे अर्थस्य विस्तारेण कथनं—अपेक्षते परमत्रार्थस्य संक्षेपेणैव यन्निरूपणं क्रियते स संक्षेप गुणः। एष गुणो वामनोक्त प्रौढेश्चतुर्थभेदेन समासेन सदृशोवर्तते।[2]

सम्मितत्वम्—

यत्र शब्दार्थौं तुल्यौस्तस्तत्र सम्मितत्वगुणउच्यते।[3] अस्य गुणस्योदाहरणत्वेन "इन्दुर्मूर्ध्नि शिवस्य शैलदुहितुः" इत्यादिपद्यं समुपन्यस्तम्। अस्मिन् पद्ये प्रणववाचकस्यार्थस्य समानरूपत्वेन यथावत्, विभाजनं कृत्वा वाक्यस्ययोजना विहितास्ति। अतोऽत्र संमितत्व गुणो विद्यते।[4]

भाविकत्वम्—

साभिप्रायत्वेन यत्कथनं भवति स भाविकत्वगुणो वर्तते।[5] अस्मिन् भाविकत्वगुणे वामनप्रतिपादितप्रौढेः पंचमभेदस्य साभिप्रायत्वस्य प्रभावो विद्यते।[6] भोजेन भाविकत्वगुणस्योदाहरणत्वेन एकं पद्यं प्रस्तुतम् तस्मिन्निदर्शनें दत्तसंकेतायाः कुलटाया भाविपरपुरुषोपभोगसमये—नखक्षतादीनां, नलग्रन्थीभिरालेखनानुकूल व्याजेन यद् गोपनं तदेव साभिप्रायत्वकथनमस्ति तत् साभिप्रायत्वमेवं भोजमते भाविकत्वार्थगुणो विद्यते।[7]

गतिः—

एकस्मादर्थादर्थान्तरस्यावगमो अर्थगतो गतिर्गुणो भवति।[8] अस्मिन् गुणे सहृदयहृदयसवेद्यादर्थात् अनुरणनरूपेण व्यंगयात्मकस्यार्थान्तरस्य

---

1. संक्षेपस्तस्य संवृतिः। सं०कं०भ० 1/85.
2. का०लं०सू० पृ० 102-103.
3. शब्दार्थौयत्र तुल्यौस्तः संमितत्वं तदुच्यते। सं०कं०भ० 1/86.
4. अत्र प्रणवलक्षणस्यार्थस्य तुल्यत्वेन यथावद्विभज्य विनिवेशनं संमितत्वम्। तत्रैव० पृ० 126.
5. साभिप्रायोक्ति विन्यासो भाविकत्वं निगद्यते। सं०कं०भ० 1/86.
6. का०लं०सू० पृ० 102-103.
7. अत्रतमालमालावलयित सरित्तरीकृत संकेतायाः कुलटायाः स्वतनौ भाविनां परपुरुष नखक्षतानां नलग्रन्थ्यालेख व्याज गोपनेन साभिप्राय भणनं भाविकम्। सं०कं०भ० पृ० 127.
8. गतिः सा स्यादवगमो योऽर्थोदर्थान्तरस्यतु। तत्रैव० 1/87.

प्रतीतिर्जायते। अस्मिन् गुणे पदर्थान्तरस्य प्रतीतिर्भाति सा प्रतीतिरानन्दवर्धनोक्तानुरणनरूपव्यंग्य एव विद्यते।[1] अतिविस्तृतस्यव्यंग्यस्याथवा ध्वनिसिद्धान्तस्य एकस्मिन् गतिगुणे यो समावेशः कृतः स औचित्यं न धत्ते।

रीतिः—

अर्थोत्पत्तौ क्रियाक्रम एव रीतिर्नाम गुणो वर्तते।[2] अस्मिन् गुणे वस्तूनां या उत्पत्तिस्तस्य यथाक्रमेण वर्णनमपेक्षते। अस्य विषये "रत्नदर्पण व्याख्यायां" कथितमस्ति यद् उत्पत्यादिक्रियाणां क्रमः काव्य सौन्दर्याय गृह्यते।[3] अत्र वस्तुस्वभाववर्णनं नास्ति। अतोऽत्र जातिगुणस्यार्थव्यक्ति गुणस्य च शंका न कार्या जाति गुणादर्थव्यक्तिगुणाच्चास्य रीतिगुणस्य विषयो भिद्यते। भोजस्यार्थगतरीतिगुणो दण्डिनो यथासंख्य अलंकारवद् वर्तते।[4]

उक्तिः—

यदि स्वाभिप्रायः प्रकारान्तरेण रमणीयार्थेणोच्यते तदार्थउक्ति—गुणोऽभिधीयते।[5] अयं भोजदेवस्योक्तिगुणः कुन्तकप्रतिपादित वक्रोक्त्या अपरः पर्यायो विद्यते। यतो वैदग्ध्यभंगीभणितिः वक्रोक्तिरेव भवति[6]। कुन्तकेन 'वक्रोक्तिजीविते' यो वक्रोक्तिसिद्धान्तः काव्यात्मत्वेन प्रतिष्ठापितः, स भोजदेवेनोक्तिगुणे निहितः। भोजेनास्य गुणस्य यत्पद्यं उदाहृतम् तत्पद्यंपूर्ववर्ती वामनेन, आग्राम्यत्वमुदारतागुणस्योदाहरणत्वेनोदाहृतम्।[7]

प्रौढिः—

काव्ये कवेरभीप्सितार्थस्य निर्वाहः प्रौढिगुणो वर्तते।[8] अस्मिन्नभिलषितस्य महतोप्यर्थस्य अल्पवाक्येन कथनं भवति। अस्य प्रौढिगुणस्य लक्षणानुसारिणी

---

1. ध्व०लो० पृ० 144.
2. रीतिः सा यस्त्विहार्थानामुत्पत्यादि क्रियाक्रमः। सं०कं०म० 1/87.
3. स०क०भ० रत्नदर्पण व्याख्यायाम् पृ० 129.
4. का०द० 2/273.
5. उक्तिर्नामयदिस्वार्थो भंग्या भव्योऽभिधीयते। सं०कं०भ० 1/88.
6. वक्रोक्तिरेव वैदग्ध्य भंगी भणिति रुच्यते। व०जी० 1/10.
7. का०लं०सू० 3/2/13.
8. विवक्षितार्थ निर्वाहः काव्ये प्रौढिरितिस्मृता। सं०कं०भ० 1/88.

रचना वामनप्रतिपादितायाः प्रौढेश्चतुर्थ भेदस्योदाहरणे विद्यते। तत्रापि अभीप्सितार्थस्य समासेन निरूपणं कृतमस्ति।[1]

वैशेषिकपदगतदोषगुणाः–

भोजदेवस्य बाह्याभ्यन्तरगुणविवेचनानन्तरं सम्प्रति संक्षिप्तरूपेण तस्य वैशेषिकगुणानां विवेचनं क्रियते। सर्वप्रथमं भामहेन सन्निवेशवैशिष्ट्यात्, आश्रय–सौन्दर्याच्च दोषपरिहारो निरूपित आसीत्।[2]

तदनन्तरं आचार्यदण्डिनापि, देशकालकलालोकन्यायआगमविरोधानां दोषाणां च गुणत्वं प्रतिपादितमासीत्।[3] परवर्त्याचार्यैर्मम्मटविश्वनाथादिभिरपि दोषाणां गुणत्वं कथितम्।[4] भोजदेवेनापि पदगतवाक्यगत, वाक्यार्थगतदोषाणां गुणत्वं निरूपितम्। एते "दोषगुणा" वैशेषिकगुणत्वेन निरूपिताः। भोजस्य दोषाणां गुणत्वप्रतिपादनस्याधारः पूर्ववर्त्याचार्याः सन्ति। तत्र पदगतदोषाणां गुणत्वं यथा–

भोजमते पदाद्याश्रितदोषा अनुकरणे सदा गुणत्वं प्राप्नुवन्ति। ते पदवाक्य वाक्यार्थगतत्वेन चतुर्विंशतिधा भवन्ति।[5]

तत्रादौ असाधुत्वदोषस्य गुणत्वं यथा–

क्लिष्टम्लेच्छितादीनां पदानां प्रयोगेऽसाधुत्व दोषो भवति, परं अनुकरणे तद् असाधुत्वदोषः गुणत्वं विन्दति।[6]

---

1. का०लं०सू० पृ० 102-103.
2. सन्निवेश विशेषात्तु दुरूक्तमपिशोभते।
   नीलंपलाशभाबध्मन्तराले स्रजामिव।।
   किचिंदाश्रयसौन्दर्याद्धत्ते शोभामसाध्वपि।
   कान्ताविलोचन न्यस्तंमलीमसमिवांजनम्।। भा०कं०लं० 1/54-55.
3. विरोधः सकलोऽप्येष कदाचित् कविकौशलात्।
   उत्क्रम्य दोषगणनां गुणवीर्थीं विगाहते। का०द० 3/80-85.
4. का०प्र० उ० पृ० 365-37, स०द० प० 16-22.
5. पदाद्याश्रितदोषाणां ये चानुकरणादिषु।
   गुणत्वापत्तये नित्यंतेऽत्रदोष गुणाः स्मृताः।
   त्रिविधाअपिते भूयश्चतुविंशतिधावुधैः।
   प्रोक्तायथा गुणत्वेन प्रविभज्यतथोच्यते। स०कं०भ० 1/89-90.
6. याम्लिष्टक्लेच्छितादीनां पददोषेष्वसाधुता।
   निरूपिताऽनुकरणे गुणत्वं सा प्रपद्यते। तत्रैव० 1/92.

अप्रयुक्तत्वदोषस्यगुणत्वं यथा–

अप्रयुक्तत्वदोषस्याप्यनुकरणे गुणत्वंजायत।[1]

श्रुतिकष्टत्वदोषस्यगुणत्वंयथा–

श्रुतिविरसत्वात् श्रुतिकष्टत्वदोषः संभवति परं दुर्वाचकेषु रौद्रादिरसेष्वनुप्रासानुकूलवर्णविन्यासादस्यदोषस्य गुणत्वं प्रतीयते।[2]

अनर्थकदोषस्य गुणत्वम्–

कस्यचित् पदस्य पादपूर्त्यर्थं यदि प्रयोगः स्यात्तदा सा पदावली–अनर्थक दोषेण दूषिताभवति। परं यमकाद्यलंकारेऽनर्थक पदस्य प्रयोगो गुणरूपतामेति।[3]

अन्यार्थदोषस्य गुणत्वम्–

यस्मिन्नर्थे यस्य शब्दस्य रूढिर्निवर्तते तस्मिन्नर्थे तस्य शब्दस्य प्रयोगेण अन्यार्थदोषो जायते। परमीदृशानां शब्दानां प्रयोगः प्रहेलिकादावदोषभाग् भवति।[4]

अपुष्टार्थदोषस्य गुणत्वम्–

शब्दानामाधिक्येसत्यर्थस्य यदिस्वल्पता स्यात्तदा रचना अपुष्टार्थत्व दोषेण दूषिता कथ्यते। भोजः एनां तुच्छार्थतां मन्यते परंच्छन्दोऽनुरोधात्तत्र गुणत्वं मन्यते।[5]

असमर्थदोषस्य गुणत्वम्–

यत्र कस्यचित् पदस्यावाच्यार्थो गृह्यते तत्र असमर्थ नाम दोषो विद्यते। परं तस्य–असमर्थदोषस्य रतिकर्मणि सीत्कारादिशब्दप्रयोगे गुणत्वं भवति।[6]

---

1. गुणमप्रयुक्तस्य तथानुकरणे भवेत्। तत्रैव० 1/92.
2. यच्छ्रुतेर्विरसं कष्टं तस्य दुर्वाचकादिषु।
   गुणत्वमनुमन्यन्ते सानुप्रासस्यसूरयः।। सं०कं०भ० 1/92.
3. यत्पादपूरणाद्यर्थमनर्थकमुदाहृतम्।
   गुणत्वमनुमन्यन्ते तस्यापि यमकादिषु।।सं०कं०भ० 1/83.
4. यत्तुरूढिच्युतत्वेन प्रोक्तमन्यार्थसंज्ञितम्।
   प्रहेलिकादिषुप्रायो गुणत्वं तस्य युज्यते।। तत्रैव० 1/94.
5. तुच्छवाच्यमपुष्टार्थमिति यत्प्राक् प्रकाशितं।
   तस्यच्छन्दोऽनुरोधादौ गुणत्वमवधार्यते।। तत्रैव० 1/95.
6. प्रतिपादितामादौ यदसमर्थमवाचकम्।
   तस्यापि खलुमन्यन्ते गुणत्वं सीत्कृतादिषु।। तत्रैव० 1/96.

अप्रतीतिदोषस्य गुणत्वम्–

केवलं शास्त्रएवार्थस्य स्पष्टत्वंस्यात्तदाशास्त्रज्ञाएव तमर्थं जानन्ति तेषांकृते स गुण एव वर्तते, परं अन्येषां कृते तु स अप्रतीतदोष एव वर्तते।[1]

क्लिष्टत्वदोषस्य गुणत्वम्–

यद्यर्थप्रतीतिर्विलम्बेनस्यात्तदा कष्टत्वदोषोभवति, परं झटित्यर्थप्रतीतौ तस्यगुणत्वमुक्तम्।[2]

गूढार्थत्वदोषस्य गुणत्वम्–

अप्रसिद्धार्थपदानां प्रयोगेण गूढार्थत्वदोषो जायते, परं व्याख्यानादौ अस्य गुणत्वमभिहितम्।[3]

नैयार्थत्वदोषस्य गुणत्वम्–

अस्मिन् दोषे संकेतितार्थः समाहितो भवति अर्थात् शब्दस्य संकेतितार्थः स्वयं न प्रकाश्यते तत्रार्थस्य कल्पना क्रियते, प्रहेलिकादिषु नेयार्थत्वदोषस्य भोजदेवेन गुणत्वं प्रतिपादितम्।[4]

संदिग्धत्व दोषस्य गुणत्वम्–

अनिश्चयात्मकज्ञानेन संदिग्धत्वदोषो भवति, प्रकरणादिसाहाय्येन निश्चयात्मकंज्ञानंभवेत्तत्रास्य दोषस्य गुणत्वम्।[5]

विरुद्धत्वदोषस्य गुणत्वम्–

अर्थस्यविपरीतकल्पनं विरुद्धंभवति स एव विरुद्धार्थोऽभिधया अविरुद्धार्थं प्रकाशयति तदा विरुद्धदोषोगुणतामाप्नोति।[6]

---

1. शास्त्रमात्र प्रतीतत्वादप्रतीतं यदुच्यते।
   गुणत्वं तस्य तद्विद्यसंभाषादौ विदुर्बुधाः।। सं०कं०भ० 1/97.
2. अर्थप्रतीतिकृद्दूरे क्लिष्टंनामयदुच्यते।
   झटित्यर्थ प्रतीतौ तद्गुणत्वमनुगच्छति।। तत्रैव० 1/98.
3. अप्रसिद्धार्थसंबन्धं यद्गूढार्थमितिस्मृतम्।
   तद्व्याख्यानादिषु प्रायो गुणत्वेन तदिष्यते।। तत्रैव० 1/99.
4. नेयार्थ यत्स्वसंकेतक्लृप्तवाच्यं निरूपितम्।
   प्रहेलिकादिषु प्राज्ञैस्तद्गुणत्वेन गण्यते।। तत्रैव० 1/100.
5. यद् निश्चयकृत्प्रोक्तं संदिग्धं तद्गुणी भवेत्।
   भवेद्विशेषावगमोयदि प्रकरणादिभिः। सं०कं०भ० 1/101.
6. तथाभूताभिधानेन गुणत्वं प्रतिपद्यते।। यत्तद्विरुद्धमित्युक्तं विपरीतप्रकल्पनम्।
   तत्रैव० 1/102.

अप्रयोजकत्वदोषस्य गुणत्वम्–

रचनायां प्रयुक्तानिपदानि यदा–वैशिष्टयं न प्रतिपादयन्ति तदा अप्रयोजकत्वमित्युक्तम्, वैशिष्ट्यप्रतिपादनमन्तरा स्वरूपकथनमात्रंयद्यभीष्टं स्यात्तत्राप्रयोजकत्वदोषो गुणत्वमापद्यते।[1]

देश्यदोषस्य गुणत्वम्–

यत्र व्युत्पत्तिरहितानि पदानिप्रयुज्यन्ते तत्र पदगतदेश्यदोषो भवति। अस्मिन्दोषे प्रकृतिप्रत्ययानां ज्ञानं न जायते,[2] देश्यदोष दूषितानि पदानि यदि महाकविभिः प्रयोज्यन्ते तदा देश्यदोषो गुणतामेति।[3]

ग्राम्यत्वदोषस्य गुणत्वं यथा–

घृणावद्, अश्लीलामंगलार्थभेदेन त्रिविधोग्राम्यत्वदोषः संवीतगुप्त लक्षितावस्थासु गुणत्वं प्राप्नोति।[4] ग्राम्यत्वदोषविषये–आचार्यवामनेन निरूपितमासीत् गुप्तलक्षितसंवृतानि, अर्थात् अप्रसिद्धलक्षणात्मक संवीत संवृतपदानि (यस्यपदस्य असभ्योऽर्थो विद्यते स यदि लौकिक व्यवहारेण संवृतस्स्यात्तदा संवीतसंवृत शब्देनोच्यते) न दोषाधायकत्वानि भवन्ति।[5] भोजेन ग्राम्यत्वदोषविषये पूर्णरूपेण वामनस्यानुकरणं कृतमस्ति। संवीतशब्दस्यार्थं स्पष्टयता भोजेन वामनस्यैकंपद्यमुद्धृतं वर्तते, तत्र कथितमस्ति यल्लोके यस्यशब्दस्यार्थो यस्मिन्नर्थविशेषेगृह्यते तस्य तथैव ग्रहणं भवति, यस्य पदस्य लोकव्यवहारेणा सभ्यार्थः संवृतो विद्यते तस्य दोषान्वेषणं नोचितं, यथा पुरुष जननेन्द्रियबोधको लिंगशब्दो असभ्यार्थं प्रकटयति, परं शिवलिंगस्य संस्थाने न कस्याप्यसभ्यत्व

---

1. अप्रयोजकत्वमित्युक्तमविशेष विधायकम्।
   स्वरूपमात्रेवक्तव्ये तस्यापि गुणतेष्यते।। तत्रैव० 1/103.
2. तद्देश्यमिति निर्दिष्टं यदव्युत्पत्तिमत् पदम्। सं०कं०भ० 1/14.
3. यदव्युत्पत्तिमद्देश्य मिति पूर्वं निरूपितम्।
   महाकवि निबद्धं सत्तदप्यत्र गुणीभवेत्।। तत्रैव० 1/104.
4. ग्राम्यंघृणावदाश्लीलामंगलार्थ यदीरितम्।
   तत्संवीतेषु गुप्तेषु लक्षितेषु न दूष्यति। सं०कं०भ० 1/105.
5. न गुप्त लक्षित संवृतानि। का०लं०सू० 2/1/15.

भावना प्रादुर्भवति। अतोलोक व्यवहारेणाच्छन्नोऽसभ्योऽर्थो गुणत्वं प्राप्नोति।[1] अनेनैवप्रकारेण कस्यचित्पदस्यासभ्योऽर्थोऽप्रसिद्धत्वाल्लोक गुप्तो भवति,[2] अतोगुप्तार्थस्यकृते दोषविषयिणी भावना नोचिता।

यथा—भगिनी, भगवती इत्यत्रापि भगशब्दो लोकव्यवहारेणच्छन्नत्वात् नासभ्यत्वेन प्रतीयते।[3] यदि असभ्यार्थस्य लक्षणया प्रतीतिः स्यात्तदाप्ययंदोषो गुणत्वमुपपद्यते—यथा—ब्रह्माण्डउपस्थानादि शब्दानां प्रयोगेन ब्रह्माण्डशब्दात्, अण्डशब्दः, उपस्थानात् शिश्नाद्यर्थं लक्षणयाप्रकटयति। अतएवास्य दोषस्य गुणत्वं जायते।[4] भोजमते—अश्लीलोऽपि, असभ्यार्थोऽसभ्यार्थान्तरासभ्य-स्मृतिहेतुत्वाच्चत्रिविधो वर्तते।[5] पुनः प्रत्येकं त्रिविधोभूत्वा नवधा भवति यथा—

घृणावद्	अश्लील	अमंगल
संवीत, गुप्तं, लक्षितं	संवीतं, गुप्तं, लक्षितं	संवीतं, गुप्तं, लक्षितं
1. संवीताश्लीलदोषगुणः लक्षितासभ्यस्मृतिहेतु-	1. गुप्ताश्लीलान्तर दोषगुणः	1. दोषगुणः
2. संवीतअशस्तामंगलत्व दोषगुणः	2. गुप्तअशास्तार्थान्तरा-मंगलदोषगुणः	2. लक्षिताशास्त्रस्मृति-दोषगुणः
3. संवीत घृणावद्दोषगुणः	3. गुप्तघृणावदार्थान्तर दोषगुणः	3. लक्षितघृणावदस्मृति-दोषगुणः

अनेन प्रकारेण ग्राम्यत्वदोषस्य नवभेदैः—सह पूर्वप्रतिपादित पंचदशभेदानां संकलनेन भोजमते पदगत दोषगुणानां संख्या चतुर्विंशतिर्भवति। भोजेनपदगत

1. संवीतस्यहि लोकेषु न दोषान्वेषणं क्षमम्।
   शिवलिंगस्य संस्थाने कस्यासभ्यत्वभावना। सं०कं०भ० पृ० 147.
2. अप्रसिद्धासभ्यं गुप्तम् का०लं०सू० 2/1/16.
3. वस्तुमाहात्म्य गुप्तस्य पदार्थस्य विभावनात्।
   भगिनी भगवत्यादि नासभ्यत्वेन भाव्यते।। स०कं०भ० पृ० 148.
4. ब्रह्माण्डकारणंयोऽप्सु निदधेवीजमात्मनः।
   उपस्थानं करोम्येष तस्मैशेषाहिशायिने। स०कं०भ० पृ० 149.
5. तत्रासभ्यमसभ्यार्थान्तरमसभ्यस्मृतिहेतुश्चाशीलम्। शृं०प्र० नवम प्र० पृ० 3.

दोष निरूपणानन्तरं–अभिहितं यत् कान्ताविलोचनेन्यस्तंकृष्णवर्णकज्जलवत् आश्रयस्य सौन्दर्यकारणाद्दोषोऽपि सौन्दर्यंदधाति।[1] पुष्पमालायां ग्रथित हरितपत्रमिव सन्निवेशवैशिष्ट्यात् दोषाअपि रमणीयत्वमाप्नुवन्ति।[2]

पदगतदोषाणामतिरिक्तं वाक्यदोषाणां भोजदेवेन गुणत्वप्रतिपादन-मधोलिखित प्रकारेण कृतमस्ति।

1. शब्दहीनत्वदोषः स्वाभाविक सौन्दर्येण।
2. क्रमभ्रष्टस्य अन्वयबोधे कृतप्रयत्ने।
3. विसंधिदोषस्य दुर्वाचके प्रगृह्यादौ।
4. पुनरुक्तदोषस्याऽनुकम्पाद्यतिशयविवक्षायाम्।
5. व्याकीर्णत्वदोषो विवक्षितत्वात्।
6. संकीर्णत्वदोषः प्रश्नोत्तरादौ।
7. अपदत्वदोषा, भाषाचित्रप्रसंगे।
6. गार्भितत्वदोषा रसान्तरप्रसंगे।
9. भिन्नलिंगत्वदोषः सहृदयानुद्वेजकत्वे।
10. भिन्नवचनत्वदोषः, सहृदयानुद्वेजकत्वे।
11. हीनोपमदोषः प्रसिद्धोपमानेसति।
12. अधिकोपमत्वदोष, उपमानधर्मस्योद्घाटनं विधायअनुमानेन प्रतीतौसत्यां।

---

1. किंचिदाश्रयसंबन्धाद्धत्ते शोभामसाध्वपि।
   कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम्। सं०कं०भ० 1/106.
2. संविनेशवशात्किंचिद्विरुद्धमपि शोभते।
   नीलंपलाशमावद्धमन्तरालेस्रजामिव।। तत्रैव० 1/107.
3. सं०कं०भ० 1/111.
4. तत्रैव० 1/112.
5. तत्रैव० 1/113.
6. तत्रैव० 1/114.
7. तत्रैव० 1/115.
8. तत्रैव० 1/116.
9. तत्रैव० 1/117.
10. तत्रैव० 1/118.
11. तत्रैव० 1/119.
12. तत्रैव० 1/120.
13. तत्रैव० 1/121.
14. तत्रैव० 1/122.

13. छन्दोभंगदोषस्य, संयोगस्य तीव्रप्रयत्नोच्चारणेन पूवर्णलघुत्वे।
14. भग्नयतिदोषस्ययतिभ्रंशोऽपि स्वरसंधिकृतत्वादविभिन्ननामधातु शरीरत्वाच्च।
15. अशरीरत्वदोषस्य अस्त्यादिक्रिया पदानपेक्षत्वात्।
16. शैथिल्यदोषस्य, बन्धप्राशास्त्येन गौडैरादृतत्वात्।
17. वैषम्यदोषस्य, पौरस्त्यैरादृतत्वात्।
18. कठोरत्वदोषस्य दीप्तरसत्वात्।
19. प्रसादहीनत्वदोषस्य चित्रादिकाव्ये।
20. नेयार्थत्वदोषस्याऽतिप्रसिध्याप्रतीयमानत्वात्।
21. ग्राम्यत्वदोषः, विदग्धोक्तौ।
22. असमासत्वदोषोऽसमस्तत्वेऽपि प्रौढबन्धस्य दीप्तत्वात्।
23. अनिर्व्यूढत्वदोषो, रसान्तरपरिग्रहेरीत्यन्तर परिग्रहाच्च।
24. अलंकारहीनत्वदोषस्य पूर्वोत्तरवाक्यानां समन्वयाद् गुणत्वं मन्यते।

वाक्यार्थदोषगुणाः

वाक्यदोषाणां भोजदृशा गुणत्वमभिधाय सम्प्रति वाक्यार्थ दोषाणां गुणत्वमुच्यते।

1. अपार्थत्वदोषः,–मत्तोन्मत्त–बालानामुक्तौ गुणत्वंप्रतिपद्यते।[13]
2. अप्रयोजकत्वदोषस्य क्वचिद्गुणत्वं दृश्यते।[14]

---

1. तत्रैव० 1/123.
2. तत्रैव० 1/124.
3. तत्रैव० 1/125.
4. तत्रैव० 1/126.
5. स०कं०भ० 1/127.
6. तत्रैव० 1/126.
7. तत्रैव० 1/129.
8. तत्रैव० 1/130.
9. तत्रैव० 1/131.
10. तत्रैव० 1/132.
11. तत्रैव० 1/133.
12. तत्रैव० 1/134.
13. तत्रैव० 1/136.
14. तत्रैव० 1/137.

3. व्यर्थत्वदोषस्यापि अप्रयोजकत्वदोषवत् क्वचिद् गुणत्वं परिलक्ष्यते।[1]
4. एकार्थदोषस्य रसाक्षिप्ततया अत्यन्तभावाविष्टावस्थायां वक्त्राभिहि- तत्वाद् गुणत्वं समुदीरितम्।[2]
5. यदि कविः संशयोत्पादनायैव द्व्यर्थकपदानि प्रयुनक्ति तदा संन्दिग्धत्वदोषस्य गुणत्वं भवति।[3]
6. वैचित्र्याय पदानां प्रयोगोऽक्रमत्वदोषापहारकः।[4]
7. छायोत्कर्षे खिन्नत्वदोषस्य भोजदेवोऽदोषत्वमनुमनुते।[5]
8. लोकप्रसिद्धस्यार्थमतिक्रम्य यत् प्रस्थानं प्रवर्तते तदत्युक्तिदोषेण दूषितो भवति परं गौडमार्गानुयायिनां कृते मनोह्लादकत्वादस्य गुणत्वं परिकीर्तितम्।[6]
9. परुषत्वदोषे विपरीतलक्षणया अर्थान्तरस्य लक्षितत्वाद् गुणत्वं मन्यते।[7]
10. यत्र रसवस्तुनोरप्राधान्यमभीष्टं स्यात्तत्र विरसत्वदोषो गुणरूपतां धत्ते।[8]
11. हीनोपमत्वदोषः क्वचिद् गुणतामेति। भोजदेवेन अस्योदाहरणे न्यूनत्वोपमानेऽपि रागातिशये हेतुत्वाद् गुणत्वं प्रतिपादितम्।[9]
12. अधिकौपम्यदोषस्यापि क्वचिद् गुणत्वमीरितम्।[10]
13. असदृशोपमत्वदोषस्य, व्यतिरेकालंकारे उपमालंकारे च गुणत्वमिष्यते।[11]
14. अप्रसिद्धोपमत्वदोषः कुत्रचिद् दोषभाग् न भवति।[12]
15. निरलंकारत्वदोषः अर्थस्यौर्जित्याद् गुणत्वमाकलयति।[13]

---

1. तत्रैव० 1/137.
2. तत्रैव० 1/138.
3. स०कं.भ० 1/139.
4. तत्रैव० 1/140.
5. तत्रैव० 1/141.
6. तत्रैव० 1/142-144.
7. तत्रैव० 1/145.
8. तत्रैव० 1/146.
9. तत्रैव० 1/147.
10. तत्रैव० 1/148.
11. तत्रैव० 1/149.
12. तत्रैव० 1/150.
13. तत्रैव० 1/151.

16. अश्लीलत्वदोषः कविभिरादृतत्वात् कुत्रचिद् न दुष्यति।[1]

17. कविनैपुण्येन विरुद्धार्थं परित्यज्य विरुद्धत्वदोषो गुणवीर्थीं विगाहते।[2]

निम्नलिखितप्रकारेण विरुद्धत्वदोषस्य भोजदेवेन नव भेदा निरूपितास्सन्ति। यथा—देशविरुद्धः, कालविरुद्धः, लोकविरुद्धः, युक्तिविरुद्धः, औचित्यविरुद्धः, वचनविरुद्धः, धर्मविरुद्धः, अर्थशास्त्रविरुद्धः, कामशास्त्रविरुद्धश्च। एते सर्वेदोषाः कवेरसाधारणनैपुण्येन गुणत्वमधिगच्छन्ति।[3] अत्र वाक्यार्थगुणानां संख्या पूर्ववत् चतुर्विंशतिः भवितव्यासीत्, परमेषां संख्या विरुद्धत्वदोषगुणभेदैः सह पंचविंशतिर्वर्तते, यदि विरुद्धत्वदोषस्य पार्थक्येन गणना कृता स्यात्तदा एषा संख्या षड्विशतिर्भवति। सर्वेषां गुणप्रकाराणां संकलनेनाधोलिखितप्रकारेण गुणानां योगो वर्तते।

1. बाह्यशब्दगुणाः- चतुर्विंशतिः।
2. आन्तरिकार्थगुणाश्चतुर्विंशतिः।
3. वैशेषिकपददोषगुणाश्चतुर्विंशतिः।
4. वैशेषिकवाक्यदोषगुणाश्चतुर्विंशतिः।
5. वैशेषिकवाक्यार्थदोषगुणाः पंचविंशतिः सर्वेषां संकलनेन गुणसंख्या शतोत्तरैकविंशतिर्विद्यते।

भोजदेवस्य गुणनिरूपणाद् ज्ञायते यदनेन गुणसामान्यलक्षणं न कृतम्, लक्षणाऽभावे गुणानां काव्ये कुत्र, कीदृशंस्थानं विद्यते इति ज्ञातुं न पार्यते। भोजेनैतदवश्यं निर्णीतम् यो कविर्दोषान् हेयदृष्ट्या जानाति, स एव काव्यं कर्तुं प्रभवति।[4] तदनन्तरं गुणालंकारेभ्यः गुणानां वैशिष्ट्यं निरूपयता तेन भणितं यदलंकारसमन्वितं गुणहीनं काव्यं अकाव्यंभवति, गुणालंकारयोर्योगेऽलंकाराणामपेक्षया गुणानां प्राधान्यं वरीवर्ति। एतत् पूर्वमप्यभिहितम्। एवंविधा अस्यबुद्धौ गुणधारणा आसीत् यद्दोषेष्वपि अनेन गुणत्वं दृष्टम्। भोजेन ये चतुर्विंशतिः गुणाः स्वीकृताः तेषु दश गुणाः पूर्ववर्त्याचार्यैः स्वीकृता-आसन्, अन्येषां चतुर्दशगुणानां निरूपणं स्वतन्त्रोद्भावनया कृतम्। भोजेन दशगुणानां लक्षणानि पूर्ववर्त्याचार्याणामनुसारं विहितानि, तेष्वपि गुणलक्षणविषये भोजेन

---

1. स०कं०भ० 1/152.
2. तत्रैव० 1/153-156.
3. तत्रैव० 1/196-199.
4. एवं पदानां वाक्यानां वाक्यार्थानां च यः कविः।
दोषान् हेयतया वेत्ति स काव्यं कर्तुमर्हति।। स०कं०भ० 1/58.

वामनमतस्याशयो वैशिष्ट्येन स्वीकृतः। येषां चर्तुदशगुणानां नवीना कल्पना विद्यते तेषु गुणेषु केषांचिद् गुणानां लक्षणानि वामनस्यार्थप्रौढेः सदृशानि सन्ति, केषांचिद् गुणानां लक्षणानि पूर्ववर्त्त्याचार्याणां भाविकत्व, प्रेयः सूक्ष्मलंकाराणां लक्षणानि प्रकान्तरेण निर्दिष्टानि एवं केषांचिद् गुणानां विषये भोजस्य स्वातन्त्र्यं लक्ष्यते। यथा दण्डिरूद्रट्योःसूक्ष्मालंकाराद् भोजस्य शब्दगुणः सौक्ष्म्येण भिद्यते एवं "भाविकत्व" शब्दगुणोऽपि दण्डिनिरूपितभाविकालंकारात् पृथक् भूतो न वर्तते। शब्दगतप्रौढिगुणस्य लक्षणं वामनोक्तिकाव्यपाकवद् वर्तते। अर्थगतौजोगुणस्य लक्षणे स्वतन्त्रप्रज्ञा प्रकटिता। भोजदेवस्यार्थ-गतौर्जित्यगुणो दण्डिनः—उर्ज्जस्वी-अलंकारस्य नामान्तरं विद्यते। भोजेनार्थगत-प्रेयो गुणस्योदाहरणं वामनोक्तिवैचित्र्यात्मकमाधुर्यगुणः तेनैव रूपेणोदाहृतम् परमुक्तिवैचित्र्यात्मकप्रेयोगुणस्य लक्षणं न कृतम्। अर्थगत समाधिगुणोऽपि स्वातन्त्र्येण निरूपितः। अर्थगतगतिगुणस्य लक्षणेऽर्थादर्थान्तरस्य प्रतीतिः स्वीकृता या व्यंग्यविषयिणी भवति, अतिविस्तृतक्षेत्रस्य व्यंग्यार्थस्यैकस्मिन्नेव गतिगुणेऽन्तर्भावः नैव युक्तः। भरतोदीरितोदारतागुणाद् भोजस्योदारतोदात्तत्व-गुणौ न पृथग्भूतौ स्तः।

भोजस्य बाह्याभ्यन्तरिकवैशेषिकगुणानां संकलनेन द्विसप्ततिः संख्या जायते वाक्यदोषगुणवाक्यार्थदोषगुणानां संख्या चतुर्विंशतिर्वर्तते सर्वेषां संकलनेन शतोत्तरविंशतिसंख्या गुणानां वर्तते। भोजदेवो गुणप्रसंगे कथितवान् यद् समाधिगुणं विहाय श्लेषादिनवगुणैः काव्ये काव्यत्वं जायते एषां गुणानां वैपरीत्ये नव "अरीतिमद्" दोषा भवन्ति।[1]

अर्थगतमाधुर्यगुणलक्षणे क्रोधादिवर्णने तीव्रतायाः अभावः प्रतिबोधितः यो-ऽन्याचार्याणां माधुर्यगुणलक्षणाद् भिन्नोऽस्ति। यद्यपि भोजेन गुणानां निरूपणं विस्तारेण कृतम्। परं तन्निरूपणं व्यवस्थितं न विद्यते। यदा दशगुणवादिनां दशगुणाः परवर्त्तिकाले स्वीकृता नैवाभूवन्, तदा भोजस्य चतुर्विंशतिगुणानां विषये मान्यतायाः प्रश्नो नैवोदेति। प्रतिपादनं किमपि महत्त्वं नैवाकलयति। तेन भोजस्य गुणा अतीवविकीर्णा विस्तृता अव्यवस्थिताश्च सन्ति येषु किमप्यति नूतनत्वं न संलक्षते।

क्षेमेन्द्रः—

कविकण्ठाभरणेऽतीव संक्षिप्तरूपेण गुणानां निरूपणं लभ्यते, यल्लभ्यते तस्माद् गुणानां विषये पर्याप्तरूपेण ज्ञानं न भवति—गुणसामान्यलक्षणविषये

---

1. गुणानां दृश्यते यत्र श्लेषादीनां विपर्ययः।
   अरीतिमदिति प्राहुस्तत्त्रिधैव प्रचक्षते।। सं०कं०भ० 1/28-29.

क्षेमेन्द्रेण मौनमेवाकलितम् गुणगणनात् प्राग् गुणदोषयोर्ज्ञानं परमावश्यकं प्रतिपादितम्। गुणदोषयोर्ज्ञानविषये क्षेमेन्द्रेण कथितमस्ति यथा राजहंसः- एकस्मिन्नेव पात्रे जलदुग्धयोर्मिश्रणं पृथक्कर्तुं सामर्थ्यशीलो भवति, तथैव विमलप्रतिभाशालिनो राजहंससदृशाः कवय एकस्मात् काव्यपात्रात् राजमरालवद् गुणदोषान् पृथक्कर्तुं सम्यकतया जानन्ति।[1] अनेन परिलक्ष्यते यत् कवयो गुणदोषज्ञातारो भवेयुः, येन दोषहानाद् गुणोपादानात् काव्यरचनायां समर्थाः स्युः। अस्मादनन्तरं शब्दवैमल्यं, अर्थवैमल्यं, रसवैमल्यं, इति त्रयः काव्यगुणाः प्रतिपादिताः।[2] एषां गुणानां लक्षणान्यनुक्त्वैव शब्दकालुष्यं, अर्थकालुष्यं, रसकालुष्यं, इतित्रयो दोषाः कथिताः।[3] अस्मात् प्रतीयते यत् क्षेमेन्द्रेणोपर्युक्त-त्रयाणां गुणानां यन्निरूपणं कृतं तेभ्यः कवयोऽवश्यमेव परिचिता भवितव्या अन्यथा काव्ये गुणानामभावे शब्दकालुष्य, अर्थकालुष्य, रसकालुष्यदोषाणां प्रसंग आपतिष्यति। कवेः कर्म काव्यं वर्तते तच्छब्दंविनानावतिष्ठते, शब्दो अर्थेन विना, अर्थो रसेनविना, सहृदयहृदयाह्लादकरत्वं व्यक्तुं न प्रभवति अस्माद्धेतोः क्षेमेन्द्रेण शब्दवैमल्यं, अर्थवैमल्यं रसवैमल्यमिति त्रयः काव्यगुणाः स्वीकृताः।

शब्दवैमल्यगुणाभावे, शब्दकालुष्यदोषस्य स्थितिरायाति शब्दकालुष्यो-दाहरणस्य रचना श्रुतिकटुत्वदोषदूषिता वर्तते,[4] शब्दानां प्रखरप्रयोगत्वात्। अस्मात् प्रतीयते यच्छब्दवैमल्यगुणस्य माधुर्यगुणानुसारिणी रचना भवितव्या। तेन शब्दे वैमल्यस्योदाहरणं माधुर्यगुणानुरूपं वर्तते।[5] अनेनैव प्रकारेण अर्थकालुष्योदाहरणे कष्टत्वदोषस्य सद्भावोऽस्ति[6] परमर्थवैमल्य-गुणस्योदाहरणेऽर्थः सद्य एव चित्ते परिस्फुरति[7] अतोऽर्थवैमल्यगुणः प्रसादगुणसदृशो विद्यते।

---

1. काव्यैकपात्रं विलसद् गुणदोषदुग्धपाथःसमूहपृथगुद्धरणे विदग्धाः।
   जानन्ति कर्तुमभियुक्ततया विभागं चन्द्रावदातमतयः कविराजहंसाः।।
   कविकण्ठाभरणम्, सन्धि 4, श्लोक।
2. तत्र शब्दवैमल्यं अर्थवैमल्यं रसवैमल्यमिति त्रयः काव्य गुणाः।
   तत्रैव० चतुर्थ सं० पृ० 88.
3. शब्दकालुष्यं, अर्थकालुष्यं, रसकालुष्य मिति काव्यदोषाः। तत्रैव
4. कविकण्ठाभरणम् चतुर्थ सन्धि पृ० 90.
5. तत्रैव० पृ० 89.
6. तत्रैव० पृ० 91.
7. तत्रैव० पृ० 89-90.

रसवैमल्ये, औचित्यरूपेण रसस्याभिनिवेशः कर्तव्य इति क्षेमेन्द्राभिमतम्। यतोहि रसकालुष्यदोषस्य यदुदाहरणं समुट्टङ्कितं तस्मिन् यद्वर्णनं विहितम् तत् राजमहिष्यनुरूपं न विद्यते[1], चक्रवर्तिराजमहिष्या हृदि परपुरुषस्य रति-विषयकाभिलाषस्य वर्णनं न युक्तं एवं प्रकारेण रसविषयकामुचितवर्णनेन रसकालुष्यदोष उदेति। अतो रचनायां रसौचित्येन वर्णनं कविभिः कार्यम् औचित्यरूपेण रसस्याभिनिवेशे रसवैमल्यगुणे क्षेमेन्द्रस्य तात्पर्यम्।[2]

आचार्यमम्मटः–

आचार्यमम्मटमते गुणस्वरूपम्–

आचार्यमम्मटेन गुणस्य यत् सामान्यलक्षणं कृतम् तदस्यानन्दवर्धनाचार्यस्य गुणलक्षणस्येव प्रतिष्ठापनं वर्तते। मम्मटात् प्राक् भरत, भामह, दण्डि, वामन, प्रभृतिभिः, गुणलक्षणविषये पृथक्-पृथग् धारणा प्रकटिता आसीत्, कुन्तकेन एभ्यो आचार्येभ्योऽतिरिक्ता गुणविषयिण्या धारणायाः प्रतिपादनं कृतम्। भोजदेवेन त्वनावश्यकरूपेण गुणानां यथा सामर्थ्ये विस्तारः कृतः। सर्वप्रथमानन्दवर्धनो भामहानुसारं त्रीन् गुणान् स्वीकृत्य स्वमौलिकोद्भावनया तेषां रसधर्मत्वं प्रतिष्ठाप्य गुणालंकारयोर्भेदं निरूपयामास। तदनन्तरमाचार्यमम्मटः आनन्दवर्धनानुसारं गुणविषयकं सिद्धान्तं प्रतिष्ठापयामास। योऽद्य पर्यन्तं सर्वमान्योऽवर्तत। मम्मटेन गुणस्वरूपमित्थं निरूपितं, यथा शौर्यादय आत्मनो धर्मा भवन्ति न तु वपुषा, तथैव माधुर्यादयो गुणा रसस्येव धर्मा वर्तन्ते।[3] अनेनैतत् प्रतीयते यद् गुणानां रसेन सह नियतसम्बन्धोऽस्ति ये रसं विना न तिष्ठन्ति स्थिताश्चावश्यं रसस्योत्कर्षं कुर्वन्तीति।

यद्यपि मम्मटेन मुख्यरूपेण गुणानां रसधर्मत्वमभिहितम् परं काव्यलक्षणे गुणानां शब्दार्थधर्मत्वमपि कथितम्।[4] काव्यलक्षणेऽपि सगुणौ इति कथनेन रसस्यापि प्रतीतिर्भवति यतो गुणा रसधर्मत्वेन निरूपिताः, परं काव्यलक्षणस्य मुख्यार्थाद् गुणानां शब्दार्थधर्मत्वमपि ज्ञायते।

---

1. कविकण्ठाभरणम् पृ० 92.
2. तत्रैव० पृ० 90.
3. ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
   उत्कर्षहेतवस्तेस्युरचलस्थितयो गुणाः।। का०प्र० 8/66.
4. तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि। तत्रैव० 1/1.

गुणानां शब्दार्थधर्मत्व विषये मम्मटः कथितवान् यदेषां माधुर्यौजः प्रसादाख्यानां गुणानां रसधर्मत्वं प्रतिपादितम्, तथाप्येषामुपचारेण शौर्यादय आत्मना धर्माः सन्तो यथा शरीरधर्माः कथ्यन्ते तथैव रसधर्माणां माधुर्यादिगुणानां शब्दार्थधर्मत्वमपि मन्यते।[1]

गुणानां रसाश्रयत्वविषये सर्वप्रथमं भरतेन संकेतः कृत आसीदिति।[2] मम्मटमते यथा शौर्यादयः प्राधान्येनात्मनो धर्मा भवन्ति, परं गौणरूपेण शरीरस्य धर्मा अप्युच्यन्ते, तथैव गुणा मुख्यतो रसस्यैव धर्मा वर्तन्ते परं गौणरूपेण शब्दार्थयोर्धर्माअपि स्वीक्रियन्ते। अतएवाभिहितमस्ति यन्माधुर्यौजःप्रसादाख्या गुणाः उचितैर्वर्णैर्व्यज्यन्ते नतेषां केवलं वर्णमात्राश्रयत्वं बोध्यम्।[3]

गुणालंकारयोरभेदवादी उद्भटस्य मतं निराकुर्वता मम्मटेन प्रतिपादितम् यदलंकारास्तत्रैव रसमुत्कर्षयन्ति यत्र रसस्य सद्भावो दृश्यते, अन्यथा अलंकारा चित्रकाव्यादौ तथैवोक्तिवैचित्र्यमात्रस्वरूपाधायका भवन्ति यथा यौवनशून्य नायिकाया अंगेषु कटककुण्डलाद्यलंकारा दृष्टेश्चमत्काराधायका जायन्ते। कुत्रचिद् रसस्य सद्भावेऽपि अलंकारास्तं नोपकुर्वन्ति यथा सुकुमारनायिकाया अग्ङेषु ग्रामीणालंकारास्तस्याः सौन्दर्यं वर्धयन्ति[4]। मम्मटेन गुणानां रसेन सह समवायसम्बन्धः प्रतिपादितः। अलंकारा नियतरूपेण रसं नोपकुर्वन्ति तेन गुणेभ्योलंकारा भिद्यन्ते।[5]

मम्मटेन गुणालंकारयोरभेदस्य यत्खण्डनं कृतम् तत्तु युक्तमेव वर्तते, यतोहि गुणा आन्तरीयकाः सन्ति काव्यस्यात्मा रसधर्मत्वादन्वयव्यतिरेकवद् गुणानां रसधर्मत्वं वर्तते, यथा आत्मनोऽभावात् शरीरस्य चैतन्यं न भवति तथैव रसाऽभावात् काव्ये काव्यत्वं न विद्यते, गुणानां काव्यात्मना सह नित्यसम्बन्धत्वात्–काव्येऽनिर्वार्यत्वं प्रकटीभवति तेन दशगुणानां विशेषतो वाम्नोक्तशब्दार्थगुणानां खण्डनं कर्तुं स्वमतेन माधुर्यौजः प्रसादाख्यानां त्रयाणां

---

1. गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता। क०प्र० 8/71.
2. प्रयोगमेषां च पुनर्वक्ष्यामि रससंश्रयम्। ना०शा० 16/114.
3. आत्मन एव हि यथा शौर्यादयो नाकारस्य, तथा रसस्यैव माधुर्यादयो गुणो न वर्णानाम् क्वचित्तु शौर्यादिसंमुचिताकारमहत्वादेर्दर्शनात्... अत एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते नतु वर्णमात्राश्रयाः। का०प्र० वृत्तौ पृ० 464.
4. उपकुर्वन्ति तं सन्तं येगृङ्द्वारेण जातुचित्।
   हारादिवदलंकारास्तेनुप्रासोपमादयः। का०प्र० 8/67.
5. समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादय इत्यस्तु गुणालंकाराणां भेदः, ओजः प्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवेषां भेदः। इत्यभिधानमसत्। का०प्र० वृत्तौ० पृ० 470.

गुणानां निरूपणमकारि।[1] तन्निरूपणं आनन्दवर्धनोक्तगुणानां सैद्धान्तिकरूपेण प्रतिष्ठापनमेव वर्तते। सम्प्रति मम्मटाभिमतस्य गुणत्रयस्य विवेचनमित्थं विद्यते।

माधुर्यम्—

चित्तद्रवीभावस्य कारणं श्रृंगारे स्थीयमानं यदाह्लादस्वरूपं स माधुर्य गुण उच्यते।[2] सम्भोगश्रृंगारे चित्तस्य द्रुतिर्भवति[3], द्रुतिरेका विशिष्टा प्रक्रिया वरीवर्ति यस्यां, काठिन्यमन्युक्रोधाद्युपहितविक्षेपपरित्यागेन द्वेषादिजन्य काठिन्याभावाच्चे- तसो विगलितत्वमिव सहृदयचित्तार्द्रप्रायता जायते तया सामाजिका एकाग्रमनसा आह्लादस्वरूपमानन्दमनुभवन्ति। श्रृंगारादयो रसा आनन्दस्वरूपाः सन्ति, येषु सहृदयानां चित्तं द्रवति, स एव धर्मविशेषेण विद्यमाने माधुर्येणाभिधीयमाने रसे उत्तरोत्तरोत्कर्षेण विराजते।[4] न केवलं माधुर्यगुणः सम्भोगश्रृंगारे तिष्ठति, अपितु करुणविप्रलम्भशान्तरसेष्वपि उत्तरोत्तराधिक्येन विलसति।[5]

आचार्यमम्मटेनानन्दवर्धनानुसारं गुणा रसधर्माः स्वीकृताः परं माधुर्यगुणस्य उत्तरोत्तराधिक्यं नाङ्गीकृतम् यथा आनन्दवर्धनेन सम्भोगश्रृंगाराद् विप्रलम्भश्रृंगारे विप्रलम्भात् करुणरसे तरतमरूपेण माधुर्याधिक्यं स्वीकृतमासीत्,[1] मम्मटः उत्तरोत्तराधिक्येन करुणविप्रलम्भ शान्तरसेषु अत्यन्तद्रुतिहेतुत्वाद् माधुर्यगुणं स्वीचकार। काव्यप्रकाशे भामहोक्तमाधुर्यगुणलक्षणं खण्डयन् श्रव्यत्वमोजः-प्रसादगुणयोरपि भवति एवं स्वीकारे, केवलं श्रव्यत्वं नातिसमस्तार्थत्वं च माधुर्यगुणस्य लक्षणं न युज्यते।[2] मम्मटेनोपचारेण माधुर्यादिगुणानां शब्दगुणत्वं प्रत्यपादि। गुणानां व्यञ्जकत्वं वर्णसमासरचनाया आधारेण निरूपितम्।[3]

---

1. माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश। का०प्र० 8/68.
2. आह्लादकत्वं माधुर्यं श्रृंगारे द्रुतिकारणम्। तत्रैव०
3. श्रृंगारे अर्थात् सम्भोगे। द्रुतिर्गलित्त्वमिव। तत्रैव, वृत्तौ पृ० 474.
4. का०प्र० प्रभाव्याख्यायां 8 उल्लास पृ० 418.
5. करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्। तत्रैव० 8/69.

1. श्रृंगारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्।
   माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः।। ध्व०लो०लोचन 2/8.
2. श्रव्यत्वं पुनरोजः प्रसादयोरपि। का०प्र० 8 उल्लास पृ० 474.
3. प्रोक्ताशब्दगुणाश्चये।
   वर्णाः समासो रचना तेषां व्यञ्जकतामिताः।। का०प्र० 8/73.

माधुर्यगुणे टवर्गरहिताः, वर्गाणां कुचुटुतुपू एषां, ये अन्तिमो ङ ञ ण न म रूपाः, स्व स्ववर्गस्यान्त्यवर्णयुक्ताः स्पर्शवर्णाः ह्रस्वान्तरितौ रेफणकारौ इत्यादयो वर्णाः, समासाभावः अथवा अल्पसमासवन्तः माधुर्यगुणं विभावयन्ति।[1] आह्लादकत्वविषये बालवोधिन्यां कथितं यदाह्लादनमाह्लादो भावे घञ् स्वार्थे क प्रत्यये आनन्दस्वरूपत्वमित्यर्थः।[2] आह्लादकत्वस्य शब्दस्यार्थ आनन्दहेतुत्वानन्दजनकत्वं भविष्यति, अस्यामवस्थायां शृंगारादिरसेषु असंगतिर्भविष्यति, यतः शृंगारादयो रसा आह्लादस्वरूपाः सन्ति न तु आह्लाद-हेतवः। अत आह्लादनमाह्लाद एषा व्युत्पत्तिरपेक्ष्यते, न तुआह्लादयतीति आह्लादकः। आह्लादकत्वं न केवलंशृंगाररसे, अपितु सर्वेषु रसेषु भवति परं तेषु चित्तस्य द्रुतिर्न जायते।

ओजः—

चित्तस्य विस्ताररूपदीप्तत्वजनकौजो गुणो वर्तते। दीप्तिरेका विशिष्टा वृत्तिः। यया मनः प्रज्वलितमिव जायते, एतदेव चित्तस्य विस्तार इत्युच्यते। भिन्नविषयत्वेन अथवा प्रतिकूलविषयत्वेन दीप्तिर्द्रुतेर्विरोधिनी वर्तते अस्य गुणस्य वीररसे अवस्थितिः प्रतिपादिता।[3] न केवलं वीररसे ओजो गुणस्तिष्ठति अपितु वीररसवत् बीभत्सरसे रौद्ररसे चाप्यस्यावस्थितिः। वीररसात् बीभत्से, वीभत्सापेक्षया रौद्ररसे आधिक्येन चित्तस्य दीप्तिर्भवति। अतएव क्रमेण वीरबीभत्सरौद्र रसेषु ओजोगुणः उत्कर्षरूपेण विराजते।[4] ओजोगुणस्योक्तेषु रसेषु उत्तरोत्तराधिक्यस्य एतदेव कारणं वर्तते, यद्वीररसे द्वेष्यस्य जिगीषामात्रं भवति। बीभत्से घृणितस्य त्यागेच्छा, रौद्ररसे अपकर्तुःवधस्य समीहा जायते। आनन्दवर्धनेन ओजोगुणलक्षणे प्रतिपादितं वर्तते काव्ये विद्यमाना रौद्रादयो रसा दीप्त्या लक्ष्यन्ते, तां दीप्तिं प्रकाशयितुं शब्दार्थाः कारणानि भवन्ति—तान्याश्रित्य ओजोगुणो व्यवस्थीयते।[5] अस्मात् प्रतीयते यदानन्दवर्धनेन ओजोगुणलक्षणे दीप्तिशब्दस्य प्रतिपादनं कृतम्, तन्मम्मटेनापि स्वीकृतम्, परमोजोगुणस्याधिक्यं यथानन्दवर्धनेन रौद्ररसे प्रतिपादिता न तथा मम्मटेन। अभिनवगुप्तेन दीप्ति विषये कथितम् यत्स्वभावतः दीप्तिः-

---

1. मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।
   अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।। तत्रैव० 8/74.
2. का०प्र० बालबोधिनी सहितः। 8 उल्लास पृ० 474.
3. दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः। का०प्र० 8/69.
4. वीभत्सरौद्र रसयोस्तस्याधिक्यं क्रमेण च। तत्रैव० 8/70.
5. ध्व०लो० लोचन 2, 9.

पाठकानांदर्शकानांश्रोतृणां च हृदयं विकसितं, विस्तृतं प्रज्वलितं च करोति। यस्यां विकासविस्तारप्रज्वलनरूपा तिस्रोऽवस्था भवन्ति। सा दीप्तिः ओजो गुणेनाभिधीयते।[1]

माधुर्यगुणस्य, सम्भोगश्रृंगारकरुणविप्रलम्भशान्तरसेषु च उत्तरोत्तरं आधिक्यं मम्मटेन प्रतिपादितम्। ओजोगुणस्य वीरवीभत्सरौद्ररसेषु क्रमेणोत्कर्षो निरूपितः। परं नवरसेषु केवलं षण्णां रसानांसगुणत्वं प्रतिपादितम् किमन्येषु हास्यभयानकाद्भुतरसेषु माधुर्यौजसोर्द्वयोर्गुणयोः सत्ता वर्तते ? श्रृंगार कारणैर्हास्य रसस्याविर्भावः स्यात्तदा माधुर्यगुणस्य प्राधान्यं संभवति। वीरादिविभावैर्हास्यर-सस्याविर्भावे सति ओजोगुणस्य प्राधान्यम् वरिवर्ति माधुर्यगुणो हास्यरसे प्रकर्षेण विराजते ओजोगुणस्य तत्र स्वल्पता विद्यते भयानके अद्रुतेच ओजस एव प्राधान्यम् माधुर्यंतु तत्र स्वल्परूपेण प्रतीयते।[2] "बालवोधिन्यां" कस्यचिन्मतं समुपन्यस्तं वर्तते, अस्यमतस्याभिमतत्वेनैव प्रतिपादनं कृतम्। ओजोगुणे वर्गाणां क च ट त प रूपेण आद्याक्षरेण सह तस्यैव वर्गस्य द्वितीयाक्षरस्ययोगः तृतीयेनाक्षरेणसह चतुर्थाक्षरस्य संयोगः अधः उपरि उभयत्र वा रेफ संयुक्तो अक्षरः, टादयश्चत्वारोवर्णाःशकारषकारौ च दीर्घसमासो विकटारचना च ओजोगुणव्यञ्जकतामेति।[3] सुकुमारकठिनवर्णाः कथं क्रमेण माधुर्य, ओजोगुणयोर्व्यञ्जकत्वेन निरूपिताः, एतत्तुगुणव्यंजकवर्णानामाधार- भूताध्याये स्फुटी भविष्यति।

प्रसादः—

अग्निर्यथा शुष्ककाष्ठे झटिति प्रसरति, जलं यथा स्वच्छवस्त्रं सहसा व्याप्नोति तथैव स्वच्छतारूपो प्रसादः झटिति चित्तमभिव्याप्य, आधाराधेय

---

1. दीप्तिः प्रतिपत्तुर्हृदये विकास विस्तार प्रज्वलन स्वभावा साच मुख्यतया ओजशब्द वाच्या। तत्रैव० द्वितीय उ०पृ० 457.
2. तत्र हास्यादीनां श्रृंगारांगविभावादि प्रभवत्वे माधुर्यं प्रधानम् वीराग्ङविभावादिप्रभत्वे तु ओजः प्रधानम्। हास्ये सर्वदेव प्रकृष्टं माधुर्यं स्वल्पमोजः भयानकेऽद्भुतेच, ओजः प्रधानं स्वल्पं माधुर्यमिति केचित्। का०प्र० वामनी टीकायाम् पृ० 476.
3. योग आद्यतृतीयाम्यामन्त्ययो रेण तुल्ययोः।
   टादिः शेषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि। का०प्र० 8/75.
3. शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।
   व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्रविहितस्थितिः।। तत्रैव० 8/70-71.

सम्बन्धेन सर्वेषुरसेषु व्यंजक सम्बन्धेन सर्वासु रचनासु च–तिष्ठतीति[1]। प्रसादगुणश्चित्तस्य विकासहेतुर्वर्तते, प्रसादस्य सद्भावे सर्वेरसाश्चित्तं व्याप्नुवन्ति। यदा वीररौद्रादिरसेषु प्रसादाख्यो गुणः शुष्केन्धनाग्निवत् चितं व्याप्नोति, श्रृंगारकरुणादिषु स्वच्छवस्त्रे, जलवत् प्रसादगुणः सहसा व्याप्नोति।[2] अस्यगुणस्य सर्वेषुरसेषु सर्वासुसंघटनासु स्थितिः प्रदर्शिता। अस्मात्प्रतीयते यदस्मिन्गुणे द्रुतिदीप्तिविकासरूपाः तिस्रोऽवस्था निवसन्ति यस्मादस्मिन् गुणे ओजः प्रसादयोरपि अस्तित्वमनिवार्यरूपेण वर्तते। इत्यन्यथाकर्तुं न शक्यते। मम्मटस्य प्रसादगुणलक्षणं आनन्दवर्धनमनुसरति। ध्वनिकारः कथितवान् यत् काव्यस्य समग्रान्रसान् प्रति यो समर्पकत्वगुणः स एव प्रसादेनाख्यायते।[3]

अस्यगुणस्य माधुर्यौजोवत् रसानां शब्दार्थानां वा कश्चिन्नियम विशेषो न विद्यते, अपितु सर्वसाधारणोऽयं प्रसादाख्यो गुणः[4]। येन शब्देन, समासेन, रचनया वा श्रवणसमनन्तरमेवार्थज्ञानं भवेत् सः वर्णेषु समासेषु रचनासु च विद्यमानः प्रसादो नाम गुण इति प्रसादगुणव्यत्रजकत्वे मम्मटाशयः।[5]

गुणानामन्तर्भावस्य कारणम्–

आचार्यमम्मटेन आनन्दवर्धनानुसारं स्वमतेऽपि माधुर्यौजप्रसादाख्यानां त्रयाणां गुणानां निरूपणं कृतम्। वामनेन ये दश शब्दगुणा निरूपितास्तेएवार्थ गुणत्वेन निरूपिताः।[6] परं तेषांशब्दार्थगुणानां लक्षणानि पृथग् रूपेण प्रतिपादितानि।

आचार्यमम्मटो वामनस्य शब्दार्थगुणेषु केषांचिदत्रिषुगुणेषु, केषांचिद् दोषाभावमात्रे, अन्तर्भावमकरोत्। गुणत्रये दशगुणानामन्तर्भावस्यैतदेव कारणं वर्तते यत् सामाजिकानां नवरसेभ्यः हृदयानां द्रुतिर्विस्तार

---

1. शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।
   व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः।। का०प्र० 1/70-71.
2. यदावीर रौद्रादिषु चित्तंव्याप्नोति तदा शुष्केन्धनाग्निवदिति यदा श्रृंगार करुणादिषु तदा स्वच्छ जलवदिति। का०प्र० बालबोधिनी पृ० 476.
3. ध्वन्योलोक दीधिति व्या० 2/10.
4. ध्वन्योलोक दीधिति व्या० 2/33 पृ० 121.
5. श्रुतिमात्रेण शब्दात्तु येनार्थ प्रत्ययो भवेत्।
   साधारणः समग्राणां स प्रसादो गुणोमतः। का०प्र० 8/76.
6. ओजः प्रसाद, श्लेष समता समाधि माधुर्य सौकुमार्योदारताऽर्थ व्यक्ति कान्तयो बन्धगुणः। का०लं०सू० 3/1/4.

विकासरूपास्तिस्रोऽवस्था भवन्ति तास्तिस्रोऽवस्था क्रमेण माधुर्यौजः प्रसादाख्य गुणानाश्रित्य तिष्ठन्ति। शृंगारकरुण शान्तेभ्यो चित्तस्य द्रुतिर्विद्यते, वीरवीभत्स रौद्ररसेभ्यश्चित्तस्य विस्तारोजायते, हास्याद्भुत भयानकेभ्यो चित्तं विकसति। हास्यरसे बदनस्य विकासः, अद्भुतेनयनस्य, भयानके झटित्यपसरणरूपो गमनस्य विकासो जायते। स च क्वचिद् द्रुत्या क्वचिद्विस्तारेण विभावादि वैचित्र्यवशाद्भवति।[1] एवदेव कारणं यद् ध्वनिवादिभिस्त्रयोगुणाः स्वीकृताः।

वामनोक्तदशगुणेषु केचन् माधुर्यौज प्रसादगुणेषु अन्तर्भवन्ति, केचिद्दोषाभावरूपा वर्तन्ते, केचिद्दोषत्वं प्राप्नुवन्ति।[2]

मम्मटमते वामनोक्तदशशब्दगुणानामन्तर्भावोयथा–

बहूनांपदानामेकपदवत्प्रतीतिरूपो श्लेषः, आरोहाऽवरोहरूपा समाधिः, पदानां विकटत्वं अर्थात् नृत्यत्वप्रायरूपोदारता, ओजोमिश्रितशैथिल्यस्वरूपो प्रसादः, एषां चतुर्ण्णां शब्दगुणानामोजोगुणे अन्तर्भावो भवति। वामनप्रतिपादित माधुर्य-गुणस्य मम्मटोक्तमाधुर्यगुणेनैव परिग्रहो जायते।

अर्थव्यक्तिगुणस्य, प्रसादगुणेऽन्तर्भावो भवति। मार्गाभेदरूपो समाताख्यो गुणोऽपि क्वचिद्दोषत्वं प्राप्नोति। अपारुष्यस्वरूपो सौकुमायगुणः, औज्वल्य-स्वरूपकान्तिगुणश्च क्रमेण कष्टत्वग्राम्यत्वदोषयोर्निराकरणेन स्वीकृतौ, मम्मटमते इमौ द्वावपि शब्दगुणौ दोषाभावरूपौ वर्तेते।[3] अनेन उपर्युक्तप्रकारेण मम्मटेन वामनस्य शब्दगुणानामन्तर्भावो विहितः।

दश-अर्थगुणानामन्तर्भावो यथा–

अर्थस्य पंचधाप्रौढिर्वामनेन–ओजोगुणत्वेन निरूपिता।[4] मम्मटमते सा प्रौढिः केवलमुक्तिवैचित्र्यमात्रं विद्यते। यतः तदअभावेऽपि काव्यव्यवहार- प्रवृत्तिर्भवति, काव्ये रसस्यैव प्राधान्यं वरीवर्ति। अतो रसाऽभावेऽर्थस्य प्रौढिसद्भावेऽपि काव्यव्यवहार प्रवृत्तिर्न जायते। इदमेवकारणमस्ति यन्मम्मटेन वामनस्य प्रौढिमोजोगुणत्वेन नादृता। अर्थप्रौढेः साभिप्रायत्वभेदं विहाय-चत्वारो भेदाः वैचित्र्यमात्ररूपाः। साभिप्रायत्वरूपस्यौजोगुणस्य अपुष्टार्थत्वदोषाभावे,

---

1. का०प्र० बालबोधिनी टीका० 6 उल्लसा पृ० 474.
2. केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः।
   अन्ये भजन्ति दोषत्वं कुत्रचित् न ततो दश।। का०प्र० 6/72.
3. का०प्र० 8 उल्लासः पृ० 479.
4. का०लं०सू० 3/2/2.

अर्थवैमल्यस्वरूपप्रसादगुणस्य, अधिकपदत्वरूपदोषाभावे, उक्तिवैचित्रयस्वरूप माधुर्यस्य, अनवीकृतत्व दोषभावे अपारुष्यस्वरूप सौकुमार्यगुणस्य, अमंगल-रूपाश्लीलदोषाभावे अग्राम्यस्वरूपोदारतागुणस्य च मन्तर्भावोभवति। एतेपञ्चार्थ-गुणाः उपर्युक्त प्रकारेण दोषाभावमात्रे गुणत्वं प्राप्नुवन्ति। मम्मटेन एषां गुणानां दोषाभावमात्रत्वं प्रतिपादितम्। वस्तुस्वभावस्फुटत्वमर्थव्यक्तिगुणस्य स्वभावोक्त्यलंकारेण ग्रहणंकृतम्। दीप्तरसत्वस्वरूपस्य कान्तिगुणस्य, रसध्वनि गुणीभूत् व्यंग्याभ्यां ग्रहणं जायते। वामनस्य क्रमकौटिल्यानुल्वणत्वोपपत्तियोगरूप घटनात्मा श्लेषगुणोऽपि उक्तिवैचित्र्यमात्रं वर्तते (एकस्यैवार्थस्य भङ्ग्यन्तरेण पुनः कथनमुक्तिवैचित्र्यमिति)।[1]

अवैषम्यस्वरूपा समताऽपि दोषाभावमात्रएववर्तते, अयोनिअन्यच्छायारूप द्विविधार्थदृष्टिस्वरूपः समाधिगुणः काव्यशरीरनिर्वाहकत्वान्न[2] गुणः। इत्थं मम्मटो वामनस्य दशशब्दगुणानां दशअर्थगुणानांच अन्तर्भावं चकार। परमनेन वामनात् पूर्ववर्तिराचार्यैनिरूपितानां दशगुणानां खण्डनं न भवति यदिस्यात्तदा केषांचिद्गुणानामेव मम्मटानुसारं खण्डनं भवितुमर्हति नतु सर्वेषाम्।

इमौ द्वावपि—आचार्यौ पृथक्-पृथक् सिद्धान्तप्रवर्तकौ आस्ताम्। वामनेन गुणानां शब्दार्थगतत्वं, निगदितम्।[3] मम्मटेन गुणा रसाश्रयाः प्रतिपादिताः।[4] दीप्तरसत्वंकान्तिरित्युक्त्वा वामनेन सर्वेषां रसानां कान्तिगुणे विन्यासः कृतः।[5] मम्मटेन एतद्विपरीतं कान्तिगुणस्य रसध्वनौ गुणीभूतव्यग्येच अन्तर्भावो- विहितः।[6]

वामनेन काव्यशोभाजनकत्वं गुणसामान्यस्यलक्षणं कृतम्।[7] मम्मटेन गुणानां रसधर्मत्वं निगदितम्।[8] वामनेन गुणानां विपर्यये दोषलक्षणं कृतम्।[9] मम्मटेन वामनोक्तगुणानां दोषविपर्ययत्वं प्रतिपादितम्।[10] एवं द्वयोराचार्ययोः परस्परं विरुद्धाधारणा आसीदिति, अन्यथाकर्तुं न शक्यते। एतदप्यत्र वाच्यम् यद्वामनोक्त शब्दार्थगुणान् निराकर्तुं स्वमतं च स्थापयितुं मम्मटसमक्षमानन्दवर्धनस्य

---

1. का०प्र० बालबोधिनी, पृ० 481.
2. तत्रैव० 8 उल्लासः पृ० 481-83.
3. का०लं०सू० 3/1/1 वृत्तौ।
4. का०प्र० 8/66.
5. का०लं०सू० 3/2/15.
6. का०प्र० विश्वेश्वर 8 उल्लास पृ० 392.
7. का०लं०सू० 3/1/1.
8. का०प्र० 8/66.
9. का०लं०सू० 1/1.
10. का०प्र० अष्टम उल्लासः पृ० 391-92.

रसाश्रितास्त्रयोगुणा आसन्। एतदेवकारणमस्ति यद्वामनोक्त शब्दार्थगुणान् अकिंचिनकरानिति मत्वा मम्मटोऽखण्डयत्। यस्मादानन्दवर्धनस्य मम्मटस्य च मतमेव प्रसिद्धिमगात्।

यद्यपि मम्मटेन वामनोक्त शब्दार्थगुणानां प्रदर्शितरीत्या अन्तर्भावो विहितः। परमेतदपिविचारणीयोऽस्ति यद्वामनेन तस्मिन् समये गुणानां शब्दार्थयोर्वर्गद्वये विभाजनं कृतम्। यदा केनापि उपयुक्तं गुणसामान्यलक्षणं न कृतमासीत्। वामनसमये काव्यस्यात्मा रसोवर्तते इति न केनाप्याचार्येण दृष्टमासीत्। अलंकारवादिना वामनेन गुणानां शब्दार्थयोर्वगद्वये विभाजनं कृत्वा तत्कलीन अलंकारशास्त्रस्य विशेषतः गुणानां च महानुपकारोसाधितः। वामनात्प्राक् कैश्चिदाचार्यैर्गुणानामलंकाराणांचाभिन्नत्वं निरूपितमासीत्;[1] एवं च कैशिचद्गुणानां कृते विशिष्टालंकार शब्दस्यप्रयोगः कृत आसीत्।[2] यदितेषामाचार्याणामनुसारं वामनेनापि गुणानां प्रतिपादनं कृतोऽभविष्यत् तदा मम्मटसमक्षे एतादृशी- स्थितिर्नैवसमुत्पद्येत येन मम्मटः- आनन्दर्धनानुसारं गुणानां रसधर्मत्वं स्वीकृत्य वामनोक्तशब्दार्थगुणानां खण्डने प्रयतेत्।

आनन्दवर्धनेन मम्मटेन च गुणानां गौणीवृत्या यच्छब्दव्यंजकत्वं स्वीकृतम् तस्याधारो वामनोक्त शब्दार्थगता गुणा एववर्तन्ते। सर्वप्रथमं वामनेन गुणसामान्य लक्षणंविधाय काव्ये गुणानां शोभाकरत्वं प्रतिपादितम्। आचार्यवामनेनैव सर्वप्रथमं गुणालंकारयोर्भेदो दर्शितः तथा रचनायां आत्मत्वेन गुणाः स्वीकृताः। वामनेन काव्यस्यात्मा रीति रिति स्वीकृतः। परं सा रीतिः विशेषवती पदानां रचना भवति तत्रवैशिष्टयं गुणात्मकत्वमेव वर्तते।

ध्वनिवादिनामाचार्याणां गुणविषयकं महत्वं वामनकारणादेव वर्तते यतोहि रसाश्रितगुणविषये येनकेनचिद्रूपेण वामनेनैवबीजारोपणमर्थगतकान्तिगुणेन कृतमासीत्। आचार्यमम्मटो ध्वनिवादी वर्तते तस्मात् आनन्दवर्धनानुसारं गुणानां रसधर्मत्वं स्वीचकार। आचार्यवामनः अलंकारवादी वर्तते। अनेन स्वसमयानुसारं गुणानांविषये साधुप्रतिपादितम्। अलंकारवादिभिः प्रायः सर्वैराचार्यैर्गुणानां दशसंख्या स्वीकृता, नतु पूर्वाचार्यस्य गुणानामपरेण खण्डनं कृतम्। यतोहि परम्परयालंकारवादिनां समये गुणानां दश संख्यैव पुष्टिंगता रसात्मकत्व काव्यव्यवहारस्तदानीं नासीत्।

---

1. का०प्र० उद्भटमतम् अष्टम उल्लास पृ० 470.
2. का०द० 2/3.

दशगुणस्वीकृतौ कारणम्–

चेत् खण्डनस्य परिपाटीअवलम्बणीयास्यात्तदा मम्मटस्य त्रयोगुणा येषां रसानां नित्यधर्मा सन्ति तेषु रसेष्वेव माधुर्यादयोगुणाः अन्तर्भवितुमर्हन्ति। यतो यस्यां रचनायां रसस्यसद्भावो विद्यते तत्र माधुर्यादयोगुणाः स्वयमेव भविष्यन्ति को लाभः गुणानां व्यर्थकल्पनया। अथवा वामनोक्त दीप्तरसत्वरूप कान्तिगुणे एव सर्वेषां रसध्वनिगुणीभूतव्यग्यानां च अन्तर्भावो मन्तव्यः। परमहमेवं न मन्ये मम्मटेन याभिर्युक्तिभिर्वामनोक्त शब्दार्थगुणानामन्तर्भावोविहितः ताः युक्तयो दृढ़तमाः सन्ति।

ध्वनिवादिनामाधारेणैव अद्य काव्यस्यकाव्यत्वं वर्तते। रसेष्वेव गुणानामन्तः पातेसति अथवा कान्तिगुण एव गुणानांरसानाचान्तःपातेसति समग्रा गुणविषयिणी व्यवस्था समूलोन्मूलतामेष्यति। वामनेन गुणानांविपर्यये दोषाणां प्रतिपादनं कृतम्, नतु दोषवैपरीत्ये गुणाः, परं मम्मटेन दोषवैपरीत्ये गुणानां खण्डनं कृतम्। एतदपि सम्भवति यन्मम्मटेन दोषविपर्ययो गुणा इति भरतगुणलक्षणात् संकेतंप्राप्य वामनस्य गुणानामन्तर्भावकर्तुं योजना सुनियोजिता याद्यपर्यन्तं सर्वमान्याऽतिष्ठत्। समुचितप्रकारेण मम्मटेन वामनोक्तशब्दार्थगुणानामन्तर्भावो प्रदर्शितः, परं भरतोक्तानां तथा दण्डयोक्तगुणानामन्तर्भावविषये न किमप्यभिहितम्। यया रीत्या गुणानामन्तर्भावो प्रदर्शितः- तयापद्धत्या भरतोक्त श्लेषगुणप्रथमलक्षणस्य,[1] समतायाः प्रथमलक्षणस्य[2], उदारतायाः प्रथम लक्षणस्य[3], समाधिगुणस्य प्रथमलक्षणस्य[4], अन्तर्भावो न सम्भवः, अनेनैव प्रकारेण दण्ड्युक्त प्रसादगुणस्य समाधिगुणस्य च[5], अन्तर्भावो न युज्यते।

दण्ड्युक्त माधुर्यौजगुणयोः पृथक् सत्ता विद्यते।[6] भरतदण्ड्युक्ताना मेभ्योऽन्येषां गुणानांमन्तर्भावो मम्मटरीत्या भवितुं शक्यते। दण्डयुक्तार्थव्यक्ति गुणस्य स्वभावोकत्यलंकारेण ग्रहणंभवति, अथवा नेयार्थत्वदोषाभावरूपोऽर्थ-व्यक्ति गुणः।[7]

---

1. ना०शा० 16/97.
2. तत्रैव० 16/100.
3. तत्रैव० 16/110.
4. तत्रैव० 16/102.
5. का०द० 1/45-93.
6. तत्रैव० 1/51-80.
7. तत्रैव० 1/73.

येषांगुणानामन्तर्भावे किमपिकाठिन्यं तेषांविषये मम्मटेन नियमविशेषेण कथनीयमासीत् यदेषांगुणानां पृथग्-अस्तित्वं वर्तते, अतएव एषामन्तर्भावो न समीचीनः। भरतोक्तश्लेषसमतासमाधिउदारतागुणानां प्रथमलक्षणानि नैव अन्तर्भवन्ति दण्डयुक्तप्रसादसमाधिगुणयोरन्तर्भावो न सम्भवः। दण्डीमते माधुर्यौजोगुणयोः पृथगस्तित्वमस्ति। अतोऽष्टौगुणाः स्वीकर्तव्याः। यतोहि वामनोक्तगुणलक्षणेभ्यः उपर्युक्तगुणानां लक्षणानि शब्दार्थोभयदृष्टया भिन्नत्वेन निरूपितानि।

वामनस्यापि गुणविषयिणीधारणा क्षीरक्षालिता न वर्तते। वामनेन शब्दार्थगतत्वेन गुणानां यद्विभाजनं कृतम् तत् केनकारणेन कस्यलक्षणस्याधारेण कृतम् एतत्सर्वं न स्फुटीकृतम्। एकत्र गुणालंकारयोर्भेदः प्रदर्शितः गुणानां नित्यत्वमलंकाराणामनित्यत्वमभिहितम्। अपरत्र अर्थव्यक्तिगुणस्य मम्मटानुसारं स्वभावोकत्यलंकारेण यद्ग्रहणं भवति तदन्यथाकर्तुं न पार्यते, अनेन गुणालंकारयोर्योभेदो निरूपितस्तस्य निरासो भवति। वामनस्य नित्यरूपो अर्थव्यक्तिगुणोऽनित्येऽलंकारे सुव्यक्तरूपेणान्तर्भवति। वामनेन श्लेषादि शब्दार्थगुणानां सुव्यवस्थितरूपेण लक्षणानि न निरूपितानि। एतदेवकारणं वर्तते यन्मम्मटेन वामनोक्त गुणानामन्तर्भावो प्रदर्शितः। भोजप्रभृतिभिर्वामनेन सह सौहृद्यं प्रकटितम् यतो वामनेन पूर्ववर्त्याचार्येभ्यः दशगुणा आधिक्येन स्वीकृताः। भोजदेवेन वामनादपि चतुर्दश गुणा अधिकाः प्रतिपादिताः। दोषाभावमात्रे वाक्यार्थदोषगुणानां वैशेषिकत्वेन निरूपणं कृतम्। मम्मटेन वामनगुणलक्षणान्यादाय अन्तर्भावो प्रदर्शितः, भरतदण्डिनोर्गुणधारणा विषये मौनमेवाकलितम्।

पूर्वप्रदर्शितरीत्या भरतसम्मताः श्लेषः, समतासमाधिउदारताः दण्डीसम्मतः प्रसादः, समाधिः, माधुर्य, ओज एते अष्टौ गुणाः स्वीकर्तव्याः।

समाधिगुणस्य यदि एकत्वसंख्या स्वीकृतास्यात्तदा गुणानां सप्त संख्या भविष्यति, परमेवमपि न संभवति यतो दशगुणाः शब्दार्थद्वारा रचनामुपकुर्वन्तः उत्कर्षकारका इत्युच्यन्ते। यथा शौर्यादयोगुणा आत्मनोधर्माभवन्ति शरीरान्तः आत्मनोनिवासात् शरीरधर्माप्युच्यन्ते तथैव माधुर्य-ओजः-प्रसाद, एतेत्रयो गुणाः काव्यास्यात्मनोरसस्यधर्मासन्तः (शरीरधर्माः) शब्दार्थधर्माप्युच्यन्ते, अन्येषां सप्तगुणानां शब्दार्थधर्मत्वांगीकारे न किमप्यपचीयते। मम्मटोक्त त्रयाणां गुणानां सत्ता तु अपरिहार्यैव विद्यते। यतो रसमयवाक्यार्थ ज्ञानानन्तरं चित्तस्यद्रुतिर्भवति, कदाचित् समकालमेव द्रुतिदीप्त्योः सद्भावोप्यनुभूयते कादाचित्-चित्तस्य विकासो

भवति। नवरसजन्या द्रुतिर्विस्तार विकासाख्यास्तिस्रोऽवस्थाः क्रमेण माधुर्य ओजप्रसादाख्यगुणैरूच्यन्ते।

माधुर्यादयो गुणा रसस्यधर्माः वर्तन्ते। हृदि विद्यमाना स्थायिभावा एव स्वं स्वं निमित्तमासाद्य रसत्वेनाभिधीयन्ते। माधुर्यादयोगुणा अपि चित्तवृत्तिविशेषा मन्यन्ते। अतएव ध्वनिवादिभिर्गुणानां रसधर्मत्वं स्वीकृतम्। यस्यां रचनायां रसस्यास्तित्वं भवति तत्र रसानुसारं माधुर्यादिगुणानां सद्भावो जायते् परं रचनायां समुचितव्यञ्जक वर्णानामभावे रचनागतमाधुर्यादयो गुणा न भविष्यन्ति। अतएवोपचारेण गुणानां वर्णधर्मत्वमपि स्वीकृतम्। अधुना सर्वमान्योऽयं सिद्धान्तः यद्रसस्यरसादिध्वनेश्च काव्ये सर्वोपरिस्थानं वर्तते। अतो गुणानां शृंगारादि रसैःसह सम्बन्धो गौरवायैव वर्तते। अस्मात् कारणात् वामनस्य शब्दार्थगता मान्यता न्यक्कृता विद्यते। मम्मटस्य रसाश्रितगुणविषयिणी धारणा एव-अर्वाचीनैराचार्यैः स्वीकृता। साम्प्रतिकैरपि स्वीक्रियते।

यद्यपि मम्मटेन भरतदण्डिनोः गुणानांविषये स्वीयाधारणा न प्रकटिता तेषु गुणेषु केचिद् वामनोक्तगुणवद्-अन्तर्भवन्ति। परं पूर्वप्रदर्शितगुणानामन्तर्भाव-विषये सन्दिग्धास्थिति एव विद्यते तथापि मम्मटस्य त्रयो गुणा अपलपितुं न शक्यन्ते।

निष्कर्षतो रसाश्रितागुणाः शब्दार्थगुणानां निषेधं न कुर्वन्ति। एकत्र माधुर्यादयोगुणा रसादीनामुत्कर्षं कुर्वन्ति, अपरत्र श्लेषादयोगुणाः शब्दार्थयोरु-भयोरप्युत्कर्षं विदधति। अतः चित्तस्य द्रुतिर्दीप्तिर्विकासरूपा माधुर्यौजः प्रसादगुणाः स्वीकर्तव्याः, एवं च भरतदण्डिनोर्येषां गुणानांविषये मम्मटेन न किमप्यभिहितम् ते गुणा तत्तद्लक्षणानुसारं स्वीकर्तव्याः। यदि भरतप्रतिपादितस्य दण्डीप्रतिपादित समाधिगुणस्य समाधिगुणेनैव गतार्थता स्यात्तदा सप्तगुणा भरतदण्डी सम्मताः, त्रयोगुणा मम्मटाभिमताः येषां संकलनेन दशसंख्येव स्वीकर्तव्या। इदं मतं षष्ठाऽध्यायेऽपि स्फुटीभविष्यति। मम्मट प्रतिपादितगुणानामन्तर्भावक्रमे केवलं वामनगुणाएव अन्तर्भवन्ति न भरतदण्डिनोः। अतोऽत्र उपर्युक्त विवेचनप्रतिपादन-मावश्यकमासीदिति।

निष्कर्ष रूपेण मम्मटस्य सारांशोऽयं वर्तते–

1. यथा शौर्यादय आत्मनोधर्माःसन्ति तथैव माधुर्यादयो गुणा रसधर्मा वर्तन्ते।
2. गुणानां रसेनसह सम्बन्धोऽन्वयव्यतिरेकवद् विद्यते।
3. गुणा रसस्योत्कर्षं कुर्वन्ति।
4. गौणीवृत्या उपचारेण वा शब्दार्थयोर्धर्माअपि भवन्ति।

5. कोमलवर्णा माधुर्यगुणव्यत्रजकाः। कठिनवर्णा ओजोगुण व्यंजकास्सन्ति।
6. चित्तस्यद्रुत्यवस्थायां माधुर्यगुणोभवति; चित्तस्य विस्तारावस्थाया-मोजोगुणो भवति। प्रसादगुणे द्रुतिर्दीप्तिर्विकासादयोऽवस्था भवन्ति।

वाग्भटः—

दशगुणनिरूपणात् प्रथम वाग्भटस्य गणनाऽपि दशगुणवादिषु वर्तते। वाग्भटालंकारे दण्डीवामननिरूपितगुणविषयिणी धारणा एव प्रकटिता वर्तते। वाग्भटेन स्वातन्त्र्येण गुणविषये न किमप्यभिहितम्।

गुणसामान्यलक्षणे अनेन कथितं यच्छब्दार्थौ दोषरहितावपि यैर्गुणैर्विना न प्रशस्येते ते गुणा औदार्यसमतादयस्सन्ति।[1] अनेनकथनेन वाग्भटमते गुणानां भावात्मकत्वं ज्ञायते। वाग्भटेन गुणालंकाररीतिरसापेतं साधुशब्दार्थसन्दर्भयुक्तं काव्यं यशसेविदधीदिति काव्यफलं प्रतिपादितम् अस्मिन् काव्यप्रयोजने गुणालंकारप्रभृतीनां काव्यतत्वानां समानास्थितिर्निरूपिता।[2] वाग्भटः अलंकारस्य यत् सामान्यलक्षणकमरोत् तेन गुणानां महत्वमपचीयते। आचार्यवामनेन गुणयुक्तमलंकाररहितमपिकाव्यं काव्यनामभाग् भवतीति प्रतिपादितम्। परं वाग्भटमते तु दोषरहितं गुणयुक्तमपि काव्यं चित्रजात्याद्यलंकाररहितं तथा न शोभते यथा स्त्रीरूपं कटककुण्डलाद्यलंकारैःरहितं न शोभते।[3] अस्मादलंकार लक्षणादलंकाराणामेव काव्ये अनिवार्यता प्रकटीभवति। वाग्भटेनालंकारसामान्य लक्षणे गुणानां या हेयता प्रतिपादिता सा समीचीना न प्रतिभाति। यतोहि दशगुणनिरूपकैराचार्यैर्विवेचितगुणप्रकारेणयेनकेनचिद्रूपेण गुणानामावश्यकत्वं स्वीकृतम्। ध्वनिवादिभिरपि गुणानां काव्यात्मना रसेनसह सम्बन्धः स्थापितः। परं वाग्भटेन गुणमहत्वं न्यक्कृत्यालंकाराणांमहत्वं निरूपितम्। गुणानामुपसंहारं-कुर्वता वाग्भटेन यद्गुणमहत्वं प्रतिपादितम् तेनाप्यलंकाराणां महत्वमेव पुष्टं भवति।

---

1. अदोषावपिशब्दार्थौ प्रशस्येते न यैर्विना।
तानिदानीं यथाशक्ति ब्रूमोऽभिव्यक्तये गुणान्।।
औदार्यसमता कान्तिरर्थव्यक्तिः प्रसन्नता।
समाधिः श्लेष ओजोऽथ माधुर्यं सुकुमारता।। वाग्भटालंकारः 3/1-2.
2. साधुशब्दार्थ सन्दर्भं ओजोऽर्थ माधुर्यं सुकुमारता। गुणालंकार भूषितम्
स्फुटरीति रसोपेतं काव्यं कुर्वीत कीर्तये।। तत्रैव० 1/2.
3. दोषैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः।
स्त्रीरूपमिव नोभाति तं ब्रुवेऽलंक्रियोच्चयम्।। तत्रैव० 4/1.

वाग्भटमते—औदार्यादिगुणैः समन्वितं काव्यं मुक्ताफलानांस्रजमिव वाग्देवी आभूषणरूपेण स्वकण्ठे धारयति।[1] यद्यप्यत्र गुणानां भावात्मकस्थितिं प्रदर्शयितुं वाग्भटेन प्रयासोविहितः परं सः प्रयासः पूर्णरूपेण न प्रकटितः। यदौदार्यादि-गुणैर्युक्तं काव्यं मुक्ताफलानां स्रगिवेति प्रतिपादनेनगुणानामप्यलंकारत्वं सिद्धयति। यतः सरस्वती गुणग्रथितां काव्यरूपिणींमालामलंकारत्वेन स्वीकरोति। वाग्भटेन गुणसम्बन्धिनी धारणा स्फुटरूपेण न निरूपिता। दशगुणवादिभिर्दण्डी-वामनप्रभृतिभिर्गुणानां सम्बन्धो रीतिभिः सह संस्थापित आसीत् परं वाग्भटेन शिष्टाचारंनिर्वोढुमपि रीतिभिः सह गुणानां सम्बन्धो न स्थापितः।

काव्यरचनाप्रकारेषु गुणानां समवायसम्बन्धो वर्तते परं वाग्भटमते सहृदयहृदयानांमनःसु यस्मादर्थकारणादत्यन्तं चमत्कारउदैति तस्मिन् काव्येसोऽर्थो वर्णितरीत्याऽलंकारत्वेन बोद्धव्यः।[2]

1. अतो वाग्भटमते शब्दार्थौ, औदार्यादि गुणैः प्रशस्येते।
2. गुणयुक्तमपि काव्यमलंकाररहितं न शोभते।
3. गुणेभ्योऽलंकाराः विशिष्यन्ते।

हेमचन्द्रः—

हेमचन्द्रः काव्यलक्षणे शब्दार्थौ इत्यस्य विशेष्यभागस्य त्रीणि विशेषणानि प्रतिपादयामास। तत्र सगुणौ इति विशेषणमपिवर्तते। अस्माद् ज्ञायते यत्, हेमचन्द्रमतेऽपि गुणाः शब्दार्थयोर्धर्मावर्तन्ते।[3]

अस्यमते रसस्योत्कर्षहेतवो गुणाः, अपकर्षहेतवस्तु दोषाः, इमौद्वावेव गुणदोषौ उपचारेण, शब्दार्थयोर्धर्मा विद्यन्ते।[4] गुणानामावश्यकत्वमनुभवता हेमचन्द्रेणकथितं यदलंकारशून्यं गुणयुक्तं काव्यं स्वदते, गुणशून्यमलंकारयुक्तमपि काव्यं न स्वदते।[5] अनेनकथनेनालंकारेभ्योगुणानामनिवार्यत्वं सिध्यति। यतोहि गुणा

---

1. गुणैरमीभिः परितोऽनुविद्धं मुख्ताफलानामिव दाम रम्यम्।
देवीसरस्वत्यपि कण्ठपीठे करोत्यलंकारतया कवित्वम्।। वाग्भटालंकारः 3/18.
2. अर्थेन येनातिचमत्करोति प्रायः कवित्वं कृतिनां मनःसु।
अलंक्रियात्वेन स एव तस्मिन्नभ्यूह्यतां हन्त दिशानयैव।। तत्रैव० 4/152.
3. अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम्। हे०चं०का०शा०। म०अ० पृ० 19.
4. रसस्योत्कर्षापकर्षहेतू गुणदोषौ भक्त्या शब्दार्थयोः। तत्रैव० पृ० 19.
5. तथाहि अनलंकृतमपि गुणबहवः (बहुलं) स्वदते। अलंकृतमपि निर्गुणं न स्वदते। तत्रैव० पृ० 19.

अङ्गिनि रसे तिष्ठन्ति; अलंकारास्तु शब्दार्थावाश्रित्यतिष्ठन्ति, विद्यमानेरसे कदाचिदुपकुर्वन्ति कदाचिन्नोपकुर्वत्ति। हेमचन्द्रो मुख्ययावृत्या गुणानां शब्दार्थाश्रयत्वं न स्वीचकार। भरतप्रभृतिभिराचार्यैः प्रतिपादितानां दश गुणानां लक्षणानि प्रतिपादयामास[1] तेषु केषांचिल्लक्षणानां समर्थनं केषाञ्चित् खण्डनं चाकरोत्।[2]

ओजः प्रसादः माधुर्यं, साम्यं, औदार्यमित्येषांपंचानां गुणानामुल्लेखंविधायैते गुणा पाठनियमा वर्तन्ते, एषांगुणत्वं तु केषांचिन्मते छन्दविशेषे एव भवतीति हेमचन्द्रण निगदितम्।[3] हेमचन्द्रेण माधुर्योजप्रसादाख्यास्त्रयो गुणा स्वीकृताः। दशगुणानां, पंचगुणानां च माधुर्यादित्रिषु गुणेषु अन्तर्भावः स्वीकृतः। केचिद् गुणा दोषपरिहारेण स्वीकृताः।[4]

माधुर्यगुणस्यस्थितिर्यथा आनन्दवर्धनेनमम्मटेन च प्रतिपादितासीत् न तथा हेमचन्द्रेण। आनन्दवर्धनेन, सम्भोगश्रृंगाराद विप्रलम्भश्रृंगारे ततोऽपि करुणे सातिशयेन माधुर्यगुणस्य स्थितिर्निरूपितासीत्।[5] मम्मटेन तु संभोगश्रृंगारात्, करुणे ततोऽपि विप्रलम्भे ततोप्यधिका शान्तरसे माधुर्यगुणस्य स्थितिः-प्रदर्शितासीत्[6] परं हेमचन्द्रेण शान्तकरुणविप्रलम्भेषु, उत्तरोत्तर क्रमेण अतिशयेन माधुर्यगुणः स्वीकृतः।[7] हेमचन्द्रस्य ओजोगुणलक्षणे प्रसादगुणलक्षणे च किंमप्यभिनवत्वं न प्रतिभाति। अनयोर्द्वयोर्गुणयोर्व्यञ्जकतास्थितिश्चानन्द-वर्धनानुसारं मम्मटानुसारं च निरूपिता।[8]

---

1. ततश्चैते शब्दार्थाश्रयत्वेनान्ये च गुणा यत्कैश्चन प्रतिपाद्यन्ते तन्न युक्त मिति। तथाहि–"ओजः प्रसादश्लेष समता समाधि माधुर्यसौकुमार्योदारतार्थव्यक्ति कान्तयो बन्धगुणादश" इति केचित्। तत्रैव० पृ० 32-33 अ० चतुर्थ।
2. तत्रैव० पृ० 233 तः 240 पर्यन्तम्।
3. ओजः प्रसाद मधुरिमाणः साम्यमौदार्यंच पंचेत्यपरे तथा हि। यद्दर्शितविच्छेदं पठतामोजः, विच्छिद्यपदानि पठतां प्रसादः, आरोहावरोतरङ्गिणिपाठे माधुर्यम्, स सौष्ठवमेव स्थानं पठतामौदार्यम् अनच्चनीयं पठतां साम्यामिति। लदिद मलीकं कल्पना तन्त्रः यद्विषय विमागेन पाठ नियमः स कथं गुणनिभित्तमिति छन्दोविशेष निवेश्या गुणसंपत्तिरिति केचित्। हे०च०का०शा० वृत्तौ पृ० 240.
4. माधुर्योजः प्रसादास्त्रयोगुणाः। त्रयो न तु पंच दश वा, लक्षणस्य व्यभिचारा-दुच्यमान गुणेष्वेवान्तर्भावात्, दोषपरिहारेण स्वीकृतत्वाच्च। तत्रैव० पृ० 232-33.
5. ध्वा०लो० 2/31.
6. का०प्र० 8/91.
7. शान्तकरुण विप्रलम्भेषु सातिशयम्। का०शा० पृ० 241.
8. हे०च०का०अ० अ० 4, पृ० 242-243.

जयदेवः—

गुणस्वरूपम्—

जयदेवस्य गुणनिरूपणात् गुणस्वरूपविषये न किमपि ज्ञातुं शक्यते। यथा शौर्यादयोगुणाः पुरुषे पुरुषत्वप्रतीका भवन्ति तथैव काव्येपि श्लेषादयोगुणाः काव्यत्वप्रतीका वर्तन्ते। अनेनैतत् प्रतीयते यत् जयदेवमतेऽपि श्लेषादिगुणैर्विहीनं काव्यं नैव काव्यनामभाग् भवति।[1] गुणविषये यद्यपि जयदेवेन आचार्यमम्मटस्य समर्थनं न विहितम् नच मम्मटानुसारं गुणानांसंख्यानिरूपिता। तथापि गुणस्वरूप विषये अप्रत्यक्षरूपेण केनचिदंशेन मम्मटमतमेव समर्थितम्। मम्मटेन शौर्यादयः आत्मनोधर्माः कथिताः।[2] जयदेवेनतु पुरुषे पुरुषत्व प्रतीका शौर्यादयो कथिताः, गुणानांसंख्याविषयेप्यनेन संदेहास्पदास्थितिरेव स्थापिता। गुणनिरूपणस्यान्तिमे-पद्ये कथितम् यत्-शृंगारे रसे, प्रसादगुणे च कान्त्यर्थव्यक्तिगुणयोर्ग्रहणं भवति।[3] यद्यस्य कथनस्य अयमाशयः स्यात् यत् कान्त्यर्थव्यक्तिगुणयोः क्रमेण शृंगाररसे प्रसादगुणे च अन्तर्भावो भवति; तदा जयदेवमते अष्टौगुणा भविष्यन्ति। परमेतदपि नैव युक्तं प्रतिभाति, गुणगणनायां तु जयदेवेन दशगुणाः स्वीकृताः। अतः कान्त्यर्थव्यक्तिगुणयोरन्तर्भावो नैवकृतः अपितु संक्षेपार्थं इमौद्वावेव गुणौ संग्रहशब्देन शृंगाररसत्वेन प्रसादगुणत्वेन च स्वीकृतौ अनयोर्द्वयोर्गुणयोर्लक्षणेऽपि न निरूपितौ यतो नाम्नाएव तयोरर्थ ज्ञानं भवति। अत उभयोः शृंगार प्रसादयोरुदाहरणाभ्यां कान्त्यर्थव्यक्तिगुणयोः सद्भावः प्रतिबोधितः। अनेनाशयेनैव जयदेवेन कान्तिगुणस्यार्थव्यक्तिगुणस्य च स्वरूपं पृथक्तया नैव कथितम्। शृंगार रसेन कान्तिगुणस्य यद् ग्रहणं विहितम् तद्-आचार्यवामनस्येवानुकरणं वर्तते। यतो वामनेन कान्तिगुणस्यलक्षणं रसदीप्तत्वरूपेण कृतम्।[4] काव्ये यः सर्वस्वमलंकारमनुमनुते,[5] तस्य एतावदंशेनापि गुणनिरूपणात् काव्यलक्षणे गुणप्रयोगादुपकारो मन्तव्यः।[6]

---

1. अमीदशगुणाः काव्ये पुंसि शौर्यादयोयथा। चं०लो० 4/10.
2. येरसस्याङ्गिनोधर्माः शौर्यादय इवात्मनः। का०प्र० 8/66.
3. शृंगारे च प्रसादे कान्त्यर्थव्यक्ति संग्रहः। चं०लो० 4/10.
4. का०लं०सू० 3/2/15.
5. अंगीकरोति यः काव्यं शब्दार्थावनलंकृती।
   असौनमन्यते कस्मादनुष्णमनलंकृती।। च०लो० 1/8.
6. निर्दोषालक्षणवती सरीतिर्गुणभूषणा।
   सालंकाररसानेक वृत्तिर्वाक्काव्यनामभाक्। तत्रैव० 1/7.

जयदेवस्य गुणविवेचनम्

जयदेवः श्लेषः, प्रसादः, समता, समाधिः, माधुर्यं, ओजः, पदसौकुमार्यं, अर्थव्यक्तिः उदारता, कान्तिः, इत्यनेनप्रकारेण दशगुणान् प्रतिपादयामास। सम्प्रति अर्थव्यक्तिगुणं कान्तिगुणं विहाय श्लेषादि अष्टौ गुणानां विवेचनमित्थं वर्तते।

1. श्लेषः–

यत्र असंभवार्थस्य, संभवरूपेणवर्णनं स्यात्तत्रार्थश्लेषगुणो भवति। यत्र हृदयाह्लादकराणां सजातीयशब्दानां प्रयोगः स्यात् सा रचना शब्दश्लेषयुक्ता जायते।[1] जयदेवेन अर्थश्लेषस्य स्वरूपं निरूपितम् जयदेवस्यास्मिन् श्लेषगुण-लक्षणे वामनोक्त क्रमकौटिल्यानुल्वणत्वोपोपपत्तियोगस्वरूपअर्थश्लेषस्य,[2] तथा मसृणत्वस्वरूपशब्दश्लेषस्य सादृश्यं वर्तते।[3]

जयदेवस्य श्लेषगुणलक्षणे किमपि नूतनत्वं न लक्षयते येनास्य गुणस्य विषये कापिनूतना धारणा प्रतीतिपथमवतरेत्।

2. प्रसादः–

यस्य वाक्यस्याभ्यन्तरेस्थितः सम्पूर्णोऽर्थः पदार्थसहितः प्रयत्नेन विना प्रतीतिविषयो भवति स स्वच्छजलवत् प्रसादगुणो वर्तते।[4] एषगुणो भरतस्य प्रसादगुणेन अर्थतः साम्यमावहति।[5] वास्तविकरूपेण जयदेवस्य प्रसादगुणो वामनोक्तअर्थवैमल्यस्वरूपप्रसाद गुणान्नभिद्यते।[6] मम्मटस्य प्रसादगुणस्य लक्षणे जलं यथा स्वच्छवस्त्रं सहसैवव्याप्नोति तथैवार्थोऽपि सहसा यत्र चितंव्याप्नोति तत्र प्रसादगुणो राजते।[7] जयदेवेनापि सलिलस्येवसूक्तस्य इत्यादि शब्दैः प्रसाद- गुणोव्यवस्थापितः। अतोऽत्र एतन्निश्चीयते यत् जयदेवेन प्रसादगुणस्य लक्षणं वामनमम्मटयोः प्रसादगुणस्य लक्षणानुसारं विहितम्। प्रसादगुणलक्षणे प्रायः पूर्ववर्तिभिरपि एतादृशीधारणा स्वीकृता।

---

1. श्लेषो विघटमानार्थ घटमानत्ववर्णनम्।
   स तु शाब्दः सजातीयैःशब्दैर्बन्धः सुखावहः।। च०लो० 4/1.
2. का०लं०सू० 3/2/4.
3. तत्रैव० 3/1/11.
4. यस्मादन्तः स्थितः सर्वः स्वयमर्थोऽवभासते।
   सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः। चंलो० 4/3.
5. ना०शा० 16/99.
6. का०ल०सू० 3/2/3.
7. शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः। का०प्र० 8/70.

3. समताः–

जयदेवः समतागुणेऽल्पसमासत्वं, वर्णानांपदानां च साम्यत्वं, निरूपितवान्।[1] अस्मिन् गुणे समासाभावः प्रदर्शितः, वा शब्देन समासाभावत्वमथवा वर्णादीनां साम्यप्रयोगो इत्येतद् द्वयोरेकतरोऽभिमतः। द्वयोरेकतरमपि समतागुणस्य लक्षणं स्यात् तदा समाससद्भावेऽपि समतागुणो भविष्यति–समासाभावे वर्णादीनां तुल्यप्रयोगात् समता गुणोभविष्यति, एतत् प्रसादगुणस्य लक्षणं संदिग्धरूपेण प्रदर्शितम्।

समतागुणेऽसमस्तरचना भरतेन पूर्वमेव बोधिता[2]। रचनायां अवैषम्यं दण्डिना,[3] अवैषम्यंसमता इतिवामनेन,[4] क्रमवतामवैषम्यमिति भोजदेवेन, समता[5] गुणस्य लक्षणं कृतम्। जयदेवेनापि समतागुणलक्षणे समासाभावो भरतमते प्रतिपादितः। वर्णादीनामवैषम्यं अन्येषामुपर्युक्त आचार्याणामनुसारं समतागुण लक्षणे प्रदर्शितम्।

4. समाधिः–

अर्थस्ययन्महत्वं स समाधिगुणोवर्तते। अस्मिन् गुणे देदीप्यमाना सान्द्रा रसमयीरचना हृदि प्रविशन्तीव काव्यमर्मज्ञान् रोमाञ्चितं करोति।[6] वस्तुतो जयदेवेनार्थस्यमहिमैव समाधिगुणत्वेनोपन्यस्तः समाधिगुणस्यलक्षणे लसद्घनरसात्मना इत्यत्र रसात्मनः शब्दात् ज्ञायते यत् रस एव आत्माजीवनाधायको यस्य तादृशस्यार्थस्य यन्महत्वं स समाधिगुणत्वेनाख्यायते। यद्यपिचन्द्रालोके अन्यकाव्यतत्वानामपेक्षयाऽलंकाराणामेव प्राधान्यं वरिवर्ति परं समाधिगुणलक्षणे रसः काव्यात्मत्वेन प्रतिष्ठापितः। जयदेवस्य एषगुणो वामनस्यार्थदृष्टिःसमाधिगुणादभिन्नो वर्तते।[7] परं वामनोक्त समाधिगुणस्य लक्षणं जयदेवस्य समाधिगुणस्यलक्षणं च अंशतः किञ्चिद्भिद्यते यतो वामनेन दीप्तरसत्वं कान्तिगुणे कथितम्।[8] परं जयदेवेन रसात्मनाऽर्थ- महिमा समाधिगुणे प्रदर्शितः।

---

1. समताल्पसमासत्वं वर्णाद्यैस्तुल्यताऽथवा। चं०लो० 4/4.
2. ना०शा० 16/100.
3. का०द० 1/47.
4. का०लं०सू०
5. श्रृ०प्र० नवम प्र० पृ० 344.
6. समाधिरर्थमहिमा लसद्घनरसात्मना।
   स्यादन्तर्विशतायेन गात्रमंकुरितं सताम्। च०लों० 4/5.
7. का०लं०सू० 3/2/7.
8. तत्रैव० 3/2/15.

5. माधुर्यम्–

पुनः कथितपदस्य यद् वैचित्र्यात्मकं रमणीयत्वं तन्माधुर्यगुणोपेतं भवति।[1] जयदेवस्य माधुर्यगुणो वामनस्यउक्तिवैचित्र्यस्वरूपमाधुर्यगुणात् पृथक् भूतो न वर्तते।[2] जयदेवेनास्यगुणस्यलक्षणे पुनरुक्तशब्दस्य प्रयोग आधिक्येन कृतः। अत एतावन्मात्रेणास्यगुणस्य वामनाद्भिन्नत्वमपि विद्यते। अस्मिन् गुणलक्षणेऽपि जयदेवेन पुनरुक्तशब्दो भरतस्य माधुर्यगुणात् गृहीतः।[3] वैचित्र्यशब्दो वामनस्यार्थगुण माधुर्यलक्षणाद् गृहीतः। अन्यथा वामनस्य माधुर्यगुणलक्षणानुसारं लक्षणं करणीयमासीत्।

6. ओजः–

जयदेवानुसारमर्थस्य प्रौढिः तथा अतिविस्तृतस्यार्थस्य संक्षेपेण प्रतिपादनं ओजो गुणो भवति।[4] अयंहि वामनस्येव अर्थगतौजोगुणस्य लक्षणं प्रकारान्तेरणा घटयत्।[5] अस्यगुणस्यलक्षणमर्थगत एव कृतम्।

7. सौकुमार्यम्–

येनशब्देन यस्मिन्वाक्ये पारुष्यप्रतीतिर्भवति तस्य शब्दस्य स्थाने शब्दान्तरसन्निवेशेन यदि पारुष्यप्रतीतिर्नस्यात्तत्र सौकुमार्यगुण उच्यते।[6] आचार्यवामनेन कठिनताया अभावे सौकुमार्याख्योऽर्थ गुणः प्रतिपादितः तदनुसारं जयदेवेन सौकुमार्यगुणस्य लक्षणं कृतम्।[7] जयदेवस्य सौकुमार्यगुणः श्रुतिकटुत्वदोषाभाव एव वर्तते।

8. उदारताः–

जयदेवमते विदग्धप्रयोज्या उदारता अग्राम्यत्वात् पृथग् वर्तते,[8]। अनेनोदारता गुणलक्षणे प्रतीयते यदनेन वामनोक्तार्थगुणअग्राम्यत्वरूपउदारतागुणस्य

---

1. माधुर्यपुनरुक्तस्य वैचित्र्यं चारुतावहम्। चं०लो० 4/6.
2. का०लं०सू० 3/2/11.
3. वहुशोयच्छ्रुतं वाक्यमुक्तंवापि पुनः पुनः। ना०शा० 16/104.
4. ओजः स्यात्प्रौढिरर्थस्य संक्षेपो वाऽतिभूयसा। चं०लो० 4/7.
5. का०लं०सू० 3/2/2.
6. सौकुमार्यमपारुष्यं पर्यायपरिवर्तनात्। चं०लो० 4/8.
7. का०लं०सू० 3/2/12.
8. उदारतातुवैदग्ध्यमग्राम्यत्वात् पृथङ्मता। चं०लो० 4/9.

लक्षणं न स्वीकृतम्।[1] केवलं अग्राम्यत्वात् पृथग् भूतोऽयं गुण इति जयदेवमतम्। वामनोक्तउदारतागुणमस्वीकृत्य स्वमतेऽप्यस्यगुणस्य विषये जयदेवेन न स्पष्टीकृतम्। "वैदग्ध्यमुदारतेतिगुणलक्षणेन प्रतीयते विदग्धैर्यत् किमपि वर्णनीयस्य महत्वं प्रतिपाद्यते तदेवोदारता भवतीति निश्चीयते।

जयदेवस्य गुणविवेचनेन ज्ञायते यदस्य गुणनिरूपणं अधिकांशतो वामनेन सादृश्यंकरोति। यतः श्लेषः, समाधिः, माधुर्य, ओजः, सौकुमार्यमित्यादीनां गुणानां लक्षणानि वामनसदृशानिसन्ति। उदात्ततानिरूपणे वामनस्य अग्राम्यत्वरूपोदात्तता न स्वीकृता। कान्त्यर्थव्यक्तिगुणयोर्लक्षणे अभिधाय श्रृंगारेरसे प्रसादगुणेन तयोर्गहणंकृत्वा अष्टौगुणानां लक्षणोदाहरणानि निरूपितानि। यद्यप्यनेन गुणानां शब्दार्थयोवर्गद्वये विभाजनं न कृतम् परं निरूपितगुणधारणया माधुर्यसमाध्याख्यौगुणावर्थगुणत्वेन निरूपितौ। प्रसादादयः शब्दगुणत्वेन निरूपिताः, श्लेषगुणस्य उभयात्मकता प्रतिपादिता।

सामान्यगुणस्यलक्षणं जयदेवेन न कृतम येन गुणानां काव्ये महत्वं प्रतीयेत्। गुणनिरूपणानन्तरं एकस्मिन् पद्ये शरीरे शौर्यादिगुणानामिव काव्ये काव्यत्वप्रतीकाः श्लेषादयो गुणाः प्रतिपादिताः।

विद्याधरः—

विद्याधरेण गुणसामान्य लक्षणेऽआत्मनि शौर्यादय इव गुणानां रसधर्मत्वं स्वीकृतम्।[2] गुणालंकारयोरभेदवादी चायं उद्भटमतस्य मम्मटवदेव खण्डनं कृतम्।[3] मम्मटसदृशएव विद्याधरः स्वमते त्रीन्गुणान् स्वीचकार।[4] विद्याधरः श्लेषादि दशगुणानां समर्थनं नाकरोत् यतोहि दशगुणेषु केषांचिद्गुणानां माधुर्यौजप्रसादेषु अन्तर्भावोऽनेन विहितः। केचिद्दोषविपर्यये गुणा भवन्ति।[5] विद्याधरस्यगुणनिरूपणे किमप्यभिनवं नावलोक्यते केवलं पूर्वाचार्याणामेव गुणविषयिनी धारणा रूपान्तरिता विद्यते।

---

1. का०लं०सू० 3/2/13.
2. अग्ङिनि रसे स्थिताये विभ्रत्युत्कर्ष हेतुतां सततम्।
   आत्मनि शौर्यादय इव ते नामैते गुणाः कथिताः।। एकावली 5/1.
3. वस्तुतस्तु रसस्य धर्मा गुणाः। गुणालंकाराणां समवायवृत्या स्थितिरिति गड्डरिका प्रवाहेण। तत्रैव उन्मेष पंचम पृ० 145 वृत्तौ।
4. तत्रैव० 5/2-6.
5. तत्रैव० 5/7-8 पृ० 52-53

विद्यानाथः–

गुणस्वरूपम्–

प्रतापरुद्रीये गुणसामान्यलक्षणं न प्रतिपादितम्। चतुर्विंशतिगुणानां निरूपणे कथितमस्ति यदेतेगुणाः काव्यं प्रकाशयन्ति[1]। अतो विद्यानाथमते गुणाः काव्यप्रकाशकास्सन्ति। काव्यप्रकरणे अनेन कथितं यच्छौर्यादयो यथा आत्मनोधर्मा भवन्ति तथैव श्लेषादयो गुणा आत्मनोत्कर्षकारकाः सन्ति।[2]

रसस्यधर्मा गुणा वर्तन्ते इति साक्षात् नैव प्रतिपादितम् परमव्यक्तरूपेण गुणानां रसधर्मत्वं स्वीकृतमस्ति। तत्रैव काव्यप्रकरणे रसरसाभास, भावाभासादयस्तथा वस्तुव्यंग्योऽलंकारव्यंग्यश्च व्यंग्य वैभवशब्देन निरूपिताः। हारादिवदलंकाराणां बाह्यशोभाकरत्वं प्रतिपादितम्।[3] विद्यानाथमतेऽलंकारा हारादिरिव काव्ये बाह्यसौन्दर्याधायकाः, गुणा आत्मनोत्कर्षहेतुतुत्वात् आन्तरिकशोभाधायका वर्तन्ते। रसादयो व्यंग्यवैभवाः काव्यस्य प्राणाः सन्ति तत्र गुणा उत्कर्षका भवन्ति। प्राचीनाचार्याणां मते गुणानां संघटनाश्रयत्वं निरूपितम्। रूद्रटमतंसमुद्धरतानेन कथितमस्ति यद् गुणालंकारयोः स्वरूपं काव्यशोभाकरत्वमेव वर्तते।[4] अलंकारः काव्यशोभायाः यथा कारणं भवति तद्वत् काव्यशोभायाः कारणंगुणावर्तन्ते; तेषां विपर्यये दोषोभवति। अस्मात् कारणात् प्रतापरुद्रीये गुणाः संघटनाश्रिता कथिताः।[5] अनेनैतन्नैव चिन्तनीयम् यद् विद्यानाथेन गुणाः संघटनाश्रितासन्ति, इति स्वीकृतम्। अपितु गतिगुण-निरूपणप्रसंगे प्राचीनानां मतमस्मिन्विषये केवलं प्रदर्शितम्। विद्यानाथमतेतु गुणा पूर्व प्रदर्शितरीत्या रसधर्मा एव वर्तन्ते।

---

1. चतुर्विंशतिरेते स्युर्गुणाः काव्यप्रकाशकाः। प्रतापरूद्रीये पृ० ३73.
2. श्लेषादयोगुणास्तत्र शौर्यादय इव स्थिताः।
   आत्मोत्कर्षावहा....तत्रैव० श्लोक 3, पृ० 54.
3. शब्दार्थौभूतिराख्यातौ जीवितं व्यंग्यवैभवम्।
   हारादिवदलंकारास्तत्रस्युरुपमादयः।। प्र०रु० श्लो० 2 पृ० 54.
4. काव्य शोभाकरत्वमेव गुणालंकारस्वरूपत्वम्। तत्रैव० पृ० 390.
5. तदुक्तं रुद्रटेन–योहेतुः काव्यशोभायाः सोऽलंकारः प्रकीर्त्यते।
   गुणोऽपि तादृशो ज्ञेयो दोषः स्यात्तद्विपर्ययः।
   अतो गुणानां संघटनाश्रयत्वमेव युक्तम्। तत्रैव० पृ० 391.

अस्मिन् विषयेऽवश्यमेव सन्देहोजायते यत् काव्यप्रकरणे गुणा आत्मोत्कर्षकारकाः प्रतिपादिताः, शब्दालंकारप्रकरणे संघटनाश्रया गुणाः, शब्दार्थाश्रया अलंकारा निर्दिष्टाः।[1] विद्यानाथेन आत्मोत्कर्षकरा गुणाः प्रतिपादिताः रीतयः काव्ये स्वभाववत्[2] सन्ति। तदनन्तरं गुणानां संघटनाश्रयत्व प्रतिपादनं बदतोव्याघात एव वर्तते। विद्यानाथेन अधोलिखित प्रकारेण चतुर्विंशतिगुणानां, निरूपणंकृतम्। तेषां नामानि यथा–श्लेषः, प्रसादः, समता, माधुर्यं, सुकुमारता, अर्थव्यक्तिः, उदारत्वं, कान्तिः, उदात्तता, ओजः, सुशब्दता, प्रेयान् और्जित्यम्, विस्तरः, समाधिः, सौक्ष्म्यम्, गाम्भीर्यम्, संक्षेपः, भाविकम्, संमितत्वम्, प्रौढिः, रीतिः, उक्तिः, गतिः।[3]

एषां चतुर्विंशति गुणानांविषये प्रतिपादितम् यदेषुगुणेषु केचिद्गुणा दोषपरिहारेण गुणाभवन्ति, केचित् स्वतः- उत्कर्षहेतुत्वाद् गुणामन्यन्ते। विद्यानाथेन तेषां गुणानां परमोत्कृष्टत्वमभिहितम् ये स्वतो अतिमात्रेण काव्यशोभां वर्धयन्ति। दोषपरिहारेण गुणत्वकथनं सर्वसम्मतं न वर्तते, दोषाभावमात्रेण ये गुणत्वमभिलषन्ति तेषांकृते एव सौकुमार्यादयोगुणा गुणत्वेनाभिमताः।[4] प्रतापरुद्रीये येषांदोषाणां कथनं न कृतम् तेषांयत् निराकरणं कृतम् तद् युक्तं न वर्तते।[5] परमस्मिन् विषये विद्यानाथेन यथासम्भवं केषांचिद्दोषाणां गुणत्वेन परिहारः कृतः[6]। विद्यानाथमते ये चतुर्विंशतिगुणास्सन्ति तेषामत्र पृथक्-पृथग् विवेचनं न क्रियते। यतो विद्यानाथेन प्रायः सर्वेषां गुणानांनिरूपणं भोजवदेव कृतम्। तेषुलक्षणेषु पृथग् रूपेण न किमपि वैशिष्टयं वर्तते। अत एव विद्यानाथोक्तचतुर्विंशति गुणानां पृथग् विवेचनं न कृतम्।

---

1. चारुत्वहेतुत्वेऽपि गुणानामलंकाराणांचाश्रयभेदात् भेदव्यपदेशः संघटनाश्रया गुणाः शब्दार्थाश्रयास्त्वलंकाराः। तत्रैव० पृ० 398.
2. स्वभावाइव रीतयः। प्र०रु० श्लोक 3, काव्यप्रकरणम् पृ० 54.
3. श्लेषः, प्रसादः, समता माधुर्यं सुकुमारता।
   अर्थव्यक्तिरुदारत्वं तथा कान्तिरुदात्तता।।
   ओजः सुशब्दता प्रेयानौर्जित्यमथ विस्तरः।
   समाधिः सौक्ष्म्यगाम्भीर्ये संक्षेपो भावकं तथा।
   संमितत्वं तथा प्रौढिरीतिरुक्तिर्गतिस्तथा।
   चतुर्विंशतिरेते स्युर्गुणाः काव्यप्रकाशकाः।। प्र०रु० पृ० 372.
4. प्रतापरुद्रीये पृ० 373.
5. तत्रैव० 374.
6. एवं यथासंभवं केषांचिद्दोषपरिहारकत्वेन गुणत्वम्। तत्रैव० पृ० 374.

विश्वनाथः—

कविराजविश्वनाथः आचार्यमम्मटवद् गुणसामान्यलक्षणं कृतवान्। यथा मम्मेटनात्मनो शौर्यादय इवांगीभूतरसस्य धर्मा अचलस्थितयः, उत्कर्षहेतवो गुणाः प्रतिपादिताः[1] तथैव विश्वनाथेन शरीरे-आत्मनो शौर्यादिवत्, अंगीभूत रसस्यधर्माः गुणास्सन्तीति कथितम्।[2]

यथा मम्मटेन माधुर्यौजप्रसादाख्यास्त्रयो गुणाः स्वीकृता[3]स्तथैव विश्वनाथेनापि त्रयोगुणा अंगीकृताः।[4] विश्वनाथेन, मम्मटोक्तकाव्यलक्षणस्य खण्डनाऽवसरे "सगुणौ" इति शब्दार्थयोः सगुणत्व मिति विशेषणस्यापि खण्डनं विहितम्। काव्यलक्षणखण्डने गुणानां शब्दार्थधर्मत्वस्य निरासः कृतः। तदनन्तरं मम्मटवदेव गुणानां रसधर्मत्वमुरीकृत्य लक्षणया तेषां शब्दार्थधर्मत्वमपि स्वीकृतम्।[5] एकस्यांकारिकायां गुणालंकाररीतयः काव्यस्योत्कर्षहेतवः प्रतिपादिताः।[6] अस्यां कारिकायां—गुणालंकाररीतीनां समाना स्थितिः प्रतिपादिता। अस्मात्प्रतीयते यद् विश्वनाथेन, अलंकाराणा रीतीनां च कृतेऽपि गुणशब्दस्य प्रयोगः कृतो वर्तते। विश्वनाथस्य कथनं वर्तते यच्छौर्यादयो गुणाः, कटककुण्डलाद्यलंकाराः शरीरोत्कर्षं कुर्वन्तः उपमाद्यलंकाराः वैदर्भी प्रभृतयोरीतयो देहद्वारेणेव शब्दार्थद्वारेण काव्यस्यात्मभूतंरसमुत्कर्षयन्ति।[7] कविराजेन गुणाभिव्यञ्जकशब्दैर्युक्तंकाव्यं उत्कर्षकरं भवतीति निगदितम्।[8] अत्र विश्वनाथेन गुणालंकाररीतयः शब्दार्थद्वारेण रसमुत्कर्षयन्ति काव्यस्योत्कर्षकाः प्रतिपादिताः, अनेन गुणालंकारप्रभृतीनां समानास्थितिः प्रकटी भवति परं पश्चात् केवलं गुणानां रसधर्मत्वभिहितम्।

---

1. का०प्र० 8/66.
2. रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा। गुणाः स०द० 8/1 पृ० 264.
3. का०प्र० 8/68.
4. माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा। सा०द० 8/1.
5. इहयद्यपि गुणानां रसधर्मत्वं, तथापि गुणशब्दोऽत्र गुणाभिव्यञ्जक शब्दार्थयो रूपचर्यते। तत्रैव० पृ० 23.
6. उत्कर्ष हेतवः प्रोक्ता गुणालंकार रीतयः तत्रैव० 1/3.
7. गुणाः शौर्यादिवत्, अलंकाराः कटककुण्डलादिवत् रीतयोऽवयवसंस्थान विशेषवत्, देहारेणेव शब्दार्थ द्वारेण तस्यैव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका इत्युच्यन्ते। सा०द०। पृ० 22.
8. यतश्च गुणाभिव्यज्जकाशब्दरसस्योत्कर्षकाः इत्युक्तं भवतीति प्रागेवोक्तम्। तत्रैव० 8/1.

येषां माधुर्यौजःप्रसादाख्यानां त्रयाणांगुणानां रसधर्मत्वविषये विचारो विधीयते।

तत्रादौ माधुर्यम्–

चित्तस्य द्रुति स्वरूपाल्हादो विश्वनाथमते माधुर्यगुणो वर्तते।[1] द्रुति-स्वरूपाल्हादे चित्तस्यद्रुतिर्भवति स द्रुतिस्वरूपआल्हादो माधुर्यगुणतामेति।

द्रुति-आह्लादयोर्भेदाभेद विमर्शः–

विश्वनाथेन माधुर्यगुणलक्षणावसरे "यत्तुकेनचिदुक्तम्" इत्यत्र केनच्छिब्देन मम्मटोक्तमाधुर्यगुणस्य लक्षणस्योपरि आक्षेपःकृतः। यन्मम्मटेन माधुर्यंद्रुतिकारणं प्रतिपादितम् तन्नसंभवति, यतो द्रवीभावोऽथवा द्रुतिरास्वादस्वरूपाह्लादात् अभिन्नावर्तते। अतएव सा द्रुतिः कार्यरूपा न वर्तते यतोहि आस्वादाह्लादौश्च रसस्य पर्यायभूतौस्तः, तस्माद्रुतिः रसस्वरूपा वर्तते नतुरसात् पृथक्। न च रसस्य कार्यभूता। अतो द्रुतेरपि कार्यत्वं न सम्भवति द्रुतेः कार्यत्वाभावात् माधुर्येतत् कारणताऽपि न सिध्ययति। अनेन प्रकारेण मम्मटस्य माधुर्यंद्रुतिकारण-मितिमतं विश्वनाथेनापाकृतम्।[2] अत्रैदमुच्यते यच्चित्तस्यद्रवीभावः कथं भवति अथवा आह्लादः कथं जायते ? अस्योत्तरंभविष्यति यद्रसाच्चित्तस्य द्रुतिर्भवति– आस्वादः च जायते, तत् आह्लादकत्वमेवमाधुर्यमावहति। किमत्रप्रमाणं यद्रुतिरेव आस्वादस्वरूपाह्लादात्–अभिन्ना विद्यते ? न किमपि। तर्हि कथमुक्तं विश्वनाथेन यद्द्रुतिरेव आह्लादस्वरूपा, रसस्वरूपा च विद्यते। एतन्मतं सुसमीचीनं न प्रतिभाति आचार्यमम्मटेन न कुत्राप्यभिहितम् यन्माधुर्यं द्रुतिकारणं अपितु माधुर्यगुणलक्षणे मम्मटेनकथितं चित्तद्रवीभावस्यकारणं श्रृंगाररसे विद्यमान-माह्लादस्वरूपमेव माधुर्यगुणः सम्भवति।[3] अनेनज्ञायते यद्रसस्याह्लाद-स्वरूपाच्चित्तस्य **द्रवीभावो** जायते। श्रृंगारादि रसे विद्यमाना या आह्लादकता सा आह्लादकता **एव चित्त**द्रवीभावस्य कारणं वर्तते। अहमेवंनिश्चिनोमि यद्द्रुतौ–आह्लादकतायांचावश्यमेवान्तरंवर्तते परं तत्– कमलशतपत्रभेदनवत् लाघवान्नसंलक्ष्यते।

---

1. चित्तद्रवीभावमयोह्लादोमाधुर्यमुच्यते। तत्रैव० 8/1.
2. यत्तुकेनचिदुक्तम्–"माधुर्यं द्रुतिकारणं" इति तन्न। द्रवीभावस्यास्वादस्वरूपा-ह्लादाभिन्नत्वेन कार्रुत्वाभावात्। तत्रैव० 8 पृ० 264.
3. का०प्र० 8/68.

द्रुति रसस्य तादृशं रूपमऽस्ति यत्र सहृदयस्यचेतो गलितत्वमिव भवति अर्थादार्द्रप्रायो जायते तदनन्तरं रसः स्वाह्लादकतां प्रति सहृदयमाकर्षति ततः सहृदयः तस्य रसस्यास्वादनं करोति। द्रुतौ–अथवा द्रवीभावावस्थायां सहृदय- स्तस्मिन् रसे पूर्णरूपेण तल्लीनो न भवति। चित्तद्रवीभावानन्तरं शृंगारादयो रसाः स्वाह्लादस्वरूपंप्रति आकर्षयन्ति सा समाकृष्यमाणा चित्तस्यार्द्रतैव आस्वादस्याथवाऽह्लादस्य प्रथमरूपं वर्तते। तत् आह्लादस्वरूपमेव माधुर्यगुणो विद्यते। लोकेप्यतिप्रियवस्तु सर्वप्रथमं स्वसौन्दर्येण स्वात्मानं प्रति मानवमाकर्षयति यदा मानवहृदि विद्यमानः सुषुप्तावस्थायां रत्यादिस्थायिभावस्तस्मात् सौन्दर्यजन्य आकर्षणात् किञ्चिदुद्बुद्धो भवति ततः सहृदयचेतो वस्तुसौन्दर्यप्रति आकृष्टो जायते, तस्मिन्समये चित्तस्यद्रुतिसंभवति अस्यामवस्थायामपि स्वस्य, परस्य, वस्तुजातस्य च ज्ञानं बोभवीति।

परं यदा पूर्णरूपेण तस्यसौन्दर्यस्यानन्दं अनुभवति तदा सावस्था आह्लादस्वरूपा, अथवा आस्वादस्वरूपा जायते। अनेनैतत् स्फुटंभवति यद्-द्रुतिः रसस्वरूपा न वर्तते। अतो मम्मटमते शृंगारादिरसे यदाह्लादकत्वं तद्द्रुतेः कारणं वर्तते। द्रवीभावे आह्लादे च सूक्ष्मभेदो अवश्यमेव विद्यते, तेन विश्वनाथमतस्य निरसनं प्रतिभाति। यदि चित्तस्य द्रवीभावस्वरूपआह्लादो माधुर्यगुणेस्यात् विश्वनाथेन तावेव आस्वादाह्लादौच रसस्य पर्यायत्वेन प्रतिपादितौ तदा चित्तद्रवीभावस्वरूपाह्लादो माधुर्यगुणः कथं न रसस्य पर्यायत्वेन स्वीकृतः। यद्येवं न कृतम् तदा द्रवीभावस्याह्लादस्य च भेदः कर्तव्य एव। माधुर्यगुणस्य स्थितिर्मम्मटानुसारं विश्वनाथेनापि सम्भोगशृंगारे, करुणे विप्रलम्भशृंगारे शान्तरसे च उत्तरोत्तरं अधिकतर-अधिकतमरूपेण स्वीकृता।[1] अस्यगुणस्य व्यञ्जकत्वं विश्वनाथेन प्रकारान्तरेण मम्मटवत् प्रतिपादितम्।[2]

ओजः–

चित्तस्यविस्ताररूपं यद्दीप्तत्वं तद् विश्वनाथेन ओजो गुणत्वेन कथितम्।[3]

---

1. संभोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्। सा०द० 8/2,
2. मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान्विना।
   रणौलधूच तद् व्यक्तौ वर्णाः कारणतां गताः।।
   अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा। तत्रैव० 8/3-4 पृ० 265.
3. ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते।। तत्रैव० 8/4.

अस्यगुणस्य स्थितिः, वीरवीभत्सरौद्ररसेषु विराजते।[1] अस्योजोगुणस्य व्यञ्जकत्वमपि मम्मटानुसारं प्रतिपादितम्।[2]

प्रसादः—

विश्वनाथेन प्रसाद गुणस्य लक्षणमपि प्रकारान्तरेण मम्मटसदृशं व्याहृतम्। प्रसादगुणविषये उच्यते यथा शुष्केन्धने अग्निः सहसा व्याप्नोति, तथैव प्रसादाख्यो गुणः सहसा चित्तं व्याप्नोति।[3] अस्य प्रसादगुणस्य विषयः सर्वेरसाः सर्वाः रचनाश्च सन्ति।[4] श्रवणमात्रेण येषां पदानामर्थावबोधः स्यात् ते प्रसाद गुणव्यत्रजकाः।[5] यथा मम्मटेन वामनोक्तदशशब्दार्थगुणानामन्तर्भावो विहितस्तथैव विश्वनोथेनाऽपि दशशब्दार्थगुणानामन्तर्भावो निरूपितः। अन्तर्भावविषये विश्वनाथेन निगदितं यदेषां माधुर्यादिगुणानां शब्दगुणत्वमर्थगुणत्वं च लक्षणया भवति। यथा शौर्यादयो गुणाः आत्मनोधर्मा विद्यन्ते परं कदाचित्, आकृत्या शूरोऽयमितिव्यवहारोऽपि लक्षणैव जायते तथैव काव्यस्यात्मनो रसस्य धर्मा माधुर्यादयो गुणा वर्तन्ते तथापि लक्षणया काव्यस्यशब्दावली रूपस्य शरीरस्य धर्माः प्रोच्यन्ते।[6]

तत्रादौ शब्दगुणानामन्तर्भावोयथा—श्लेषसमाधिरौदार्य प्रसाद इत्येतेषां वामनोक्त शब्दगुणानामोजसि अन्तर्भावः।[7] माधुर्यगुणस्य माधुर्यगुणेनैव गतार्थत्वं स्वीकृतम्।[8] प्रसादाख्यगुणेन अर्थव्यक्तिगुणस्य ग्रहणं भवति।[9]

---

1. वीरवीभत्सरौद्रेषु क्रमेणाधिक्यमस्यतु। तत्रैव० 8/5.
2. वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
   उपर्यधौ द्वयोर्वा सरेफष्ट ठ ड ढैः सह।
   शकारश्च षकारश्च तस्य व्यंजकतां गताः।।
   तथा समासबहुलो घटनौद्धत्यशालिनी। तत्रैव० 8/5-7.
3. चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।। स०द० 8/7.
4. स प्रसादः समस्तेषु रसेषु रचनासु च। तत्रैव० 8/8.
5. शब्दास्तद्व्यत्रजका अर्थबोधकाः श्रुतिमात्रतः।। तत्रैव० 8/8.
6. एषां शब्दगुणत्वं च गुणवृत्योच्यते वुधैः। तत्रैव० 8/9.
7. सा०द० 8/9-10.
8. तत्रैव० 8/10.
9. तत्रैव० 8/11-12.

कान्तिसौकुमार्यगुणयोः क्रमेण ग्राम्यत्वदुश्रवत्वदोषयोस्त्यागेन सत्ता स्वीकृता,[1] अर्थात् कान्तिसौकुमार्य गुणौ द्वावैव दोषाभावरूपौ वर्तेते। मार्गाभेद- रूपः समतागुणोऽपि क्वचिददोषतां बिभर्ति अन्यथा माधुर्यादित्रिषुगुणेषु समतागुणस्य अन्तर्भावो भवति।[2]

अर्थगुणानामन्तर्भावोयथा—ओजः प्रसादो, माधुर्यं सौकुमार्यमुदारता इत्येतेषां पंच गुणानामभाव एव दोषाभवन्ति। यथा क्रमेण अपुष्टार्थत्वाधिकपदत्वानवीकृतत्व अमंगलरूपाश्लीलग्राम्यत्व दोषाणां निराकरणेन स्वीकृतिर्विद्यते।[3] वस्तुस्वभाव स्फुटत्वरूपोऽर्थव्यक्तिगुणस्यस्वभावोक्त्यालंकारेण परिग्रहो भवति।[4] कान्तिगुणस्य रसध्वनौ गुणीभूतव्यंग्येच अन्तर्भावो संजायते।[5] रसस्यानुपकारकत्वात्-श्लेषार्थगुणस्यापि वैचित्र्यमात्रावहत्वम्। समतागुणोऽपिदोषाऽभावरूप एव विद्यते।[6] अयोनि अन्यच्छायायोनिरूप द्विविधार्थदृष्टिरूपः समाधिगुणोऽपि काव्यस्या-साधारणशोभाधायको न वर्तते अपितु काव्यस्य शरीरभूतार्थमात्रस्य निर्वाह-कत्वम्।[7] एवमर्थगुणानामन्तर्भावो विश्वनाथेन मम्मटदृशा प्रतिपादितः। अनेन प्रकारेणप्रतीयते यद्विश्वनाथेन गुणानां लक्षणानि तेषांस्थितिः वर्णव्यंजकत्वं च तथा वामनोक्तगुणानामन्तर्भावो मम्मटदिशैव निरूपितः, केवलं माधुर्यगुणे चित्तस्य द्रुतिराह्लादस्वरूपा अथवा आस्वादस्वरूपा प्रतिपादिता, इत्यनेन मम्मटस्य माधुर्यगुणो अपाकृतः, इति न मन्तव्यम् यतोहि माधुर्यगुणलक्षणे द्रुति रसास्वादस्यप्रथमावस्था विद्यते, सूक्ष्मरूपेण, द्रुत्याह्लादयोश्च अथवा द्रुत्यास्वादयोश्च भेदो विद्यते।

केशवमिश्रः—

अयं अलंकारशेखरे गुणानां श्लाध्यत्वं निरूपयन् भोजदेववदलंकारेभ्यो गुणानाम-

---

1. साहित्यदर्पणः 8/12.
2. तत्रैव० 8/13.
3. तत्रैव० 8/14.
4. तत्रैव० 8/15.
5. तत्रैव० 8/15.
6. तत्रैव० 8/16.
7. तत्रैव० 8/16.

त्यधिकं महत्वं प्रकटयामास।[1] केशवमिश्रेण श्रीपादमतं समर्थयता गुणाः शौर्यादिवत् प्रतिपादिताः।[2] भोजदेवस्यानुसरणं कुर्वता गुणानां शब्दार्थाश्रयत्वेन द्वैविध्यं निगदितम्, दोषाणामदोषत्वेसति भोजदेववद् वैशेषिका गुणाः कथिताः।[3]

गुणानां वर्गीकरणे केशवमिश्रेण भोजदेवस्यानुसरणं विहितं, गुणानां निरूपणे पृथक्सरणिः समवलम्ब्य संक्षिप्तत्वं, उदात्तत्वं प्रसादः, उक्तिः, समाधिः, इत्येषु पंचगुणेषु, अन्येषां एकोनविंशतिगुणानां गतार्थत्वं स्वीकृतम्।[4] भाविकत्वं, सुशब्दत्वं पर्यायोक्तिः सुधर्मिता इत्येतेषु चतुर्ष्वर्थगुणेष्वन्येषां गुणानां संगतिः प्रदर्शिता।[5] अनेन पर्यायोक्तिगुणो मार्गाभेदरूपत्वेन समतागुणस्य स्थाने निरूपितः। सुधर्मितागुणस्य लक्षणे कथितं यद् यत्र विशेषणै र्विशेष्यलाभोभवति तत्र सुधर्मितागुणो जायते।[6] अस्योदाहरणं "अयमुदयतिमुद्राभञ्जनः पद्मनीनां" इत्यादिपद्यमुदाहृतम्, विश्वनाथेन साहित्यदर्पणे अयंश्लोको लाटीरीत्या उदाहरणाय उदाहृतः।[7] पदवाक्यार्थदोषाणां यत्र अदोषत्वं विद्यते तत्र केशवमते वैशेषिकगुणानां स्थितिर्मन्तव्या।[8] मिश्रः श्रीपादमतं समुपन्यस्यन्, रसोत्पत्तौ प्रतिबन्धकत्वेन दोषाणां दोषत्वेन यत्र केनापि हेतुना रस प्रतिबन्धो न संभवति तत्रादोषत्वमुचितमेवति व्याजहार।[9] केशवो गुणनिरूपणे माधुर्यौजाख्यौ द्वावेव मुख्यौ गुणौ परित्यक्तवान्। भोजदेवस्य चतुर्विंशति शब्दार्थगुणेषु येषां गुणत्वं स्वीकृतम् एवं च तेषु येषामन्येषां गुणानामन्तर्भावो विहितः- इयं कापि-

---

1. अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम्।
   गुणयोगस्तयोर्मुख्यो गुणालंकारयोगयोः।। अलंकारशेखरः 1/2/1 पृ० 21.
2. तत्रैव० पृ० 21 वृत्तौ।
3. गुणः सामान्यतो द्वेधा शब्देष्वर्थेषु च स्थितः।
   दोषाणामप्यदोषत्वं प्राहुर्वैशेषिकान्गुणान्। तत्रैव० 3/1/1.
4. संक्षिप्तत्वमुदात्तत्वं प्रसादोक्तिसमाधयः।
   अत्रैवान्य समावेशात् पंच शब्दगुणाः स्मृताः।। तत्रैव० 3/1/2.
5. भाविकत्वं सुशब्दत्वं पर्यायोक्तिः सुधर्मिता।
   चत्वारोऽर्थगुणाः प्रोक्ताः परेत्वत्रैव संगताः।। तत्रैव० 3/2/1.
6. तत्रैव० 3/2 पृ० 23.
7. स०द० 9/5.
8. पदवाक्यतथार्थेषु ये दोषाः पूर्वमीरिताः।
   तेषां क्वचिददोषत्वं यत्तद्वैशेषिको गुणः।। अलं०शे० 3/3/1.
9. तत्रैव० पृ० 24 वृत्तौ।

नूतना सरणिः प्रतिभाति। सरणिरियं केवलं केशवस्य अलंकार शेखरे दृश्यते। केशवमिश्रेण भोजदेववद् गुणाः शब्दार्थवैशेषिकवर्गेषु विभक्ताः। परं भोजदेववद् गुणानां संख्या न स्वीकृता, प्रत्युत पंचसुशब्दगुणेषु चतुर्ष्वर्थगुणेष्वन्येषां शब्दार्थ गुणानां समावेशः कृत इति। मुख्यौ माधुर्यमोजाख्यौ द्वावेवगुणौ नाम्नाऽपि न निरूपितौ। इदमेवकारणं यदस्य मतं परवर्तिभिर्नसमर्थितम्।

कर्णपूरगोस्वामी—

यथा आत्मनोत्कर्षजनका आत्मनिष्ठा धर्मविशेषाः शौर्यादयस्सन्ति तथैव काव्यस्यात्मनो रसस्यधर्मविशेषा माधुर्यादयो गुणास्सन्ति, गुणानां वर्ण-व्यंजकत्वमपि—आत्मन इव प्रतिपादितम्। यथा विविधा विशिष्टा गुणक्रिया एव आत्मनः शौर्यव्यञ्जिकाभवन्ति तथैव सुकुमारवर्णा माधुर्यगुणस्य; कठोरवर्णा रसनिष्ठओजोगुणस्य व्यञ्जका जायन्ते।[1] कर्णपूरमते यथा शौर्यादयो गुणाः कातर्यादयो दोषा आत्मन एव धर्मावर्तन्ते तथैव माधुर्यादयोगुणाः श्रुति- कटुत्वादयो दोषा अपि रसस्यैवोत्कर्षापकर्षकारका धर्मा वर्तन्ते।[2]

गोस्वामिना स्वमते माधुर्योजप्रसाख्यास्त्रयोगुणाः कथिताः। वामनोक्त दशगुणेषु केवलं सप्तगुणानां लक्षणानि प्रतिपाद्य स्वमते निरूपितेषु त्रिषु गुणेष्वन्तर्भावः प्रदर्शितः।[3] कर्णपूरो वामनोक्तसप्तगुणेषु प्रौढिनाम्नो गुणस्य प्रतिपादनमकरोत्।[4] प्रौढिनामगुणो वामनेन पृथक्रूपेण न स्वीकृत आसीत् अपितु अर्थस्य प्रौढि ओजोगुणो इति वामनेन निरूपितमासीत्।[5]

भोजदेवेन शब्दार्थगतगुणेषु प्रौढिगुणस्य पृथक्कल्पना विहिता।[6] "लोकनाथचक्रवर्तिकृतसंस्कृतटीकायां" कथितं यत् प्रौढिगुणस्य सौकुमार्य

---

1. रसस्योत्कर्षकः कश्चिदद्धर्मोऽसाधारणो गुणः।
   शौर्यादिरात्मन इव वर्णास्तदव्यञ्जकामताः।। तत्रैव० 6/176 अलंकारकौस्तुभः
2. अलंकार कौस्तुभः पृ० 239 वृत्तौ।
3. माधुर्यमपिचौजश्च प्रसादश्चेति ते त्रयः।
   केचिद्दशेतिब्रूवत् एष्वेवान्तर्भवन्तिते। अलं०कौ० 6/178-188.
4. अर्थव्यक्ति रुदारत्वं श्लेषश्च समता तथा।
   कान्ति प्रौढ़ि समाधिश्च सप्तैतेतैसमंदश। तत्रैव० 6/180.
5. अर्थस्य प्रौढिरोजः का०लं०सू० 3/1/6.
6. स०कं०भ० 1/76, 1/88.

गुणस्य स्थाने नामग्रहणं कृतम्।[1] वामनोक्त दशगुणेषु केवलं सप्तानां गुणानां लक्षण निरूपणेऽन्तर्भावप्रतिपादनेचेदमेव वीजं यन्माधुर्यौजःप्रसादस्वरूपास्त्रयोगुणाः कर्णपूरगोस्वामिना स्वयमेव स्वीकृताः। अत एव एषां त्रयाणांगुणानां वामनोक्त दशगुणेषु गणना न विहिता न च लक्षणानि निरूपितानि। कर्णपूरस्य त्रयोगुणा आनन्दवर्धनानुसरणं कुर्वन्ति। गुणानां स्थितिप्रतिपादने व्यञ्जकत्वनिरूपणे च पूर्वाचार्याणामनुसरणं कृतम्।[2] प्रसादगुणः सर्वेषु रसेषूपयुक्तत्वादस्यगुणस्य व्यञ्जिका रचना एव प्रतिपादिता।[3] कवि कर्णपूरो ध्वनिवादिआचार्याणामनुसारं त्रीन्‌गुणान् स्वीचकार। आनन्दवर्धानादिवद् गुणानां रसधर्मत्वं निरूपयामास।

आचार्य विश्वनाथदेवः–

विश्वनाथदेवेन गुणसामान्यलक्षणे गुणा रसस्यधर्माः प्रतिपादिताः आनन्दवर्धनादिभिर्गुणसामान्यलक्षणे समानाधिकरणशब्दस्य प्रयोगो नैव विहितः। परं विश्वनाथदेवेन सामानाधिकरण्येन गुणा रसस्योत्कर्षकाः कथिताः।[4] समानाधिकरण्यशब्दार्थं व्याहरन् डॉ० रामप्रतापः स्फुटीकृतवान् यद् गुणस्य रसेनसह समानाधिकरण्यं भवति, गुणत्वेरसत्वे च समानाधिकरण्यं विद्यते, एकाधिकरणे रसे गुणत्वरसत्वयोरुभयोर्स्थितिर्विराजते, रसत्वं रसस्यावच्छेदक धर्मोवर्तते गुणत्वं गुणस्य च। गुणत्वंगुणेतु तिष्ठत्येव परं रसमधिवसति अतो गुणो रसस्योत्कर्षकारणं वर्तते[5] विश्वनाथदेवमते रत्यादिसमन्वितचैतन्यस्य आनन्दांशस्योपरि पतितस्यावरणस्यसम्यगुच्छेदएवोत्कर्षो भवति।[6]

विश्वनाथदेवेन माधुर्योजःप्रसाद गुणानां लक्षणानि गुणस्थितिर्वर्णव्यञ्जकत्वंच अक्षरशः आचार्यमम्मटानुसारं प्रतिपादित[7]मस्ति। विश्वनाथदेवः श्रृंगारहास्य

---

1. दण्डिवामनादि गणिते गुण गणे गृहीतस्य सौकुमार्यस्य स्थलेऽस्योद्देशः। अलं०कौ०पृ० 242 संस्कृत टीकायाम्।
2. तत्रैव० 6/189-191.
3. तत्रैव० 6/194.
4. रसत्व समानाधिकरणत्वे सति, उत्कर्षहेतुत्वं गुणत्वम्। साहित्यसुधासि 6/135.
5. तत्रैव० तरंग 6 पृ० 317.
6. उत्कर्षश्च रत्याद्यवच्छिन्नस्य चैतन्यस्य आनन्दांशे आवरणस्य सम्यगुणच्छेदः तत्रैव० पृ० 317/18 वृत्तौ।
7. तत्रैव० 320-327.

करुणाद्भुतशान्तरसेषु चित्तस्यव्याप्तिं स्वच्छजलवत् स्वीचकार तथा वीर रौद्र भयानकवीभत्सरसेषु शुष्केन्धनाग्निवच्चित्तस्यव्याप्तिमनुमोदते।[1] आचार्य विश्वनाथदेवेन दण्डयुक्तदशगुणानामुल्लेखं विधाय, श्लेषादीनां दशगुणानां लक्षणोदाहरणानि प्रतिपादितानि, यानि लक्षणानि प्रायो वामनोक्तगुणलक्षणेभ्यः साम्यंकुर्वन्ति। प्रसादगुणस्य लक्षणं मम्मटोक्त प्रसादेन सह सादृश्यमाकलयति।[2]

मम्मटेन कष्टत्वग्राम्यत्वदोषौ परित्यज्य सुकुमारताकान्त्याख्यौ द्वौ गुणौ स्वीकृतौ। परं विश्वनाथदेवेनास्यमतस्य विरोधंकुर्वता कथितं यद्दोषा गुणाभावस्वरूपा न वर्तन्ते, गुणाश्चापिदोषाभावरूपाः न विद्यन्ते। अतः कष्टत्व ग्राम्यत्वदोषयोस्त्यागेन सुकुमारतागुणस्य कान्तिगुणस्य च ग्रहणं न भवति अपित्वनयोर्गुणयोर्पृथगस्तित्वं वर्तते।[3] मम्मटप्रतिपादितदिशा वामनोक्त गुणानामन्तर्भावस्य विरोधंकुर्वता विश्वनाथदेवेन कथितं यद्दशशब्दगुणानामर्थगुणानां च रसस्यधर्मभूतेषु माधुर्यौजप्रसादाख्येषु त्रिषु गुणेष्वन्तर्भावो न युज्यते। गुणा दोषाभावरूपा भवन्ति इत्यस्मिन् मम्मटस्य कथनेऽपिप्रबलायुक्तिर्नविद्यते। यद्येवमभिमतः स्यात् यद्दोषाभावस्य नाम एव गुणोऽस्ति तर्हिदोष एव गुणाभावोऽस्तीति कथयितुं शक्यते। अस्माद्धेतोर्गुणदोषयोः पृथग्स्तित्वं स्वीकर्तव्यमिति। समतादयोगुणा दोषरूपाभवन्ति एतदपि न युक्तं यतो वक्त्राद्यौचित्येन

---

1. यदा वीर रसादिषु चित्तंव्याप्नोति तदा शुष्केन्धनाग्निवत्। यदा शृंगार करुणादिषु चित्तंव्यप्नोति तदा स्वच्छजलवत्। तत्रैव० 323 वृत्त।
2. तत्रैव० तरंग 6 पृ० 143-154.
3. अपिच कष्टत्वमोजोव्यञ्जक वर्णवत्वं, सुकुमारतातु मधुरसव्यंजक वर्णतत्वं तथा चानयोः परस्पराभावारूपत्वाभावात्कथं कष्टत्वत्यागात्सुकुमारतापरिग्रहः। एवमविदग्धयुक्तत्वरूप ग्राम्यत्वविदग्धप्रयुक्त स्वरूपकान्त्योरपि बोध्यम्। तस्माद् विनिगमना विरहाद् द्वयोरेव दोषगुणत्वं सिद्धमित्यलं पल्लवितेन। साहित्यसुधा सिन्धु पृ० 342.
4. यत्तु कैश्चिदुक्तम्, केचिदन्तर्भवन्त्येष्विति तन्न। शब्दार्थधर्माणां गुणानां रसधर्मेषु तेष्वन्तर्भावाभावात्। यद्यपि दोष त्यागात् परेश्रिता इति तदपि मन्दम्। दोषा एव गुणाभावः सन्तु वैपरीत्यस्यापि सुवचत्वात् तथा च विनिगमना विरहादद्वावपि गुणदोषौपृथक्। यदप्युक्तम्–अन्येभजन्तिदोषत्वं तदपि (अयुक्तम) वक्त्रौचित्य–वशाद् द्वयोरप्यन्यथात्वमभ्यूपगतमेवेत्युपरभ्यते। तत्रैव० पृ० 357 वृत्तौ।

दोषाभावरूपा, दोषरूपा इत्युभयविधगुणानां अन्यथाभावः, गुणाभावः, गुणत्वं च मम्मटेनाभ्युपेतम् वर्तते। विश्वनाथदेवस्य दशगुणान्तर्भावविषये उपर्युक्त–विवेचनानुसारमौदासीन्यं प्रतीयते। विश्वनाथदेवेन दशशब्दगुणानां दश–अर्थगुणानां च पृथगस्तित्वस्वीकारे स्वकीयाधारणा प्रकटिता, दश-शब्दार्थ गुणानांमन्तर्भावस्य विरोधः कृतः, परं यथा मम्मटस्य वामनोक्त शब्दार्थ-गुणानामन्तर्भावः पुष्टोवर्तते न तथा गुणानामन्तर्भावविरोधस्य विश्वनाथदेवस्य मतं प्रवलमस्ति, केवलं गुणदोषयोः पृथगस्तित्वमस्तीति कथनेन मम्मटस्य शब्दार्थ गुणानामन्तर्भावस्य विरोधो न सम्भवः। विश्वनाथदेवस्य स्तुत्योऽयं प्रयासो यच्छब्दार्थगुणानां पृथक् पृथगेवास्तित्वं स्वीकर्तुं संकेतः कृतः।

धर्मसूरिः–

धर्मसूरिणा गुणसामान्यलक्षणं निरूपयता कथितं यत् समवायसम्बन्धेन गुणा रसमुत्कर्षयन्ति। अलंकारास्तु संयोगवृत्या रसमुपकुर्वन्ति।[1] साहित्य-रत्नाकरणस्य पंचमेतरंगे गुणालंकारयोः शब्दार्थगतत्वं समर्थितम्।[2] गुणानां रसधर्मत्वं व्यवस्थापयन् "धर्मसूरि"रचकथत् यद्गुणिनंविहाय गुणा अन्यत्र न तिष्ठन्तीति।[3] "मन्दरटीकायां" श्रीमल्लादिलक्ष्मणसूरिणाऽपि गुणानां रसधर्मत्व विषयेऽयमेवाशयोऽभिव्यक्तः।[4] "साहित्यरत्नाकरे" प्राचीनानामाचार्याणां धारणैव गुणविषये प्रस्फुटिता वर्तते सूरिणा–मम्मटानुसारेण गुणालंकारयोर्भेदः, एवं च गुणानां शब्दार्थधर्मत्वव्यवहारोप्युपचारेण स्वीकृतः।[5]

अनेन माधुर्यौजः प्रसादख्यास्त्रयो गुणा मम्मटमतं समर्थयितुं प्रतिपादिताः।[6]

---

1. समवायवृत्या रसोपस्कारकत्वं गुणसामान्य लक्षणम्।
   संयोगवृत्या रसोपस्कारकत्वमलंक्ङाकारसामान्य लक्षणम्।।
   साहित्यरत्नाकरे 5/1 पृ० 352.
2. तत्रैव० 5/1 पृ० 347-351.
3. नहि गुणा गुणिनं विहायान्यत्र समवयन्तीति दृष्टचरम्। तत्रैव० 5/1 पृ० 354.
4. अयंभावः गुणगुणिनोः समवायः इति नियमान्माधुर्यादि गुणानां गुणिनोः रसान् विसृज्यान्यत्र समवायो न दृष्टइति। एतेन तत्तद् गुणानां तत्तद्रस प्रतीति नियमादैवासम्भव परिहारः सिद्ध एवेत्यूहयम्। तत्रैव० 5/1 पृ० 355.
5. तत्रैव० 5/1 पृ० 358-359.
6. तत्र माधुर्यादयस्त्रयः सर्वसप्रतिपन्नाः। सा०र० 5/1.

माधुर्यम्–

आल्हादैकमयत्वं माधुर्यस्य लक्षणं वर्तते। आचार्यवामनवदेवास्य गुणस्य पृथक्पदत्वं स्वीकृतम्। अस्य गुणस्य व्यञ्जकता दीर्घसमासाभावे पृथकपदत्वेच क्रोडीकृता। अस्य माधुर्यगुणस्य सम्भोगविप्रलम्भकरुणशान्तरसेषुचानुकूलता प्रतिपादिता।[1]

ओजः–

धर्मसूरिः–दीप्त्यात्मक विस्तार हेतुरोजो इति गुणस्यलक्षणं स्वीकुर्वन्नास्य गुणस्य व्यञ्जकत्वं समासबाहुल्यंचनिरूपितवान्। अस्य स्थितिर्वीररौद्रबीभत्स, भयानकेषु दृश्यते।[2]

प्रसादः–

आचार्यमम्मटवदेवास्यगुणस्य प्रकारान्तरेण लक्षणं विधाय सर्वेषु रसेषु प्रसादगुणस्य स्थितिः प्रतिपादिता।[3] अस्य गुणस्य प्रसिद्धार्थकता व्यञ्जकत्वमस्ति।

एते त्रयोगुणा धर्मसूरिणा भावरूपेण स्वीकृताः। एतत्त्रयारितिक्ताः दोषाभावरूपा वर्तन्ते। एवं च अस्यमते भावाऽभावात्मकत्वमुभयेषामपिगुणत्वंयुक्तम्।[4]

अनेन विद्यानाथोक्तचतुर्विंशति गुणाः परिगणितास्सन्ति तेषामन्तर्भावोऽपि निम्नप्रकारेण विहितः। अर्थव्यक्ति गुणः प्रसादे अन्तर्भावितः। औदार्यउदात्तता, और्जित्य इत्येषां त्रयाणां गुणानां ओजस्यन्तर्भावो विहितः। प्रौढिः, उक्तिः, संक्षेपः, सौक्ष्म्यम्, विस्तरः, सम्मितत्वं, प्रेयः गतिः, समता इत्येषां प्रौढयादीनामष्टानां गुणानां मुक्त्याख्यगुणेऽन्तर्भावो जायते। रूपकाद्यलंकारेषु समाधिगुणोऽन्तर्भवति। अतोऽस्य गुणस्य पृथक् रूपेण न गुणत्वम्। श्लेषगुणस्य शब्दश्लेषालंकारेऽन्तर्भावो

---

1. आनन्द निष्यन्दित्वं माधुर्यम्। तस्यप्राचुर्येण पृथकपदता लक्षणः शब्दधर्माव्यत्रजकः। इदं च सम्भोगविप्रलम्भकरुणशान्तानुरूपम्। स०र० 5/1.
2. ओजः पुनर्दीप्त्यात्मक चेतो विस्तार हेतुः। तद्व्यञ्जकं समासभूयस्त्वम्। वीररौद्रवीभत्स भयानकेषु चेतत् प्रयोज्यम्।। तत्रैव० 5/1.
3. यश्चित्तं ह्यश्रुतेऽह्नाय शुष्केन्धनमिवानलः।
   स प्रसादो मतः सर्वरससाधारण स्थितिः।।
   तस्य प्रसिद्धार्थकत्वं व्यंजकम्। तत्रैव० 5/1.
4. एतेत्रयो भावरूपाः। इतरेषु केचिद् भावाः केचिद्भावरूपाः।
   उभयेषामपि गुणत्वं युक्तम्। तत्रैव० 5/3.

स्वीकृतः माधुर्यगुणे सुकुमारताख्यो गुणः अन्तर्भावितः।[1]

धर्मसूरिणा ओजः प्रसादः, माधुर्यं उक्तिः, कान्तिः, सुशब्दता गाम्भीर्यं, भाविकः, रीतिरित्येषां नवगुणानां केषाचिन्मते निरूपणं कृतम्।[2] अयं स्वमते त्रयाणां अथवा चतुर्णां माधुर्यमोजःप्रसादसौशब्द्य गुणानां निरूपणमकरोत्। विशेषतस्त्रयोगुणा ग्रन्थकर्त्रे रोचन्ते।[3] धर्मसूरिणा साहित्यरत्नाकरस्य पंचमतरंगे शब्दार्थयोर्गुणालंकारवैशिष्ट्यसमर्थनम्, गुणानां वर्णधर्मत्वनिरासः, उपचारेण गुणानां शब्दार्थधर्मत्वव्यवस्थापनं कृतकरत्व निरासः, गुणसंख्याने मतवैविध्यम्, नहि गुणत्वं भावत्वनियतम्, इत्यादीनां विस्तारेण स्वमतस्य प्रतिपादनं कृतम्। परमेतत्सर्वं ध्वनिवादी-आचार्याणामनुसरणं वर्तते। विद्यानाथोक्तानां येषां पंचदशगुणानां अन्तर्भावो विहितः स धर्मसूरेः स्वतन्त्रोद्भावना वर्तते।

पण्डितराजजगन्नाथः—

जगन्नाथो रसगंगाधरे यद्गुणनिरूपणंचकार तत्र सामान्यस्य गुणलक्षणस्याभावो-विद्यते। अनेनातीवप्रौढधिया तर्कवितर्कैश्च प्राचीनानां रसवादीनामाचार्याणां गुणविषयकानि मतानि खण्डितानि तेष्वपि आचार्यमम्मटः सर्वप्रथमोऽस्ति। अस्य कथनमस्ति यद्विविधैर्लक्षणैः प्रमाणैश्च श्रृंगारादिरसेषु माधुर्यौजः प्रसाद-ख्यास्त्रयोगुणा आचार्यनिरूपिताः सन्ति।[4]

माधुर्यगुणस्य स्थितिविषये त्रीणिमतानि प्रतिपादितानि। तत्र प्रथमं मतं तेषामाचार्याणां विद्यते येषांमते संभोगश्रृंगारेयावन्मात्रं माधुर्यगुणो विद्यते, ततोप्यधिकं करुणेऽनयोर्द्वयोरप्यधिकंविप्रलम्भश्रृंगारे सर्वेभ्योऽप्यधिकं शान्तरसे माधुर्यगुणस्तिष्ठति इति स्वीक्रियते यतः पूर्वपूर्वरसापेक्षयोत्तरोत्तरेरसे चित्तद्रुतिराधिक्येन भवति।[5]

---

1. साहित्यरत्नाकरे 5/3 पृ० 371-375.
2. ओजः प्रसादमाधुर्याण्युक्ति कान्ति सुशब्दताः।
   गाम्भीर्यं भाविकं रीतिमूचुः, केचिद् गुणान् नव।। तत्रैव० 5/3.
3. माधुर्यौजः प्रसादस्तु सौशब्दयेन समन्विताः।
   गुणाश्चत्वार एवैते मम सूक्ष्मतरेक्षितुः।।
   त्रय एवेतिवाऽत्यर्थं मनसे रोचते मतम्।। तत्रैव० 5/8 पृ० 382.
4. रसेषु चैतेषु निगदितेषु माधुर्यौज प्रसादाख्यां स्त्रीन् गुणानाहुः।
   रसगंगाधराम आनन पृ० 218.
5. तत्र श्रृंगारे संयोगाख्ये यन्माधुर्यं, ततोऽतिशयं करुणे, ताभ्यां विप्रलम्भे तेभ्योऽपि शान्ते, उत्तरोत्तरमतिशयितायाश्चित्तद्रुतेर्जननात् इति केचित्। तत्रैव०। आनन पृ० 218.

द्वितीयमतं-तेषां विदुषां विद्यते ये सम्भोगश्रृंगारात् करुणशान्तयोस्ताभ्यामपि विप्रलम्भश्रृंगारे उत्तरोत्तरमाधिक्येन माधुर्यगुणस्तिष्ठतीति मन्यन्ते।[1]

तृतीयमतानुसारं सम्भोगश्रृंगारात् करुणविप्रलम्भशान्तरसेषु साम्येन माधुर्यं भवति। एषु त्रिषु प्रथमं तृतीयमतं च स्वीकृतम्, अस्मिन्मते करुणविप्रलम्भ-शान्तरसेषु उत्तरोत्तरं माधुर्यमतिशयेन तिष्ठति। इति स्वीकारोक्तिर्मम्मटस्या-नुसरणमेव वर्तते।[2]

द्वितीयमते जगन्नाथेन स्वकीयारुचिःप्रदर्शिता[3] ओजोगुणस्य स्थिति- वीररसे, वीराद्वीभत्से, ततोपिरौद्ररसे उत्तरोत्तरं विराजते। एषु त्रिषु रसेषु चित्तदीप्ति-रतिशयेन भवति।

प्रसादगुणस्य विषये केचिदद्भुतहास्यभयानकेषु रसेषु प्रसादाख्यो गुणस्तिष्ठतीति मन्यन्ते, अन्ये एषु रसेषु ओजःप्रसादख्यौ गुणावभिलषन्ति। जगन्नाथेन तु आचार्यमम्मटसदृशेव सर्वेषु रसेषु, सर्वासु संघटनासु च प्रसादगुणस्य स्थितिः स्वीकृता विद्यते।[4] जगन्नाथेन गुणानां स्थितिविषये प्रायः मम्मटमतस्यानुसरणं विहितम्, अतो गुणानां स्थितिविषये न किमपि नूतनत्वं प्रतिभाति। माधुर्यगुणस्य श्रृंगारादिषु त्रिषु रसेषु, ओजोगुणस्य वीरादिषु त्रिषु रसेषु नियता स्थितिर्विद्यते परं प्रसादाख्यो गुणः सर्वेषु रसेषु सर्वासु संघटनासु च प्रकाशते, अतएव प्रसादो, नामगुणो माधुर्यमोजयोर्विशिष्यते।

माधुर्यगुणलक्षणे मम्मटेन यद्द्रुतिशब्दस्य प्रतिपादनं कृतमस्ति तस्या विषये जगन्नाथेन स्वमतमेवं प्रदर्शितम्। माधुर्यगुणश्चित्तद्रुतेः, ओजश्चित्तदीप्तेः, प्रसादश्चित्तविकासस्य च प्रयोजकोऽस्ति नतु जनकः।[5] जगन्नाथस्यैतत् कथनं

---

1. संभोगश्रृंगारात् करुणशान्तयोस्ताभ्यामपि विप्रलम्भे, इत्यपरे। तत्रैव० पृ० 219.
2. संयोगश्रृंगारात् करुणविप्रलम्भशान्तेष्वतिशयितमेव न पुनस्तत्रापि तारतम्यम्, इत्यन्ये। तत्र प्रथमचरमयोर्मतयोः करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्, इति प्राचां सूत्रमनुकूलम्। रस०गं०। आनन पृ० 229.
3. मध्यस्थे तु मते करुणशान्ताभ्यां विप्रलम्भस्य माधुर्यातिशये यदि सहृदया-नामनुभवोऽस्ति, तदा स प्रमाणम्। तत्रैव० 229.
4. वीरवीभत्सरौद्रेष्वोजसो यथोत्तरमतिशयः उत्तरोत्तरमतिशयितायाश्चित्ते दीप्तेर्जननात्। अद्भुतहास्यभयानकानां गुणद्वययोगित्वं केचिदिच्छन्ति। अपरे तु प्रसादमात्रम्। प्रसादस्तु सर्वेषु रसेषु सर्वासु रचनासु च साधारणः। तत्रैव० 220.
5. गुणानां चैषां द्रुति-दीप्ति-विकासाख्यस्तिस्रश्चित्तवृत्तयः क्रमेण प्रयोज्याः तत्तद्-गुणविशिष्टरसचर्वणाजन्य इतियावत्। रस० गं०। म०आ० पृ० 2.

विश्वनाथमनुसरति विश्वनाथेनाऽपि द्रुतिविषये मम्मटस्य खण्डनं कृतम्, तद्विषये तत्रैव मया स्वमतमपि प्रतिपादितम्।

जगन्नाथस्यमतमस्ति यदद्रुत्यादिचित्तवृत्तिम्यः माधुर्यादयो गुणाः नैव समुत्पद्यन्ते, अपितु श्रृंगारादिरसास्वादनेन चित्तवृत्तय उत्पद्यन्ते। येषां रसानां श्रृंगारादिरसे स्थितिर्भवति तत्तद्रसास्वादनेन चित्तस्य द्रुतिर्दीप्तिर्विकासानामुद्भवो जायते। गुणानां रसधर्मत्वमिति मम्मटादीनां मतं निराकुर्वन् जगन्नाथः प्राह—गुणानां रसधर्मत्वमिति निर्णीते सति मधुरा रचना ओजस्वीबन्ध इति व्यवहारः, आकार एवास्य शूर इतिवत् लाक्षणिको व्यवहारोऽस्ति नतु मुख्यरूपेण एष व्यवहारः।-अनेन प्रकारेण मम्मटादिभिर्गुणानां यद्रसधर्मत्वं स्वीकृतम् तत्र किं प्रमाणम् ? यदि प्रत्यक्षं प्रमाणं स्यात् अर्थात् पूर्वोक्तप्रकारेण चित्तवृत्तयोह्युपद्यन्ते इत्यनुभूयते, अस्यामवस्थायां पण्डितराजजगन्नाथेन प्रत्यक्षं प्रमाणं न स्वीकृतम्। अस्मिन् विषये जगन्नाथः कथितवान् यथा अग्नेःकार्यं दाहादिः वर्तते, तथा अग्नेर्गुणः ऊष्णस्पर्शो वर्तते। अनयोर्द्वयोः पृथक पृथगनुभवो जायते यदाऽग्निनादाहो न भवति, तदाऽपि तस्योष्णस्पर्शस्याऽनुभवो जायते तथैव श्रृंगारप्रभृतीनां रसानां या द्रुत्यादयश्चित्तवृत्तयः सन्ति तास्वतिरिक्तं रसधर्माणां माधुर्यादिगुणानां पार्थक्येन प्रत्यक्षतया प्रतीतिर्न जायते।[1]

यद्येवमभिमतं स्यात् यन्मार्धुयादिगुणयुक्ता रसा द्रुतिदीप्तिविकासानां कारणानि भवन्ति, तत्र विद्यमानस्य धर्मविशेषरूपे तेषां गुणानामनुमानं भवति। परं जगन्नाथेन एतदपि न स्वीकृतम् यतो रसा द्रुत्यादिचित्तवृत्तीनां कारणानि सन्ति, तेषां कारणतावच्छेदकधर्मत्वेन गुणकल्पना वैयर्थ्यं स्यादिति, अर्थात् द्रुतिं प्रति श्रृंगारः कारणम् एवं प्रकारेण सर्वेषां रसानां कृते कार्यकारणभावः-कल्पनीयः, अनेन प्रकारेण श्रृंगारत्वादिक्लृप्तधर्माणामेव कारणतावच्छेदकं स्वीकृत्य निर्वाहो भविष्यति, तदा अक्लृप्तगुणानां कल्पनया यद्गौरवं तन्न स्वीकर्तुं शक्यते।[2]

---

1. एवमेतेषु गुणेषु रसमात्रधर्मेषु, व्यवसितेषु "मधुरा रचना" ओजस्वीबन्धः इत्यादयो व्यवहाराः "आकारोऽस्य शूर" इत्यादिव्यवहारवदौपचारिकाः इति मम्मटभट्टादयः। येऽमी माधुर्योजः प्रसादा रसमात्रधर्माः तेषां रसमात्रधर्मत्वे किं मानम्। प्रत्यक्षमेवेति चेत्, न, दाहादेः कार्यानलगतस्य स्पर्शस्य यथा भिन्नतयाऽनुभवः तथा द्रुत्यादिचित्तवृत्तिभ्यो रसकार्येभ्योऽन्येषां रसगत गुणानामननुभवात्। तत्रैव० पृ० 221-222.
2. तादृशगुणविशिष्टानां रसानां द्रुत्यादिकारणत्वात् कारणताऽवच्छेदकतया गुणानामनुमानमिति चेत् (न) प्रातिस्विकरूपेणैव रसानां कारणतोपपत्तौ गुण-कल्पने गौरवात्। रस०गं० प्रथम आनन पृ० 222.

अस्यामवस्थायामपि कार्यकारणभावे गुणानां सन्निवेशोऽवश्यमेव कल्पनीयो यदि सर्वत्र कार्यकारणभावयोः कल्पना कृता स्यात्, तदा शृंगारो द्रुतिकारणं, करुणो द्रुतिकारणं, शान्तो द्रुतिकारणमनेन विधिना प्रातिस्विकरूपेण सर्वेषां रसानां द्रुतिदीप्तिविकासानां भेदेन नवकार्यकारणभावानां कल्पना भविष्यति। तदनन्तरं द्रुतिं प्रति माधुर्यगुणयुक्तो रसः कारणं, दीप्तिं प्रति ओजोगुणयुंक्तो रसः कारणं, विकासं प्रति प्रसादगुणयुक्तो रसः कारणं, एवं कार्यकारणभावे स्वीकृते सति त्रयः कार्यकारणभावा भवन्ति, लाघवादयमेव पक्षः स्वीकर्तव्यः, परं जगन्नाथेन एतत्पूर्वपक्षोऽपि न स्वीकृतः, मम्मटेन शृंगारादिषु त्रिषु माधुर्यस्य, वीरादिषु त्रिषु ओजोगुणस्य, अद्भुतादिषु त्रिषु प्रसादगुणाधिक्येन स्वीकृतः। अर्थात् द्रुतिः, द्रुतितरं, द्रुतितमं। दीप्तिः, दीप्तितरं, दीप्तितमं, विकासः, विकासतरं, विकासतममित्येवंरूपेण नवकार्यकारणभावानां कल्पना भविष्यति, या गुरुभूतैव वर्तते। अत्र जगन्नाथमते एतत्स्फुटं भवति यन्माधुर्यादयो गुणाः, मुख्यया वृत्त्या काव्यस्यांगीभूतरसस्य धर्मा न विद्यन्ते।[1] पण्डितराजजगन्नाथेनान्य प्रकारेणापि माधुर्यादिगुणानां रसधर्मत्वस्य निरसनं कृतमस्ति–यथा मम्मटमते रसः काव्यस्यात्मा वर्तते, वेदान्ते आत्मा निर्गुणत्वेन स्वीकृतः, अत आत्मभूतरसस्य धर्मा माधुर्यादयो गुणा न भवितुं शक्यन्ते। गुणा रसस्य धर्मावर्तन्ते। अस्यार्थः यद्येवं स्यात्, यद्रसस्योपाधिभूतस्थायीभावानां धर्मा गुणास्सन्ति, एतदपि युक्तियुक्तं न प्रतिभाति। यतोहि मम्मटादीनांमते रत्यादयः स्थायिभावाः सुखस्वरूपा वर्तन्ते, सुखस्वरूपत्वात् ते स्वयं गुणास्सन्ति तेष्वन्यगुणानां स्थितिः सम्भवा न विद्यते, यतो नैयायिकानां मते गुणे गुणान्तरस्य सन्निवेशो न युज्यते। अनया रीत्या जगन्नाथो मम्मटमतं निराकरोत्।[2] पण्डितराजो जगन्नाथः- एकां शंकां प्रस्तूय तस्या निराकरणं करोति। निर्गुणात्मनि रसे गुणा न तिष्ठन्ति, तदा शृंगारो मधुर इत्यादि व्यवहारः कथं जायते। अस्मिन् विषये स्वमतमित्थं

---

1. शृंगारकरुणशान्तानां माधुर्यवत्त्वेन द्रुतिकारणत्वं, प्रातिस्विकरूपेण कारणत्वकल्पना- पेक्षया लघुभूतमिति तु न वाच्यम्, परेण मधुरतरादि गुणानां पृथग् द्रुततरत्वादि कार्यतारतम्यप्रयोजकताऽभ्युपगमेन माधुर्यवत्त्वेन कारणताया गुरुभूतत्वात्। रस०गं० प्रथम आनन पृ० 223.
2. किंचात्मनो निर्गुणतयाऽत्मरूपरसगुणत्वं माधुर्यादीनामनुपपन्नम्। एवं तदुपाधि रत्यादि गुणोऽपि, मानाभावात्। पररीत्या गुणे गुणान्तरस्यानौचित्याच्च। तत्रैव० प्रथम आनन पृ० 224-225.

प्रकटितम् यद्द्रुत्यादि चित्तवृत्तेः प्रयोजकत्वं श्रृंगारादिरसेषु विद्यते, अथवा प्रयोजकतासम्बन्धेन द्रुत्यादि चित्तवृत्तावेव गुणास्सन्ति, यदि द्रुत्यादयो चित्तवृत्तिविशेषा मन्यन्ते माधुर्यादयो गुणा रसेष्वेव तिष्ठन्ति तर्हि द्रुत्यादिकमेव माधुर्यमितिकथनं सङ्गच्छेत इति जिज्ञासायां जगन्नाथेन कथितं यद्यपि द्रुत्यादयो चित्तवृत्तिविशेषा वर्तन्ते तथापि तत्प्रयोजका माधुर्यादयो श्रृंगारादिष्ववतिष्ठन्ति। अतएव प्रयोजकतासम्बन्धेन द्रुत्यादयो रसे स्थातुं शक्नुवन्ति। प्रयोजकतासम्बन्धेन श्रृंगारो मधुर इति व्यवहारो तथैव भवति यथा वाजिगन्धाख्यौषधिः उष्णेति व्यवहारो भवति।

यद्यपि वाजिगन्धौषधिः उष्णो न विद्यते अपितु स उष्णतायाः प्रयोजिकाऽस्ति अतः प्रयोजकतासम्बन्धेन वाजिगन्ध्युष्णाभवतीति व्यवहारो जायते, तथैव माधुर्यादीनां प्रयोजकाः श्रृंगारादयो रसास्तेषां कृते श्रृंगारो मधुर इति व्यवहारो जायते।[1]

पण्डितराजमते द्रुत्यादिचित्तवृत्तीनामसाधारणप्रयोजकता रसे तु भवत्येव, परं शब्दार्थरचनायामपि सा प्रयोजकता भवतीति न दोषकृत्। अतो गुणानां द्रुत्यादिप्रयोजकत्वरूपस्य माधुर्यादेः शब्देऽर्थेच सत्त्वात् मधुरा रचना, ओजस्वी बन्धः, इत्यादिव्यवहारं साधयितुं पृथग् लक्षणानां कल्पनाया आवश्यकता न भविष्यति। अनेनैतत्प्रतीयते यज्जगन्नाथेन गुणानां शब्दार्थरचनायामपि स्थितिः प्रदर्शिता।[2] अनेन पण्डितराजजगन्नाथेन मम्मटमतस्य खण्डनं कृतम्। यद्यपि द्रुतिविषये गुणानां रसधर्मत्वविषये चानन्दवर्धनविश्वनाथाभ्यामपि निरूपणं कृतमस्ति, परमत्र जगन्नाथस्य चरमं लक्ष्यं आचार्यमम्मटस्येव खण्डनं प्रतिभाति।

जगन्नाथेन गुणानां स्थितिविषयकं तथा गुणानां रसधर्मत्वस्य खण्डनं विधाय, द्रुत्यादिचित्तवृत्तीनां श्रृंगारादिरसेषु प्रयोजकतासम्बन्धं स्वीकृत्य जरत्तराणां दशशब्दगुणानां दशार्थगुणानां च प्रकारान्तरेण लक्षणान्यभिधाय, यथा मम्मटेन विश्वनाथेन च वामनोक्तदशशब्दगुणानामर्थगुणानां चान्तर्भावो विहितस्तथैव जगन्नाथोऽप्यन्तर्भावमकरोत्।[3]

---

1. अथ श्रृंगारो मधुरः इत्यादि व्यवहारः कथमितिचेत् एवं तर्हिद्रुत्यादिचित्तवृत्ति-प्रयोजकत्वम्, प्रयोजकतासम्बन्धेन द्रुत्यादिकमेव वा माधुर्यादिकमस्तु। व्यवहारस्तु "वाजिगन्धोष्णा" इति व्यवहारवदक्षतः। रस०गं० प्रथम आनन पृ० 225.
2. तथाच शब्दार्थयोरपि माधुर्यादेरीदृशस्य सत्त्वादुपचारो नैव कल्प्यः, इतितु मादृशाः। तत्रैव० पृ० 227.
3. अपरेत्वेषु गुणेषु कतिपयान् प्रागुक्तैस्त्रिभिर्गुणैर्वक्ष्यमाणदोषाभावालंकारैश्च गतार्थ-यन्तः, काँश्चिद् वैचित्र्यमात्ररूपतया क्वचिद् दोषतया च मन्यमाना न तावतः स्वीकुर्वन्ति। तत्रैव० पृ० 288.

अन्तर्भावसम्बन्धे जगन्नाथस्य न किमप्यभिनवं प्रतिभाति। गुणानां संख्या विषयेप्यनेन जगन्नाथेन मम्मटोक्तास्त्रयो गुणाः स्वीकृताः।[1] अनेन पार्थक्येन त्रयाणां माधुर्यौजःप्रसादाख्यानां गुणानां लक्षणानि न कृतानि। गुणानां वर्ण-व्यञ्जकत्वमपि प्रकारान्तरेण रसवादी आचार्याणामनुसरणं करोति।[2]

जगन्नाथेन रचनायां सामान्यतया किं वर्जनीयो भवति, वैशिष्ट्येन किं त्याज्यो भवति इत्यस्मिन् विषये स्वतन्त्रोद्भावनया विचारः कृतः।

(क) एकस्मिन्नेव पदे नैरन्तर्येण एकस्यैव वर्णस्य वारद्वयं प्रयोगोऽश्रव्यो-भवति। यथा ककुभयसुरभिः, विततगात्रः, पललमिवाभाति।[1]

(ख) भिन्नपदगतत्वेऽपि असकृद्भिन्नपदगतत्वेऽपि रचना अश्रव्या भवति।[4]

(ग) एकस्मिन्नेव पदे—एकस्यैव वर्गस्य पृथक् पदानामसकृदावृत्तिस्तथाच पृथक्-पृथग् भिन्न-भिन्नपदेष्वेकस्यैव वर्गस्याक्षराणां सकृदावृत्तिः अश्रव्या भवति।[5]

इत्यादिप्रकारेण अन्यान्यपि अश्रव्यतायाः किचिंदश्रव्यतायाः प्रकाराणि प्रतिपादितानि। पूर्वप्रदर्शितअश्रव्यताप्रकाराणां बाधोऽपि निरूपितः। यदा अश्रव्यव्यंजनानां मध्ये गुरुस्वरस्य व्यवधानं स्यात्तदाऽश्रव्यतायाः निरासो भवति। अनेनाऽश्रव्यताया स्थितौ श्रव्यतायाः, श्रव्यतायास्थितौ अश्रव्यतायाः प्रकाराणिं निरूपितानि सन्ति।[6]

जगन्नाथस्य कथनं वर्तते रसविशेषाऽनुसारं ये दोषाः मधुर रसे त्याज्या भवन्ति, ते ओजस्विरसेऽनुकूलतां प्राप्नुवन्ति। एवं ये दोषा माधुर्यरसास्यानुकूला भवन्ति, ते ओजस्विरसे प्रतिकूलतां भजन्ते।[7] मधुररसेषु प्रतिकूलतया हातव्य दोषाणामपि विस्तरेण निरूपणं कृतमस्ति एतत्सर्वं केवलं संकेतमात्रेण मया प्रतिपादितम्।[8]

---

1. अतस्त्रय एव गुणा इति मम्मटभट्टादयः। रस०गं० प्रथम आनन पृ० 253.
2. तत्रैव० प्रथम आनन पृ० 253-259.
3. तत्रैव० पृ० 260.
4. तत्रैव० पृ० 261.
5. तत्रैव० पृ० 262.
6. तत्रैव० पृ० 264-271.
7. रस०गं० प्रथम आनन पृ० 27.
8. तत्रैव० प्रथम आनन पृ० 272-284.

गुणानां काव्यात्माश्रयत्वविमर्शः—

आत्मनो निर्गुणत्वात् रसस्य धर्मा गुणा न वर्तन्ते इति यज्जगन्नाथेन कथितम् तत् सुसमीचीनं न प्रतिभाति, यतोहि मम्मटोक्तकाव्यलक्षणं खण्डयता जगन्नाथेन प्रतिपादितम् काव्यलक्षणे गुणालंकारयोर्निवेशो न युक्तः।[1] यतोहि शौर्यादय आत्मनो धर्माः सन्ति, शब्दार्थशरीरे गुणानां स्थितिरसंभवैव अर्थात् गुणाः शौर्यादिवत्, काव्यस्यात्मनो रसस्य धर्मा वर्तन्ते नतु काव्य शरीरघटकाः।[2] उपमानुप्रासादयोऽलंकाराः काव्यस्य शब्दार्थमयं शरीरमलंकुर्वन्ति, अतो गुणालंकारयोः काव्यलक्षणे उपादानं न समीचीनम्। उपर्युक्तप्रकारेण पण्डितराजजगन्नाथमते गुणानां रसधर्मत्वं सिद्ध्यति, परं मम्मटेन गुणानां यद् रसधर्मत्वमभिहितमस्ति तत्खण्डयितुं जगन्नाथेन कथितं यदात्मा निर्गुणोऽस्ति, अतः काव्यस्य रसरूपात्मनि माधुर्यादिगुणानां रसधर्मत्वेन प्रतिपादनं नोचितम्।[3] अत्र जगन्नाथस्य बदतो व्याघातो विद्यते।

प्रतिपादितदृशा पण्डितराजजगन्नाथो वेदान्तमतमवलम्ब्य आत्मा निर्गुणोऽयमिति मत्वा गुणानां रसधर्मत्वमिति ध्वनिप्रतिष्ठापकाचार्याणामथवा रसादीनां निश्च्योतभूतस्य मतस्य यत् खण्डनं कृतवान्, तदौचित्यं न धत्ते। न्यायदर्शनानुसारं जीवात्मनि संख्यापरिमाणपृथक्त्वादयो चतुर्दश गुणास्तिष्ठन्ति संख्यापरिमाणपृथक्त्वादयोऽष्टौगुणाः परमात्मनि निवसन्ति।[4] गुणाश्रयत्वं द्रव्यत्वमिति द्रव्यलक्षणदृशाऽपि गुणात्मनोः सम्बन्धो विद्यत एव।[5] आत्मनो बृहदत्त्वं परमात्मा, परमात्मनः अंशः आत्मा वर्तते, आत्मा परमात्मा उपर्युक्त-रीत्यनुसारं सगुणो वर्तते, अस्मात् कारणात् काव्यस्यरसमयः आत्मापि मधुर्यादि गुणसहितो विद्यते। अतो जगन्नाथदृशा गुणानां रसधर्मत्वस्य निरासो दुराग्रह-पूर्वकमेव प्रतिभाति। जीवात्मा विविधशरीरेषु भिन्न-भिन्न प्रकारेण सुख-दुःखादिकमनुभवति। आत्मा एकएव भवति स एव कश्चिद् रंकः, कश्चिद्

---

1. लक्षणे गुणालंकारादिनिवेशोऽपि न युक्तः। रस०गं० प्रथम आनन पृ० 21.
2. शौर्यादिवदात्मधर्माणां गुणानां हारादिवदुपस्कारकाणामलंकाराणां च शरीर-घटकत्वानुपपत्तेश्च। तत्रैव० पृ०उ 24.
3. किंचात्मनो निर्गुणतयाऽऽत्मरूपरसगुणत्वं माधुर्यादीनामनुपपन्नम्। तत्रैव० पृ० 224.
4. जीवात्मनि संख्या परिमाण पृथक्त्वादयः.... चतुर्दश गुणाः। परमात्मनि च संख्या परिमाणमित्यादयोऽष्टौ गुणाः। तर्कसंग्रहः पृ० 32.
5. तत्रैव० पृ० 6.

सुखी, कश्चिद् दुःखी, कश्चिन् मुक्तः, कश्चिन्बद्धः, कश्चिन्नीचाभिजनः, कश्चिद् विद्वान्, कश्चिद् जाल्मः इत्यादि प्रकारेण सुख-दुःखादिगुणदोषैर्युक्तो आत्मा भवति।[1] तस्य निर्गुणत्वं सर्वशास्त्रदृष्ट्या नैव सिध्यति।

काव्यस्यात्मा तु सर्वत्र शृंगारादिरसेषु रूपान्तरिता करुणरौद्रादिरसेष्वपि माधुर्योजादिधर्मयुक्तः समग्रान् सहृदयान् प्रीणाति। काव्यस्यात्मनो नहि कश्चित् सुहृद् विमुखो भवति, अतः शरीरात्मनः सकाशात् काव्यात्मा सर्वोत्कर्षरूपेण विराजतेतराम्। यदि जगन्नाथेन वेदान्तदृशा काव्यस्यात्मा निर्गुणत्वेन प्रतिपादितः तदा रसोऽपि न्यायशास्त्रदृशा रसनाग्राह्यत्वेन स्वीकर्तव्यमासीत्। यदि न स्वीकृतस्तदैतदवगन्तव्यम् यदैकशास्त्रस्य सिद्धान्तोऽन्यशास्त्रे न प्रयुज्यते। मम्मटेन गुणानां रसधर्मत्वप्रतिपादनार्थं शौर्यादय उदाहरणत्वेनोदाहृताः, जगन्नाथेन तु शौर्यादय इवात्मनः इत्यस्मात् गुणलक्षणात् आत्मशब्दंगृहीत्वा वेदान्तशास्त्रानुसार मात्मनो निर्गुणत्वात् काव्यस्यात्मा रसोऽपि निर्गुणत्वेनाभिहितः।

वैशिषिकदर्शनेऽपि द्रव्यगुणकर्मणां समानधर्मत्वं निरूपितम्।[2] तथा रूप, रस, गन्ध इत्यादीनां कार्यगुणेषु समानजातीयरूपादिकारणानां गुणा असमवायिकारणत्वेन भवन्ति[3] यथा पटरूपे तन्तवः। वेदान्ते शुद्धात्मा निर्गुणो भवति स आत्मा मायाप्रभृतिभिर्गुणैर्न लिप्यते, परं काव्यस्यात्मा रसो रत्यादिस्थायिभावैर्युक्तोऽस्ति, अतः तस्मिन्नात्मनि माधुर्यौजःप्रसादाख्या गुणा धर्मत्वेन स्थातुं प्रभवन्तीति।

काव्यात्मनः शुद्धात्मनश्च परस्परं तारतम्यं विधाय काव्यात्मा रसो निर्गुणोऽस्ति इति कथनं नोपपद्यते। जैनदर्शनेऽपि आत्मनो गुणस्य यद् ज्ञानं तत् समवायसम्बन्धेन आत्मनि तिष्ठतीति जैनमतेऽपि आत्मा गुणेभ्यः पृथग् भूतो न वर्तते।[4] साहित्यशास्त्रे काव्यस्यात्मा रसः विभावादिभिर्व्यञ्जितश्चर्वनीयः

---

1. तत्रैव० पृ० 33.
2. द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम्। वैशेषिकसूत्रोपस्कारः 1/1/18.
3. कार्यगुणानां रूपरसादीनां सजातीयकारणगुणानामसमवायिकारणकत्वम्। तत्रैव० वृत्तौ पृ० 59.
4. यद्यात्मनो ज्ञानादव्यतिरिक्तत्वमिष्यते तदा दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावात् बुद्धयादीनां न वा मानात्मविशेषगुणानामुच्छेदावसर आत्मनोऽप्युच्छेदः स्यात्, तदव्यतिरिक्तत्वात्। भिन्नमेवात्मनो ज्ञानं यौक्तिकमिति। स्याद्वादमज्जरी। अन्य०यो०व्य० श्लोक 8, पृ० 52.

ब्रह्मास्वादमिवानुभावयन्नलौकिकतामेति अतोऽस्य रसस्य धर्मागुणा- भवन्तीति यद् मम्मटादिभिः प्रतिपादितम् तत् समीचीनमेव प्रतिभाति।

1. पण्डितराजजगन्नाथानुसारं द्रुतिदीप्तिविकासाख्या चित्तवृत्तय एव क्रमेण माधुर्य–ओजः प्रसादगुणास्सन्ति।
2. शृंगारादिरसेषु मधुरादि व्यवहारः प्रयोजकत्वसम्बन्धेन स्वीकृतः।
3. गुणानां स्थितिविषये किञ्चित् पौर्वापर्यं प्रदर्श्य मम्मटादीनामनुसारमेव जगन्नाथो गुणानां स्थितिं प्रतिपादयामास।
4. गुणानां रसधर्मत्वस्य यत्खण्डनं विहितम्, तदपि बदतो व्याघातत्वात् शुद्धात्मनः काव्यात्मनश्च भेदत्वाच्चापास्तम्।
5. द्रुत्यादिचित्तवृत्तीनां प्रयोजकत्वं न केवलं रसमधितिष्ठति, अपितु शब्दे अर्थे, रचनायाञ्चापि वर्तते।
6. गौणीवृत्त्या गुणानां शब्दार्थगतत्वमिति मम्मटमतं निरस्य, मुख्यया वृत्त्या गुणानां शब्दार्थगतत्वं रचनागतत्वं जगन्नाथः स्वीचकार।
7. जगन्नाथेन स्वमते गुणसामान्यलक्षणं न कृतम् न च माधुर्यादिगुणानां लक्षणान्युपात्तानि, मम्मटमतं समर्थयता काव्ये त्रयो गुणाः स्वीकृताः।
8. विशेषतः जगन्नाथस्य मम्मटेन सह विरोधो, द्रुत्यादिचित्तवृत्तीनां विषये, गुणानां रसधर्मत्वविषये गौणीवृत्त्या गुणानां शब्दार्थगतत्वविषये वर्तते।

प्रयोजकत्वसम्बन्धेन गुणानां रसगतत्वमपि पण्डितराजः स्वीचकार।

भरतमुनेरारभ्य प्राचीनानामर्वाचीनानामाचार्याणां समासेन गुणविवेचनं प्रस्तूयते। यद्यपि प्रदर्श्यमानगुणविवेचने आचार्यैः किमपि गुणविषयिणी असाधारणधारणा न प्रकटिता अपितु पूर्ववर्तिनामाचार्यानामनुसारमेव गुणनिरूपणं विहितम्, गुणस्वीकृतिविषये एभिरपि स्वस्वमतान्यनुदितानि इति मत्वा तेषां मतं प्रदर्श्यते।

---

1. अन्यूनाधिकवाचकत्वम्।
2. सुक्रमत्वम्।
3. अपुष्टार्थत्वम्।
4. चारुपदत्वम्।
5. क्षोदक्षमत्वम्।
6. अक्षूणत्वम्।

रूद्रटः—

रूद्रटेन स्पष्टरूपेण गुणनिरूपणमकृत्वा वाक्यलक्षणनिरूपणाऽवसरे अन्यूनाधिकवाचकत्वम्, सुक्रमत्वम्, अपुष्टार्थत्वम्, चारुपदत्वम्, क्षोदक्षमत्वम्, अक्षूणत्वम्, एते षड्गुणा वाक्यस्य प्रतिपादिताः।[1] एषु वाक्यगुणेषु प्रथम, द्वितीय, तृतीय, चतुर्थ गुणाः क्रमेण न्यूनत्वाधिकपदत्व, दुष्क्रमत्व, अपुष्टार्थत्व, दुःश्रवत्वदोषाणां विपर्ययस्वरूपा वर्तन्ते। क्षोदक्षमत्वम् वाक्यगुणस्याभिप्रायः औचित्ययुक्ते वाक्यार्थे वर्तते। "नमिसाधुना" क्षोदक्षमत्वशब्दस्यार्थः गाम्भीर्ययुतः स्वीकृतः।[2]

भोजदेवेन व्यंग्यार्थेन युक्तः शब्दगतगाम्भीर्यगुणः स्वीकृतः।[3] शास्त्रार्थसव्यपेक्षतादशायामर्थगतगाम्भीर्यगुणो अंगीकृतः।[4] समग्रगुणसाकल्येन, समग्रदोषत्यागेन रूद्रटायाक्षूणत्ववाक्यगुणो नितरां रोचते अक्षूणत्ववाक्यगुणविषये "नमिसाधुना" टीकायां लिखितं यदसमर्थत्वं, अप्रतीतत्वं, विसंधिरित्यादि दोषाणां त्यागाद् वाक्यं प्रयोगयोग्यं भवति।[5] अनेन विधिना षड्वाक्य गुणनिरूपणानन्तरं प्रतिपादितं यद्रचनायामेवं विधानां शब्दानां प्रयोगः कर्तव्यः, ये संज्ञा, सर्वनाम, विशेषणशब्देषु रमणीयत्वमुत्पादयेयुः[6] रूद्रटमते रचनायां यच्चारुत्वं भवति तद्रमणीयशब्दानां प्रयोगेणैव जायते। रचनायांसौन्दर्यस्यावश्यकता प्रतिपादयता तत्र चारूत्वहेतुः शब्दगुणानां रमणीयसन्निवेशो निगदितः। रमणीयशब्दानां प्रयोगेणैव रचनायां रमणीयत्वमुदेति।[7]

पूर्वप्रतिपादिताचार्याणामतिरिक्तमपि, आचार्यविश्वेश्वरेण चमत्कार चन्द्रिकायां, रत्नेश्वरमिश्रेण सरस्वतीकण्ठाभरणस्य रत्नदर्पणव्याख्यायां, अच्युतरायः साहित्यसारस्य "धन्वन्तरिरत्ने" प्रकाशवर्षेण रसार्णवालंकारे,

---

1. अन्यूनाधिकवाचकसुक्रमपुष्टार्थशब्दचारूपदम्।
क्षोदक्षममक्षूणं सुमतिर्वाक्यं प्रयुञ्जीत। रूद्रट० का०लं० 2/8.
2. क्षोदक्षमं प्रेरणसहं वाक्यं प्रयुञ्जीत। गाम्भीर्ययुतमिति तात्पर्यार्थः। तत्रैव० नमिसाधु० टी०रु०का० लं० 2/6 पृ० 31.
3. शृं० प्र० नवम प्र०पृ० 343.
4. तत्रैव० पृ० 346.
5. समस्तदोषत्यागात्समस्तगुण संग्रहाच्च परिपूर्णम्, एतेन "असमर्थप्रतीतं विसंधिः इत्यादिवक्ष्यमाणदोषत्यागाच्च वाक्यस्य प्रयोगार्हत्वमावेदितम्। तत्रैव० 12/8 पृ० 31.
6. रचयेत्तमेव शब्दं रचनाया यः करोति चारुत्वम्।
सत्यपि सकलयथोदितपदगुणसाम्येऽभिधानेषु।। तत्रैव० 2/9.
7. रचनाचारुत्वे खलु शब्दगुणः संनिवेशचारूत्वम्। तत्रैव० 2/10.

बहुरूपमिश्रेण दशरूपकस्य व्याख्यायां च गुणानां विषये भिन्न-भिन्नरूपेण विचाराः समुपन्यस्ताः परमेषां धारणा पूर्ववर्त्त्याचार्याणामनुगामिनी विद्यते, अतोऽत्र तेषां पृथक् पृथग् विवेचनं न कृतम्।

उपर्युक्ताचार्येषु अच्युतस्य गुणधारणा वैलक्ष्यण्यमावहति यतो हि धर्माः, रसः, लक्षणं रीतिः, अलंकारः, वृत्तिः, एषां षण्णां काव्यतत्त्वानां काव्यगुणत्वेन निरूपणं विहितम्।[1] अच्युतरायेन वैशेषिकगुणानां निरूपणं कुर्वता कथितं यन्मुख्यगौणयोर्भेदेन वैशेषिकगुणस्य द्वौ भेदौ वर्तेते। मुख्यवैशेषिकगुणः प्रसिद्धो भवति। गौणवैशेषिकगुणोऽपि विधिनिषेधमुखेन द्विविधौ विद्यते।[2] तदनन्तरं मुख्यगौणभेदयोर्दोषस्य गुणत्वं, दोषनिवारणं तथा च दोषस्य गुणादिभिरौपयिकत्वमितिभेदेन त्रयो भेदाः प्रतिपादिताः।[3] अच्युतेन सत्त्वरजस्तमो गुणानामाधारेण रसानां विभाजनमकारि। श्रृंगारकरुणशान्तरूपेषु सात्त्विकरसेषु माधुर्यगुणोऽवतिष्ठते। वीरवीभत्सरौद्ररूपेषु तामसिकरसेषु ओजोगुणस्य स्थितिर्भवति हास्याद्भुतबीभत्सेषु रजोगुणप्रयुक्तेषु रसेषु माधुर्यौजो गुणोऽवतिष्ठते।

एषु प्रतिपादितेंषु रसेषु क्रमेण उत्तरोत्तरमाधिक्येन, माधुर्यम्, ओजो माधुर्योजो गुणास्तिष्ठन्तीति। प्रसादस्य स्थितिः पूर्वाचार्याणामनुसारं सर्वेषु रसेषु स्वीकृता।[4]

---

1. धर्मा रसा लक्षणानि रीत्यलंकृतिवृत्तयः।
 रसिकाह्लादका ह्येते काव्ये सन्ति च षड्गुणाः।। साहित्यकारः 1/120.
2. आद्यः पुनर्द्विधा ज्ञेयो मुख्यगौणत्वभेदतः।
 मुख्यः प्रसिद्ध एवास्ति गौणः स्यादपवादतः।।
 स तु किचिंदविच्छेदाद्विहितस्य निषेधनम्।
 विधिर्वा प्राङ्निषिद्धस्येत्येवं द्विविध उच्यते। तत्रैव० 7/3/6.
3. गुणत्वकरणाद्दोषे दोषत्वस्य निवारणात्।
 गुणाद्यौपयिकत्वेनात्याज्यत्वाच्च पुनस्त्रिधा।। तत्रैव०
4. सात्विकैकरसस्थो यो धर्मो धीदृतिकार्यसौ।
 माधुर्यं भोगकरुणाऽयोगशान्तेऽधिकं क्रमात्।
 तमसैकं रसस्यो यो धर्मोधीदीप्तिकार्यसौ।
 ओजो वीरे च बीभत्से रौद्रे च क्रमशोऽधिकम्।।
 राजसेषु तु तेषु स्यात्प्राधान्यमुभयोरपि।
 यः सर्वरसगोपीन्द्रं दीपवच्चीनमम्बुवत्।
 ओजोमाधुर्ययोर्हतं नयहं न ये द्राक् स प्रसादकः।। साहित्यसारः 7/122-125.

एवं प्रकारेण अच्युतो गुणविषयिणी धारणां निरूपितवान्। विश्वनाथेन साहित्यदर्पणस्य तृतीयपरिच्छेदे रसस्याऽस्वादनप्रकारे सत्त्वगुणस्योद्रेकात् रजस्तमसि-अभिभूय आस्वादनप्रकारो नतु कस्यचिदेकस्य रसस्याऽपितु सर्वेषां रसानां निरूपित आसीत्।[1] परमच्युतेन पूर्वप्रतिपादितसरण्या सत्त्वरजस्तमोगुणानां स्थितिः प्रदर्शिता, अस्मिन् विषये ईदृशीधारणा सुसमीचीना न प्रतिभाति। यद्यपि रजोगुणस्य तमोगुणस्य च भावा रसविशेषेषु भवन्ति, परं रसास्वादने तेषां तिरोभाव एव विश्नाथमते सङ्गच्छते।

---

1. तत्रैव० 3/2.

षष्ठोऽध्यायः

गुणशब्दस्यार्थाः

सामान्यव्यवहारिकभाषायां कस्यचिदपि वस्तुन उत्कर्षाधायकविशेषता गुणशब्देनोच्यते। प्रतिशास्त्रं प्रायोगुणानां लक्षणानि संख्या च पृथग् वर्त्तते। सांख्यशास्त्रे प्रकृत्या त्रिष्ववयवेषु गुणशब्दः प्रयुज्यते। सत्त्वरजस्तमो-गुणरूपेयं प्रकृतिः। गुणानां साम्यावस्थाया नाम प्रकृतिः। एतदतिरिक्ता न कापि प्रकृतिः।

प्रकृत्या ये परिणामास्सन्ति तेषां कारणं पूर्वोक्तगुणा वर्तन्ते। कदाचित् सत्त्वगुणस्य, कदाचिद्रजोगुणस्य कदाचित्तमोगुणस्य प्राधान्यं वरीवर्ति। सत्त्वगुणस्य प्राधान्ये ऊर्ध्वागमनज्ञानधर्मैश्वर्यादय उत्पद्यन्ते। रजोगुणश्चलोवर्तते, अतो गतिकारणम्। तमो गुणो गतिनिरोधकोऽस्ति, तेनाधर्मज्ञानादेः कारणम्, अस्मादेव कारणात् इयं प्रकृतिः त्रिगुणात्मिका कथ्यते। एषां प्राधान्येन व्यक्तीनां प्रकृत्या आधारेण च विभागः क्रियते। सांख्यमताऽनुसारं पुरुषोऽथवा आत्मा गुणातीतः। योगशास्त्रेऽपि ईश्वर उपर्युक्तगुणातीतः प्रतिपादितः। न्यायवैशेषिकदर्शने गुणाद्रव्याश्रया उच्यन्ते। अस्मिन् दर्शने गुणानां वैशिष्टयं द्रव्येभ्यः पृथग् विद्यते, परं द्रव्येष्वेव समवायसम्बन्धेन निवसति। कोशेषु गुणशब्दस्य विविधव्युत्पत्तयो दृश्यन्ते, कोशानुपजीव्यैव गुणशब्दस्यार्था व्युत्पत्तयश्च प्रदर्श्यन्ते।

1. गुणाः–गुण, त क मन्त्रणे इति कविकल्पद्रुमः।
2. अदन्त–चुरा–पर–सक०सेट। ह्रस्वो मूर्धन्यव्योपधः गुणयति इति दुर्गादासः।
3. गुणः–पुं–(गुण्यते मन्त्र्यते मन्त्रणादिभिर्नीश्चीयते राजभिरिति।
4. गुण मन्त्रणे घञ्, षट्प्रकारको राजनीतिविशेषः तद्यथा सन्धिः, विग्रहः, यानम्, आसनम्, द्वैधम्, आश्रयः। यथा मनुस्मृतौ–सन्धिञ्च विग्रहं चैव यानमासनमेव च। द्वैधीमावं साश्रयं च षड्गुणान् चिन्तयेत्सदा।।[2]
5. गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि।
   सगुणोऽपि पूर्णकुम्भो यथा कूपे निमज्जति।।

---

1. विश्वकोशे, पृ० 455-456.
2. मनुस्मृतौ, 7/160.

6. यथा आर्यासप्तशत्याम्–काञ्चीगुण इव पतितः स्थितैकरत्नः फणी स्फुरति।
7. शुक्लकृष्णरक्तपीतादिद्रव्याश्रितः।
   स तु शौर्यादिः रसगन्धादिश्च–इत्यमरः तस्य लक्षणं यथा–
   सत्त्वे निविशतेपैति पृथग् जातिषु दृश्यते।
   आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः।। इति मुग्धबोधनम्।

यः सत्त्वे द्रव्ये निविशते तदेवाश्रयीतत्यर्थः अपैति तस्मात् सत्त्वादपगच्छतीत्यर्थः यथा श्यामता पूर्वमाम्रादिकफलमुपगच्छति। पश्चात् पक्वदशायां ततोऽपैति ततो भिन्नेषु पदार्थेषु दृश्यते–आम्रादिफले या श्यामता दृष्टा सा कदलीफलादिषु च दृश्यते स गुणः स्यादित्यर्थः।

8. शोभाविलासादयो सात्त्विकनायकगुणाः।
9. महाभारते यथा–आहारो द्विगुणस्त्रीणां बुद्धिस्तासां चतुर्गुणः।
10. व्याकरणे संज्ञाविशेषः अदेङ्गुण इत्युक्ते एकारे ओकारेच।
    इ, उ, ऋ, लृ, एषां स्थाने, ए, ओ, अर्, अल्, गुणा भवन्ति।[1]
11. गुण मन्त्रणे – आम्रेडने चेत्येके, उभयपदी, सक० सेट गुणयति–ते अजुगुणत्–ते–, धनुषो मौर्व्याम्, धनुराकर्षणदामिनी रज्जुमात्रे, सगुणोऽपि पूर्णकुम्भो निमज्जतीत्युद्भटः।
12. ज्ञानविनयादिषु-गुणा गुणाऽनुबन्धितत्वादिति कालिदासः।
13. नीतिशास्त्राऽनुसारं दयादाक्षिण्यादयः प्राणिमात्रधर्माः।[2]
14. गुणो मौर्व्यामप्रधाने रूपादौसूदइन्द्रिये।
    त्यागशौर्यादि सत्वादि सन्ध्याद्यावृत्तिरज्जुषु।।[3]
15. रूपादिचतुर्विंशतिपदार्थेषु मुक्तावल्याम्।[4]
16. त्रिगुणं सुगतत्वम् हेतोः प्रहाणं त्रिगुणं सुगतत्वमतिः श्रयात्।[5]

अनया रीत्या गुणशब्दस्यार्था वहवः सन्ति इति कोशेषु सविस्तरं प्रपञ्चितम्। अलंकारशास्त्रे भरतादिभिः श्लेषादिदशगुणानां कृते गुणशब्दस्य व्यवहारो विहितः। आनन्दवर्धनादारभ्य माधुर्यादिषु त्रिषु प्राधान्येन गुण व्यपदेशः कृतोऽस्ति।

---

1. शब्दकल्पद्रुमः द्वितीयो भागः पृ० 335-336.
2. शब्दस्तोममहानिधिः–
3. मे०को० शब्दवर्गः पृ० 45.
4. न्यायसिद्धान्तमुक्तावली, प्रत्यक्ष खण्ड 3-5.
5. प्रमाणवार्तिके, प्रमाणसिद्धिः पृ० 141-144.

अलंकारशास्त्रे भरतदण्डिवामनवाग्भटप्रभृतिभिर्गुणानां दश संख्या स्वीकृता। आनन्दवर्धनमम्मटविश्वनाथहेमचन्द्रजगन्नाथादिभिस्त्रयो गुणाः स्वीकृताः।

कुन्तकेन मार्गत्रयान्तर्गत, माधुर्य, प्रसाद, लावण्य, आभिजात्याख्यश्चेति-चत्वारो गुणा अंगीकृता औचित्यसौभाग्यनामानौ द्वौ गुणौ स्वीकृतौ।

भोजराजेन गुणसंख्या बाह्याभ्यन्तरवैशेषिकभेदेन 24 + 24 + 24 = 72, 72 + 48 = 120 पर्यन्तम् प्रापिता।

केशवमिश्रेण भोजदेवस्य चतुर्विंशतिगुणानां पञ्चशब्दगुणेषु पंचार्थगुणेष्वन्येषां पंचदशगुणानामन्तर्भावो विहितः। एवं विविधविधागुणविषयिणी धारणाऽवलोक्यते। तत्रापि सर्वप्रथमं प्रामाणिकरूपेण गुणनिरूपणस्याधारो भरतमुनिकृतनाटय-शास्त्रमेव विद्यते। एतत् सर्वं गुणविवेचनाऽध्याये प्रतिपदं स्फुटीकृतम्, भरतात् प्रागपि गुणनिरूपणमवर्तत तन्निरूपणं चतुर्थेऽध्याये विद्यते।

तन्त्रशास्त्राऽनुसारं माधुर्यादिगुणव्यञ्जकवर्णानामाधारः—

साहित्यशास्त्रे माधुर्यादिगुणानां मम्मटादिभिराचार्यैर्यद् वर्णव्यञ्जकत्वं प्रतिपादितं वर्तते। कथं न तैः सर्वेषां वर्णानां माधुर्यादिगुणेषु व्यञ्जकत्वं प्रतिपादितं, वर्णानां विभागे किमपि रहस्यं वर्तते, यदर्थं गुणस्य व्यञ्जका वर्णाः पृथग् रूपेण निर्धारिताः सन्ति, ओजोगुणस्य वर्णाः पृथग्रूपेण सन्ति, अतोऽधुना माधुर्यगुणस्य व्यञ्जकवर्णान् अभिधाय तेषां वर्णानामेव माधुर्यव्यञ्जकत्वे हेतुः प्रदर्श्यते।

तन्त्रशास्त्रस्य महिमा तन्त्रेषु प्राचीनकालतः दृश्यते। ये स्वरव्यञ्जनादयो वर्णाः सन्ति ते तन्त्रेषु मातृका इति नाम्ना व्यवह्रियन्ते, स्वराः, कवर्गचवर्गटवर्ग, तवर्गपवर्गयवर्गशवर्गाः एता अष्ट मातृकाः सन्ति, यासां देवताऽपि तन्त्र शास्त्रानुसारं पृथक्-पृथग् रूपेण विभक्ताः सन्ति। तेषां देवतानां स्वरूपमपि प्रदर्श्यमानक्रमाऽनुसारं विद्यते, स्वराणां कवर्गादीनां च स्वरूपवर्णदेवतादि-निर्धारणेन विना माधुर्यादिगुणानां वर्णव्यञ्जकत्वे हेतुप्रदर्शनमशक्यम्, अतोऽत्र सर्वप्रथमं कस्य कस्य गुणस्य के के वर्णा व्यञ्जकास्सन्ति तेषां वर्णानां स्वरूपम् कीदृशम्, तेषां मातृकापदवाच्यानां वर्णानां का का देवतास्सन्ति तेषां देवतानां किं किं स्वरूपम्, को वर्णः का दिशा इति प्रदर्शनमन्तरा वर्णव्यञ्जकत्वे हेतु प्रतिपादनं न युक्तियुक्तम्, यतोहि अज्ञातस्य ज्ञानं न भवति अतोऽत्र क्रमेण छन्दः शास्त्रतन्त्रशास्त्रमधिकृत्य गुणव्यञ्जकवर्णानां कारणं संक्षेपेण वक्ष्यते।

छन्दःशास्त्रोक्तवर्णानां शुभाशुभत्वम्–

छन्दःशास्त्रे वर्णानां शुभाशुभत्वं निरूपितं विद्यते। मगणादिगणानां स्वरूपदेवताफलनिरूपणप्रसंगे निर्दिष्टं यत् काव्यनायकस्य तत्कर्तुः पठितुर्वा मगणादिगुणानां फलं सुविचार्य अवगन्तव्यम्। गुणशुद्धिप्रतिपादनपूर्वकं वर्णशुद्धिरपि निरूपिता वर्तते। वर्णशुद्धौ नायकादयः सुखमनुभवन्ति। च, ङ्, झ, ज, ट, ठ, ड, ढ, ण, प, फ, व, भ, ग र, ल, घ, ष, ह, ल अक्षराणि तथा संयुक्ताक्षराणि विहाय अन्यान्यक्षराणि शुभफलप्रदानि भवन्ति।[1] इदमेव कारणं वर्तते यट् टकाराद्या वर्गाः ओजोगुणसमन्वितायां रचनायां वैशिष्ट्येन स्वीकृताः।

दुःखदारिद्रयवाचकानां शब्दानां प्रयोगस्य निषेधो भामहस्य काव्यालंकारेऽपि द्रुष्टुं पार्यते। अस्मादवगम्यते यन्मनीषिभिः साहित्यशास्त्रे माधुर्यौजो गुणव्यञ्जका वर्णाः पृथक्त्वेन प्रतिपादिताः।

माधुर्यगुणव्यञ्जकवर्णाः–

माधुर्यगुणस्य व्यञ्जकवर्णाऽभिधानसमये वाग्देवताऽवतारमम्मटेन काव्यप्रकाशे कथितं वर्तते यन्मूर्ध्नि वर्गान्त्यगाः क, च, ट, त, प, रूपाः एवं च अन्त्यगाः ङ, ञ, ण्, न, म, रूपाः, एवंच स्पर्शवर्णाः (कादयो मावसानाः स्पर्शाः)[2] अर्थात् क वर्गतः म पर्यन्तं ये वर्णाः सन्ति ते स्पर्शसंज्ञाका भवन्ति। ते स्पर्शवर्णा अपि माधुर्यगुणे व्यंजकतामियन्ति। यथा अङ्ग, सङ्ग, गुञ्ज, कुञ्ज, इत्यादिरूपेण टवर्गाक्षराणि विहाय, ह्स्वरकारणकारसंयुक्ताक्षराणि समासेन मध्यमसमासेन युक्ता रचना माधुर्यगुणव्यञ्जकेषु वर्णेषु कारणत्वेन वर्तन्ते।[3]

---

1. अवर्णात्सम्पत्तिर्भवति मुदितवर्णाद्धनशता।
   न्युवर्णादाख्यातिः सरभसमृवर्गोद्धनशता।
   तथा ह्येच सौख्यं, ङ न, ण रहितादक्षरगणात्।
   पदादौ विन्यासात् भ, र, व, ह, ल, हा, हा विरहितात्।
   कः खो गो घश्च लक्ष्मीं वितरति, वियशा ङ स्तथा चःसुखं छः।
   प्रीतिं यो मित्रलाभं मयमरणकरो झञौ, टठौ खेद दुःखे।
   डः शोभां ढो विशोभां भ्रमणमथ चणहतः सुखं यश्च युद्धं।
   दोधः सौख्यं मुदं नः सुखमयमरणक्लेशदुःखापवर्गः।।
   वृत्तरत्नाकर-भट्टीव्याख्यासहितः। 1/6-7.
2. लघुसिद्धान्तकौमुदी संज्ञाप्रकरणम्।
3. मूर्ध्निवर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।
   अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।। का०प्र० 8/74.

अनेनैव प्रकारेण विश्वनाथेनाऽपि साहित्यदर्पणे माधुर्यगुणव्यंजका वर्णाः प्रतिपादिताः तत्र अवृत्ति, अल्पवृत्तिर्वा इतिलिखितं वर्तते, अर्थात् समासाऽभावः, अल्पसमासः, द्वित्रिचतुःपदैर्युक्तः स्यात्, काव्यप्रकाशकारेण अवृत्तिर्मध्यवृत्तिर्वा इति लिखितं वर्तते। साहित्यदर्पणे मध्य इत्यस्य स्थाने अल्प इति शब्दः प्रयुक्तो वर्तते।[1]

माधुर्यगुणव्यञ्जकवर्णानामाधारः—

माधुर्यगुणे ये व्यंजकवर्णाः सन्ति तेषां वर्णानां "स्वच्छन्दोद्योत", "वामकेश्वरीमतम्" तथा योगीनीहृदयाऽनुसारं अधिष्ठात्रीदेवताः क्रमेण एवं प्रकारेण वर्तन्ते।[2]

कवर्गस्य—	ब्राह्मी	कामेश्वरी	माहेश्वरी	आग्नेयम्
चवर्गस्य—	माहेश्वरी	मोदिनी	ऐन्द्री	ईशानम्
टवर्गस्य—	कौमारी	विमला	कौमारी	उत्तरम्
तवर्गस्य—	वैष्णवी	अरुणा	वैष्णवी	दक्षिणा
पवर्गस्य—	वाराही	जयिनी	वाराही	पश्चिमा[3]

अत्र कवर्गस्य अधिष्ठात्र्या देवतायाः कमलपत्रसदृशा कान्तिः दिव्याभरणैर्युक्तं ब्राह्मी स्वरूपं वर्तते, एतदर्थं पद्मसदृशकान्तित्वाद् दिव्यालंकारैरलंकृतत्वात् कवर्गवर्णा माधुर्यगुणव्यञ्जकतायां समुपन्यस्ताः। शंखगोदुग्धवन्महत्तेजो युक्तायाः कवर्गस्य अधिष्ठात्रीदेवताया माहेश्वर्याः स्वरूपं विद्यते इति हेतोः चवर्गा माधुर्यगुणस्य व्यंजकत्वेन कथिताः।

टवर्गाक्षरेषु माधुर्यगुणे णकारस्य ग्रहणं भवति, अन्येषां चतुर्णां वर्णानां

---

1. मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।
   अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।। का०प्र० 8/74.
2. स०द० 6/3.
3. स्वच्छन्दोद्योत, प्रथमपटले
   वामकेश्वरीमतम्, प्रथमपटले
   योगिनीहृदयम् द्वितीयपटले
   द्रष्टव्य—मन्त्र और मातृकाओं का रहस्य पृ० 100 तः 106 पर्यन्तम्।

निषेधोस्ति अकोमलत्वात्, ण-इत्यस्य वर्णस्य अधिष्ठात्रीदेवता कौमारी वर्तते पद्मगर्भसदृशकान्तित्वात्, हारकेयूरभूषितत्वान्माधुर्यगुणव्यञ्कवर्णेषु णकारस्य-प्रयोगः कृतः।

हारकुण्डलमण्डिता, स्निग्धनीलकमलसदृशकान्तियुक्ता तवर्गस्याऽधिष्ठात्री देवता वैष्णवी राजते, वैष्णव्याः सौम्यदर्शनस्याकृतिः, अत्यन्ता रुचिकरा भवति, अत एव तवर्गवर्णा माधुर्यगुणस्य व्यञ्जकाः सन्ति।

नीलजलदवत् कान्तियुक्ता, सर्वाऽभरणभूषिता पवर्गस्याधिष्ठात्री देवता वाराही वर्तते, वाराही पश्चिमस्यां दिशि निवसति, अस्यामेव दिशि दशदिक्पालेषु जलस्याधिष्ठात्री देवता वरुणो निवसति। जलेऽपि माधुर्यं भवति। अत एव तवर्ग वर्णाः माधुर्यगुणस्य व्यञ्जकास्सन्ति।

यवर्गेषु रकार आगच्छति, हारकुण्डलमण्डिता शंखकुन्देन्दुधवला यवर्ग-स्याऽधिष्ठात्री देवता ऐन्द्री वर्तते। ऐन्द्रीदेवताया पूर्वदिशा वर्तते। पूर्वदिक् पतिः इन्द्रो वर्तते। असौ यथा वृष्टिवर्षणेन लोकान् प्रीणाति, तथैव रकारोऽपि स्वभावतो माधुर्यगुणव्यञ्जको भवति। एवं प्रकारेण कवर्गादारभ्य शकारपर्यन्त्तं सप्तमातृकाः सन्ति, यासां पूजनं वेदसमयादारभ्य भवति। अधुनाऽपि आसां सप्तमातृकाणां मांगलिकहोमादिकृत्येषु अर्चनं भवति। आभ्यो मातृभ्यः समग्रं जगत् (शास्त्रमयं जगत्) व्याप्तं वर्तते। एतदुक्तमातृकाणां माधुर्यगुणे कारणत्वं स्वच्छन्दोद्योतस्य दशमपटलाऽनुसारं प्रतिपादितम्।

सम्प्रति मातृकाणां किं स्वरूपम्, को वर्णः, येन माधुर्यगुणे एषां व्यंजकता स्पष्टरूपेण अवभासयेदिति। यद्यपि मातृकावर्णानां तन्त्रेष्वधिकं महत्त्वं वर्तते वर्णानां स्वरूपविविधार्थवर्ण विषये अतीव विस्तृतं विवेचनं लभ्यते। अत्र निबन्धे विषयान्तरशंकया तत्सर्वं न लिख्यते। अतोऽत्र संक्षेपेणैव मातृकावर्णानां स्वरूप-वर्णविषये प्रतिपाद्यमाधुर्यव्यञ्जकर्णाः तन्त्राऽनुसारं प्रदर्श्यन्ते।

कदम्बकोरकाकारो रत्नांगदकेयूरकंकनैः शोभितः पुष्पहारैरलंकृतो जपापुष्प सिन्दूरसदृशाभायुक्तो वर्तते। इदमेवकारणं यत् एतावद् भूषणैरलंकृतः वकारो माधुर्यगुणस्य व्यजकः। यथा देवेषु सर्वप्रथमं ब्रह्मणो नाम उच्चार्यते तथैव व्यंञ्जनवर्णेषु वकारः सर्वप्रथमं–ब्रह्मणः प्रातिनिध्यं करोति।[1] यथा बृहद्वाचस्पत्ये एकैव कवर्णस्य अनेकार्थाः सन्ति, अन्येषां वर्णानां

---

1. कामधेनुतन्त्रे–चतुर्थ पञ्चम पटले।

अर्थप्रतिपादनं न्त्वत्र दुष्करमेव।[1] प्रायेण कवर्गादारभ्य क्षकारपर्यन्तं सर्वे वर्णाः कुण्डलीत्रयसंयुक्ताः, बिन्दुत्रयगुणत्रयसंयुक्ताः, शक्तित्रयविशिष्टाः सामान्यतः सर्वशक्त्यात्मकाश्च सन्ति, एवं च पंचदेवमयाः, पञ्चप्राणात्मका वर्तन्ते समयाऽनुसारं शुभाऽशुभ फलप्रदायकाः एते वर्णाः भवन्ति।

खकारः	शंखकुन्दसदृशः	गकारः	अरुणादित्यसदृशः
धकारः	तरुणादित्यसदृशः	ङ्कारः	सर्वदेवमयः
चकारः	रक्तविद्युतसदृशः	छकारः	पीतविद्युतसदृशः
जकारः	शरच्चन्द्रसदृशः	झकारः	रक्तविद्युतसदृशः
ञकारः	रक्तविद्युतलतातुल्यः	णकारः	पीतविद्युल्लताकारः
तकारः	पीतविद्युतसदृशः कान्तियुक्त	थकारः	तरुणादित्यसदृशकान्तियुक्तः
दकारः	रक्तविद्युल्लताकारः	धकारः	पीतविद्युत्सदृशः
नकारः	रक्तविद्युत्कान्तियुक्तः	पकारः	शरच्चन्द्रतुल्यकान्तियुक्तः
फकारः	रक्तविद्युतसदृशः	वकारः	शरच्चन्द्रोपमः
भकारः	त्रिशक्तियुक्तः	मकारः	तरुणादित्यसदृशः
रकारः	रक्तविद्युत्सदृशः		

---

1. कः क्रोधीशो महाकाली कामदेवः प्रकाशकः।
कपाली तेजसः कान्तिर्वासुदेवो जयानलः।।
चक्री प्रजापतिः सृष्टिर्दक्षस्कन्धो विशाम्पतिः। अनन्तः पार्थिवो बिन्दुस्तपिनो परमात्मकाः। वर्गाद्यश्च मुखी ब्रह्मा वर्णाथोऽम्भः शिवाजलम्। माहेश्वरी तुला पुष्यं मंगलाश्चरणाकरः। नित्या कामेश्वरी मुख्या कामरूपो गजेन्द्रकः। श्रीपुररमणो रंगः कुसुमापरमार्थकः। कै शब्दे, कच् दीप्तौ, ब्रह्मणि, विष्णौ कामदेवे, अग्नौ, वायौ, यमे, सूर्ये, आत्मनि, दक्षे, प्रजापतौ, राजनि कामग्रन्थै, मयूरे, इति तु मेदिनी कोशे स्पष्टं वर्तते। विहगे शब्दचित्रे चित्ते, देहे, काले, धनेमेधे, शब्दे, अनेकार्थबोधे प्रकाशे च इतितु कशब्दवाचका अर्था एकाक्षरकोशे प्रतिपादितास्सन्ति कः प्रजापतिः यस्मात् पितामहो भूतः प्रभुरेकः प्रजापतिः ब्रह्मासुरगुरुस्थानुर्मनुः कः परमेष्ठयः। वाचस्पत्यम् तृतीयो भागः पृ० 1601 तः 1602 पर्यन्तम्।

एवं प्रकारेण माधुर्यगुणव्यंजकवर्णानां शुक्लादयो वर्णाः (रागाः) सन्ति,[1] उपर्युक्तानां सर्वेषां कवर्गादीनां शुक्लादयो वर्णाः, पीतरक्तशरच्चन्द्रसदृशाः सन्ति, लोकेऽपि एते वर्णाः सर्वेषामनुजानां चेतांसि हरन्ति, माधुर्यगुणयुक्ता रचनाऽपि सर्वेषां हृदयं मुष्णाति एतदर्थम् एते वर्णो माधुर्यगुणस्य व्यंजकाः सन्ति। "मातृका-विवेके" सौभाग्यभास्करे तु मातृकाणां वर्णा भिन्नप्रकारेणैव कथिताः। वास्तविकरूपेण सर्वे वर्णाः त्रिशक्तिरूपाः सन्ति। सर्वस्य वर्णस्य शक्तयः घोर, घोरतर, अघोर-रूपेण त्रिधा विभाजिताः सन्ति।

यदा कामक्रोधादीनां विस्तारं कुर्वन्त्यः शक्तयः भोगापवर्गात्मकमिश्रित-कर्मफलेषु मनुष्यः आसक्तो भवति, तदा आसांशक्तीनां घोरलक्षणं भवति। अस्यां दशायां ओजोगुणाऽनुसारिणी रचना जायते, उद्धतरचनायां प्रायः कामक्रोधादीनामेव विस्तारो भवति येनेयं रचना ओजोगुणाऽनुसारिणी वीर, वीभत्स, रौद्ररसेषु वर्तते, इमाः शक्तयो विषयासक्तचित्तानि मनुष्यान् नीचातिनीचकार्ये यथा पातयन्ति तदा एता अधोरतरा उच्यन्ते, अस्यामवस्थायामपि रचनायामोजोगुणस्येव साम्राज्यं वरीवर्ति। सर्वज्ञतादशायां यदाशक्तयः शिवताप्रदायिन्यो भवन्ति, तदा इमा अघोरशब्देनोच्यन्ते। अस्यां दशायां रचना माधुर्यगुणयुक्ता प्रसादगुणयुक्ता च भवति यतोहि माधुर्यप्रसादगुणौ पाठकानां श्रोतृणां कृते अत्यन्तंरूचिकरौ भवतः अत्यन्तानन्दसौख्यरूपिशिवतामयत्वात्[1]। शिवसूत्रवार्तिके तु ज्ञानस्य परापरभेदेन द्वैविध्यं प्रतिपादितं वर्तते।[2] आचार्यक्षेमराजेण पर, परापर, अपर, भेदेन ज्ञानं त्रिविधं कथितं, यज्ज्ञानं क्रमेण अघोर (पर)[3] घोर (परापर) घोरतर (पर) नाम्ना कथ्यते। अनेन एतज् ज्ञायते यत् सर्ववर्णाः स्वशक्तीनां प्रभावात् सर्वत्र रचनायां प्रयोजयितुं योग्याः सन्ति, परं वर्ण, देवता, स्वरूपादिभेदेन सर्वत्र एषां प्रयोगो न जायते।

---

1. कामधेनुतन्त्रम् चतुर्थपञ्चमषष्ठपटलानि। द्रष्टव्य मन्त्रमातृकाओं का रहस्य पृ० 114-125.
1. शिवसूत्रवार्तिक, तृतीप्रकाश सूत्र 19.
2. ज्ञानस्यैव द्विरूपस्य परापरविभेदतः। तत्रैव० 1/4.
3. स्पन्द सन्दोह पृ० 21 द्रष्टव्य–मन्त्रमात्रिकाओं का रहस्य पृ० 103-104.

ओजोगुणव्यंजकवर्णाः–

आचार्यमम्मटेन विश्वनाथेन च काव्यप्रकाशे तथा साहित्यदर्पणे ओजोगुण-व्यञ्जकाः वर्णा एवं प्रकारेण कथिताः।[1]

वर्गाणां प्रथमतृतीयाक्षराणां यत्र प्रयोगः स्यात् वर्गाणां प्रथमतृतीयौ अन्त्यौ–द्वितीय–चतुर्थौ यत्र परस्परं सम्पृक्तौ स्याताम् एवं च रकारस्य केनाप्यक्षरेण सह उपर्यधः कुत्रचिदपि, वर्ष, अद्रि, द्रुम, वक्त्र, वज्रादिरूपेण प्रयोगः स्यात्, तुल्यवर्णयोः तकार, चकार, जकार, तकारादीनां, वित्त, चित्त, उच्च, जगज्जात, उद्दाम इत्यादिरूपेण यत्र प्रयोगः स्यात् ट, ठ, ड ढ वर्णौ एवं श, ष, वर्णैयुक्ता दीर्घसमासैश्च यत्र उद्धता रचना भवति, तत्र ओजोगुणो दीप्यते, अथवा उक्तप्रकारेण ओजोगुणयुक्तां रचनां कविः कुर्यात्। समुदीरिता वर्णा ओजगुणस्य व्यञ्जका सन्ति। अस्य गुणस्य, क्रमेण वीरवीभत्सरौद्ररसेषु आधिक्यंभवति। अस्मिन् चित्तस्य विस्त्तारोभवति अर्थात् वीरादिरसेषु चित्तविस्तारस्य हेतुभूता दीप्तिः-ओज इति नाम्ना कथ्यते। चित्तस्य विस्ताररूपदीप्तत्वजनकत्वम्-ओजस्त्वम्।

ओजोगुणव्यञ्जकवर्णानामाधारः–

ओजोगुणस्य व्यंजकवर्णानां अधिष्ठातृदेवताः "स्वच्छन्दोद्योत", "वामकेश्वरी-मतम्" एवं योगिनीहृदयाऽनुसारम्–एवंप्रकारेण सन्ति।

				स्वच्छन्दो०	**वामके०**	**योगिनीहृ०**
णकारं	विहाय	टवर्गाः		**कौमारी**	**विमला**	**कौमारी**
प्र०	तृ०	द्वि०	च०			
क	ग	ख	घ	ब्राह्मी	कामेश्वरी	माहेश्वरी
च	ज	छ	झ	माहेश्वरी	मोदिनी	ऐन्द्री
त	द	थ	ध	वैष्णवी	अरुणा	वैष्णवी
प	ब	फ	भ	वाराही	जयिनी	वाराही
		र		ऐन्द्री	सर्वेश्वरी	चामुण्डा
		श	ष	चामुण्डा	कौलिनी	महालक्ष्मी

1. योग आद्यस्तृतीयायामन्त्ययोः रेणतुल्ययोः। टादि शषौ वृत्तिदैर्ध्यं गुम्फ उद्धत ओजसि। क०प्र० 8/75.
वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
उपर्यधो द्वयोर्वा सरेफौ टठडढैः सह शकारश्च खकारश्च तस्य व्यञ्जकतां गताः। तथा समासबहुलो घटनौद्धत्यशालिनी। सा०द० 8/5-6.

योगिनीहृदयदीपिकाऽनुसारं माहेश्वर्यादीनां स्वरूपं प्रदर्शयन् शारदातिलकतन्त्रस्य पदार्थादर्शटीकाऽनुसारं ओजोव्यञ्जकवर्णानां स्वरूपप्रदर्शनपुरस्सरं तथा शुक्लादिवर्णत्वकथनपूर्वकं ओजोगुणव्यंजकतायामधार उच्यते।

णकारं विहाय ट, ठ, ड, ढ वर्णानां अधिष्ठात्रीदेवता पीतवर्णयुक्ता शक्तितोमरधारिणी वरदाभयहस्ता कौमारी वर्तते।

द्विवाहुयुक्तः क्रौञ्चवाहनो महाध्वनियुक्तष्टकारो वर्तते, अस्य अधिष्ठाता देवोऽपि शक्तितोमरधारी वर्तते। अत ओजगुणव्यंजने टकारस्य प्रयोगः समुचितमेव। ओजोगुणेऽपि महाध्वनयो भवन्ति, ओजोगुणयुक्तरचनायां वक्ताऽपि तोमरादिशक्तिभिरलंकृतो दृश्यते।

धरापद्मगजेन्द्रस्थितो द्विभुजो विषनाशो लक्ष्ययोजनशरीरपरिमितः उज्ज्वलवर्णयुक्तः ठकारो विद्यते, विषनाशनादिविशेषणत्वात् ठकारस्याऽपि ओजोगुणस्य व्यंजकता समुचितेव।

अष्टबाहुयुक्तश्चतुर्मुखः श्वेतकमलासनः सहस्रयोजनविस्तीर्णोऽलंकृतशरीरो डकारो वर्तते। अष्टबाह्वादिविशेषणैर्विशिष्टत्वाद डकारः ओजगुणव्यंजकत्वे कारणतां गतः।

अग्निबिम्बस्थोऽजवाहनो दशबाहुयुक्तो ज्लकत्कान्तियुक्तो ढकारः- ओजोगुण व्यञ्जकतायां परमावश्यकः।

क, ग, ख, घ वर्णानां त्रिनेत्रा, श्वेतवर्णा, शूलधारिणी, कपालमृगपरशुं दधाना माहेश्वरी अधिष्ठात्री देवता वर्तते।

गजवाहनः, शुक्लवज्रकरः सहस्रद्वययोजनपरिमितो भूबिम्बगतनवकुंकुमवर्णः तकारो वर्तते। गजवाहनत्वात्, शुक्लवज्रकरत्वात् उक्तविशेषणैर्विशिष्टा माहेश्वरी देवतात्वात्तकार ओजोगुणव्यंजकः।

पाशांकुशधारणशीलस्य, सर्पवाहनस्य, सर्पभूषणस्य, शतयोजनपरिमितशरीरस्य गकारस्य, हस्ते पाशतोमरयुक्तस्य, मेषवाहनस्य कृष्णवर्णस्य भीषणस्य सहस्रयोजनदीर्घशरीरस्य खकारस्य।

उष्ट्रवाहनस्य, गदावज्रधारणशीलस्य द्विमुखस्य सहस्रयोजनपरिमितशरीरस्य कृष्णवर्णस्य घकारस्य ओजोगुणप्रतिपादने वर्णव्यञ्जकता युक्ता।

च, ज, छ, झ वर्णानां देवता श्यामवर्णा, वज्रोत्पलधारिणी ऐन्द्री वर्तते।

चकारः—युगाग्रपद्मसंस्थितः चतुर्वाहुः कपर्दिकैर्विभूषितः सुगन्धाढ्यः, कोटियोजनविस्तीर्णः श्वेतवर्णयुक्तो विद्यते।

जकारः—श्वेतवर्णश्चतुर्बाहुकौटियोजनमितः।

छकारः—कोटियोजनविस्तीर्णः पद्मस्थितः चतुर्वाहुयुक्तः।

झकारो—ऐन्द्री चतुर्बाहुः, कौटियोजनमितः श्वेतवर्णः। ऐन्द्रीदेवतायाः श्यामवर्णत्वात् वज्रोत्पलधार्यमाणत्वात्—ओजोगुणव्यंजकः वर्तते। त, द, थ, ध एषां वर्णानां दिव्यभूषणभूषिता श्यामवर्णा, हस्तेपद्मं विभ्राणा, शंखचक्रं दधाना वरदा, अभयदा, वैष्णवीवर्तते। गन्धाढ्यः सहस्त्रयोजनविस्तीर्णः, कुंकुमवर्णसदृशः तकारो द्विभुजः, षण्मुखः, कोटियोजनमितो महिषवाहनो दकारः, वृषारूढो, भयंकरः अष्टबाहुः चतुर्मुखः पीतवर्णः थकारः, सिंहवाहनः, चतुर्बाहुः, चतुर्लक्षयोजनपरिमितो धकारः एते चत्वारो वर्णा भयंकरत्वादिविशेषणै-र्विशिष्टत्वाद् ओजोगुणव्यंजका भवन्तीति।

प, व, फ, भ, एषां ओजोगुणव्यंजकवर्णानां श्यामलकान्तियुक्ता, वज्र, चक्र, हल, मुशल, खड्गखेटकधारिणी अधिष्ठात्री देवता वाराही वर्तते। विंशतिवाहुः, दशमुखा कोटिमाना वकवाहनत्वात् पकारः, द्विबाहुयुक्तः षण्मुखः, दशकोटियोजनमितः, नीलोत्पलस्थो हंसवाहनः पुष्टिप्रदोऽरूणवर्णयुक्तो वकारः।

द्विबाहुयुक्तः, चंचलः सिंहस्थः, दशकोटियोजनमितः श्वेतवर्णः पकारः, धूम्रवर्णः त्रिहस्तः, त्रिमुखो व्याघ्रवाहनो भीषणाकृतिर्महाबली, दशलक्षयोजनविस्तीर्णो धूम्रवर्णो भकार एतेवर्णाः स्वाधिष्ठात्र्या देवताया वैष्णव्याः सार्धमोजोगुणस्य-व्यंजकतां गताः।

रकारस्य अधिष्ठात्री देवता चामुंडा वर्तते, या कृष्णवर्णा, दक्षिणकरे शूलं, डमरूं, खड्गं, वेतालकं च धारयति, वामकरे, नागं, खेटकं, कपालं, घण्टां च धारयति।

त्रिकोणाम्बुजयुक्तः रकारः मेषवाहनः चतुर्बाहुर्वर्तते। अयमपि ओजगुण व्यंजको वर्तते, स्वाधिष्ठात्र्या देवतायाः चामुंडायाः स्वरूपत्वात्। (रकारोऽग्ने-बीजं वर्तते)।

श, ष अनयोर्द्वयोर्वर्णयोर्मातुलुंगफलधारणकर्त्री महालक्ष्मी अधिष्ठात्री विद्यते। हेमवर्णयुक्ता, कमलासनसंस्थिता, द्विभुजयुक्ता शकारः कृष्णवर्णयुक्तः सहस्त्रयोजनमितः द्विभुजयुक्तः षकारः ओजोगुणव्यञ्जकः प्रतिपादितः[1] वर्णानां विषये, मेदिनीकोशे एकाक्षरकोशे वाचस्पत्ये च, शब्दकल्पद्रुमादिग्रन्थेष्वपि भिन्न-भिन्नप्रकारेण बहुविधं प्रतिपादितं वर्तते परं प्रकृतनिबन्ध स्याऽनुपयोगाच्च

---

1. योगिनीहृदयम् द्वितीयपटले। शारदा तिलकतन्त्रपदार्थदर्शाटीका पृ० 60-61. द्रष्टव्यंमन्त्रमातृकाओं का रहस्य, पृ० 126, तः पर्यन्तम्।

तेषां विस्तृतविवेचनं न युक्तम्, अतोऽत्र संक्षेपेण, माधुर्यौजोगुणव्यञ्जकवर्णानां-माधारो यथामतिः प्रतिपादितः।

प्रसादगुणव्यञ्जकवर्णाः पृथग् रूपेण आचार्यमम्मटेन विश्वनाथेन च न प्रतिपादिताः। प्रसादगुणवर्णनाऽवसरे विश्वनाथेन साहित्यदर्पणे कथितं यत् येन शब्देन श्रवणसमनन्तरमेव, अथवा समासेन रचनाया वा झटित्यर्थाऽवगतिः स्यात्, एवं विधाः शब्दाः समासाः रचनाश्च प्रसादगुणस्य व्यञ्जकाः सन्ति।[1] आचार्यमम्मटेनाऽपि कथितं सर्वेषां रसानां, सर्वासां रचनानां च साधारणधर्मः प्रसादगुणो भवति, रचनायामल्पसमासे, समासाभावे च सुकुमारकोमलशब्दानां व्यंग्यत्वे प्रसादाख्यो गुणो जायते। (श्रुतिमाधुर्ये अकोमलशब्दव्यंग्यत्वेऽपि माधुर्य गुणो) लक्ष्यते। "उद्धतरचनायां" विकटार्थव्यंग्यत्वे शब्दे–ओजो गुणो राजते एतदेवैषां गुणानामन्तरम्।[2]

गुणानां समन्वयात्मकविमर्शः—

गुणविवेचनादृज्ञायते यद् भरतदण्डिप्रभृतिभिराचार्यैर्दशगुणाः स्वीकृताः तेषां शब्दार्थगतत्वं स्पष्टतो न प्रतिपादितं, तथापि गुणलक्षणेभ्यः अनयोः शब्दार्थगता-भावना दृष्टिपथमवतरति। वामनेन स्फुटतया गुणानां शब्दार्थयोर्वर्गद्वये निरूपणं विहितम्। वामनमन्तरा दशगुणनिरूपकाणामाचार्याणां सादृश्यमासीत्, गुणविवेचनेन स्फुटतयाऽवगम्यते यद्गुणविषये आचार्याणां मतमतान्तराणि सन्ति। आनन्दवर्धनप्रभृतिभिराचार्यैर्माधुर्योजःप्रसादाख्यानां त्रयाणां गुणानां काव्यात्मना रसेन सह समवायसम्बन्धः स्वीकृतः। चित्तस्यद्रुतिर्दीप्तिर्विकासभेदेन त्रयो गुणाः स्वीकृताः, मम्मटेन वामनस्य सप्तशब्दार्थगुणानामन्तर्भावः त्रिषु गुणेषु विहितः। एषु केचिद् गुणाः पूर्वप्रतिपादितरीत्या दोषाभावरूपाः प्रतिपादिताः, केचित् स्वभावोक्तिरसध्वनिगुणीभूतव्यंग्ये च अन्तर्भाविताः। प्राचीनोक्तेषु दशगुणेषु त्रयोगुणा रसधर्माः प्रतिपादिताः, अन्ये सप्तगुणा न्यक्कृताः, मम्मटेन स्वमते त्रयाणां गुणानां साक्षाच्छब्दार्थधर्मत्वमस्वीकृत्योपचारेण, शब्दार्थधर्मत्वमंगीकृतम्।

1. शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः। स०द० 8/8
   साधारणः समग्राणां स प्रसादो गुणो मतः।। का०प्र० 8/76.
2. द्रष्टव्य–वाचस्पत्यम्, बृहत्संस्कृताभिधानम्।
   तृतीयो भागः—पृ० 1601 तः 1602 पर्यन्तम्।
   चतुर्थो भागः—पृ० 2778 तः 3403 पर्यन्तम्।
   पंचमो भागः—
   षष्ठोभगः पृ० 4549 तः 5173-74 पर्यन्तम्।

वस्तुतो भामहादारभ्य एव आचार्या वर्गद्वये विभक्ता आसन् यैर्पृथक् पृथक् प्रकारेण गुणानां प्रतिपादनं कृतम्।

भरतात् प्रागपि संस्कृतसाहित्यशास्त्रे, महाभारत, पुराणे कौटिल्यीय-अर्थशास्त्रे, रूद्रदाम्नःशिलालेखे गुणनिरूपणं स्फुटरूपेण दृष्टिपथमवतरति। वेद ब्राह्मणारण्यकोपनिषदादिग्रन्थेषु माधुर्यादिगुणानां नामानिलभ्यन्ते, तेषामनुसारिणीरचनाऽपि दृग्गोचरी भवति। एतदपि संलक्ष्यते यदधिकैराचार्यैर्गुणत्रयादधिका गुणाः स्वीकृताः। गुणत्रयनिरूपकाणां संख्या दशगुणवादिभ्योऽधिका न विद्यते। परं गुणत्रयनिरूपकैः, काव्यत्मना रसेनसह गुणानां सम्बन्धस्थापनात् अधिकाकीर्तिरर्जिता। अद्याऽपि रसधर्माणां त्रयाणांगुणानां महत्वं स्वीक्रियते एतदर्थं ध्वनिवादिनो आनन्दवर्धनमम्मटादयो प्रशंसनीयाः सन्ति। परमेभिर्यः प्राचीनानां गुणानां साक्षाच्छब्दार्थगतत्वेन गुणत्वं न स्वीकृतम्, तन्नक्षोदक्षमः प्राचीनाचार्यैर्विचार्य एव दशगुणा निरूपिता आसन् तेपथिभ्रष्टानैवासन् तेषां समक्षमपि दशगुणेषु त्रयोगुणा आसन्, दोषाश्चाप्यासन् तेऽपि केषांचिद् गुणानामन्तर्भावकर्तुं प्रभवन्तिस्म, यद्यन्तर्भावो न विहितस्तदा एतन्नैव कथयितुं शक्यते यत्तेषांध्यानं गुणानामन्तर्भावं प्रतिनागतं स्यात्।

तस्मिन् समये रस आत्मतत्वरूपेण नैव स्वीकृतआसीत्। परं दोषास्तु तेषां सम्मुखे आसन् तथापि तैर्गुणानामन्तर्भावो न प्रदर्शितः। पूर्ववर्त्याचार्याणां परवर्तिभिः प्रायः काव्यविषयिणी समग्राधारणाः स्वस्वग्रन्थेषु निरूपिताः। परं ध्वनिवादिभिर्गुणविषयिणी धारणा तु स्वीकृता परं सा संख्या न समवलम्बिता।

प्राचीनाचार्या गुणस्य दोषस्य च पृथक् पृथगस्तित्वं स्वीकुर्वन्तिस्म। तेषां दृष्टौ दोषेषु गुणानामन्तर्भावप्रतिपादनं न सुसमीचीनमासीत्, यतोहि कस्यचिच्छरीरे कुब्जत्वादिदोषे सत्यपि गानस्य श्रेष्ठगुणो भवितुमर्हति, तत्र एतन्नैव प्रतिभाति यत् कुब्जत्वादिदोषस्य अभाव एव (गानस्य) गुणो भवति, अपित्वसौ गायक उक्तदोषेसत्यपि सामाजिकानां चेतांसि रञ्जयति। यदा कदा स दोषः परिचितेषु अपरिचितेषु च जुगुप्साभावमुत्पादयति, गायने अतिकृष्णवर्णानायिकाऽपि स्व अत्युत्तमगानेन जनान् आकर्षति। अतो दोषाभावेगुणकथनं समीचीनं न प्रतिभाति। दयादाक्षिण्यादिगुणाः काणत्वादिदोषे सत्यपि आत्मनि निवसन्तः शरीरधर्मा यथा उच्यन्ते तथैव गुणाअपि रसात्मनोधर्माः सन्तोऽपि शब्दार्थमयकाव्य शरीरस्यधर्माउच्यन्ते। काव्ये गुणाः सौन्दर्यं जनयन्ति, अतः कुष्ठत्वादिदोषाणामभावे गुणानां स्थितिःप्रतिपादनं गुणानां महत्वस्य तिरस्करणं वर्तते। कविः दोषाय काव्यं न करोति, स ब्रह्मस्वरूपाभ्यां शब्दार्थाभ्यां स्वभावान् सदोषान् कर्तुं न

चेष्टते अपितु कविकर्मानुकूल व्यापारेण रसमयीं रचनां विदधाति।

"गुणाश्रितत्वं दोषत्वं" एतद्दोषलक्षणं न कुत्रापि दृश्यते अपितु "रसापकर्षकाः दोषाः", "मुख्यार्थहतिर्दोषः" इत्यादि लक्षणानिदृष्टिपथमवतरन्ति। तेन दोषैः सह गुणानां सम्बन्धस्थापनं नोचितम्। एक (१) अंकस्य विपरीतायां दशायां लेखने नव (९) अंकोभवति त्रित्वसंख्यासूचिकायाः लिपेः (३) वैपरीत्येन लेखने षट् संख्यावाचक (६) अंको। भवति अतो एकैवांकस्य सत्ता स्वीकृतास्यात्, परमेवं कदापि न जायते। द्वयोअंकयोः पृथक्-पृथक् सत्ता विद्यते। तथ्यं तु एतदेव यद्—आनन्दवर्धनमम्मटादिभिश्च रसगतो गुणाः स्वीकतर्व्या आसन्, एतदर्थमेव द्रुतिदीप्तिविकासभेदेन त्रयोगुणा रसेषु विभक्ता वर्तन्ते। परवर्तिभिर्गुणानां रसधर्मत्वसाधनार्थं पूर्ववर्तीनां गुणानामन्तर्भावो प्रदर्शितः, परमत्र—आचार्यै एतदपि चीन्तनीयमासीद् यत् रसगतोगुणाः शब्दार्थगुणानां विरोधं न कुर्वन्ति।

दशगुणेषु माधुर्यौजः प्रसादानां रसधर्मत्वस्य, शब्दार्थधर्मत्वस्य च स्वीकरणेनेतरेषांसप्तगुणानां शब्दार्थगतत्वग्रहणेन, माधुर्यादयोत्रयो गुणाः शब्दार्थरसेषुत्रिषुधर्मत्वेन विद्यमाना, अन्येश्लेषादयो सप्तगुणाः केवलं शब्दार्थयोः-रमणीयोत्पदका धर्मा जायेरन्।

मम्मटगुणविवेचने पूर्वमपि प्रतिपादितं यद् भरतस्य श्लेषसमतासमाधि, उदारता इत्येतेषां गुणानां प्रथमलक्षणानि दण्डयुक्त प्रसादसमाधिलक्षणानि च यथा मम्मटेन वामनोक्तदशगुणानामन्तर्भावः प्रदर्शितः तद्वत् नान्तर्भवन्ति। भरतदण्डिनोः समाधिगुणस्य यदिचैक्यंस्वीकृतं भवेत् तदाद्वयोराचार्ययोर्मते श्लेषः, माधुर्यं, प्रसादः, समाधिरितीमे चत्वारोगुणा स्वीकर्तव्याः इति प्रथमः पक्षः भरतोक्त येषां गुणानां द्वितीयलक्षणस्यान्तर्भावोभवितुर्महति तेषामपि गुणेषु यदि गणनाकृतास्यात्तदा भरतोक्तश्लेषःसमताउदारता दण्डयुक्तप्रसादःसमाधिः माधुर्यमोज इतीमेगुणाः सप्तसंख्याकाः स्युः।

परमेतदपि न न्याय्यम्। यतोहि अन्तर्भावपक्षो न रोचते तस्माद् भरतदण्डी प्रभृतिषु प्रतिपादितेषु दशगुणेषु माधुर्यमोजः, प्रसाद इतीमे त्रयोगुणाः रसगतत्वेन शब्दार्थगतत्वेन स्वीकर्तव्याः। अन्ये श्लेषः, समता, सुकुमारता, अर्थव्यक्तिः, उदारत्वं, कान्तिः, समाधि इतीमे सप्तगुणाः शब्दार्थधर्मत्वेनाग्ङीकर्तव्याः।

येन गुणानांरसधर्मत्वंशब्दार्थ धर्मत्वंचावभासयेत् तथा गुणव्यंजकवर्णाना-मौचित्यमपि प्रतीतिपथमवतरेत्। यदि भरतदण्डिनोरनुसारं शब्द-अर्थ-शब्दार्थोभय गुणानां स्वीकृतिः स्यात्तदा अनवस्थाभविष्यति, यतोहि अनयोरपि शब्द-अर्थ-

शब्दार्थोभयगुणानां प्रतिपादने मतैक्यं न विद्यते। ये गुणा भरतस्य, शब्द-अर्थ-शब्दार्थोभयरूपास्सन्ति तद्भिन्नो दण्डी गुणा वर्तन्ते। अतो दशगुणानामेव शब्दार्थधर्मत्वं बोध्यम्, तेषुत्रयाणां माधुर्योजप्रसादानां रसधर्मत्वमपि ज्ञेयम् येन समेषां पूर्ववर्त्यापरवर्त्यानामाचार्याणां मतं माननीयं अनुकरणीयं च भवेत्।

गुणानां लक्षणोदाहरणानि—

श्लेषः प्रसादः समता समाधिः माधुर्यमोजः पदसौकुमार्यम्। अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यस्य गुणादशैते।[1] एषु गुणेषु शब्दार्थगत-रसगतमाधुर्यौजःप्रसादानां लक्षणोदाहरणानि प्रस्तूय तदनन्तरमन्येषां, श्लेष-समतासमाधिःसौकुमार्यअर्थव्यक्तिः कान्तिः उदारता, इत्येतेषां शब्दार्थगतसप्त गुणानां पृथगुदाहरणानि अलिखित्वा सौविध्यायैकैकमुदाहरणं प्रस्तूयते।

माधुर्यस्यलक्षणम्—

आल्हादकत्वंमाधुर्यं शृंगारे द्रुतिकारणम्।[2]

चित्तद्रवीभावस्यकारणं शृंगारे विद्यमानंयदाल्हादकत्वस्वरूपं तन्माधुर्यं भवति।

उदाहरणम्—

अनङ्गरङ्गप्रतिमं तदङ्गं भंगीभिरंगीकृतमानताङ्ग्याः।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि।।

अस्मिन्नुदाहरणे गकारास्तकाराश्च स्वस्ववर्गान्त्यमूर्धानः, ह्रस्वान्तरितो रेफश्चेति वर्णाः। अनंगप्रतिममित्यत्र मध्यवृत्तिः—अंगभंगीभिरंगी इत्यत्र माधुर्यवतीरचना, वर्णसमासरचना रूपं त्रयमपि विप्रलम्भशृंगारे माधुर्यगुणस्य व्यंजकत्वं व्यनक्ति।

ओजोगुणस्य लक्षणम्—

दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।[3]

दीप्तिरूपा (ज्वलद्रूपा) यश्चित्तस्यविस्तारस्तस्या हेतुः, ओजोगुणो विद्यते। अस्मिन् चित्तदीप्त्या मनोज्वलितवमिव जायते।

---

1. ना०शा० 16/96.
2. का०प्र० 8/68.
2. तत्रैव० उल्लास 8 पृ० 485.
3. का०प्र० 8/69.

उदाहरणम्—

मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा,
धौतेशांघ्रिप्रसादोपनतजयजगज्जातमिथ्या महिम्नाम्।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां,
दोष्णां चेषां किमेतत् फलमिह नगरी रक्षणे यत् प्रयासः।।[1]

अस्मिन्निदर्शने, मूर्ध्नाउत्सर्पिदर्प, इत्यत्र उपरि रेफेणयोगः, अंगघ्रि, इत्यत्राधोयोगः, उद्वृत्तकृत्तेत्यत्र तकारस्यतकारेण योगः, धौतेशपिशुनदोष्णां इत्यादौ शकार। षकारः, अस्मिन् पद्ये दीर्घसमासैर्वीररसानुगामिनी उद्धतारचना विद्यते। अतएवात्र ओजोगुणस्य साम्राज्यं वरीवर्ति। टवर्गाक्षराणामाधिक्येऽप्यस्य गुणस्य सद्भावो भवति।

प्रसादगुणस्यलक्षणम्—

शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।[2]
व्याप्नोत्यन्यत् प्रसादोऽसौसर्वत्र विहितस्थितिः।।

अग्निर्यथा शुष्कंकाष्ठं सहसा व्याप्नोति, जले यथा स्वच्छपटं झटिति प्रसरति तथैवाऽस्मिन् प्रसादगुणे रसाः सहसैव चित्तं व्याप्नुवन्ति। अस्यगुणस्य सर्वेषुरसेषु सर्वासुरचनासु च स्थितिर्जायते।

उदाहरणम्—

परिम्लानं पीनस्तनजघनसंगादुभयत—
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः,
कृशांग्याः सन्तापं वदति विसनी पत्रशयनम्।[3]

अत्र यथास्थानप्रयुक्तानां झटित्यर्थप्रत्यायकनां शब्दानां विन्यासात् प्रसादगुणो राजते। माधुर्यव्यञ्जकवर्णाः मध्यमसमासोऽनुद्धतारचना विप्रलम्भरसं परियोषयति। एषां प्रतिपादितानां माधुर्यौजप्रसादाख्यानां त्रयाणां गुणानां स्व स्व व्यंजकैर्वर्णैः शब्दगतत्वं, अर्थगतत्वं शृंगारादि रसानांधर्मत्वाद्रसगतत्वं बोध्यम्।

---

1. तत्रैव० उल्लास 8 पृ० 486.
2. तत्रैव० 8/70-72.
3. का०प्र० उल्लास 8 उदाहरण संख्या 349 पृ० 487.

शब्दार्थगुणाः–

शब्दश्लेषलक्षणम्–

ईप्सितेनार्थजातेन सम्बद्धानां परस्परम्।
श्लिष्टता या पदानां हि श्लेष इत्यभिधीयते।।[1]

ईप्सितार्थेन परस्परं सम्बद्धार्थानां श्लिष्टता।

श्लेषाभिधानोगुणः। अस्मिन्गुणे बहूनांपदानां सन्धिबन्धनादेकपद-वत्प्रतीतिर्जायते। अयमेव वामनस्य "मसृणत्वं" विद्यते।

उदाहरणम्–

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयोनामनगाधिराजः।[2] अस्मिन्नुदाहरणे अस्ति, उत्तरस्यां, दिशि पदानि पृथकत्वेनापि एकपदवत्प्रतीयन्ते येनात्र श्लेषो विराजते। अर्थश्लेषगुणः– विचारेणगम्भीरः स्वभावेन स्फुटः एवं अनयासेनसौन्दर्य-समन्वितो भवति।[3] यथा–

"दृष्टवैकासनसंस्थिते प्रियतमे" इत्यादि पद्ये एकस्यानायिकाया श्चक्षुनिमीलनं, अपरायाः मुखचुम्बनं वक्रक्रमो विद्यते तथाप्येषक्रमः सर्वस्य हृदये स्थानं विभर्ति।[4]

समता–

नातिचूर्णपदैर्युक्ता न च व्यर्थाभिधायिभिः।
दुर्बोधनैश्च न कृता समत्वात् समता मता।।[5]

अस्मिन्गुणे अधिकाः समासा न भवन्ति निष्प्रयोजनार्थ प्रतिपादिकानां शब्दानामभावो जायते, एवं दुर्बोधनीयशब्दानामभावात् समतागुणस्य सद्भावो वरीवर्ति। अयमेव गुणो दण्डिना मृदुबन्ध "स्फुटबन्ध", मिश्रबन्ध भेदेन त्रिविधो विभक्तः।[6]

---

1. ना०शा०अभि०भा० 16/97.
2. तत्रैव० 16 पृ० 1320.
3. ना०शा०अभि०भा० 16/98.
4. तत्रैव० 16/1319.
5. ना०शा० 16/100.
6. का०द० 1/47.

उदाहरणम्—

गाहन्तां महिषा निपानसलिलैः श्रृंगैर्मुहुस्ताडितं।
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।।
विस्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले,
विश्रान्तिं लभतामिदंच शिथिल ज्याबन्धमस्मद्धनुः।।[1]

प्रस्तुतपद्ये उपर्युक्तसमतालक्षणाऽनुसारं दीर्घसमासाभावात् समतागुणो वर्तते। समतार्थगुणे वर्ण्यमानविषयानांक्रमस्यनिर्वाहेण समतार्थगुणो भवति।[2] यथा—"अग्रे स्त्रीनखपाटलं कुवरकं" इत्यादि पद्ये वर्ण्यमान विषयाणां क्रमनिर्वाहे उक्तगुणस्य स्थितिर्विद्यते।

सौकुमार्यम्—

सुख प्रयोज्यैर्यच्छब्दैर्युक्तं सुश्लिष्टसन्धिभिः।
सुकुमारार्थ संयुक्तं सौकुमार्यं तदुच्यते।।[3]

यत्र रचनायामनिष्ठुराक्षराणां प्रयोगो भवति, तत्र सौकुमार्योऽर्थगुणो लक्ष्यते। अस्मिन् पदानामुपयुक्तसन्धेः सद्भावो वरीवर्ति।

उदाहरणम्—

"सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात् त्रिचतुराणि पदानिगत्वा।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुबाणा,
रामाश्रुणः कृतवती प्रथमावतारम्।।[4]

अत्रसर्वेकोमलवर्णाः शब्दगतं सुकुमारतागुणं व्यञ्जयन्ति। गृहात् किञ्चिद्दूरेगत्वा, सीतया, यदा रामः पृष्ठोऽधुना कियद्गन्तव्यमितिश्रवणानन्तरं शिरीषसदृशींकोमलांगीं सीतां विलोक्य रामस्याश्रुप्रवाहो निर्गतः। अनेन रामस्य हृदगतसौकुमार्यं द्योत्यते। कस्यचिन्मृतेसति "यशः शेष"[5] इति कथनेन यत्र सुकुमारार्थस्य प्रतीतिस्स्यात्तत्र सौकुमार्योनामार्थगुणः।

---

1. ना०शा० पृ० 1322.
2. का०द० 1/47.
3. ना०शा० 16/107.
4. श्रृं०प्र० नवम प्र० पृ० 335.
5. ना०शा०अभि०भ० पृ० 1335.

अर्थव्यक्तिः–

सुप्रसिद्धाभिधानात्तु लोककर्मव्यवस्थिता।
या क्रिया क्रियते काव्ये सार्थव्यक्तिः प्रकीर्त्यते।।[1]

यत्र रचनायां "लोक कर्मव्यस्थित्यनुसारं" सुप्रसिद्ध अभिधाव्यापारः स्यात्तत्र शब्दगत अर्थव्यक्तिगुणो राजते। अयमेव गुणो दण्डीमतेऽर्थस्यानेयत्वं विद्यते।

उदाहरणम्–

"गाहन्तां महिषा निपानसलिलैः"[2] इत्यादि। अस्य पद्यस्य समग्रारचना स्वाभिधेयमर्थं अभिधाव्यापारेणैवाभिधत्ते अतोऽर्थव्यक्तिः शब्दगुणः।

यत्र लोकप्रसिद्धार्थस्य वर्णनंस्यात्तत्रार्थव्यक्तिर्नामार्थगुणः। यथा–

पृष्ठेषु शंङ्खशकलच्छविपुच्छदानां, राजीभिरञ्जितमलक्तकलोहिनीभिः।
गोरोचनाहरितबभ्रुवहिः पलाश–मामोदते कुमुदमम्भसि पल्वलस्य।।[3]

प्रस्तुतेपद्ये कुमुदकुसुमस्य यथावर्णनं "किरातार्जुनीये" विहितं तथैव तल्लोके प्रसिद्धोऽस्ति अतोऽत्रार्थव्यक्तिरर्थगुणोऽस्ति।

उदारतालक्षणम्–

अनेकार्थविशेषैर्यत् सूक्तैः सौष्ठवसंयुतैः।
उपेतमितिचित्रार्थैः उदात्तंतच्चकीर्त्यते।।[4]

अद्भुतत्वेन यत्रार्थस्यवर्णनं स्यात्, तथा विविधभावानां संयोगोभवेत्त-त्रोदारत्वशब्दगुणो विद्यते।

उदाहरणम्–

सुचरण विनिविष्टैर्नूपुरैर्नर्तकीनां,
झणिति रणतमासीत्तत्र चित्रं कलंच।।[5]

अत्र नर्तकीनां नूपुरैर्यदद्भुतत्वेन ध्वनिरभवत् तदेवोदारत्वं वर्तते। एकाक्षरेण

---

1. ना०शा० 16/109.
2. तत्रैव० पृ० 1333.
3. तत्रैव० पृ० 1334.
4. ना०शा० 16/11.
5. तत्रैव० अभि०भा० पृ० 1335.

त्रिभिरक्षरैश्चतुर्भिरक्षरैरकारैश्च रमणीयतायाः सन्निवेशत्वादुदारताऽभिधानः शब्दगुणः स्फुरति। शृंगाराद्भुतरसैर्विविधभावयुक्तैर्दिव्यभावसमन्वितैश्चोदारताख्योऽर्थगुणो भासते।[3]

कान्तिगुणस्यलक्षणम्–

योमनःश्रोत्रविषयः प्रसादजनको भवेत्।
शब्दबन्धो प्रयोगेण स कान्त इति भण्यते।।[4]

यत्र शब्दबन्धो मनःश्रोत्रयोश्चाह्लादजनकः स्यात्तत्र कान्त्याख्यो शब्द गुणः।

उदाहरणम्–

कुरंगीनेत्रालीस्तवकितवनालीपरिसरः।[5]

अस्मिन्निदर्शने समासेसत्यपि मनः श्रोत्रयोश्च कृते रचनाल्हादकरा विद्यते अस्मादत्र कान्तिनामशब्दगुणउदेति। या रचना अर्थैः सुधाकरवदाह्लादयति सा अर्थगत कान्तिगुणेनालंकृता वरीवर्ति।[1]

समाधिगुणस्य लक्षणम्–

अभियुक्तैर्विशेषस्तु योऽर्थस्येहोपलक्ष्यते।
तेन चार्थेन सम्पन्नः समाधिः परिकीर्त्यते।।[2]

विमलप्रतिभाशालिभिरर्थस्य वैलक्ष्यण्यं प्रकाश्यते येनार्थो विशिष्टत्वमुपैति (अत्र समाहितमनसः कवि अर्थं पश्यति)। अतएव समाधिरर्थगुणत्वेन प्रतिपादितः।

उदाहरणम्–

आश्वपैहि मम सीधुभाजनाद्यावदग्रदशनैर्नदश्यते।
चन्द्र ! मद्दशनमण्डलाक्ङितः खं न यास्यसि हि रोहिणी भयात्।[3] अस्मिन् पद्ये चन्द्रमभिलक्ष्य प्रतिपादितं हे चन्द्र यावत् त्वं द्विजैर्नदश्यसे तवत् त्वं

---

3. तत्रैव० 16/110.
4. तत्रैव० 16/113.
5. तत्रैव० पृ० 1337.
1. ना०शा० 16/112.
2. तत्रैव० 16/102.
3. तत्रैव० अभि०भ०पृ० 1325.

ममममद्यपात्रादपसर द्विजैर्दशनानन्तरं चिह्नाङ्कितः त्वं रोहिणीभयादाकाशं न यास्यसि। इत्यनेनात्र अर्थस्यवैलक्ष्यण्यादर्थगतसमाधिगुणो वर्तते, शब्दगत समाधिगुणे शब्दानामारोहावरोहक्रमो भवति।[1] यथा–

निरानन्दः कौन्दे मधुनि परिभुक्तोज्झितरसे
न साले सालम्बो लवमपि लवंगे न रमते
प्रियंगौ ना संगं रचयति न चूतेऽपि चरति।
स्मरल्लक्ष्मीलीलाकमलमधुपानं मधुकरः।।

अस्मिन्निदर्शने शब्दानामारोहाऽवरोहक्रमत्वात् समाधिर्नाम शब्दगुणो दीप्यते। एभिर्लक्षणोदाहरणैरेतदवगन्तव्यम्–यन्माधुर्यौज प्रसादाख्यत्रयो गुणा रसस्यधर्माः सन्तोऽपि शब्दार्थयोर्धर्माअपि विद्यन्ते। श्लेषादयः सप्तगुणाः केवलं शब्दार्थयोधर्मा वर्तन्ते यतोहि एषु चित्तस्य द्रुतिर्दीप्तिर्विस्ताराख्यातिस्रोऽवस्था न संभवन्ति, अत एवैषां शब्दार्थगतत्वं ज्ञेयम्।

---

1. तत्रैव० पृ० 1325.

सप्तमोऽध्यायः

रसरीत्यलंकारप्रभृतिभिः सिद्धान्तैः सह गुणानां सम्बन्धाः

तत्रादौ रसस्वरूपम्–

गुणविवेचनानन्तरं साहित्यशास्त्रस्य रसालंकाररीतिवक्रोक्तिध्वन्यौचित्य-सिद्धान्तैः सह गुणानां स्थितिं प्रतिपादयितुमस्य अध्यायस्योपक्रमो विधीयते। काव्ये उपर्युक्तं सम्प्रदायानामेव आचार्यैः, स्वस्वमते काव्यात्मत्वं व्यवस्थापितम्, एभिः सह, गुणानां सम्बन्धे द्योतिते सति काव्ये गुणानां स्थितिविषये ज्ञातुं शक्यते। अलंकारशास्त्रे यदैते सम्प्रदायाः किमर्थं पृथग्रूपेण साहित्यशास्त्रे दृष्टिपथमवतरन्ति, किमेकेनसम्प्रदायेन साहित्यशास्त्रस्य निर्वाहो न भवितुमर्हति। साहित्यशास्त्रस्याऽनुशीलनेन एतद् ज्ञायते यत्साहित्यतत्त्ववेत्तारः काव्यात्मानमन्वेष्टुं कृतप्रतिज्ञा आसन्। साहित्यशास्त्रस्याचार्याणां समक्षं एषा विषमतरा समस्या आसीत् यत् को नाम काव्यस्यात्मा? येन काव्ये काव्यत्वमायातीतिसमाधातुं विद्याज्ञानविचक्षणैः साहित्यशास्त्रस्य प्रमाप-कैराचार्यैर्विविधविधसम्प्रदायानामथवा सिद्धान्तानां निरूपणं कृतम्।

अलंकारसर्वस्वे "समुद्रबन्धेन" साहित्यशास्त्रस्य सम्प्रदायानां विषये यल्लिखितं, तदुचितमेव प्रतिभाति। समुद्रबन्धमते विशिष्टशब्दार्थयोः संहतिः काव्यं भवति। शब्दार्थयोर्विशिष्टता धर्मव्यापारव्यंग्यमुखेन त्रिधा विभाजिता विद्यते। नित्यानित्यप्रकारेण धर्ममूलकवैशिष्ट्यं द्विविधं प्रतिपादितं, धर्मस्यानित्यभेदाद लंकारा गृह्यन्ते, धर्मस्य नित्यभेदाद् गुणा जरीगृह्यन्ते, अनेन प्रकारेण धर्ममूलकवैशिष्ट्यवौधकौ द्वौ सम्प्रदायौ वर्तेते अलंकारसम्प्रदायो गुणसम्प्रदायश्च। व्यापारमूलकवैशिष्ट्यस्यापि वक्रोक्तिभोजकत्वप्रकारेण च द्वौभेदौ विद्येते। एषु पंचसु पक्षेषु अलंकारपक्ष उद्भटादिभिः स्वीकृतः, द्वितीयो गुणपक्षो वामनेन, तृतीयः पक्षः कुन्तकेन, चतुर्थः पक्षो, भोजकत्वव्यापारस्य कल्पना केवलं भट्टनायकेन कृता, परमस्य भोजकत्व व्यापारस्यान्तर्भावो रसे भवति। अतो भट्टनायकस्य अभिधाव्यापारादतिरिक्तं भावकत्वभोजकत्वयोर्द्वयो-र्व्यापारयोर्मध्ये एकस्यापि व्यापारस्य सिद्धान्तत्वेन गणना कर्तुं न पार्यते। व्यंग्यमुखेन आनन्दवर्धनाचार्यो ध्वनिमेव काव्यस्यसर्वस्वमिति मत्वा ध्वनि-

संप्रदायं सिद्वान्तं वा प्रतिष्ठापयामास।[1]

सारभूतः पदार्थो रस इति ऋग्वेदे समुपलभ्यते जलसारार्थे रसशब्दः ऋग्वेदमनुसरति।[2] अनेनैव प्रकारेण सोमरसस्यार्थे,[3] पृथिव्याः सारभूतहविरित्यर्थे ऋग्वेदे रसशब्दो संलक्ष्यते। रस्यते आस्वाद्यते इति रसः, पूर्वं चतुर्ष्वर्थेषु रसशब्दस्य प्रयोगो भवतिस्म। यथा मधुराम्ललवणकटुकषायतिक्ताख्याः षड्रसाः परिगण्यन्ते। आयुर्वेदे, औषधीनां निश्च्यूतभूतार्थेऽपि रसशब्दस्य प्रयोगो दृश्यते। इत्थमेव हृदयभावाभिज्ञाः कवयोऽपि मनोभावान्, कांश्चित् स्थायिभावान् व्यभिचारिभावांश्चाश्रित्य शृंगारादीन् रसान् अंगीकुर्वन्ति।

आयुर्वेदे वनस्पत्यादिपदार्थान् निष्पीड्य तेभ्यः समुत्पन्नं यत् सुस्वादु द्रवं स रसनाम्ना व्यवह्रियते, सारभूतद्रवोऽपिरसः, तस्यास्वादोऽपि रसः, सर्वप्रथमं पदार्थसारस्य कृते–आस्वादार्थे च रसशब्दः प्रयुज्यतेस्म, कालान्तरे, इमौ अर्थौ विकसितौ। आयुर्वेदानुसारं शरीरान्तर्भूतग्रन्थिषु रसो भवति येन वपुर्विकासो जायते। अत्रापि शक्तेः प्राधान्यं विद्यते। चतुर्धा विभक्तेषु रसप्रयोगेषु तृतीयकक्षायां साहित्यरसः समायाति, अस्य रसशब्दस्यार्थास्तु, काव्यसौन्दर्यं, काव्यास्वादः, आह्लादकत्वं, ब्रह्मानन्दः, अथवा आत्मानन्दापरपर्यायास्सन्ति। रसशब्दस्य प्रतिपादितेष्वर्थेष्वास्वादस्यान्तर्भावः स्फुट एव। रसग्रहणमाध्यमो ज्ञानेन्द्रियरसना स्यात्, अथवा सूक्ष्मेन्द्रियः मनःस्यात् मस्तिष्कशक्तिरथवा आत्मास्यात् द्रवत्वसारस्तु सर्वत्र वर्तते।[4]

उपनिषत्स्वपि रसशब्दस्य प्रयोगा बहुधा लभ्यन्ते[5] तैत्तिरीयोपनिषदि

---

1. इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन, व्यापारमुखेन, व्यंग्यमुखेन, चेति त्रयः पक्षाः। आद्येप्यलंकारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण, भोगकृत्यत्वेनेवेतिद्वैविध्यम्। इति पंचसु पक्षेष्वाद्य उद्भटादिभिरंगीकृतः। द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण चतुर्थो भट्टनायकेन, पंचमो आनन्दवर्धनेन।
2. आपो अद्यान्वचारिषं रसेन समगस्मयि। ऋ०वे०अ० 1, अ०2, व०12, अ०23 पृ० 1.
3. तंगोभिर्वृषणं रसंमदाय देव वीतये। सुतंभराय तं सृज। तत्रैव० 9/6/8.
3. महेयत् पित्रईं रसं दिवेकरवत्सरत् पृशन्यश्चिकित्वान्। तत्रैव० अ० 1, अ० 4, व० 10, पृ० 393.
4. रससिद्धान्त, डॉ० नगेन्द्र पृ० 3-4.
5. छा०उ० 3/2, क०उ० 4/3.

आनन्दार्थे रसशब्दः प्राचीनत्वं द्योतयति।[1] कालक्रमेण अयमेव शब्दः श्रृंगारादि-रसार्थे प्रयुक्तोऽभवत्। कामसूत्रेऽपि चतुःषष्टिविद्यासु तृतीया विद्या "नृत्यम्" इति स्वीकृता, एवं च तत्र विभावानुभावादीनां प्रतिपादनं कृत्वा रसशब्दस्योल्लेखः प्राचीनत्वं द्योतयति।[2] पाणिनिनाऽपि, सिद्धान्तकौमुद्यां रसशब्दस्य प्रयोगो विहितः "रसिको नटः" इत्युदाहरणेन सम्यग् ज्ञायते यत् पाणिनिसमयेऽपि नटा नृत्यं कुर्वन्तिस्म तस्य नृत्यजन्यानन्दस्य कृते रसशब्दः प्रयुज्यतेस्म।[3]

राजशेखरः काव्यमीमांसायां, "रसाधिकारिकं नन्दिकेश्वरः, इत्युक्त्वा रससिद्धान्तप्रतिष्ठापकं नन्दिकेश्वरं निश्चिक्ये।[4] तस्य मतं स्वीकर्तुं न पार्यते, यतो हि अद्यास्माकं समक्षमस्य कापि रचना दृष्टिपथं नावतरति। अतो रससिद्धान्तसंस्थापको नाट्यशास्त्रप्रणेता भरतमुनिरेव वर्तते।

भरतमुनिना नाट्यशास्त्रे स्वयमेवाभिव्यक्तं यत् पाठयं—ऋग्वेदात्, गीतं सामवेदात्, अभिनयः यजुर्वेदात्, रसोऽर्थवेदाद् गृहीतो वर्तते।[5] अस्मादवगम्यते यद्रसतत्त्वस्य ग्रहणमथर्ववेदात् कृतम्, अथर्ववेदेऽपि रसशब्दस्य प्रयोगा बहुधा दृष्टिपथमायान्ति।[6] रसस्यानिवार्यत्वं प्रतिपादयन् भरतमुनिः असूचयत् यद्रसं विहाय कश्चिदर्थो न प्रवर्तते।[7] भरतमते श्रृंगाःरादयो रसा द्रुहिणेन महात्मना प्रतिपादिताः।[8] विशेषतो भरतो नाट्य एव रसस्य सत्तां व्यकरोत्, परं काव्यात्, नाट्यं निष्पद्यते अतः काव्ये रसानुप्रवेशो विद्यते।[9] रसनिष्पत्तिविषयकं भरतोक्तसूत्रं रससिद्धान्तस्य प्राणभूतं तत्वं वर्तते।[10] अस्मिन् सूत्रे विभावानुभाव-व्यभिचारिणां संयोगेन रसस्य निष्पत्तिर्निरूपिता।

---

1. रसोवै सः। रसं ह्येवायं लब्ध्वाऽनन्दी भवति। तैत्तिरीयोपनिषद्, ब्रह्मवल्ली 2/7
2. कारणान्यंगहाराश्च विभावोभाव एव च।
   अनुभावोरसाश्चेति संक्षेपानृत्यसंग्रहः। का०सू० विद्यासमुदेश प्रकरणे - 1/3/87.
3. रसादिभ्यश्च, सिद्धान्तकौमुदीतत्वबोधनीसहिता 5/2/95, पृ० 359.
4. का०मी० पृ० 1-2.
5. जग्राह पाठयमृग्वेदात् सामभ्यो गीतमेवच।
   यजुर्वेदादभिनयान् रसानाथर्वणादपि।। ना०शा० 1/17.
6. अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्च नोनः। अथर्ववेद 11/5/44.
7. नहि रसादृते कश्चिदर्थः प्रवर्तते। ना०शा० 6/31.
8. तत्रैव० 16/16.
9. यद्यपि नाट्यानान्यत्र रस इति वक्ष्यते तथापि काव्यान्नाट्यं निष्पद्यत एवेत्यस्ति काव्ये रसानुप्रवेशः। तत्रैव० अ० 4, पृ० 434.
10. विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः। ना०शा० 6/32.

रसनिष्पत्तौ कारणानि विभावा भवन्ति, आलम्बनोद्दीपनभेदेन विभावस्य द्वौ भेदौ वर्तेते।[1] नायिकादयो आलम्बनविभावा भवन्ति। चन्द्रचन्द्रिकाकोकिलालापभ्रमरझंकृत्यादय उद्दीपनकारणानि सन्ति। कायिकवाचिकमानसिकभेदेन नानाविधानि कटाक्षभुजोत्क्षेपप्रभृतीनिकार्याणि अनुभावशब्देनोच्यन्ते। अनुभावविषये यथोक्तम् झल्लकीकरटीकायां "साहित्यदर्पणे"।[2]

रसनिष्पत्तौ सहायकत्वेन निर्वेदादयस्त्रयस्त्रिंशत् व्यभिचारिभावाः स्वानुरूपरसस्योपकारं कुर्वन्ति। एतेव्यभिचारिभावाः रसोपकृतिं विधाय प्रत्यावर्तन्ते।[3] एभिर्विभावादिभिर्व्यंजनाख्यवृत्या प्रतिपादितोऽविच्छिन्नप्रवाहरूपः स्थायिभावः चित्तवृत्तिविशेषो रसः कथ्यते। अत एवोक्तं मम्मटेन स्थायि भावो रसः स्मृतः।[4] स्थायिभावस्य लक्षणं विश्वनाथेन एवं प्रकारेण कथितम्।[5] सर्वप्रथमं स्थायिभावानां महत्त्वं सर्वेभ्यो भावेभ्योऽधिकं निगदितम्।[6]

विभावानुभावव्यभिचारिस्वरूपरसविषयकं भरतसूत्रमादाय विविधविधशास्त्रमर्मज्ञैः मीमांसा, न्याय, सांख्य, साहित्यमतानुयायिभिः क्रमेण भट्टलोल्लटश्रीशंकुकभट्टनायकाभिनवगुप्तपादैश्च, उत्पत्तिः, अनुमितिः, भुक्तिः, अभिव्यक्तिप्रकारेण व्याख्या विहिता। भट्टलोल्लटस्योत्पत्तिवादो वर्तते

---

1. विभाव्यन्ते हि रत्यादिर्यत्र येन विभाव्यते।
   विभावोनाम स द्वेधा आलम्बनोद्दीपनात्मकः।। का०प्र० 4
   झल्लकीकरटीकायाम् पृ० 87.
2. रत्यादीन् स्थायिनः अनुभावयन्ति अनुभवविषयीकुर्वन्तीति अनुभावाः। का०प्र० चतुर्थ उल्लास पृ० 86.
   उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।
   लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्योः। सा०द० 3/132.
3. येतूपकर्तुमायान्ति स्थयिनं रसमुत्तमम्।
   उपकृत्य च गच्छन्ति ते मता व्यभिचारिणः।। का०प्र० उ० 4 पृ० 86.
   विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
   स्थायिन्युन्मग्ननिर्मग्नाः कल्लोल इव वारिधौ। द०रू० 4/7.
4. का०प्र० 4/43.
5. अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
   आस्वादांकुरकन्दोऽसौ भावः स्थायीति सम्मतः। स०द० 3/174.
6. यथा नराणां नृपतिः शिष्याणांच यथा गुरुः।
   एवंहि सर्वभावानां भावः स्थायी महानिह।। ना०शा० 7/8

अस्य मतानुसारं रसो मुख्यरूपेणानुकार्यरामादौ तिष्ठति अनुकर्त्तृत्वाद् गौणरूपेण नटेऽपि रसस्य स्थितिर्भवति। भट्टलोल्लटः सामाजिकेषु रसाऽभावं स्वीचकार।[1]

न्यायनयनिष्णातः श्रीशंकुको विभावादिभिः रसस्यानुमितिं स्वीकरोति। अस्य मते नटः कृत्रिमरूपेण अनुभावादीनां प्रकाशनं करोति, परं तस्य सौन्दर्यबलात् सत्यतायाः प्रतीतिर्भवति। सामाजिकः कृत्रिमानुभावादीन् दृष्ट्वा, नटे वास्तविकताया अभावादपि तत्र रसस्यानुमानं करोति, एवं च वासनासंस्कार-बलादनुमीयमानरसस्य स्वात्मगतत्वेनास्वादयन् रसपदवीमधिरोहतीति।[2]

भरतरससूत्रस्य व्याख्याविषये भट्टनायकस्य भुक्तिवादः प्रसिद्धोऽस्ति। अस्यमते–अनुकार्यरामादौ रसोत्पत्तिर्न जायते न च अनुकर्तृनटादौ रसस्यानुमानं विधीयते यतो द्वावेवावुदासीनौ वर्तेते। अतः सर्वप्रथमं भावकत्वव्यापारेण काव्यार्थस्य साधारणीकरणं भवति, अन्यो भोजकत्वव्यापारः सामाजिकान् रसस्य भोगं कारयति। भट्टनायको अभिधालक्षणाभ्यामतिरिक्तं, भावकत्व- भोजकत्वाख्यं व्यापारद्वयं आविर्भावयामास। अस्य वादो भुक्तिवादेनोच्यते।[3]

अभिनवगुप्तो रसस्याभिव्यक्तिं स्वीचकार। अस्यमते पूर्वं पदेभ्योऽर्थावगमस्ततो विभावादिभिर्वाक्यार्थस्य प्रतीतिः, तदनन्तरं अभिनयादिभिः वासनाख्यसंस्कारेण सामाजिको विभावादिभिः सह साधारणी- करणं विदधाति, ततोऽज्ञानावरणापनयेन अखण्डस्य, स्वप्रकाशस्य, चिदानन्द- मयस्य, वेद्यान्तरस्पर्शशून्यस्य, ब्रह्मास्वादसहोदरस्य, लोकोत्तरचमत्कार- कारिरसस्य प्रतीतिं सहृदयसामाजिकाः कुर्वन्ति। रत्यादयः स्थायिभावाः सहृदयसामाजिकेषु वासनाख्यरूपतया सर्वदा विद्यमाना भवन्ति, यदा ते अभिनयादिभिरुद्बुद्धा जायन्ते, तदा सामाजिका रसमास्वादयन्ति। अभिनव- गुप्तमते विभावादयो रसस्य व्यंजका वर्त्तन्ते, रसो व्यंग्यरूपोऽस्ति, अतो विभावादिभिः रसस्याभिव्यक्तिर्भवति।[4]

एभिश्चतुर्भिर्व्याख्याकारैः भरतरससूत्रे समागतस्य संयोगपदस्यार्थः क्रमेण, कार्यकारणभावात् अनुमाप्यानुमापकभावात्, भोज्यभोजकभावात्, व्यंग्य-व्यंजकभावात्, निष्पत्तिशब्दस्यार्थो अनुपदमेव उत्पत्तिः, अनुमितिः, भुक्तिः,

---

1. का०प्र० चतुर्थ उल्ल० पृ० 87.
2. का०प्र० चतुर्थ उल्ल० पृ० 88-90.
3. का०प्र० चतुर्थ उल्ला० पृ० 90-91.
4. तत्रैव० पृ० 91-95.

अभिव्यक्तिः स्वीकृतः। रसविषये विशिष्टज्ञानार्थं संकेतिता ग्रन्था द्रष्टव्याः।[1] एषु चतुर्षु मतेषु अभिनवगुप्तस्याभिव्यक्तिवादः सर्वैर्विद्वद्भिः समर्थ्यते, यद्यपि भट्टनायकस्य भुक्तिवादोऽपि अभिव्यक्तिवादस्यानतिदूरे विद्यते, परं भट्टनायकस्य भावकत्वभोजकत्वव्यापारौ विद्वद्भिर्न समादृतौ, यस्मादस्य भुक्तिवादो विख्यातो नाऽभवत्।

काव्यनाटकेषु रसस्यैव प्राधान्यं बोभवीतीति विषये विदुषामेकमतम्। विष्णुधर्मोत्तरपुराणेऽभिहितं प्रयत्नेन रसयुक्ता रचना कर्तव्या, यतोहि समग्रं नाट्यं रसप्रधानं विद्यते।[2] आचार्यभामहः रसस्य रसवदाद्यलंकारेष्वन्तर्भावं चकार।[3]

आचार्यदण्डिना रसवदालंकारनिरूपणे, अष्टरसानामुल्लेखः कृतो विद्यते[4], अस्माद् ज्ञायते यद्दण्डी श्रृंगारादीन् रसान पूर्णमजानात्। आचार्यवामनेन श्रृंगारादि-रसानां कान्त्याख्यगुणेन ग्रहणमकारि।[5] रुद्रटः सरसात्मककाव्यस्यानुमोदनं विधाय नीरसाद् जना विभ्यतीत्यचूचुदत्।[6] उद्भटेनापि रसवदाद्यलंकारवर्गे श्रृंगारादिरसानामनुमोदनं विहितम्।[7] पूर्ववर्त्त्याचार्या अलंकारानेव शशंसुः, येन रसमहत्त्वविषये विचारं विधातुं—अथवा रस एव काव्यात्मा वर्तते इति विचारं कर्तुमसमर्था बभूवुः।

प्राधान्येन सर्वप्रथमं रसमहत्त्वप्रतिपादने आनन्दवर्धनः प्रथमं स्थानमविन्दत्। अस्मादारभ्य परवर्तिभिः प्रायः सर्वैराचार्यैः काव्यस्य प्राणभूततत्त्वस्य महत्व-मुररीकृतम्। विश्वनाथेन रसात्मकवाक्यस्येव काव्यत्वं समर्थितम्।[8] ध्वनिलक्षण-

---

1. ना०शा० अभिनव भारती अ० 6.
   का०प्र० चतुर्थ उल्लास   सा०द० तृतीय परि०
   रससिद्धान्त, डॉ० नगेन्द्र, भारतीय काव्यशास्त्र डॉ० सत्यदेव चौधरी।
2. बन्धो रसानुगः कार्यः सर्वेष्वेतेषु यत्नतः।
   रसप्रधानमेवैतत् सर्वं नाट्यं नराधिप।। वि०ध०पु०तृ० खं० 17, अ० 62, श्लोक पृ० 314.
3. रसवद्दर्शितस्पष्टश्रृंगारादि रसं यथा। भा०क०लं० 3/6.
4. इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम्। का०द० 2/292.
5. दीप्तरसत्वं कान्तिः। का०लं०सू० 3/2/15.
6. ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे।
   लघु मृदुच नीरसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्यः।
   तस्मात् तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्। रू०का०लं० 12/1-2.
7. काव्यालंकारसारसंग्रह एवं लघुवृत्तिव्याख्यायाम्। 4/1-5.
8. स०द० 1/3, पृ० 19.

खण्डनकर्त्तुर्महिमभट्टमतेऽपि काव्ये रसात्मकत्वं मुख्यंस्थानं विभर्त्ति।[1] यद्यपि आनन्दवर्धनेन विस्तृतरूपेण ध्वनिनिरूपणं विहितम्, परं व्यापकतत्वस्य रसस्यानुसरणं कर्तव्यम्, येन काव्यमार्गोप्यनन्ततां भजते इत्यभिधाय[2] निष्कर्षतया रसादिरूपे व्यंग्यव्यञ्जकभावे कविः प्रयत्नो विदधतीति प्रतिपादितम्।[3] अत एवानेन रसवध्वनेः सर्वोत्कृष्टत्वं समर्थितम्। रसमयेकाव्ये सर्वे पदार्था वसन्ततौ द्रुमाणामिव नवा भान्ति इत्यनेन ध्वनिसिद्धान्तप्रतिष्ठापकाचार्येण रसस्य महत्वं प्रतिपादितमिति ज्ञायते।[4]

रसगुणयोर्नित्यः सम्बन्धः–

काव्ये नाटके च रसस्यैव प्राधान्यं वरीवर्ति, इति सर्वे आचार्या विशेषतोऽर्वाचीना मुक्तकण्ठेनोद्धोषयामासुः। गुणविषये तु प्राचीनैरर्वाचीनैराचार्यैः पृथग् रूपेण मतमतान्तराणि प्रकटितानि। रसालंकाररीत्यादीनां विषये सर्वेषामाचार्याणामेकमतं नावलोक्यते, परं गुणानां विषये, गुणस्वीकृतिविषये सर्वेषामेकमतं वर्त्तते। यद्यपि भरतादिभिर्गुणस्वरूपगुणसामान्यलक्षणनिर्धारणे स्वकीयमसामर्थ्यं प्रकटितम्, परं शब्दार्थगतत्वेन गुणनिरूपणं, गुणसिद्धान्तं पोषयति। परवर्तिभिस्तु रसस्य धर्मा गुणा वर्तन्ते इत्युक्त्वा गुणानां रसेन सह नित्यः सम्बन्धः स्थापितः। भरतः उदारतागुणस्य प्रथमलक्षणेऽचकथत् यदयं गुणः शृंगाराद्भुतरसयोर्युक्तः स्यात् अनेनोदारतागुणस्य प्राधान्यं प्रतीयते, शृंगाराद्भुतरसयोस्तदङ्गता।[5] विषमः अर्धसम, सम छन्दसु– उदारार्थमधुरशब्दैः रसानुकूला रचना विधातव्या।[6] औदार्य अर्थगुणोऽस्ति, यः प्राधान्येन दीप्तरसानधिवसति, अयं शब्दगुणोऽपि वर्तते अतो दीप्तत्वप्रकाशकवर्णानधितिष्ठति। तदनुयायिमाधुर्यगुणो विद्यते। इमौ द्वावेव गुणौ स्वानुयायिगुणसहितमसृणरसेषु विद्येते[7]।

---

1. काव्यमात्रस्य ध्वनिव्यपदेशविषयत्वेनेष्टत्वात् तस्य रसात्मकत्वोपगमात् रसात्मकताभावे तस्य काव्यव्यपदेश एव न स्यात्, किमुत विशिष्टत्वम्। व्य०वि० प्रथम वि० पृ० 98/103.
2. युक्त्यानयानुसर्तव्यो रसादिर्बहुविस्तरः।
   मितोप्यनन्ततां प्राप्तः काव्यमार्गो यदाश्रयात्। ध्वा०लो० 4/3.
3. व्यंग्यव्यंजकभावेऽस्मिन्विविधे सम्भवत्यपि।
   रसादिमय एकस्मिन्कविः स्यादवधानवत्।। तत्रैव० 4/5.
4. दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
   सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः।। तत्रैव० 4/4.
5. दिव्यभावपरीतं यच्छृंगाराद्भुतयोजितम्।
   अनेकभावसंयुक्तमुदारत्वं प्रकीर्तितम्। ना०शा० 16/110.
6. यच्छन्दः पूर्वमुद्दिष्टं विषमार्थसमे समम्।
   उदारमधुरैः शब्दैस्तत्कार्यं तु रसानुगम्। तत्रैव० 16/121.
7. उदारमधुरैरिति। औदार्यशब्दगुणो दीप्तेषु प्राधान्येन तदनुयायि च गुणान्तरं माधुर्यं, स्वानुयायिगुणसहितमसृणेषु रसेषु। तत्रैव० 16 पृ० 1339.

अतोऽत्र अभिनवगुप्तमतं गुणानां रसधर्मत्वमंशतः साधयति। भरतेन पृथग् रूपेण रसगुणयोःपरस्परसम्बन्धविषये पार्थक्येन नाभिहितम्।

आचार्यदण्डिना रसवदाद्यलकाराणां निरूपणं विहितं,[क] परं गुणानां रसधर्मत्वं नाभिहितम्। वैदर्भमार्गस्य प्राणाः दशगुणा वर्तन्ते,[1] इत्युक्त्वा रचनायां आत्मतत्वरूपेण गुणानां प्रतिपादनं कृतम्। रसवद्वाक्यं मधुरं भवतीतिमाधुर्य-गुणलक्षणे, रस एव माधुर्यगुणस्य धर्मत्वेन प्रतिपादितः।[2]

अतः काव्ये गुणानामेव मुख्यत्वं स्वीकृतम् न रसस्य। अनेन गुणानां शब्दार्थधर्मत्वं प्रतिपादितमिति। वामनेन स्फुटरूपेण गुणानां शब्दार्थगतत्वं तथा च गुणानां काव्यसौन्दर्यजनकत्वं प्राधान्येन स्वीकृतम्।[3] "दीप्तरसत्वं कान्तिः"[4] इत्यनेन कान्तिगुणे एव रसानां विनिवेशः कृतः। आनन्दवर्धनेन सर्वप्रथमं काव्ये रसस्य मूर्धन्यत्वं स्वीकृत्य गुणानां रसधर्मत्वं निगदितम्।[5] अनेन गुणानामन्वयव्यतिरेकत्वमंगीकृतम्।

भोजदेवः काव्ये गुणयोगं रसावियोगं च नित्यत्वेन निरूपयामास।[6] तेन गुणरसालंकारैः, गुणरसाभ्यां, गुणालंकाराभ्यां, रसालंकारभ्यां च षट्प्रकारोऽ-लंकारसंकरः प्रतिपादितः, शब्दगुणअर्थगुणदोषगुणानामपि अलंकारसंकरत्वं निरूपितम्।[7] भोजदेवश्चतुर्विंशतिगुणानां रसारम्भकेण, गुणारम्भकेण, शुद्धशब्दार्थगतरूपेण विभागत्रयमकरोत्, रसारम्भकगुणविभागस्य रसभा-वारब्धवर्गस्य च गुणानां रसेन सह नैरन्तर्येण सम्बन्धो विद्यते, अस्मिन् अपृथक्प्रयत्ननिर्वर्त्यमानानां गुणरसानां अवयवावयविन्यायेन वाक्ये सन्निवेशो भवति। तत्र संकरव्यवहारो न युज्यते।[8] भोजेन रसारम्भकेविभागे दण्डि प्रतिपादितमाधुर्यगुणस्य तथा आनन्दवर्धनोक्तमाधुर्योजः प्रसादगुणानां शब्दतः ग्रहणं कृतमस्ति।[9]

क. का०द० 2/292.

1. तत्रैव० 1/42.
2. मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः। का०द० 1/51.
3. का०लं०सू० 3/1/1.
4. तत्रैव० 3/2/15.
5. ध्व०लो० 2/6.
6. नित्यो हि काव्ये गुणयोग इव रसावियोगः। शृ०प्र० 11 प्र० पृ० 437.
7. तत्रैव० पृ० 448-53.
8. अत्रापि ब्रूमः अवयवावयविन्यायेन चापृथक्प्रयत्ननिर्वर्त्यानां गुणरसानां वाक्ये सन्निवेशः। तत्रसंकरव्यवहारो न प्रवर्तते। तत्रैव० 11 प्र० पृ० 453.
9. तत्रैव० 11 प्र० पृ० 453.

अनेनैव प्रकारेण रसानां गुणारम्भकत्वेऽपि और्जित्यं, भाविकत्वं, माधुर्य-मुदात्तत्वं प्रेयः, कान्तिः-एते षड्गुणाः प्रतिपादिताः। एषां रसेन सांकर्यं न भवति।[1] एवं भोजदेवो दण्डी तथा आनन्दवर्धनानुसारं गुणानां रसधर्मत्वमपि स्वीकरोतीति अपृथक्प्रयत्नगुणविभागाद् ज्ञायते। आचार्यमम्मटेन आनन्दवर्धनोक्त-गुणानां रसधर्मत्वमतं सुव्यवस्थापितम्[2]। गौणीवृत्या गुणानांशब्दार्थधर्मत्वमपि प्रतिपादितम्। अग्निपुराणकारस्य गुणविषये शब्दार्थगता गुणधारणा लक्ष्यते।[3] हेमचन्द्र[4]-विश्वनाथ[6]-कर्णपूर-गोस्वामी[7] विश्वनाथदेव,[8]प्रभतिभिराचार्यैर्गुणानां रसधर्मत्वं प्रतिपादितम्। विद्यानाथश्चारुत्वातिशयरूपेण गुणसामान्यलक्षणं विधाय शब्दगतत्वेन गुणान् कथयामास।[9] पण्डितराजजगन्नाथमते गुणाः शब्दार्थरसरचनावृत्तिगता वर्तन्ते।[10] जगन्नाथेन गुणविषये मम्मटमतमेव समर्थितम्।[11] अतः प्राक्तनैर्गुणानां शब्दार्थगतत्वं स्वीकृतमासीत्। आनन्दवर्धनादारभ्य काव्यस्यांगीभूतरसस्य धर्मत्वेन गुणानां व्यवस्थापनमभूत्।

पूर्ववर्त्याचार्याः रसाद् गुणानामधिकं महत्वम मन्यन्त, येन गुणेषु रसस्यान्तः पातोविहितः परं परवर्तिभिराचार्यैर्गुणेभ्यो रसस्याधिकं महत्त्वं स्वीकृत्य काव्यात्मत्वेन व्यवस्थापितस्य रसस्यांगभूतत्वेन गुणाः समुपन्यस्ताः।

---

1. सेयं गुणानां रसारम्भकत्वे संकराप्रसिद्धिः, एवं रसानां गुणारम्भकत्वेऽपि तद्यथा–रूढाहंकारतौर्जित्यं, भावतोवाक्प्रवृत्तिर्भाविकत्वं, क्रोधादावप्यतीव्रता, माधुर्यं, आशयोत्कर्षः, उदात्तत्वं, अर्थस्याभीष्टतमताप्रेयः दीप्तरसत्वं, कान्तिरिति। शृ०प्र० 11 प्र० पृ० 453.
2. का०प्र० 8/66.
3. अग्निपुराणम् अ० 346 पृ० 502.
4. हेमचन्द्र काव्यानुशासनम् अ० 4, पृ० 241-45.
5. एकावली 5/1.
6. स०द० 8/1.
7. अलंकारकौस्तुभः 6/176.
8. साहित्यसुधासिन्धुः 6/136.
9. प्रतापरूद्रीयम् पृ० 37-374.
10. र०गं० प्रथम आनन पृ० 226-27.
11. अतस्त्रय एव गुणा इति मम्मटभट्टादयः र०गं० प्रथम आ०पृ० 253.

आनन्दवर्धनोत्तरवर्ती ध्वनिवादिभिराचार्यैर्गुणा रसस्य नित्यधर्माः प्रतिपादिताः। भावाश्चिरन्तनीनसंस्कारवशात् सुषुप्तावस्थायां सामाजिके निवसन्ति, स्वं स्वं निमित्तमासाद्य अविच्छिन्नरूपेण विद्यमानाः रत्यादयः स्थायिभावा उद्बुद्धो भूत्वा रसत्वमाप्नुवन्तीति। रसेन सह गुणानां नित्यसम्बन्धो वर्तते इति मम्मटेनाप्यभिहितम्। तेन माधुर्यौजः प्रसादगुणानां क्रमेण द्रुतिर्दीप्तिर्विस्ताररूपेण-तिस्रोऽवस्थाः प्रतिपादिताः। आसामनुसारं संभोगकरुणविप्रलम्भशान्तरसेषु उत्तरोत्तरं माधुर्यं कोमलकोमलतरकोमलतमभेदेन भवतीति। वीरबीभत्स, रौद्ररसेषु दीप्तिस्वरूपस्योजोगुणस्याधिक्यं दृश्यते। प्रसादगुणस्य, सर्वेषु रसेषु सर्वासु रचनासु व्यंग्यव्यञ्जकसम्बन्धेन स्थितिः प्रतिपादिता विद्यते। माधुर्यादयो गुणाश्चित्तवृत्तिविशेषा मन्यन्ते। द्रुतिर्दीप्तिर्विस्तारहेतुत्वात् रसा अपि चित्तवृत्तिविशेषा वर्तन्ते अत एव तेषु प्रदर्शितरीत्या उत्तरोत्तराधिक्येन माधुर्यादयो निवसन्ति। अतः रसगुणयोर्नित्यः सम्बन्धो वर्तते। एषां गुणानां लक्षणया शब्दार्थ- धर्मत्वं स्वीकृतम् नतूपचारेण गुणानां शब्दार्थधर्मत्वमपितु साक्षात्सम्बन्धेन स्वीकर्त्तव्यम् रसगतगुणानां माधुर्योजःप्रसादानां गौणीवृत्त्या शब्दार्थ-धर्मत्वप्रतिपादनं समीचीनम् परं भरतदण्ड्युक्तगुणानां लक्षणया नैव, अपितु मुख्यरूपेण शब्दार्थधर्मत्वं स्वीकर्तव्यम्। माधुर्यौजः प्रसादख्यास्त्रयोगुणा रसस्योपकारकत्वेन वर्तन्ते अन्ये शब्दगुणा अर्थगुणाश्च काव्यशरीरस्योत्कर्षं कुर्वन्ति। अनेन विदुषां मतानुशीलनेन रसगुणयोर्नित्यः सम्बन्धः प्रतीयते।

रीतिसिद्धान्तः—

ऋग्वेदे महती स्रुतिरिव इत्यर्थे रीतिशब्दः प्रयुक्तः। यथा नदीनां—स्रोतो विभक्तं सत्-निम्नदेशाऽभिमुखं प्रसरति, तथैव शवसा-आत्मीयेन बलेन तत्तद्देवगृहं पृथग् विभिन्नं सत् असरत् = अगच्छत्।[1]

यथा नदीनां प्रवाहः कदाचिद् वैमुख्येनाभिगच्छति तथैव देशभेदेन रचना प्रवाहोऽपि वैदर्भीगौड्यादिरीतिषु विभक्तो विद्यते। वेदे नदीप्रवाहार्थे यो रीतिशब्दः प्रयुक्तो विद्यते, स एव कालान्तरे वैदर्भादिदेशस्य तत्र विद्यमानस्य कवेश्च रचनाभेदेन वैदर्भीगौड्यादिरीतिषु विभक्तो ह्यवर्तत। एवमेव गौडीपाञ्चालीलाटी-रीतीनामप्युद्गमः प्रतिभातीति। चतुष्षष्टिकलासु एका पाञ्चालिकी—

---

1. ब्रह्मणस्पते रभवद्यथावशं सत्योमन्युर्महिकर्मा करिष्यतः।
योगा उदाजत्स दिवेविचामभजन्महीव रीति शवसा सरत्पृथक्। ऋ०वे द्वितीय-भागः 2/3/24, ऋ 14 पृ० 303.

कला प्रतिपादिता तस्याः पाञ्चालिक्याऽपि, पाञ्चालदेशस्य चतुःषष्टिकलानां निर्देशोऽस्ति।[1] अनेनाऽवधार्यते यत् पाञ्चालिकीकलाभिधाना साहित्यशास्त्रे पाञ्चालीरीतिः समाख्याता। भरतो रीतेः स्थाने चतस्रोः वृत्तीः प्रतिपादयामास।[2] कैशिकीनाम्नः चतुर्थवृत्तेः प्रयोगः भरतेन ब्रह्माज्ञया कृत इति।[3]

यः कोऽपि किञ्चित् कार्यकरोति तत्र वाङ्मनःकायव्यापारादयो भवन्ति तेषु लालित्यवैचित्र्ययोरनुप्रवेशो भवति, तत् वैचित्र्यसम्पादनार्थमेव चतस्रो वृत्तयो निरूपिताः।[4] विविधैराचार्यैः रीतिर्गुणोवृत्तिःसंघटना मार्गइत्यादि शब्दैः रीतेर्महत्त्वमुररीकृतम्। एवमलंकाररसादिसिद्धान्तप्रवर्तकानामाचार्याणां ग्रन्थेषु रीतेर्महत्वमथवा रीत्यापरपर्यायमार्गादीनां निरूपणं दृग्गोचरीभवति।

सुरगुरोरनुज्ञया भरतःपूर्वोक्ता वृत्तीः स्वीचकार यतो वृत्यनुसारं सर्वं नाट्यं प्रतिष्ठितम्।[5] वृत्तीनामतिरिक्तं रीतिस्थाने भरतः तिस्रः प्रवृत्तीः निरूपयामास।[6] अस्मादवगम्यते यद् भरतस्य प्रवृत्तिप्रयोगो रीतिशब्दमनुससार, भामहात् प्रागपि रीतीनां प्रयोग आसीत् एतद्भामहस्य वैदर्भगौडयोर्निरूपणादवगम्यते। भामहेन स्वमते रीतेर्मान्यता नाङ्गीकृता नच रीतिशब्दस्याथवामार्गशब्दस्य प्रयोगो विहितः। भामहेन वैदर्भगौड्योः प्रयोगः काव्यभेदान्तर्गत एव कृतः। विदुषां मतं प्रस्तुवता भामहेन वैदर्भकाव्यभेदस्यैवानुमोदनं कृतम्।[7]

---

1. पाञ्चालिकी च चतुष्षष्टिरपरा। का०सू० 1/3/16, पृ० 95.
2. भारतींसात्वतीं चैव वृत्तिमारभटीं तथा।
   समाश्रितः प्रयोगस्तु प्रयुक्तो मया द्विजाः।। ना०शा० 1/41.
3. परिगृह्य प्रणम्याथ ब्रह्मा विज्ञापितो मया।
   अथाहमां सुरगुरुः कैशिकीमपि योजय।। ना०शा० 1/42.
4. यद्यत्किल कर्मारभ्यते तत्र वाङ्मनः कायव्यापारस्तावदस्ति। तत्र कस्यचिल्लालित्य- वैचित्र्यक्रमस्यानुप्रवेशः। यत् उत्तमप्रकृतीनां सौष्ठवमय एव सर्वे व्यापाराः। तदेव तद्वृत्तिः चतुष्टयम्। ना०शा०अभि० भा० 1/41.
5. भारती सात्वती चैव कैशिक्यारभटी तथा।
   चतस्रो वृत्तयो ह्येता यासु नाट्यं प्रतिष्ठितम्। तत्रैव० 6/24-25.
6. अवन्ती दाक्षिणात्या च तथा चैवोद्रमागधी।
   पञ्चाली मध्यमावेति विज्ञेयास्तु प्रवृत्तयः।। तत्रैव० 6/25-26.
7. वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।
   तदेव च किल ज्यायः सदर्थमपि नापरम्।। भा०क०लं० 1/31.

गौडवैदर्भयोः पार्थक्यं गतानुगतिकया अल्पबुद्धयः कुर्वन्ति।[1] वैदर्भाःकथयन्ति, नामानि तु इच्छया प्रसूतानि भवन्ति तेषामर्थेन सह वैशिष्ट्येन सम्बन्धो न भवति।[2] उद्भटेन परुषउपनागरिकग्राम्यभेदेन रीतिस्थाने तिस्रो वृत्तयः स्वीकृताः।[3] रीतिसिद्धान्तस्य मुख्यरूपेण प्रतिष्ठापकाचार्यवामनो वर्तते। रीतेरात्मत्वेन गुणानां प्रतिपादनं यत् कृतं तस्माद् गुणसम्प्रदायोप्यस्य- नामचरितार्थतामेति। अस्मिन् विषये डॉ० रेवाप्रसादद्विवेदिनां मतं वर्तते यदयं सम्प्रदायः सौन्दर्यसम्प्रदायो विद्यते। नायं वामनः रीतिसम्प्रदास्य गुणसम्प्रदास्य च प्रवर्तको वर्त्तते। वामनस्य सौन्दर्यसम्प्रदायः तथैव व्यापकोऽस्ति यथा आनन्दवर्धनस्य ध्वनिसम्प्रदायः। वास्तविकमेतत्तथ्यं यद्वामनः सौन्दर्यसम्प्रदायस्य प्रतिष्ठापको विद्यते।[4] वामनेन रीतिरेव काव्यस्यात्मा कथितः,[5] रीतेरन्तरङ्गत्वेन गुणाः प्रतिपादिताः।[6]

वैदर्भ्यादिरीतीनां नामकरणे इदमेव कारणं वामनेनोक्तम् यद् विदर्भादिदेशेषु वैदर्भ्यादिरीतीनां प्रयोगेण नामकरणं कृतमस्ति।[1] तेन तिस्रो रीतयः प्रतिपादिताः गुणभेदात्-रीतीनां विभागोऽपि निरूपितः।[2] आचार्यदण्डी रीतिस्थाने मार्गशब्दस्य प्रयोगं विदधत् वैदर्भगौडयोर्द्वयोर्मार्गयोर्निरूपणं चकार।[3] शोरसैनी, लाटी गौडी इमाः सर्वाः देशनामोपलक्षितभाषाः नाट्यशास्त्रे प्राकृत

---

1. गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक्।
   गतानुगतिकन्यायान्नाख्येयममेधसाम्।। भा०का०लं० 1/32.
2. ननु चाश्मकवंशादि वैदर्भमिति कथ्यते।
   कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते।। तत्रैव० 1/33.
3. काव्यालंकारसारसंग्रहः 1/4-6.
4. काव्यालंकारसूत्रभूमिका—डॉ० रेवाप्रसाद द्विवेदी पृ० 27.
5. रीतिरात्माकाव्यस्य। का०लं०सू० 2/6.
6. विशोषो गुणात्मा। तत्रैव० 2/8.

1. विदर्भादिदृष्टत्वात् तत्समाख्या। का०लं०सू० 2/10.
2. समग्रगुणा वैदर्भी। तत्रैव० 2/11.
   ओजः कान्तिमती गौडीया। तत्रैव० 2/12.
   माधुर्य सौकुमार्योपपन्ना पाञ्चाली। तत्रैव० 2/13.
3. अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।
   तत्र वैदर्भ गौडीयौ वर्ण्येते प्रस्फुटान्तरौ। का०द० 1/40.

नाम्ना व्याहृता भवन्ति।[1] वैदर्भगौडमार्गयोर्व्यवहारो वर्त्तते परमनयोरवान्तर-भेदगणना तथैव असम्भवा यथेक्षुक्षीरगुडादीनां माधुर्यान्तर कथनंसरस्वत्याऽपि वक्तुं न पार्यते।[2] अनयोर्मार्गयोर्भेदं दण्डी एव प्रावर्तयत्। गौडेष्वक्षरडम्बर, इति वाणोक्त्या गौडीरीत्याः प्रचलनं प्रतीयते।[3] वृत्तिविभागः समासासमासभेदेन द्विधा विद्यते। समासयुक्तवृत्तिषु पाञ्चालीलाटीगौडीयारीतयो भवन्ति, आसु लघुमध्यायतसमाससहिता रचना भवतीतिरूद्रटमतम्।[4] समासरहिता वृत्तिरेको विद्यते या वैदर्भीनाम्ना व्यवहीते।[5] आनन्दवर्धनाचार्यः रीतिस्थाने संघटनाशब्दमङ्गीचकार। रसेन सह रीत्या आन्तरिकसम्बन्धं स्वीकृत्य संघटनाया विशद विवेचनं कृतवान्। वैदर्भ्यादि रीतीनामुल्लेखो न विद्यते परमसमासा, मध्यमसमासा, दीर्घसमासेति त्रिधा संघटनाया निरूपणेन ज्ञायते यदानन्दवर्धनस्य वैदर्भ्यादिरीतिषु प्रकारान्तरेण समर्थनमवलोक्यते।[6] रीतिनिरूपणं सुवर्णनाभेन सर्वप्रथमं कृतमस्ति।[7] परमस्मिन् तथ्ये राजशेखरस्य कथनादन्यत् किमपि प्रमाणान्तरं न वर्तते येनेदं मतं नांगीक्रियते। वैदर्भीगौडीपाञ्चालीभेदेन तिस्रा रीतयः सन्ति, आसां देशभेदेन एवं विभागः कृतः—

(क) भारतस्य पूर्वखण्डे, औद्रमागधीप्रवृत्तिः, भरतीवृत्तिः, गौडीरीत्यनुसारं काव्यरचना क्रियते।

---

1. शौरसेनी च गौडी च लाटी चान्या च तादृशी।
   याति प्राकृतमित्येव व्यवहारेषु सन्निधिम्। का०द० 1/41-52. 1/35.
2. इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्।
   तद् भेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिताः।।
   इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।
   तथापि न तथा ख्यातुं सरस्वत्यपि शक्यते। तत्रैव० 1/101-102.
3. हर्षचरितसारः 1/7.
4. नाम्नां वृत्तिर्द्वेधा भवति समासासमासभेदेन।
   वृत्तेः समासवत्यास्तत्रस्यू रीतयस्तिस्रः। रूंद्रट का०लं० 2/3.
5. पाञ्चाली लाटीया गौडीया चेति नामतोऽभिहिताः।
   लघुमध्यायतविरचनसमासभेदादिमास्तत्र।। तत्रैव० 2/4.
5. वृत्तेरसमासा या वैदर्भी रीतिरेकैव। तत्रैव० 2/6.
6. असमासा समासेन मध्यमेन च भूषिता।
   तथा दीर्घसमासेति त्रिधा संघटनोदिता। ध्वा०लो० 3/5.
7. रीतिनिर्णयं सुवर्णनाभः। काव्यमीमांसा अ० 1 पृ० 3.

(ख) पाञ्चालदेशे–पाञ्चाली मध्यमाप्रवृत्तिः, सात्वत्यारभटी वृत्तिः, पाञ्चाली-रीत्यनुसारं रचना विधीयते।

(ग) अवन्तिदेशे–आवन्तिप्रवृत्तिः सात्वतीकैशिकीवृत्त्यनुरूपं काव्यं क्रियते, अतोऽत्र विचक्षणाः रीतिं नैव विचारयन्ति।

(घ) दक्षिणदेशे दाक्षिणात्या प्रवृत्तिः कैशिकीवृत्तिर्वैदर्भीरीतिरित्येतनुसारं रचना भवति।[1]

वृत्तयःप्रवृत्तयश्चतस्रो नानासंख्याकादेशाश्चतुर्षुदेशेषु वृत्तिप्रवृत्तीनां सामञ्जस्य विषये वक्तुं शक्यते यदनन्तदेशानपि चतुर्धा विभज्य कवयः कार्य-निर्वाहं कुर्वन्ति। सामान्येन तु समग्रदेशः चक्रवर्तिक्षेत्रं विद्यते।[2] तत्र वेशविन्यास-क्रमः प्रवृत्तिः, विलासविन्यासक्रमो वृत्तिः, वचनविन्यासक्रमो रीतिः।[3] राजशेखरमते तिसृषु रीतिषु सरस्वती साक्षाद्रूपेण निवसति। रीतियुक्तानि वाक्यानि काकुः विविधत्वेन करोति।[4] धनञ्जयमते भारती शब्दवृत्तिर्वर्तते, अन्यास्तिस्रोऽर्थवृत्तयः सन्ति।[5] कुन्तको रीतिविषये मनसि-अरुचिं विधाय कविप्रस्थानहेतवस्त्रीन् मार्गान् प्रतिपादयामास।[6]

काव्यरचनायाः कारणभूताः सुकुमारमार्गः, विचित्रमार्गः, मध्यममार्गश्चैतत्त्रयो मार्गास्सन्ति। सर्वस्यमार्गस्य माधुर्यप्रसादलावण्याभिजात्याख्या चत्वारो गुणाः स्वीकृताः।[7] रीङ्गतौ धातुना रीतिशब्दो निष्पद्यते। वैदर्भी गौडी पाञ्चाली अवन्तिका, लाटी मागधी, इमा रीतयः काव्ये मार्गशब्देनोच्यन्ते।[8]

---

1. काव्यमीमांसा अ० 3, 7 द्रष्टव्य।
2. का०मी० तृतीय आ० पृ० 23.
3. तत्रैव० अ० पृ० 22.
4. वैदर्भी गौडीया पञ्चाली चेति रीतयस्तिस्रः
   आसुच साक्षान्निवसति सरस्वती तेन लक्ष्यन्ते।।
   रीतिरूपं वाक्यं त्रितयं काकुः पुनरनेकयति। तत्रैव०
5. द०रू० द्वितीय प्रकाशः 60-61 वृत्तौ पृ० 143.
6. संप्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।
   सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः। व०जी० 1/24.
7. व०जी० 1/30-33.
8. वैदर्भादि कृतः पन्थाः काव्ये मार्ग इति स्मृतः।
   रीङ्गतावितिधातोः सा व्युत्पत्या रीतिरुच्यते।।
   वैदर्भी चाथ पाञ्चाली गौडीयावन्तिका तथा।
   लाटीया मागधी चेति षोढा रीतिर्निगद्यते। सं०कं०भ० 2/27-28.

भोजदेवो वृत्तीनां द्वादशभेदान्[1] निरूप्य, वृत्ती नांरीतीनां च चतुर्विंशति-शब्दालंकारेष्वन्तर्भावं चकार।[2] रीतिशब्दस्यार्थः कविगमनाऽनुरूपमार्गोऽस्ति। रीतीनां वृत्तीनां चाभेदो दृश्यते।[3] उपनागरिका, परुषा, कोमलेतितिस्रो वृत्तीर्लक्ष्ययित्वा वामनादीनांमते एता वृत्तयः सन्तीति ज्ञायते।[4] उद्‌भटं विहाय मम्मटात् पूर्वं न केनापि इमा वृत्तयः एभिर्नामभिः स्वीकृताः।

वृत्तिशब्दस्यार्थः नियतवर्णेषु स्थीयमानः रसविषयको व्यंजनाव्यापारोऽस्ति।[5] मम्मटेन यथा त्रयो गुणाः स्वीकृतास्तथैव तिस्रो वृत्तयः स्वीकृताः। अग्निपुराणे पाञ्चालीगौडीवैदर्भीलाटीभेदेन चतुर्विधा रीतयः प्रतिपादिताः।[6]

वाग्भटेन भूयान्समासैर्गौडीया रीतिः असमस्तैःपदैर्वैदर्भीरीतिरङ्गीकृता[7]। जयदेवोऽपि चतसृणां रीतीनां समर्थकोऽस्ति।[8] विश्वनाथेन पदानां संघटनं रीतिरित्युच्यते इति प्रतिपादितम्। सा रीतिरंगसंस्थानवत् स्वीकृता। रस भावादीनामुपकारकर्त्री सा रीतिवैदर्भीगौडीपाञ्चालीलाटीभेदेन चतुर्विधा

---

1. मुहुरावर्त्यमानेषु यः स्ववर्गेषु वर्तते।
   काव्यव्यापी स सन्दर्भो वृत्तिरित्यभिधीयते।।
   कर्णाटी कौन्तली कौङ्की कौङ्कणीवानवासिका। द्रावडी माथुरी मात्सी मागधीतम्रलिप्तिका। औड्री पौण्ड्रीति विद्विद्भिःसा द्वादशविधेष्यते। सं०कं०भ० 2/78-80.
2. चतुर्विंशतिरित्युक्ताः शब्दालंकारजातयः। तत्रैव० 2/4.
3. केषाञ्चिदेता वैदर्भी प्रमुखारीतयोमताः।
   एतास्तिस्रो वृत्तयः वामनादीनां मते वैदर्भीगौडीपाञ्चालाख्या रीतयो मताः। तत्रैव०
4. का०प्र० 8/107-110.
5. वृत्तिर्नियतवर्णगतो रसविषयो व्यापारः। तत्रैव० पृ० 404.
6. वाग्विद्या सम्प्रतिज्ञाने रीतिः सापि चतुर्विधा।
   पाञ्चाली गौडदेशीया वैदर्भी लाटजस्तथा।।
   उपचारयुता मृद्वी पाञ्चाली ह्रस्वविग्रहा।
   उपचारैर्नबहुभिरूपचारैर्विवर्जिता।।
   नातिकोमलसन्दर्भा वैदर्भी मुक्तविग्रहा।।
   लाटीया स्फुटसन्दर्भा नाति विस्फुरविग्रहा। अ०पु०अ० 340/1/4.
7. द्वे एव रीती गौडीया वैदर्भी चेति सान्तरे।
   एका भूयः समासा स्यादसमस्तपदा परा।। वाग्भटा० लं० 4/159.
8. पाञ्चालिकी च लाटीया गौडीया च यथा रसम्।
   वैदर्भी च यथासंख्यं चतस्रो रीतयः स्मृताः।। चं०लो० 6/22.

विद्यते।[1] गुणव्यंजकवर्णानामाधारेण रीतीनां लक्षणानि विहितानि।[2] कैश्चिदाचार्यैः केवलं रीतीनां निरूपणं कृतम्, कैश्चिद् रीतीनां वृत्तीनां प्रवृत्तीनां च प्रतिपादनं विहितम्, एषां भेदः पूर्वमपि प्रतिपादितः, रीतीनांनामकरणं देशस्याऽथवा प्रान्तस्याधारेण भवति, वृत्तीनां नामकरणं मम्मटेन गुणव्यञ्जकवर्णानामाधारेण विहितम्।

प्राक्तनसमये रीतीनां सम्बन्धः तत्प्रान्तनाम्न आसीदिति रीतीनां नामानुसारं काव्यमीमांसानुसारं च ज्ञायते। रीत्यपरपर्यायः शैलीशब्दस्यार्थोऽपि काव्यरचना-प्रकारो अथवा काव्यरचनापद्धतिर्वर्तते। शैली कवेरभिप्रायं सूचयति यादृशैः शब्दैः कविः स्वभावान् व्यनक्ति सा शैलीत्युच्यते। अलंकाराः शैलेरुपकारकाः सन्ति। कस्य कवेरियंरचना इति ज्ञातुं शैली अस्माकं साहाय्यं विदधाति।[3] आचार्याणामियं शैली यत् सामान्येनाभिधाय विशेषेण विवृणोति।[4]

गुणरीत्योः सम्बन्धः—

नाट्यशास्त्रे रीतिमन्तरा वृत्तीनां प्रवृत्तीनां च निरूपणं कृतमस्ति,[5] नाट्यशास्त्रानुरूपं साक्षात् गुणरीत्योः सम्बन्धः स्थापयितुं न शक्यते। भामहोऽपि माधुर्यादिगुणानां रीतिभिःसह प्रत्यक्षरूपेण गुणसम्बन्धं न स्वीचकार। भामहेन माधुर्यप्रसादलक्षणे समासाभावःप्रतिपादितः। ओजो गुणो बहुभिः समासै र्युक्तो भवति।[6] यथा गुणलक्षणे समासाभावः समासस्याधिक्यं विद्यते, तथैव वैदर्भमार्गे गौडमार्गे च क्रमेण समासाभावः समासबाहुल्यं च भवति। अनेन रीतिर्गुणयोः पारस्परिकसम्बन्धोंऽशतः प्रकटीभवति। श्लेषादयो दशगुणा वैदर्भमार्गस्य प्राणास्सन्तीति प्रमाणेन गुणानां सम्बन्ध उभाभ्यांमार्गाभ्यां सह प्राणत्वेन वर्त्तते। एषु श्लेषादिगुणेषु केषांचिद् गुणानां विपर्ययो गौडमार्गे दृश्यते।[7] रीतेः प्राणा यदि गुणाःसन्ति तदा गुणैर्विना रीतेर्नकिमप्यस्तित्वं-

---

1. पदसंघटनारीतिरङ्गसंस्थाविशेषवत्।
   उपकर्त्री रसादीनां सापुनः स्याच्चतुर्विधा।।
   वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा। सा०द० 9/1.
2. स०द० 1/2/3.
3. द्रष्टव्य—भारतीयकाव्यशास्त्र की भूमिका डॉ० नगेन्द्र पृ० 40.
4. वाचस्पत्यम् पृ० 604.
5. ना०शा० 6/24-25.
6. भा०कं०ल० 2/1-3.
7. का०द० 1/42.

विद्यते। रीतिरवयवरूपाऽस्ति तस्मिन् सञ्चारो गुणैरायाति। यस्मादनयोः सम्बन्धो अङ्गाङ्गिभावरूपेण वर्तते। आचार्यवामनेन काव्यस्यात्मा रीतिः प्रतिपादिता,[1] तस्या रीते रचना विशिष्टपदैर्भवति[2]। तत्र रीतौ वैशिष्टयं गुणैर्जायते[3], अस्मात् प्रतीयते यद्वामनोऽपि प्रकारान्तरेण दण्डीमतमबोधयत्। यथा दण्डी वैदर्भमार्गस्य प्राणत्वेन दशगुणान् स्वीचकार, तथैव वामनोऽपि समग्रगुणयुक्तं वैदर्भीरीतिं प्रतिपादयामास।[4]

तयोर्मते गुणरीत्योः पारस्परिकसम्बन्धः समानरूपेण विद्यते। वामनेन रीतिनिरूपणं गुणानाधृत्य विहितम्, यतो हि सम्यग्गुणयुक्ता वैदर्भीरीतिर्वर्तते ओजःकान्तिसमन्विता गौडीरीतिर्भवति[5] माधुर्यसौकुमार्यसमन्वितं पाञ्चाली-रीतेर्लक्षणं विद्यते।[6] अतो गुणाः रीतेर्जीवनाधायका वर्त्तन्ते।

समासासमासभेदेन वृत्तिर्द्विधाभवति, तयोः समासवत्यावृत्तेः पाञ्चालीलाटी-गौडी एता तिस्रोवृत्तयः संभवन्ति। आसु क्रमेण लघुमध्यमायतसमासाः भवन्ति।[7] रीतीनां वृत्तीनां च पृथग् निरूपणं विद्यते। अनुप्रासालंकारान्तर्गता मधुरा, प्रौढ़ा, परूषा, ललिता, भद्रा एताः पञ्चवृत्तयः प्रतिपादिताः। वृत्तीनां यादृशानि नामानि, तादृशानां मधुरपरुषादिव्यंजनानां प्रयोगेण-इमा वृत्तयोऽवगम्यन्ते।[8] रुद्रटः रीतिरसयोः सम्बन्धस्थापने प्रथमं स्थानमविन्दत्। इतःपूर्वं न केनापि रीतिरसयोः सम्बन्धो निरूपित आसीत्। आनन्दवर्धनस्य संघटनानिरूपणं समासाभावः, समासदैर्ध्य, अल्पसमासश्च रुद्रटमनुसरति। प्रेयः करुणादद्भुतभयान-केषु वैदर्भीपाञ्चाली द्वे एव रीती प्रयोक्तव्ये। रौद्ररसे—

---

1. का०लं०सू० 2/6.
2. तत्रैव० 2/7.
3. तत्रैव० 2/8.
4. तत्रैव० 2/11.
5. का०लं०सू० 2/12.
6. का०लं०सू० 2/13.
7. नाम्नां वृत्तिर्द्वेधा भवति समासासमासभेदेन।
   वृत्तेः समासवत्यास्तत्रस्यू रीतयस्तिस्रः।।
   पाञ्चाली लाटीया गौडीया चेति नामतोऽभिहिताः।।
   लघुमध्यायुतविरचन् समासभेदादिमास्तत्र।। रुद्रट०क०लं० 2/3-4.
8. मधुरा प्रौढा परुषा ललिता भद्रेति वृत्तयः पञ्च।
   वर्णाणां नानात्वादस्येति यथार्थनाम फलाः।। तत्रैव० 2/19.

लाटीगौड्योर्द्वयोः रीत्योः प्रयोगो विधातव्याः।[1] अन्येषु रसेषु यथौचित्यं रीति-प्रयोगः कर्तव्यः। रसेन सह गुणानां सम्बन्धकारणाद्रीतिगुणयोः सम्बन्धोऽधिकं पुष्यति गुणानां रसधर्मत्वाद् गुणानां रीतेरात्मकत्वाच्च।

संघटनाया गुणानां च पारस्परिकसम्बन्धमादाय समासेन विवेचनं विद्यते, असंलक्ष्यक्रमव्यंग्यः संघटनायामपि अभिव्यक्तो भवतीति[2] प्रतिपादयितुं संघटनाया असमासासमासामध्यमसमासाश्चेति त्रयोभेदा वर्तन्ते।[3] क्रमेणैते वैदर्भी-गौडीपाञ्चालीरीतीनां प्रातिनिध्यं विदधति, इयं त्रिविधा रीतिः मम्मट-स्योपनागरिका कोमला परुषा त्रिविधा वृत्तिर्वर्तते।

संघटनागुणयोः पारस्परिकसम्बन्धविषये त्रयःपक्षाः सन्ति माधुर्यादि-गुणानाश्रित्य संघटनारसान् व्यनक्ति तस्याः संघटनाया औचित्यनियन्त्रणं वक्तुर्वाच्यार्थस्याधीनं वर्तते।[4] संघटनाविषयकास्त्रयः पक्षाः संक्षेपेण एवं प्रकारेण वर्त्तन्ते।

(क) संघटनाया गुणानामैक्यं–इति प्रथमः पक्षः।

(ख) संघटनाश्रिता गुणा इति द्वितीयः पक्षः।

(ग) गुणाश्रिता संघटना–इति तृतीयः पक्षः।

1. गुणरीत्योरभेदपक्षे "गुणानाश्रित्य" कारिकाऽनुसारं संघटना माधुर्यादि-गुणानाश्रित्य रसान् प्रतिपादयति।
2. संघटनाश्रयगुणपक्षे संघटनागुणयोश्च क्रमेणाधाराधेयसम्बन्धो द्योत्यते। अस्मिन् पक्षे संघटना आधारभूता विद्यते गुणाश्चाधेयभूता, अतः सा संघटना गुणाश्रया सती रसादीन् व्यनक्ति।
3. गुणाश्रया संघटना पक्षे–गुणा आधारभूतावर्तन्ते। संघटना आधेयरूपा भवति, अस्मात् संघटना गुणानाश्रित्य रसादीन् प्रकाशयति।[5]

---

1. वैदर्भीपाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः।
   लाटीया गौडीये रौद्रे कुर्याद् यथौचित्यम्। तत्रैव० 15/20.
2. अलक्ष्यक्रमव्यंग्यः संघटनायां भासते ध्वनिरित्युक्तम्, तत्र संघटनास्वरूपमेव तावन्निरूप्यते।। ध्व०लो० वृत्तौ पृ० 167.
3. असमासा समासेन मध्यमेन च भूषिता।
   तथा दीर्घसमासेति त्रिधा संघटनोदिता।। तत्रैव० 3/5.
4. गुणानाश्रित्य तिष्ठन्ति माधुर्यादीन् व्यनक्ति सा।
   रसास्तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः।। तत्रैव० 3/6.
5. विशेषविवरणार्थ द्रष्टव्यः ध्व०लो० 3/6-9.

एषु त्रिषु पक्षेषु गुणाश्रयसंघटनापक्षोऽतितरां पुष्यति। सुकुमारविचित्रमध्यम-भेदेन त्रयो मार्गाः सन्ति।[1] त्रयाणां मार्गाणां माधुर्यप्रसादलावण्याभिजात्याख्या चत्वारो गुणाः स्वीकृताः, त्रयाणां मार्गाणां ये चत्वारो गुणा वर्तन्ते, सर्वस्मिन् मार्गे तेषां स्वरूपनिर्धारणे पार्थक्यमवलोक्यते। औचित्यसौभाग्याख्यौ समग्रमार्गस्य साधारणगुणौ स्वीकृतौ।[2] विशेषतः पदवाक्यप्रबन्धेष्वनयोर्व्यापकत्वं दृश्यते। अनेन प्रकारेण कुन्तकस्य गुणरीत्योः सम्बन्धे वैलक्षण्यं प्रतिभाति।

देशभेदेन रीतीनां भेदकरणं न न्याय्यम्, देशानामानन्त्याद् रीतिभेदानामपि आनन्त्यं प्रसज्यते। उत्तमाधममध्यमभेदेन रीतीनां विभागोऽपि न चरितार्थतामेति। यतोहि वैदर्भीरीतेःसदृशं सौन्दर्यं सहृदयहृदयाह्लादकरं अन्यासु रीतीष्वविद्यमानत्वात् मध्यमाधमभेदौ वैफल्यमेष्यतः।[3] मम्मटेन रीतिस्थाने उद्भटानुसारं उपनागरिका कोमला परुषाख्या तिस्रोवृत्तयः प्रतिपादिताः। यदेता वृत्तयः वामनप्रभृतिभिः रीतिनाम्ना स्वीकृताः, आसांवृत्तीनां लक्षणानि गुणव्यंजकवर्णानामाधारेण विहितानि। माधुर्यव्यञ्जकैर्वर्णैरुपनागरिका, ओजोगुण व्यंजकैर्वर्णैः परुषा, एवं च प्रसादगुणाऽनुरूपं कोमलावृत्तिश्च स्वीकृता।[4] वृत्तीनामाधारो गुणव्यंजकवर्णाः, गुणाः रसस्य धर्माः, रसः शब्दार्थमय संघटनायां भवति। अस्माद्गुणरीत्योः पारस्परिकं तारतम्यं विद्यते। प्रथमवाग्भटो यथेष्टं रीतेरनिर्वाहं रीतिभ्रष्टदोषमिति कथयामास।[5] अनेन वैदर्भीगौडीरीत्योर्निरूपणमकारि।[6] अस्य मते द्वे एव रीती विद्येते, अयं हि गुणरीत्योः पारस्परिक सम्बन्धविषये न किमप्युक्तवान्। विश्वनाथस्य वैदर्भीगौडीपाञ्चालीलाटी रीतीनां लक्षणानि मम्मटस्य वृत्तीनां लक्षणानामिव माधुर्यादिगुणव्यञ्जकवर्ण समन्वितानि सन्ति।[7] मम्मटस्य वृत्तिलक्षणेभ्यो विश्वनाथस्य रीतिलक्षणेषु एतदेव भेदो विद्यते यद् विश्वनाथेन वैदर्भीलक्षणे समासाभावः, गौडीलक्षणे समास-

---

1. व०जी० 1/24.
2. तत्रैव० 1/30-57.
3. तत्रैव० 1 पृ० 97-98.
4. का०प्र० 9/80.
5. रीतिभ्रष्टमनिर्वाहो यत्र रीतेर्भवेद्यथा। वा०लं० 2/24.
6. द्वे एव रीती गौडीया वैदर्भी चेति सान्तरे।
   एका भूयः समासस्यादसमस्तपदा परा। तत्रैव० 4/149.
7. वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा। सा०द० 9/2.

बाहुल्यं पाञ्चालीलक्षणे पंचषट्पदानां समासः प्रदर्शितः, वैदर्भीपाञ्चाल्योरन्तराले लाटी रीतिः स्वीकृता।[1] विश्वनाथोऽपि ध्वनिकारवत् प्रकारान्तरेण रीतिलक्षणे संघटनाशब्दं निवेश्य रीतेरङ्गत्वेन निरूपणं चकार। रीतिः रसादीनामुपकर्त्री विद्यते।[2] कर्णपूरगोस्वामिना, गुणहेतुकधर्मविन्यासविशेषो रीतेः स्वरूपं प्रतिपादितम्। सा रीतिर्विश्वनाथानुरूपं चतुर्धा निरूपिता।[3]

समग्रगुणयुक्ता समासाभावेऽल्पसमासे सति श्रृंगाररसे करुणे च वैदर्भीरीतिराद्रियते।[4] वैदर्भीरीत्या आम्रपाक एव सहायः प्रतिबोधितः।[5] गाढत्वशैथिल्यरहितः कथाप्रायोर्थो यत्र तत्र माधुर्यगुणयुक्ता पाञ्चाली रीतिर्विद्यते।[6] निष्ठुराक्षरैःसमन्विता, अनुप्रासबहुला, दीर्घसमासयुक्ता, ओजोगुणसहिता गौडीरीतेर्लक्षणं विद्यते।[7] लादिभिर्यमलाक्षरैर्यत्रशैथिल्यमुत्कटतां भजते तत्राऽनुप्रासनिर्भरा लाटजनप्रिया लाटी रीतिर्भवति।[8] कर्णपूरेण वामनवत् समग्रगुणोपेता वैदर्भीरीतिः प्रतिपादिता तथा श्रृंगारादिरसे रुद्रटवदस्यासद्भावोऽप्यभिहितः। अनेन प्रसादगुणस्य व्यञ्जिका रचनैव स्वीकृता, तत्र वर्ण प्राधान्यं न स्वीकृतम्।[9] रीतिलक्षणेषु माधुर्यादिगुणानां प्रयोगः कृतः अतोऽस्य मतानुसारं गुणरीत्योः पारस्परिकसम्बन्धः अवश्यंभावी विद्यते। यद्यपि गुणानां व्यञ्जकका वर्णा एव भवन्ति, रचनादीनां गुणव्यंजकत्वमभीष्टम्।[10]

---

1. सा०द० 9/2-5.
2. पदसंघटनारीतिरंगसंस्थाविशेषवत्।
   उपकर्त्री रसादीनां, तत्रैव० 9/1.
3. रीतिः स्याद्धर्मविन्यास विशेषो गुणहेतुकः।
   वैदर्भ्यादि विशेषेण चतुर्धा सा निगद्यते। अलं०कौ० 9/329-330.
4. अवृत्तिरल्पवृत्तिर्वा समस्तगुणभूषिता।
   वैदर्भी सातु श्रृंगारे करुणे च प्रशस्यते।। अलं०कौ० 9/331.
5. पाकोऽप्यस्याः सहायः स्यादाम्रवार्ताकुपाकवत्। तत्रैव० 9/332.
6. अलंकारकौस्तुभः 9/334.
7. तत्रैव० 9/335.
8. तत्रैव० 9/336.
9. प्रसादस्य व्यञ्जिका तु केवलं रचना मता।
   न तत्र वर्ण प्राधान्यं प्रसादो विशदर्थता।। तत्रैव० 6/194.
10. व्यंजकाः स्युर्वर्णाश्च रचना अपि। तत्रैव० 6/189.

रचनाद्या गुणपरतन्त्रा सन्ति वक्त्रादेरौचित्याद् गुणोऽपि रचनाधीनो भवति। अतो गुणाऽपि क्वचिद् रचनाऽनुरूपा जायन्ते। गुणाः परतन्त्रास्सन्ति, वक्त्राद्यौचित्यवशाद्ररचना गुणाधीना भवति तस्माद् गुणा अपि रचनाधीना वर्तन्ते।[1]

प्राचीनैर्वर्णरचनादीनामपि पृथग्रूपेण व्यंजकत्वं प्रतिपादितम्, परं नवीनानां मतमितो भिन्नं विद्यते। वर्णविशेषारचनाविशेषाश्च माधुर्यादिगुणानां व्यंजका भवन्ति, गुणाश्रयीभूतानां रसानां व्यंजका न विद्यन्ते। रसादीनां संख्या वृद्धिभिया वर्णाःरचनाश्च रसाभिव्यंजका न विद्यन्ते। यदि वर्णा रचनाश्च माधुर्यादिगुणानां व्यंजकास्तदा गुणाश्रयरसादयोऽपि व्यंजकास्स्वीकर्तव्याः। यद् ''गुणी'' गुणानां व्यंजकत्वं नास्ति, गुणाश्रयाणामभिव्यक्तिं विना गुणानामभिंव्यक्तिर्न जायते इति कथनं न संगच्छते, यतोहि एष नियमः ध्राणरसनाश्रोत्रेन्द्रियत्रये व्यभिचरति। एभ्य इन्द्रियेभ्यः ''गुणी'' इत्यस्याभिव्यक्तिं विनैव गुणानामभिव्यक्तिर्भवति, यथा घ्राणेन्द्रियात्, गन्धगुणस्याऽभिव्यक्तिर्जायते, परं गन्धाश्रयस्य ''गुणी'' पृथिव्या अभिव्यक्तिर्नजायते। जिह्वया रसस्य प्रतीतिस्तु भवति न रसाश्रयजलस्य। कर्णाभ्यां शब्दोऽनुभूयते परं शब्दाश्रयाकाशस्याभि- व्यक्तिर्न सम्भवा। अनेन प्रकारेण पञ्चज्ञानेन्द्रियेभ्यः ''गुणी'' गुणेत्येतद्भिन्नाः तटस्थादयः पदार्था अपि परस्परं सम्मिलितरूपेण कदाचिदौसीन्येनाऽपि यथार्थज्ञानविषयभाजो भवन्ति, तथैव ''गुणी-रसो, माधुर्यादि गुणाश्चाभिव्यक्ते- र्विषयो वर्तन्ते वाक्यपदरचनादिभ्यः पृथग् व्यंजकेभ्य उपस्थिता भवन्ति अतो वर्णा रचनाश्च रसव्यंजका न विद्यन्ते, केवलं माधुर्यादयो गुणाः रसव्यंजकास्सन्तीति नवीना अनुमन्वते।[2] अतो जगन्नाथमते रीतिभ्यो वर्णेभ्यश्च गुणा अतिरिच्यन्ते रसव्यंजकहेतुत्वात्। प्रदर्शितरीत्यनुसारं दण्डिना वामनेन च गुणरीत्योः पारस्परिक-

---

1. यद्यपि गुणपरतन्त्रा रचनाद्यास्तदपि वक्त्रादेः।
   औचित्यात्तद्धीना भवन्ति तस्माद् गुणोऽपि तदधीनः। अलं०कौ० 6/194.
2. वर्णरचनाविशेषाणां माधुर्यादिगुणाभिव्यंजकत्वमेव, नतु रसाभिव्यंजकत्वम्, गौरवान्मानाभावाच्च। न हि गुण्यभिव्यंजनं विना गुणाभिव्यंजकत्वं नास्तीत्यस्ति नियम, इन्द्रियत्रये व्यभिचारात्। इत्थं च स्वस्वव्यंजकोपनीतानां गुणिनां गुणानामुदासीनानां च यथा परस्परं श्लेषेणौदासीन्येन वा तत्तत्प्रमिति गोचरता, तथा रसानां तद्गुणानां चाभिव्यक्तिविषयतेति तु नव्याः रसगंगाधरः। प्रथमाननम् पृ० 405.

साम्यमभिधाय, गुणा रीत्याः प्राणत्वेन व्यवस्थापिताः। रुद्रटेन वैदर्भ्यादिरीतिषु समासाभावः, दीर्घसमासः, अनतिसमासः प्रतिपादितः, एवं च–रीतीनां सम्बन्धो रसैःसह स्थापितः, रुद्रटानुसारं ध्वनिवादिभिराचार्यैः रीतिनिरूपणमकारि। आनन्दवर्धनेन गुणाश्रया रीतिः प्रतिपादिता अन्यथा नियतविषयगुणानामप्यनियत-प्रसंग आपतति।

मम्मटेन रीतिस्थाने तिस्रो वृत्तयः स्वीकृताः, गुणव्यंजकवर्णानामाधारेण वृत्तीनां लक्षणानि विहितानि। गोस्वामिना, गुणहेतुकधर्मविन्यासविशेषेण रीतिलक्षणं विहितम् प्रत्यक्षरूपेण वैदर्भ्यादिरीतिलक्षणेषु गुणानां रसानां च विनिवेशः कृतः। प्रसादगुणस्य व्यञ्जिका रचना वर्तते। तथा च गुणाधीना रचना रचनाधीनो गुणोऽपि वर्त्तते, यथा मम्मटेन वृत्तिलक्षणेषु गुणव्यंजकवर्णानामाधारः कल्पितस्तथैव विश्वनाथेन रीतिलक्षणेषु गुणव्यञ्जकवर्णानामाधारः परिकल्पितः परमाधिक्येन रीतिलक्षणेषु विश्वनाथेन रुद्रटवत् समासाभावः, दीर्घसमासादीनामस्तित्वं प्रतिपादितम्। सर्वेभ्यो मतेभ्यो आनन्दवर्धनस्यैवमतं रूचिकरं प्रतिभाति रीतिर्गुणाश्रिता विद्यते, सा रसधर्माणां गुणानामाश्रयीभूय रसाभिव्यक्तिं कारयितुं समर्था भवति। रचनायां तत्तद्गुणाऽनुरूपव्यञ्जकवर्णानां प्रयोगो जायते येन रचनाऽपि शब्दद्वारा गुणानामुपकारं विदधाति। रीतिभ्यो गुणा अतिरिच्यन्ते रसानां नित्यधर्मत्वात्, प्रतिपादितदिशा रीतेः संघटनामार्गवृत्तिनामभिराचार्यैर्भिन्न-त्वेन निरूपणं कृतम्। वास्तविकरूपेण रीतेः, काव्यशोभाऽपरपर्यायभूतस्य सौन्दर्यस्य, संघटनायावृत्तेश्चान्तर्भावो रीतौ भवतीति। एभिः प्रमाणैरिदं निश्चेतुं शक्यते रीतिर्गुणमाश्रयति रचनासु शब्दार्थाभ्यां गुणारीतिमुपकुर्वन्ति।

अलंकारसिद्धान्तः

अस्माकं पुरस्ताद् भरतभामहादिभ्यः प्राक्तना अलंकारविषयकग्रन्था न वर्तन्ते, तथापि वेदेषु उपमाद्यलंकाराणां प्रभूताः प्रयोगाः लभ्यन्ते, यैः प्रतीयते यदलंकारसिद्धान्ते मूलरूपेण हेतुभूता वेदा एव वर्तन्ते। ऋग्वेदे पर्याप्त्यर्थे, भूषणार्थेऽलंकारशब्दस्य बहुधा प्रयोगा दृग्गोचरीभवन्ति, तत्र "अरंकार" शब्दस्य प्रयोगो वर्तते, न तु स्फुटरूपेणालंकारशब्दस्य, तथापि (लकारस्य रत्वं छान्दसम्)

इति नियमात् सः "अरंकार" शब्दोऽलंकारार्थे प्रयुक्तोऽस्ति।[1] ऋग्वेदस्थमन्त्रेषु "उपमा" शब्दस्य प्रयोग उपमालंकारस्य प्राचीनत्वं द्योतयति। स्कन्दव्याख्यायां, उपमाशब्दस्यार्थो 'गन्त्रीणां बह्वीनांमध्ये उपमानभूता अत्यन्तोत्कृष्टः" अथवा दीप्यमानानां मध्ये प्रथमा अर्थात्–उत्कृष्टरूपोऽर्थो वरीवर्ति।[2]

ऋग्वेदस्थेषु बहुषु मन्त्रेषु दृष्टान्तानुप्रासोपमालुप्तोपमाद्यलंकारणामस्तित्वं संलक्ष्यते।[3] अनेनैतन्निश्चितो जायते यदलंकाराणां प्रयोगः वेदसमयेऽप्यासीत्, परमलंकाराणां स्वरूपनिर्धारणं आसीत् नवेति सुस्पष्टं किमपि प्रमाणं नोपलभ्यते। राजशेखरेण प्रतिपादितं यदनुप्रासयमकचित्रशब्दश्लेषवास्तवोपमातिशयोक्ति अर्थश्लेषोभयालंकाराणां निरूपणं क्रमेण प्रचेतः, यमः, चित्रांगदः, श्लेषः पुलस्त्यः, ओपकायनः, पाराशरः, उतथ्यः, कुवेरः, इत्यदिभिः कृतमासीत्।[4] उपर्युक्तालंकाराणां निरूपणाभिधाने राजशेखरेण क आधारः समवलम्बित इति ज्ञातुं न शक्यते।" अलंक्रियतेऽनेन इति अलंकारः, अलंकरोतीति अलंकारः–अनयोर्द्वयोर्व्युत्पत्याधारेण, येन अलंक्रियते, योऽलंकरोति स अलंकारो भवति। अलंकारवादिभिः सर्वैराचार्यैः काव्येऽलंकाराणां प्राधान्यं स्वीकृतमासीत्, उपलब्धसाहित्ये सर्वप्रथमं भरतमुनिः शब्दालंकारयमकस्य, अर्थालंकारोपमारूपकदीपकानां च चतुर्णामलंकाराणां निरूपणं व्यधात्।[5]

अलंकाराणां महद् वैशिष्टयं सर्वप्रथमं भामह एवाऽन्वभवत्। तेन अलंकाराणां महत्वं स्वीकुर्वता प्रतिपादितम् यथा वनिताननं कटककुण्डलादीनामभावेऽत्यन्तं

---

1. वायवा याहि दर्शतेमे सोमा अरंकृताः तेषांपाहि श्रुधीहवम्।
   ऋ०वे० 1/1/3/2 पृ० 12 प्रथमोभागः
   ईलते त्वामवस्यवः कृण्वासो वृक्तवर्हिषः आविष्मन्तो अरंकृतः।
   तत्रैव० 1/1/26 ऋ० 5, पृ० 82.
   ऋ०वे० 1/3/7 सू० 162 पृ० 1048.
2. ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यष्वैत्। तत्रैव० 1/8/3 ऋ० 15.
   सहस्र साग्निवेशि गृणीषे शत्रिमग्न उपमां केतुमर्यः। तत्रैव० 5/3/34 ऋ० 9.
3. ऋ०वे० द्वितीय भागः अ० 2. अ० 7, व० 19, म० 2, अ० 4 सू० 34, ऋ० 6, पृ० 143. तत्रैव० 2/2/21. तत्रैव० 1/7/30, तत्रैव० 2/5/21.
4. का०मी० 1/3-4.
5. ना०शा० 16/40.

रूचिकरं न भवति तथैव अलंकाररहितं काव्यं न शोभते।[1] काव्यालंकाराद्– ज्ञायते यद् भामहात् पूर्वमपि अलंकाराः शब्दालंकारार्थालंकारविभागद्वये विभक्ता आसन्, भामहेनापि अलंकाराणामुभयत्वं स्वीकृतम्।[2] सर्वप्रथममलंकारवादिषु भामहः प्रथमं स्थानमविन्दत्। अस्यमते अलंकारः, अलंकारको न भूत्वा स्वयमेवालंकार्यो वर्तते। भामहादारभ्य अच्युतरायपर्यन्तं प्रायः सर्वैराचार्यैर- लंकाराणां निरूपणं विहितम्, परं दण्ड्युद्भटरुद्रटभोजदेववाग्भटरूय्यका- दयोऽलंकारसिद्धान्तप्रवर्त्तकेषु मुख्यभूता वर्तन्ते अस्य सिद्धान्तस्याऽनुयायिनः, प्रतिहारेन्दुराजजयदेवाप्ययदीक्षितादयास्सन्ति, काव्ये अलंकारमहत्वप्रतिपाद- कैराचार्यैः रसस्य (व्यंग्यार्थस्य) गुणरीत्यादीनां विषयेऽपि यथाकथंचित् निरूपणं- कृतम्, परं मुख्यरूपेणालंकाराणां महत्वमुररीकृतम्। अलंकारवादिनोऽपि रसमहत्वंजानन्तिस्म, परं तैर्विच्छित्या-रसः-अलंकारत्वेन प्रतिपादितः। आचार्यदण्डिना सर्वेषां काव्यतत्वानां कृतेऽलंकारत्वेन व्यपदेशः कृतः।[3] रसमहत्वंजानन्नपि रसस्य रसवदाद्यलंकारेष्वन्तर्भावो विहितः।[4] रीतिसिद्धान्त- प्रवर्तको वामनः काव्येऽलंकाराणां किं स्थानमित्यस्मिन् विषये अवोचत्, काव्यमलंकारयोगेन ग्राह्यं भवति, काव्यशब्दोऽयं गुणालंकारसहितयोः शब्दार्थयोर्बोध ाकोऽस्ति परं लक्षणया केवलं शब्दार्थमात्रबोधकः काव्यशब्दो गृह्यते।[5] अलंकारेण काव्ये काव्यत्वं जायते इत्युंक्त्वा सौन्दर्यस्याभिवर्धकोऽलंकारोऽस्तीति- वामनोऽलंकारलक्षणं कृतवान्।[6] अलंकृतिरलंकार इतिव्युत्पत्या अलंकारशब्दो भावात्मकअलंकृत्यर्थे प्रयुज्यते, तथापि करणव्युत्पत्या अलंकारशब्दः उपमाद्यलंकारार्थे प्रयुज्यते।[7]

---

1. रूपकादिरलंकारस्तथान्यैर्बहुधोदितः।
   न कान्तमपि निर्भूषं विभाति वनिताननम्। भा०क०लं० 1/13.
2. तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।
   शब्दाभिधेयालंकारभेदादिष्टं द्वयंतु नः।। भा०कं०लं० 1/15.
3. काव्यशोभाकरान् धर्मान् अलंकरान् प्रचक्षते। का०अ० 2/1.
4. भामहकाव्यलंकार, 3/6 का०द० 1/51.
5. काव्यंग्राह्यमलंकारात्। का०सं०सू० 1/1.
6. सौन्दर्यमलंकारः। तत्रैव० 2/1.
7. अलंकृतिरलंकारः। करणव्युत्पत्या पुनरलंकारशब्दोऽयमुपमादिषु वर्त्तते। तत्रैव० वृत्तौ पृ० 6.

विष्णुधर्मोत्तरपुराणें[1] ऽग्निपुराणे चालंकाराणांनिरूपणं वरीवर्त्ति, परमग्निपुराणे अर्थालंकारं विना सरस्वती विधवा इव प्रतिभातीत्युक्त्वा अलंकाराणां महत्त्वं सूचितम्।[2] शब्द अर्थ शब्दार्थोभयालंकाराणां निरूपणं श्रृंगारप्रकाशे वर्तते।[3] भोजदेवस्य बाह्य आभ्यन्तर बाह्याभ्यन्तर भेदेन त्रिविधोऽलंकारविभागो विद्यते।[4] रूद्रटेन वास्तवौपम्यातिशयश्लेषा एते चत्वारोऽलंकारा मूलभूतत्वेन स्वीकृता अन्ये अलंकारा एषामेव भेदरूपेण स्वीकृताः।[5] मम्मटेन काव्यलक्षणे अनलंकृती शब्दस्य प्रयोगः कृतोऽस्ति तत्र ईषदर्थकनञप्रयोगात् ज्ञायते यदलंकार-रहितस्य काव्यस्याऽपि रसादिसद्भावे न किमप्यपचीयते।[6]

मम्मटकाव्यलक्षणात् "अनलंकृतीत्यादाय मम्मटं प्रति जयदेव एवमाह-योऽलंकाररहितं काव्यं स्वीकरोति स अग्निं उष्णतारहितं कथं न मन्यते।[7] मम्मटविश्वनाथादिभिरलंकारा अस्थिरधर्मत्वेन समुपन्यस्ताः, कदाचिदेवालंकारा रसोपकारं विदधति, नतु सर्वदा।[8] दोषरहितं गुणयुक्तमपि अलंकारै रहितं काव्यं कान्ताकान्तिवत् त्याज्यं भवतीति।[9] भरतसमये चत्वारोऽलंकारा आसन्

---

1. विष्णुधर्मोत्तरपुराणे तृतीयखण्डे 1/15 पृ० 312.
2. अलंकरणमर्थानामर्थालंकार इष्यते।
   तं विना शब्दसौन्दर्यमपि नास्ति मनोहरम्।।
   अर्थालंकाररहिता विधवैव (विधुरेवेति) सरस्वती। अ०पु०अ० 344, 1.
3. अलमर्थमलंकर्तुं यद् व्युत्पत्यादिवर्त्मना।
   ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालंकारसंज्ञया।। स०कं०भ० 3/1.
   शब्देभ्यो यः पदार्थेभ्य उपमादिः प्रतीयते।
   विशिष्टोऽर्थः कवीनां सा उभयालंक्रिया मता।। तत्रैव० 4/1.
4. अलंकाराश्च त्रिधा-बाह्याः, आभ्यन्तराः, बाह्याभ्यन्तराश्च। वस्त्रमाल्यविभूषणादयो बाह्याः। आन्तराः दन्तपरिकर्मनखच्छेदालककल्पनादयः। बांह्यभ्यन्तराः स्नान धूपविलेपनाञ्जनमुखवासताम्बूलोपयोगादयः शरीरे। श्रृं०प्र० दशम प्र०पृ० 31.
5. अर्थस्यालंकाराः वास्तवमौपम्यमतिशयः श्लेषः।
   एषामेव विशेषा अन्ये तु भवन्ति निः शेषाः।। रु०का०लं० 7/9.
6. का०प्र० 1/21.
7. अंगीकरोति यः काव्यं शब्दार्थावनलंकृती।
   असौ न मन्यते कस्मादनुष्णमनलंकृती। चं०लो० 1/8.
8. उपकुर्वन्ति तं सन्तं येऽग्ङ्द्वारेण जातुचित्।
   हारादिवदलंकारा स्तेनुप्रासोपमादयः।। क०प्र० 8/67.
9. सा०द० 10/1.
9. दोषैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः।
   स्त्रीरूपमिव नो भाति तं ब्रुवेऽलंक्रियोच्चयम्।। वा०भ०लं० 4/1.

भामहेन अष्टत्रिंशदलंकाराः स्वीकृताः तदनन्तरं दण्डी वामन, उद्भट, रुद्रट, भोजदेव मम्मट रूय्यक जयदेव विद्याधर, अप्ययदीक्षितैः च क्रमेण 37, 31, 41, 73, 72, 74, 82, 90, 86, 117 अलंकाराणां निरूपणं विहितम्।[1] एवं प्रकारेण अलंकारवादिभिराचार्यैरलंकारसिद्धान्तः वृद्धिं प्रसिद्धिं च नीतः। अलंकारमहत्त्व स्वीकारादेव पूर्ववर्त्तिनामाचार्याणां ग्रन्थानां नामानि काव्यालंकार नाम्ना विख्यातानि। वास्तविकरूपेण अलंकारैः काव्ये शोभातिशयजनकत्वं द्योत्यते। यथा काचिन्नायिका सौन्दर्यसमन्विताऽपि स्यात् परं हाराद्याभूषणैः सा अत्यर्थं रूचिकरा भवति, तथैव उपमाद्यलंकारसमन्वितं काव्यं अतिशयशोभाधायकं जायते। रसगुणादिभिः यथा स्वसौन्दर्यसमन्विता नायिका अलंकारैर्विनाऽपि शोभते, अलंकारैस्तस्याः सौन्दर्यं वर्धते तथैव रसगुणादिभिस्समन्वितं काव्यं शोभते, परमलंकारैस्तत्काव्यं शोभातिशयं पुष्णाति। अतो अलंकाराः काव्यस्य- वहिरंगभूता वर्तन्ते नान्तरीयकाः।[2]

गुणालंकारयोः सम्बन्धः—

गुणालंकारयोः परस्परं सम्बन्धं चाधिकृत्य आचार्याणां मतैक्यं नावलोक्यते। भरतेन चत्वारोऽलंकाराः[1], दशगुणाश्च[3], निरूपितास्सन्ति। दीपकालंकारस्य लक्षणे भरतेन भणितम् यत् पाठ्ये काव्ये नाटकेषु च यो माधुर्येण प्रसृतः स्यात् गुणैरलंकारैश्चालंकृतः स्यात् स दीपको नाम अलंकारः।[4] अस्माद्दीपकालंकारलक्षणाद् भरतमते गुणालंकारयोः साम्यं प्रतीयते। भरतः समतागुणलक्षणे गुणालंकारयोःपरस्परंसादृश्यं स्वीकृत्य द्वाभ्यामन्योन्यं भूषणत्वमुररीचकार।[5] अतो गुणालंकारयोरन्योन्यं सम्बन्धो विद्यते। गुणालंकारयोः सम्बन्ध- विषये, स्वरूपविषये भेदविषये च भरतमतं दृष्टिपथं नावतरति।

भरतो गुणालंकारयोश्शब्दार्थगतत्वेऽपि सुव्यक्तरूपेण न प्रतिपादयामास। गुणानामलंकाराणां च निरूपणाज् ज्ञायते यद्गुणालंकारयोश्च शब्दार्थगतत्वं

---

1. र०गं० भूमिकायाम् (मधुसूदन शास्त्री) पृ० 69-83.
2. ना०शा० 16/40.
3. तत्रैव० 16/96.
4. प्रसृतं मधुरंचापि गुणैः सर्वैरलंकृतम्।
   काव्ये यन्नाटके विप्रास्तद्दीपकमिति स्मृतम्।। तत्रैव० 116/54.
5. तत्रैव० 16/101.

विद्यते प्रायो भामहेनाऽलंकाराणां कृतेऽलंकारशब्दस्य प्रयोगो विहितः,[1] परं माधुर्यौजः प्रसादगुणानां कृते गुणशब्दो न प्रयुक्तः।[2] भाविकालंकारलक्षणे गुणशब्दस्य प्रयोगः गुणालंकारयोः साम्यं सूचयति।[3] भामहेन गुणालंकारयोः पार्थक्यं न प्रतिपादितम्। दण्डिना गुणालंकारयोः पार्थक्यं साधयितुं प्रयतितम्, परं स्फुटरूपेण गुणालंकारयोर्भेदोऽनेनापि न प्रदर्शितः।

गुणा वैदर्भमार्गस्य प्राणा वर्तन्ते,[4] इति कथनात् दण्डिमते गुणानामान्तरीयकत्वमलंकाराणां वाह्यांगत्वं विद्यते। गौडमार्गे श्लेषादिगुणेषु केषांचिद् गुणानां वैपरीत्यं भवति। अतएव उभयमार्गानुमोदितस्वभावोक्त्यादयोऽलंकाराः पृथक्त्वेनोपात्ताः। यथा भामहेन गुणनिरूपणे गुणशब्दो न प्रयुक्तः, तथा दण्डिना न कृत इति। श्लेषादयः सर्वे गुणा वैदर्भगौडमार्गे न भवन्ति, परं स्वभावोक्त्या- दयोऽलंकारा वैदर्भमार्गे गौडमार्गे चोभयत्राद्रियन्ते।[5] दण्डिमते विशिष्टालंकाराः श्लेषादयो गुणाः सन्ति स्वभावोक्त्यादयः साधारणालंकारा वर्तन्ते। श्रुत्य- नुप्रासादयोऽलंकारा गुणनिरूपणप्रसंगे मार्गद्वयविभागार्थं कथिताः।

दण्डिमते गुणालंकारयोरेतदेव भेदो विद्यते, यद् गुणा वैदर्भमार्गस्य जीवनाधायकास्सन्ति, अलंकारा गौडमार्गेऽपि गृह्यन्ते, तेनालंकारेभ्यो गुणा अतिरिच्यन्ते। उद्भटो गुणालंकारयोरभेदं स्वीकरोति। यल्लौकिकगुणालंकारयोर्भेदः भवितुं शक्यते, यतः कटककुण्डलाद्यलंकाराणां शरीरे संयोगसम्बन्धो भवति, शौर्यादयो गुणा आत्मनि समवायसम्बन्धेन तिष्ठन्ति, परं काव्ये माधुर्यादिगुणानामुपमाद्यलंकाराणां च स्थितिः समवायसम्बन्धेन भवति। अतोद्भटस्य कथनमस्ति ये गुणालंकारयोर्भेदमामनन्ति ते गड्डलिकाप्रवाहेण (गतानुगतिककया) इत्थं कुर्वन्ति।[6] सर्वप्रथमं स्पष्टरूपेण गुणालंकारयोर्भेदं वामनः प्रतिपादितवान्।

---

1. अनुप्रासः सयमको रूपकं दीपकोपमः।
   इतिवाचामलंकाराः पञ्चैवान्यैरुदाहृताः।। भा०का०लं० 2/4.
2. तत्रैव० 2/15.
3. भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्। तत्रैव० 3/53.
4. का०द० 1/42.
5. काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः।
   साधारणमलंकारजातमन्यत् प्रकाश्यते। का०आ० 2/3.
6. एष एव च गुणालंकारप्रविभागः। एवं च "समवायवृत्याशौर्यादयः संयोगवृत्यातु हारादय इत्यस्तु गुणालंकाराणां भेदः, ओजः प्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्या स्थितिरिति गड्डलिकाप्रवाहेणैवैषां भेदः। का०प्र० अष्टम उल्ला० पृ० 470.

तेन काव्ये गुणानां शोभाजनकत्वं स्वीकृतम्।[1] अलंकाराणां चातिशयशोभोत्पादकत्वमुररीकृतम्।[2] ओजःप्रसादादयो गुणा अलंकाररााहित्येऽपि काव्यशोभामुत्पादयितुंसक्षमा, अतोऽलंकारा गुणनिर्भराः। एवं स्फुटरूपेण वामनात्पूर्वं गुणालंकारयोर्भेदोनावलोक्यते। वामनः काव्यस्य ग्रहणमलंकारेण मन्यते।[3] यतोऽलंकारोऽतिशयेन काव्यसौन्दर्यं वर्धयति,[4] तत्सौन्दर्यं दोषत्यागाद् गुणालंकारग्रहणाज्जायते।[5] यद्यप्यत्र काव्यसौन्दर्यं दोषत्यागाद् गुणालंकारयोर्ग्रहणाद् भवतीत्यभिहितम्, तथापि गुणाः काव्यसौन्दर्यं जनयन्ति अलंकारास्तस्य सौन्दर्यस्य वृद्धिं- कुर्वन्तीत्यनयोर्भेदः।

वामनेनान्वयव्यतिरेकेण रसेन सह गुणानां सम्बन्धो नैव स्थापितः तथाप्यस्य-मते गुणा नित्या अलंकारास्त्वनित्या[6] वर्तन्ते। अतो गुणालंकारयोः सादृश्यं विद्यते। द्वावेव शब्दार्थयोर्धर्मौ काव्यस्योत्कर्षकारकौ च वर्तेते। वामनमते गुणालंकारयोः पार्थक्यमस्माद्धेतोर्वर्तते यद्गुणानित्या अलंकाराश्चानित्य-धर्मास्सन्तीति। सति गुणे अलंकाराः काव्ये अतिशयेनोत्कर्षं कुर्वन्ति, केवलमलंकारसद्भावः काव्यस्य क मप्युपकृतिं न करोति यतोहि गुणाः काव्ये सौन्दर्यं जनयन्ति, तस्य सौन्दर्यस्य वृद्धिमलंकाराः कुर्वन्ति, कव्ये यदि गुणैः काव्यशोभा न जनिता स्यात्तदा अलंकाराः कस्य सौन्दर्यं वर्धयिष्यन्ति। अतो गुणसद्भावे सति अलंकाराणां महत्वं नान्यथा।

डॉ० नगेन्द्रेण कथितं यद्रसध्वनिवादिभिराचार्यैर्वामनानुसारं गुणविषयिणी-धारणा प्रतिपादिता विद्यते, परं गुणानां शब्दार्थगतत्वं साक्षात् न स्वीकृतम्।[7] वामनानन्तरं गुणसामान्यलक्षणे, गुणाः काव्यस्यांगीभूतरसस्य धर्मा वर्तन्ते, अलंकाराः शब्दार्थावाश्रित्य तिष्ठन्ति।[8] आत्मनि शौर्यादिवद् माधुर्यादयो गुणा

---

1. काव्यशोभाकर्त्तारो धर्मा गुणाः। का०लं०सू० 3/1/1.
2. तदतिशयहेतवस्त्वलंकाराः। तत्रैव० का०लं०सू० 3/1/2.
3. काव्यं ग्राह्यमलंकारात्। तत्रैव० 1/1.
4. सौन्दर्यमलंकारः। तत्रैव० 1/2.
5. स दोषगुणालंकारहानादानाभ्याम्। तत्रैव० 1/3.
6. पूर्वे नित्याः। तत्रैव० 3/1/3.
7. काव्य शास्त्र की भूमिका, डॉ० नगेन्द्र पृ० 57.
8. ध्वा०लो० 2/6.

रसधर्माः सन्ति, शरीरे कटकादिवदलंकाराः शब्दार्थयोर्धर्मा विद्यन्ते। एवमानन्दवर्धनः गुणालंकारयोर्भेदं व्यदधति। आनन्दवर्धनोऽलंकाराणां शब्दार्थधर्मत्वं प्रतिपाद्य बहिरंगत्वं निरूपितवान् परमलंकाराःकाव्ये हेया न भवन्ति, अतएव रूपकाद्यलंकारा असंलक्ष्यक्रमव्यंग्यस्य ध्वनिभेदेषु चारुत्वहेतवो भवन्तीति-विभावयामास। भोजदेवेन गुणालंकारयोर्मध्ये गुणाः मुख्यभूता प्रतिपादिताः,[1] अनेन काव्ये रसगुणयोर्नित्यत्वं स्वीकृतम्।[2] मम्मटः- आनन्दवर्धनाऽनुसारं गुणालंकारयोर्निरूपणमकरोत्। यथा शौर्यादयो गुणा आत्मनो धर्मास्सन्तः आत्मानमुत्कर्षयन्ति, तथैव प्रधानभूतकाव्यस्यात्मनो "रसस्य" धर्मा गुणा वर्तन्ते। वामनेन काव्यशोभाजनकानां गुणानां नित्यत्वं स्वीकृतमासीत्, रसधर्माणांगुणानां काव्ये अचला स्थितिः प्रतिपादिता।[3] अनेन रसेन सह गुणानां नित्यता सिद्ध्यति। रसस्यांगभूतयोःशब्दार्थयोरुत्कर्षेण अलंकारा रसं कदाचिदुपकुर्वन्ति, न तु सर्वदा, शरीरे कण्ठाद्यंगानामुत्कर्षत्वाद् हारादयो शरीरिणमवतंसयन्ति,[4] तेन शब्दार्थ-शरीरस्योपकृतित्वादलंकाराः सर्वथा त्याज्या न भवन्ति। हेमचन्द्रः, अलंकार-सामान्यलक्षणे मम्मटमनुसरति।[5] अस्य मते अनलंकृतमपि गुणयुक्तं काव्यं भवति, परमलंकृतं निर्गुणं काव्यं न रोचते।[6] यद्यप्यस्य मते "दोषरहितौ सगुणौ सालंकारौ शब्दार्थौ काव्यं वर्तते,[7] परमलंकारेभ्यो गुणानामनिवार्यत्वं वरीवर्ति। विद्यानाथः गुणालंकारयोर्द्वयो काव्यशोभाकरत्वमनुमनुते।[8] गुणानां संघटनाश्रयत्वं स्वीकृतम्,[9]

---

1. अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम्।
   गुणयोगस्तयोर्मुख्यो गुणालंकारयोगयोः।। सं०कं० 1/59.
2. नित्यो हि काव्ये गुणयोग इव रसावियोगः। शृ०प्र० 11 प्र० पृ० 437.
3. ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
   उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।। का०प्र० 8/66.
4. उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
   हारादिवदलंकारास्तेऽनुप्रासोपमादयः।। तत्रैव० का०प्र० 8/67.
5. अंगाश्रिता अलंकाराः। हे०चं०का०शा०। अ० 1 पृ० 20.
6. निरलंकारयोरपीति। अनेन काव्ये गुणानामवश्यंभावमाह, तथाहि अनलंकृतमपि गुणबहवः (बहुलं) स्वदते। अलंकृतमपि निर्गुणं न स्वदते। तत्रैव० अ० 1, पृ० 19.
7. अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम्। तत्रैव० अ० 1 पृ० 1.
8. यो हेतुः काव्यशोभायाः सोऽलंकारः प्रकीर्त्यते।
   गुणोऽपि तादृशो ज्ञेयो दोषः स्यात्तद्विपर्ययः।। प्र०रू० पृ० 391.
9. संघटनाश्रयागुणाः, शब्दाश्रयास्त्वलंकाराः। तत्रैव० 398.

न च रसाश्रयत्वं अस्यमते काव्यशोभाकरत्वाद् गुणालंकारो साम्यं विभ्रतो मम्मटानुसारं गुणालंकारयोराश्रयभेदाद् भेदव्यपदेशोऽपि भवति।[1]

विद्यानाथो गुणानां संघटनाश्रयत्वं अलंकाराणां च शब्दार्थाश्रयत्वमङ्गीचकार। वाग्भटमते–दोषरहितं गुणयुक्तमपि काव्यं अलंकारैर्विना कान्ताकान्तिवन्न शोभते।[2] गुणाः शब्दार्थयोर्धर्मा वर्तन्ते काव्ये काव्यत्वकमनीयतायाः हेतुः अलंकार एव वर्त्तते।[3] विश्वनाथोऽपि गुणालंकारयोर्भेदं मम्मटवत् प्रतिपादयामास। अस्य मतेऽपिगुणा रसस्य धर्मा वर्त्तन्ते,[4] अलंकाराश्च शब्दार्थयोर्धर्मास्सन्ति।[5] अलंकारलक्षणे अलंकाराः शब्दार्थयोरस्थिरधर्माः प्रतिपादिताः, वामनानुसारं अलंकाराणां अतिशयशोभाकरत्वं स्वीकृतम्, अंगदादिवद् अलंकारा रसादीनुप- कुर्वन्तीति।

विश्वनाथदेवेन, सामानाधिकरण्येन गुणानां रसोत्कर्षकत्वं स्वीकुर्वता आनन्दवर्धनादिवद् गुणा रसधर्माः प्रतिपादिताः[6] मम्मटादीनामनुसारं गुणानामचलास्थितिरलंकाराणां च चलास्थितिर्निरूपिता।[7] गुणलक्षणेसमागतस्य समानाधिकरणत्वशब्दस्य विषये डॉ० रामप्रतापस्य कथनं वर्तते यत् समानाधिकरणत्वशब्दस्यार्थः- एकाश्रयो विद्यते, गुणत्वे रसत्वे चोभयत्र समानाधिकरणत्वं वरीवर्ति, यतो हि एकस्मिन्नधिकरणे रसे गुणत्वं रसत्वं चोभौ विद्येते।

रसत्वं रसस्यावच्छेदकधर्मो वर्तते, गुणत्वं गुणस्य। गुणत्वं गुणेतु तिष्ठत्येव परं रसमप्यधिवसति।[8] विश्वनाथदेवः शब्दालंकारनिरूपणावसरे अलंकारस्य

---

1. उपकुर्वन्ति तं सन्तमित्यादि–तत्रैव० पृ० 397-98.
   चारुत्वहेतुत्वेऽपि गुणानामलंकारणां चाश्रयभेदाद्भेदव्यपदेशः तत्रैव० पृ० 398.
2. दोर्षैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः।
   स्त्रीरूपमिव नो भाति तं ब्रूवेऽलंक्रियोच्चयम्।। वा०लं० 4/1.
3. अदोषावपि शब्दार्थौ प्रशस्येते न यैर्विना।
   तानिदानीं यथाशक्ति बुमोऽभिव्यक्तये गुणान्।। तत्रैव० 3/1.
4. रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा। गुणाः सा०द० 8/1.
5. शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
   रसादीनुपकुर्वन्तोऽलंकारास्तेऽग्ङदादिवत्।। सा०द० 10/1.
6. रसत्वसमानाधिकरणत्वे सति उत्कर्षहेतुत्वं गुणत्वम्।
   साहित्यसुधासिन्धु, 6/135.
7. गुणास्त्वचलस्थितयः। अलंकारास्तु चलस्थितय इत्यनयोर्भेदः। तत्रैव० वृत्तौ पृ० 330-331.
8. साहित्यसुधासिन्धु 6 तरंगे पृ० 317.

"विशेषलक्षणं" शब्दमलंकृत्य रसोपकारकत्वं शब्दालंकारत्वं स्वीचकार।[1] अस्मादलंकारलक्षणात् प्रतीयते यद्विश्वदेवमते "शब्दस्य शोभामभिवर्ध्य शब्दालंकारा रसोपकारं" कुर्वन्ति। अलंकारसामान्यलक्षणाऽनुसारं, अलंकारा गुणविशिष्ट- काव्यस्य शोभां जनयन्तीति।[2] जगन्नाथोऽपि त्रीन् गुणान् अनुमनुते।[3] यथा आनन्दवर्धनप्रभृतिभिर्गुणानां रसधर्मत्वं स्वीकृतमासीत्, न तथा जगन्नाथेन। अस्य मते आत्मा निर्गुणोऽस्ति, अतो रसरूपात्मनि माधुर्यादयो गुणा न निवसन्ति इत्यस्मिन् विषये गुणविवेचने प्रदर्शितम्।

जगन्नाथमते "श्रृंगारो मधुरः" इत्यादि व्यवहारः प्रयोजकतासम्बन्धेन जायते, द्रुत्यादिचित्तवृत्तय एव माधुर्यादयो गुणास्सन्ति। रसे विद्यमाना द्रुत्यादि–प्रयोजकता असाधारणीविद्यते, अदृष्टादिषु सा प्रयोजकता साधारणतया निवसति अतोऽदृष्टादिष्वविद्यमाना शब्दार्थ रस रचनादिषु प्रयोजकतासम्बन्धो गृह्यते, तस्माज्जगन्नाथः शब्दार्थरसरचनादिषु गुणगरिमानमंगड्डीचकार।[4] अस्य मते अलंकाराः शब्दार्थयोः शोभां वर्धयन्तः काव्यस्यात्मा व्यंग्यार्थे रमणीयतां जनयन्ति, तस्मादलंकारा रसोत्कर्षकाः।

गुणालंकारयोः सम्बन्धविषये एतत्प्रतिपादयितुं शक्यते यदाचार्याणां गुणालंकारसम्बन्धनिर्धारणे मतैक्यं नावलोक्यते। आनन्दवर्धनात् प्राक् आचार्या गुणालंकारयोः सादृश्यं स्वीचक्रुः, यदुभावेव कमनीयकान्त्या काव्यं भूषयन्ति। सर्वप्राथम्येन वामनः गुणाः काव्यशोभां जनयन्ति, अलंकाराः काव्यशोभां अतिशयरूपेण वर्धयन्तीत्युद्घोषयामास। वामन एव गुणानां नित्यत्वमलंकाराणां चानित्यत्वं प्रतिपादयामास। गुणानां सद्भावे अलंकाराः काव्योत्कर्षकाः गुणानामभावे अलंकाराः केवलं भारभूताः। परवर्त्यानन्दवर्धनप्रभृतीनामाचार्याणांमते गुणाः काव्यस्यात्मनो रसस्य धर्माः सन्ति अलंकारा अंगभूतयोः शब्दार्थयोर्धर्मा वर्तन्ते रसधर्मत्वाद् गुणाः काव्यस्यान्तरिकानि तत्त्वानि सन्ति। अलंकाराणां कण्ठाद्यंगेषु हारादीनामिव बहिरंगत्वं विद्यते। रसेन सह नित्यसम्बन्धत्वाद् गुणा व्यंग्यभूता वर्त्तन्ते, नत्वलंकाराः, गुणा रसधर्माः सन्तोऽपि शब्दार्थयो धर्मा वर्तन्ते अलंकाराअपि शब्दार्थयोर्धर्माः सन्त्येव, परं रसादिषु पूर्णरूपेण पृथग्भूता

1. तत्रैव० सप्तम तरंगे पृ० 359.
2. गुणविशिष्टकाव्यशोभाकारिणोऽलंकाराः। तत्रैव० 6 तरंगे पृ० 329-330.
3. रसगंगाधरः प्रथम आ० पृ० 253.
4. रसगंगाधरः प्रथम पृ० 224-227.

न सन्ति। यद् रचनायां सर्वप्रथमं शब्दस्य प्रतीतिर्भवति, ततोऽर्थस्य, अर्थप्रतीतिसमकाल एव रसस्य प्रतीतिर्जायते, रसेन सह गुणानां सम्बन्धोऽस्त्येव, परमलंकाराणां सम्बन्धोऽपि केनचिदंशेन स्फुरति।

रससमन्वितरचनायां उपमाद्यलंकाराः प्रस्फुरन्ति, यद्यलंकाराणां महत्त्वं न स्यात्, तर्हि तत्र केनचिदंशेनालंकाराणां सम्बन्धोऽस्त्येव। रचनांश्रुत्वा, पठित्वा अर्थंज्ञात्वा मधुरा रचना, मधुरोऽर्थः चित्तस्य चमत्कृतिवशादित्यादिव्यवहारो जायते। परमेषां चमत्कृतिर्यदा कदा भवति, अतएवालंकाराणां बाह्यांगत्वं प्रतिपादितम्। आनन्दवर्धनेनाऽपि रसादेरलंकार्यस्यालंकाराः चारुत्वातिशय-हेतुत्वेनोपन्यस्ताः। अलंकाराणां व्यञ्जकत्वेन व्यंग्यत्वेनोभाभ्यां प्रकाराभ्यां ध्वन्यंगता भवति। कटक-कुण्डलसदृशानां येषामलंकाराणां वाच्यतादशायां शरीरीकरणं न निश्चितं तेऽलंकाराः व्यंग्यरूपतां प्राप्य परां छायां (चारुत्वं) प्राप्नुवन्ति। यथा गुणानां गौणीवृत्त्या शब्दार्थगतत्वमुररीकृतम्, तथैव अलंकाराणामपि गौणीवृत्त्या रसेन सह सम्बन्धः स्वीकर्तव्यः।

ध्वनिसिद्धान्तः—

सर्वप्रथमं ध्वनिर्नाम व्याकरणे लभ्यते, "प्रतीतपदार्थको लोके ध्वनिः शब्दत्युच्यते, तद्यथा शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नेव मुच्यते तस्माद्ध्वनिशब्दः।

आनन्दवर्धनोऽपि प्रतिपादितवान् मुख्यरूपेण वैयाकरणा एव प्राथम्येन विद्वांसो भवन्ति यतोहि व्याकरण एव सर्वविद्यानां मूलभूतं शास्त्रं वरीवर्ति। वैयाकरणाः श्रूयमानानां वर्णानां कृते ध्वनिव्यवहारं कुर्वन्ति, तदनुसारं पदप्रत्यक्षं विना शाब्दबोधो न जायते। वर्णात्मकपदानामनित्यत्वात् पदप्रत्यक्षं न भवति, तेन मध्यमनादाभिव्यंग्यः स्फोटात्मकोऽखण्डशब्दो नित्यो वर्तते।[2] अस्मात् काव्यतत्त्वविद्भिर्मणीषिभिरपि वाच्यं, वाचकः, व्यंग्यार्थः, व्यंजनाव्यापारः, काव्यं-च ध्वनिनाम्ना प्रतिपादितः[3]।

---

1. पातञ्जलमहाभाष्यम्। 1/1/1.
2. यः संयोगवियोगाभ्यां करणैरुपजन्यते।
   स स्फोटश्शब्दजश्शब्दो ध्वनिरित्युच्यते बुधैः।। वा०प०
3. प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः काव्यतत्वार्थदर्शिभिर्वाच्य-वाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यंजकत्वसाम्याद् ध्वनिरित्युक्तः। ध्वा०लो० प्रथम उ० पृ० 53.

अतएष ध्वनिशब्दः वैयाकरणानां स्फोटसिद्धान्ताद् गृहीतोऽस्ति यतोहि, वैयाकरणाः, स्फोटाऽभिव्यंजकवर्णान् ध्वनिनाम्ना व्यवहरन्ति। स्फोटविषये "वैयाकरणभूषणसारे" वाक्यपदीये च व्यासेन निरूपणं संलक्ष्यते। ध्वनिशब्दस्य पंच यौगिकार्थास्सन्ति—

1. ध्वनति ध्वनयति वा यः स व्यंञ्जकः शब्दो ध्वनिः।

2. ध्वनति ध्वनयति वा यः स व्यंञ्जकोऽर्थो ध्वनिः।

3. ध्वन्यते इति ध्वनिः, अनया व्युत्पत्या रसालंकारवस्तुव्यंग्यादयो गृह्यन्ते।

4. ध्वन्यते अनेनेति ध्वनिः, अनया व्युत्त्पत्या व्यंञ्जनादिशक्तीनां बोधो भवति।

5. ध्वन्यतेऽस्मिन्निति ध्वनिः, अस्या व्युत्पत्याधारेण वस्त्वलंकाररसादयो ध्वन्यन्ते।

वैयाकरणानां ध्वनिसिद्धान्ताऽनुसारं ध्वनिकारः ध्वनिसिद्धान्तस्य प्रतिष्ठापनमंकरोत्, आनन्दवर्धनात् प्राक् न केनाप्याचार्येण काव्यतत्त्वरूपेण प्रत्यक्षतया प्रतिपादनं विहितम्। आनन्दवर्धनः पूर्ववर्त्याचार्याणां ध्वनिविरोधिमतं खण्डयित्वा ध्वनिसिद्धान्तं प्रतिष्ठापयामास एतत्, ध्वन्यालोकस्य प्रथमपद्यादपि प्रतीतिविषयं भवति।[1] काव्ये ध्वनिः "व्यंग्योर्थो" एव सारभूतो वर्त्तते इति प्रतिपादयितुं ध्वनि- लक्षणे कथितम्, यत्र अर्थः स्वात्मानं, शब्दः स्वाभिधेमर्थमुपसर्जनीकृत्य, प्रतीयमानार्थं च प्रतिपादयतः तं काव्यविशेषं विद्वांसो ध्वनिरितिव्यवहरन्ति।[2]

आनन्दवर्धनस्यास्मिन् सिद्धान्ते सर्वेषां काव्यतत्त्वानां विनिवेशो विद्यते। अस्य सिद्धान्ताऽनुयायिनः मम्मटविश्वनाथप्रभृतयो वर्तन्ते परं विद्वद्भिर्मम्मटोऽस्य ध्वनिसिद्धान्तस्य प्रतिष्ठापकः स्वीक्रियते, ध्वनिकारात् प्राग् यदलंकाराणां प्राधान्यमासीत्, रीतीनां यद् काव्यस्यात्मकत्वमासीत्, तत् समुदिते ध्वनिसिद्धान्ते अप्रसिद्धिमगात्।

ध्वनिगुणयोः सम्बन्धः—

ध्वनेर्विषयोऽतीव व्यापको विद्यते यस्मात् समग्राणि काव्यतत्वानि ध्वनावन्तर्भवन्ति। यत्र वाच्यार्थाद् व्यंग्यार्थस्याधिका चमत्कृतिर्जायते तदुत्तमं काव्यं, तस्योत्तमकाव्यस्य कृते आनन्दवर्धनो ध्वनिव्यपदेशमकरोत्।

---

1. काव्यस्यात्मा ध्वनिरिति, इत्यादि, ध्वा०लो० 1/1.
2. यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
   व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः। तत्रैव० 1/13.

स ध्वनिः, काव्यात्मा विद्यते, तत्रापि रसध्वनिः सर्वोत्कर्षरूपेण विराजतेतराम्। गुणानां रसधर्मत्वात् काव्ये अचलास्थितिः रसवादिभिः प्रतिपादिता, अस्माद्गुणा रसध्वनौ नित्यरूपेण विराजन्ते।[1] आनन्दवर्धनेन "रसध्वनिः सर्वोत्कृष्टरूपेण स्वीकृता। पूर्ववर्त्त्याचार्यैः रसस्य रसवदाद्यलंकारेण निरूपणं विहितमासीत्, परं ध्वनिकारेण रसभावादीनां निरूपणं असंलक्ष्यक्रमध्वन्यन्तर्गतं एव प्रतिपादितम्।[2] विभावादिभिःप्रतीयमाना रसादयो असंलक्ष्यक्रमध्वनिव्यपदेशभाजः सहृदयैरा- स्वाद्यमानतया ध्वनिरूपेण व्यवह्रियन्ते।[3]

आनन्दवर्धनेन व्यासेन ध्वनिनिरूपणं विहितम् ध्वनिभेदेषु रसादिध्वनिः सर्वोत्कृष्टरूपेण प्रतिपादितः। रसाद्यनुकूलशब्दार्थयोर्यदौचित्येन योजनम् स एव कवेर्मुख्यो व्यापारो विद्यते।[4] ध्वनिकारो रसमहत्वं स्वीकुर्वन्नुक्तवान् यथा वसन्ततौं वृक्षाः नूतना इव प्रतिभासन्ते, तथैव रसादेः परिग्रहात् प्राचीनैर्वर्णिताः सर्वेअर्था नूतना इव प्रतीयन्ते।[5] अतो रसादिमये (व्यंग्यव्यंजकभावे) कविरधानवान् स्यात्।[6]

इत्थं ध्वन्यालोके रसमहत्वं प्रतिपादितम् येन ज्ञायते रसधर्माणां गुणानां ध्वनिना सह नित्यसम्बन्धोऽस्ति। असंलक्ष्यक्रमव्यंग्यो ध्वनिः पद पदांश प्रकृति प्रत्यय उपसर्ग निपातभेदेन षड्विधो जायते। रचना वर्णप्रबन्धगतत्वादस्य सत्ता सार्वत्रिकी विद्यते, अतो गुणानां सत्ताऽपि वर्णगतत्वेन रचनागतत्वेन प्रबन्धगतत्वेन च स्वीकरणीया। शब्दशक्त्युत्थध्वनेः सकाशाद् गुणा बहिर्भूतो न वर्तन्ते तेषां वर्णव्यञ्जकत्वस्वीकरात्, आचार्यवामनेनाऽर्थगुणौजसो निरूपणे

---

1. ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्तेस्युरचलस्थितयो गुणाः।। का०प्र० 8/1.
2. रसभाव-तदाभास-भावशान्त्यादिरक्रमः।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थिताः। ध्वा०लो० 2/25.
3. रसादिरर्थोहि सहैव वाच्येनावभासते। स चाङ्गित्वेनावमासमानो ध्वनेरात्मा।
तत्रैव० दीधिति व्या० प्रथम उद्योत् पृ० 97.
4. वाच्यानां वाचकानां च यदौचित्येन योजनम्।
रसादिविषयेणैतत्कर्म मुख्यं महान् कवेः। तत्रैव० 3/32.
5. दृष्टपूर्वा अपिह्यर्थाः काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः तत्रैव० 4/4.
6. व्यंग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि।
रसादिमय एकस्मिन् कविः स्यादवधानवान्।। तत्रैव० 4/5.

प्रौढ़ेः पञ्चभेदाः प्रतिपादिताः तेषु पंचभेदेषु वाक्येन प्रतिपादनीयमर्थं बोधयितुं यद्येकपदस्य प्रयोगेण सोऽर्थः प्रतीयेत्तदा प्रौढेः द्वितीयो भेदो भवति, यथा इयमप्सरा न वर्त्तते, अपितु मानुषी स्त्री विद्यते इति-वाक्यार्थं बोधयितुं निमिषतिपदेन स्त्री रूपोऽर्थो ध्वन्यते।[1]

आचार्यमम्मटेन दीप्तरसत्वरूपस्य कान्तिगुणस्य रसध्वनौ साक्षादन्तर्भावो विहितः।[2] विश्वनाथेन अर्थशक्त्युद्भवस्योदाहरणं "दृष्टिं हे प्रतिवेशिनी" त्यादि पद्यं समुपन्यस्तम् इदमेवोदाहरणं भोजेन भाविकत्वगुणस्योदाहरणार्थे प्रतिपादितम्।[3] काव्यात्भा रसेन सह गुणसम्बन्धोऽवच्छिन्नरूपेण विद्यते। अतएव काव्यात्मा ध्वनिना सह गुणानां सम्बन्धोऽस्त्येवेति।

वक्रोक्तिसिद्धान्तः–

वक्रोक्तिसिद्धान्तस्य प्रवर्तकः कुन्तको विद्यते अस्यमते वक्रोक्तिरेव काव्यस्य सर्वस्वं वरीर्ति। कुन्तकात् प्रागपि वक्रोक्तिरलंकारस्याचार्यैर्निरूपणमकारि, परं काव्यस्य जीवनाधायकतत्वरूपेण कुन्तकात् प्राग् वक्रोक्तिनिरूपणं न विहितम्। भामहेन, अतिशयोक्त्यलंकारान्तर्गत एव वक्रोक्त्याः प्रतिपादनं कृतम्। अस्य मते अतिशयोक्तिरलंकार एव समग्रं प्रपञ्चजातं विद्यते। अनेन विना कस्याप्यलंकारस्यास्तित्वं न सम्भवम्[4]। अतिशयोक्त्यलंकारान्तर्गतवक्रोक्त्या अभावाद् भामहो हेतुः सूक्ष्म लेशादीनामलंकाराणां खण्डनं चकार।[5]

दण्डिमते, श्लेषः सर्वेषूक्तिवैचित्र्यमात्रालंकारेषु शोभां जनयति, अनेन स्वभावोक्तिवक्रोक्तिभेदेन समस्तं वाङ्मयं द्विधा विभक्तम् तत्रार्थस्वरूपवर्णनं स्वभावोक्तौ भवति, उक्तिवैचित्र्यं वक्रोक्तौ जायते।[6] अनेन प्रकारेण दण्डिनाऽपि वक्रोक्त्या महत्वं स्वीकृतम्। वामनो गौणीलक्षणया वक्रोक्तिमनुमनुते।[7]

---

1. दिव्येयं न भवति किन्तु मानुषी इति वक्तव्ये निमिषति
   इत्याहेति। का० लं सू. 3/2/2 वृत्तौ प. 103
2. का. प्र० 8म उ० प० 482
3. सरस्वती कण्ठामरणम् 1/86 प० 127
4. सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
   यत्नोऽस्यां कविना कार्यः कोलंकारोऽनया विना।। भा०का०लं० 2/25.
5. हेतुश्च सूक्ष्मो लेशोऽथ नालंकारतया मतः।
   समुदायाभिधानस्य वक्रोक्त्यनभिधानतः।। तत्रैव० 2/86.
6. श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
   भिन्नं द्विधा समासोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्।। का०अ० 2/363.
7. सादृश्याल्लक्षणा वक्रोक्तिः। का०लं०सू० 4/3/8.

रूद्रटेन, श्लेषवक्रोक्तिकाकुवक्रोक्तिभेदेन वक्रोक्त्या द्वौ भेदौ समुदीरितौ।[1] अनेनैव सर्वप्रथमं वक्रोक्त्यलंकारस्य शब्दालंकारेषु गणना विहिता।[2] आनन्दवर्धनोऽपि अतिशयोक्तेर्महत्त्वं स्वीकरोतिस्म यतो भामहस्य "सैषा सर्वत्र वक्रोक्तिः" इत्यादिपद्यं समुद्धरन् कथितवान् यत् कविप्रतिभोत्थापिता अतिशयोक्तिः सर्वेषामलंकाराणां निदानं वर्तते।[3] तदभावे केवलं नाममात्रेणालंकारो भवति। अनेनोपर्युक्तप्रकारेण कुन्तकसमक्षं वक्रोक्तिविषयकाः प्रभूततराः संकेता आसन्, यानवधार्य कुन्तको वक्रोक्त्यै सिद्धान्तरूपेण व्यापकत्वं प्रादात्। कुन्तकमते सर्वातिशायिनी लोकप्रसिद्धा उक्तिर्वक्रोक्तिर्विद्यते सा वक्रोक्तिर्वैदग्ध्यभंगीभणितिस्वरूपा भवति[4]। अस्यमते, शब्दार्थौ अलंकार्यौ, अनयोरलंकारः वक्रोक्तिरेववर्तते। सा वक्रोक्तिर्विचित्रा अभिधा वर्त्तते। यदि भामहादारभ्य वक्रोक्त्या प्रवर्त्तनंस्वीकृतं स्यात्, तदाऽपि कापि हानिर्न जायते, वक्रोक्तिसिद्धान्तस्य प्रतिष्ठापकरूपेण कुन्तक एव विद्यते।

अनेन वक्रोक्त्या षड्भेदा निम्नांकित प्रकारेण स्वीकृताः।

1. वर्णविन्यासवक्रता
2. पदपूर्वार्धवक्रता
3. पदपरार्धवक्रता
4. वाक्यवक्रता
5. प्रकरणवक्रता
6. प्रबन्धवक्रता।

एषां षड् भेदानां क्रमेण 6, 11, 8, 1, 9, 6 भेदा विद्यन्ते, सर्वेषां संकलनेन एकचत्वारिंशद्भेदा जायन्ते। कुन्तकादनन्तरमस्य सिद्धान्तस्य समर्थनं भोजदेवं विहाय न केनापि व्यधायि।

---

1. रुद्रट, का०लं० 2/14-16.
2. तत्रैव० 3/13.
3. तत्रातिशयोक्तिर्यमलंकारमधितिष्ठति, कवि प्रतिभावशात् तस्य चारुत्वातिशययोगः। अन्यस्य त्वलंकारमात्रतैवेति, सर्वालंकारशरीरस्वीकरणयोग्यत्वनाभेदोपचारात् सैव सर्वालंकाररूपेत्ययमेवार्थोऽवगन्तव्यः। ध्वा०लो० तृतीय उ०पृ० 503-504.
4. उभावेतावलंकार्यौ तयोः पुनरलंकृतिः।
   वक्रोक्तिरेव वैदग्ध्यभंगीभणितिरुच्यते।। व०जी० 1/10.
   कासौ-वक्रोक्तेरेव। वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा कीदृशीवैदग्ध्यभंगी भणितिः। वैदग्ध्यं विदग्धभावः कविःकर्मकौशलं तस्य भंगी विच्छित्तिः, तया भणितिः विचित्रैवाभिधा वक्रोक्तिरित्युच्यते। व०जी० 1/10 वृत्तौ।

भोजदेवः वक्रोक्तिविषये भामहमतं समर्थितवान्, अनेन वक्रोक्तिः, स्वभावोक्तिः रसोक्तिरितित्रिविधालंकारवर्गेषु "उपमालंकारप्राधान्ये वक्रोक्तिः" स्वीकृता।[1]

वक्रोक्तिगुणयोः परस्परसम्बन्धः—

गुणानां काव्यात्मना रसेन सह सम्बन्धः पूर्वं प्रतिपादितः, एवमेव कुन्तकमते वक्रोक्तिरपि काव्यस्यात्मा विद्यते अतोऽनयासह गुणानां सम्बन्धो भवितव्यः। वक्रोक्तिजीवितकारेण प्रतिपादितं यच्चतुर्वर्गफलास्वादमतिक्रम्य काव्यामृतरसास्वादः सहृदयहृदयेषु चमत्कारं वितनोति।[2] सरससहृदयानां लोकोत्तरानन्ददायकः सौभाग्यगुणः काव्यस्य अद्वितीयप्राणभूतो विद्यते।[3] इत्यादिप्रकारेण वक्रोक्तिजीवितकारेण रसस्याऽस्तित्वमुररीकृतम्। अनेन रसगुणयोर्नित्यसम्बन्धाद् वक्रोक्तिगुणयोः सम्बन्धः पुष्टिमेति। वक्रोक्तिभेदेषु "प्रबन्धवक्रता" भेदः सर्वोत्कर्षेण राजते। अस्य षट्सु भेदेषु तत्राऽपि प्रथमतृतीयभेदे रसस्याऽनिवार्यत्वमङ्गीकृतम्।[4] "प्रकरणवक्रता" रसवक्रतादिभेदेषु रसस्य साम्राज्यं वरीवर्ति,[5] अस्माद् वक्रोक्तिभेदेषु रसस्यास्तित्वे सति गुणसम्बन्धो निराकर्तुं न शक्यते।

कुन्तको वैदर्भीगौडीपाञ्चालीरीतीनां स्थाने क्रमेण सुकुमार विचित्र मध्यममार्गान् अभिदधौ। प्रत्येकमार्गस्य चतुरोगुणान् स्वीचकार, सर्वस्य मार्गस्य गुणलक्षणेषु रससद्भावोपि बोधितः। औचित्यसौभाग्यनामानौ साधारणगुणौ

---

1. वक्रत्वमेव काव्यानां परा भूषेति भामहः।
   श्लेषः पुष्णाति सर्वासु प्रायो वक्रोक्तिषु श्रियम्।। शृ०प्र० 11 प्र० पृ० 432.
2. चतुवर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
   काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।। व०जी० 1/5.
3. सर्वसंपत्परिस्पन्दं संपाद्य सरसात्मनाम्।
   अलौकिकचमत्कारकारि काव्यैकजीवितम्।। व०जी० 1/56.
4. इतिवृत्तान्यथावृत्तरससम्पदुपेक्षया।
   रसान्तरेण रम्येण यत्र निर्वहणं भवेत्।। तत्रैव० 4/16.
5. तत्रैव तस्य निष्पत्तेः निर्निबन्ध रसोज्वलाम्।
   प्रबन्धस्यानुबध्नाति नवांकामपि वक्रताम्।। तत्रैव० 4/20.

काव्यस्य सर्वेषु पदवाक्यप्रबन्धभेदेषु राजन्ते[1] तेन पदवाक्यप्रबन्धगतेषु वक्रोक्ति-भेदेषु गुणानां स्थितिर्भवति।

वस्तुवक्रतायां वर्णविन्यासवक्रतायां च उत्कर्षकरै रमणीयशब्दैर्वर्णनं जायते अस्यां स्थितौ शब्दगुणानां सद्भावो राजते।[2] वामनस्यार्थगुणमाधुर्योऽपि उक्ति-वैचित्र्यात्मकत्वाद् वक्रोक्तिसाम्यं विभर्ति।[3] भोजदेवो वक्रोक्तिं उक्तिगुणेन प्रतिपादयामास, अतो भोजमते वक्रोक्त्या उक्तिगुणस्य च परस्परं सादृश्यं वर्तते।[4]

कुन्तकः स्वयमेव अचकथत् यद् वक्रोक्त्या षड् भेदानां रमणीया रचना सुकुमारमार्गाऽनुरूपा माधुर्यादिगुणसमन्विता क्रियते।[5]

वक्रोक्तिजीवितकारः प्रसादगुणो वक्रोक्त्याअभिप्रायं प्रकटयतीति प्रतिपादितवान्[1]। उपर्युक्तदृशाप्रतीयते यद् वक्रोक्त्या सह गुणानां सम्बन्धो विद्यते, विविधकाव्यसिद्धान्ताः, काव्यात्मानमन्वेषयद्भिर्विद्वद्भिः काव्यात्मत्वेन व्यवस्थापिताः। सर्वेषां सिद्धान्तानां प्रतिष्ठापकाचार्याः गुणनिरूपणं प्रतिपादयामासुः, अन्यस्य कस्यचित् सिद्धान्तस्यैषामाचार्याणां समर्थनं स्यात् न स्यात् परं गुणानां- निरूपणं सर्वैः येन केनचिद्रूपेण (विहितम्)। अनेन सिद्धान्तेन गुणसम्बन्ध ाः प्रमाणितो भवतीति।

औचित्यसिद्धान्तः—

अस्मिन् संसारे, औचित्यस्य महिमा सर्वैर्मुक्तकण्ठैर्जेगीयते। औचित्यं सर्वैराद्रियते। आचार्यक्षेमेन्द्रोऽस्मिन् रसमये काव्यसंसारे औचित्यमहत्वमुद्घोषित-

---

1. यत्र वक्तुः प्रमातुर्वा वाच्यं शोभातिशायिना।
   आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते।। व०जी० 1/54.
   सर्वसंपत्परिस्पन्दसंपाद्यं सरसात्मनाम्।
   अलौकिकचमत्कारकारि काव्येकजीवितम्।। तत्रैव० 1/56.
   एतत्त्रिष्वपि मार्गेषु गुणद्वितयमुज्ज्वलम्।
   पदवाक्यप्रबन्धानाम् व्यापकत्वेन वर्त्तते। तत्रैव० 1/56.
2. वक्रोक्तिजीवितम् 2/2-3-6.
3. भंग्या इष्टाभिधानमुक्तिः। शृं०प्र० नवम प्र० पृ० 347.
4. भणितिविशेष उक्तिः। तत्रैव० नवम प्र० पृ० 344 सं०कं०भ० 1/76, 88.
5. मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः।
   अलंकरणविन्यासो वक्रतातिशयान्वितः।। व०जी० 1/34 पृ० 59.

वान्, परमस्य सिद्धान्तप्रतिष्ठापनात् पूर्वमपि उचितरूपौचित्यम् आसीदिति सम्यग् ज्ञायते।

भरतेन अभिनयप्रसंगे "औचित्य" स्थाने अनुरूपशब्दः प्रयुक्तः-[1] येन भरतो औचित्यज्ञानान्नैव अपरिचित आसीदिति लक्ष्यते। औचित्यनिरूपणे रुद्रटः सर्वप्रथमं स्थानमविन्दत।[3] आनन्दवर्धनोऽपि औचित्यमहत्वं स्वीकुर्वन् रसभगृङ्गस्य कारणमनौचित्यं प्रतिपादितवान्[4]। ध्वन्यालोके अन्यत्रापि गुणसंघटनादिस्थलेषु ध्वनिकारः औचित्यममन्यत।[5]

राजशेखरो व्युत्क्रमदोषस्यौचित्येन भूषणत्वं (गुणत्वं) स्वीचकार।[6] वक्रोक्तिजीवितकारेणौचित्याख्यो गुणः स्वीकृतः। यत्र वक्तुःप्रमातुर्वा, श्रोतुर्वा रमणीयस्यातिशयेन वाच्यस्याच्छादनं भवति तत्रौचित्यगुणो राजते।[7] सम्यक्-प्रकारेण यस्य पदार्थस्य महत्त्वं पोष्यते असावप्यौचित्यगुणो विद्यते।[8] मुख्य-रूपेणास्य सिद्धान्तस्य प्रतिष्ठापकः क्षेमेन्द्रो वर्तते, अनेन रसस्यजीवनाधायकं तत्त्वमे औचित्य एव प्रतिपादितम्,[9] यद्वस्तु यस्यानुरूपं स्यात् तदुचितं भवति उचितस्यभाव एवौचित्यं विद्यते[10]। औचित्यं परिपोषयन् क्षमेन्द्रोऽकथयत्, अलंकारा बहिरङ्गशोभाधायका वर्तन्ते गुणाश्चान्तरीयकास्सन्ति, यतस्तेषां रसधर्मत्वं

---

1. अक्लेशव्यञ्जिताकूतं झगित्यर्थ समपर्णम्।
   रस वक्रोक्तिविषयं यत्प्रसादः स कथ्यते।। व०जी० 1/31.
2. वयोऽनुरूपः प्रथमन्तु वेषो वेषानुरूपश्च गतिः प्रचारः।
   गतिप्रचारानुगतं च पाठ्यं पाठ्यानुरूपोऽभिनयश्च कार्यः।। ना०शा०अ० 13/68.
3. वैदर्भीपाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः।
   लाटीया गौडीये रौद्रे कुर्याद् यथौचित्यम्।। रु०का०लं० 15/20-21-23.
4. तदयमत्र परमार्थ अनौचित्यादृते नान्यद् रसभंगस्य कारणम्।
   प्रसिद्धौचित्यबन्धस्तु रसस्यौपनिषत् परा।। ध्व०लो० 2/14 पृ० 190.
5. तत्रैव० 3/6-9.
6. न च व्युत्क्रमदोषोऽस्ति कवेरर्थपथस्पृशः।
   तथा कथा कापि भवेद् व्युत्क्रमोभूषणं यथा।। का०मी० अ० 18 पृ० 177.
7. यत्र वक्तुः प्रभातुर्वा वाच्यं शोभातिशायिना।
   आच्छाद्यते स्वाभावेन तदप्यौचित्यमुच्यते।। व०जी० 1/54.
8. आञ्जसेन स्वाभावस्य महत्वं येन पोष्यते।
   प्रकारेण तदौचित्यमुचिताख्यानजीवितम्।। तत्रैव० 1/53.
9. औचित्यस्य चमत्कारकारिणश्चारुवर्णने।
   रसजीवितभूतस्य विचारं कुरुतेऽधुना।। औ०वि० श्लो० 3, पृ० 2.
10. उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
    उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।। तत्रैव० श्लोक 7 पृ० 8.

स्वीकृतम् परं रसस्यात्माप्यौचित्यमेव वर्त्तते,[1] अनेनौचित्यस्यातीव वैशिष्ट्यं प्रतिभाति। शृंगारादिरसप्रसिद्धस्य काव्यस्य जीवनमौचित्यं वरीवर्ति, औचित्यादेव गुणागुणत्वं प्राप्नुवन्ति[2] अतो गुणालंकाराऽपि औचित्यनिर्भराः सन्तीति।

क्षेमेन्द्रादनन्तरमपि मम्मटविश्वनाथादिभिरपि औचित्यमहत्वमुररीकृतम्। मम्मटेन वक्तृवाच्यप्रबन्धौचित्येन रचनादीनामन्यथात्वमपि स्वीकृतम्।[3] विश्वनाथोऽपि वक्त्राद्यौचित्याद् रचनादीनामन्यथात्वमनुमनुते।[4] वास्तविकरूपेण औचित्यस्यातीव विस्तृतं क्षेत्रं विद्यते, काव्यस्य सर्वाणि तत्वानि औचित्येनैव स्वात्मानं साधयन्ति। औचित्यं स्वयमेव प्रदर्शितरीत्यागुणरूपोऽस्ति, यो रसालंकार-संघटनाध्वनिगुणवक्रोक्तिषु सर्वदा विद्यमानस्तेषां तद्वत्त्वं निश्चिनोति, अन्यथा काव्ये कश्चिदपि नियमविशेषो न स्यादिति।

औचित्यगुणयोः परस्परसम्बन्धः—

प्रतिपादितौचित्यसिद्धान्ताऽनुसारं औचित्यगुणयोः परस्परसम्बन्ध-प्रतिपादनस्यावश्यकता न विद्यते तथापि पूर्वप्रदर्शितक्रमानुसारं प्रतिज्ञानिर्वाहो अवश्यंभावीतिमत्वा औचित्यगुणयोः सम्बन्धविषये किञ्चिदुच्यते—

कुन्तकस्यौचित्याख्यगुणस्य पदवाक्यप्रबन्धेष्वपि प्राधान्यं वरीवर्ति, औचित्य-गुणः स्वयमेवगुणरूपोऽस्ति अतोऽस्य औचित्यस्य माधुर्यादिगुणैः सह सम्बन्ध-प्रतिपादनस्य प्रश्नो नैवोदेति तथाप्येतत् सत्यं वर्त्तते यन्माधुर्यादिगुणेष्वस्य सत्ता विद्यमाना भवति। क्षेमेन्द्रौचित्यस्य, पदवाक्यप्रबन्ध ागुणालंकाररसप्रभृतिभिस्सप्त- विंशतिकाव्यांङ्गेषु औचित्यं स्वीचकार।[5]

---

1. अलंकारास्त्वलंकारा गुणा एव गुणाः सदा।
   औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।। तत्रैव० श्लोक 5 पृ० 4.
2. उचितस्थानविन्यासादलंकृति रलंकृतिः।
   औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणाः।। तत्रैव० श्लोक 6 पृ० 6.
3. वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित्।
   रचनावृत्तिवर्णानामन्यथात्वमपीष्यते।। का०प्र० 8/77.
4. क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः। स०द० 9/5.
5. पदे वाक्ये प्रबन्धार्थे गुणेऽलंकरणे रसे।
   क्रियायां कारके लिंगे वचने च विशेषणे।।
   उपसर्गे निपाते च काले देशे कुले व्रते।
   तत्वे सत्वेऽप्यभिप्राये स्वभावे सारविग्रहे।।
   प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि।
   काव्यांगेषु च प्राहुरौचित्यं व्यापि जीवितम्।। औ०वि०च०श० 8-10.

अस्मादवगम्यते यदौचित्यं सर्वव्यापितत्वं विद्यते। औचित्यं विना सर्वं निस्सारजातं वर्तते। विद्यमाने औचित्ये दोषोऽपि गुणरूपतामेति। अत औचित्येनैव गुणानां गुणत्वमित्यभिधाय गुणौचित्यं प्रदर्शयितुः कामेन क्षेमेन्द्रेण भणितं यद् वर्णनीयार्थाऽनुरूपमोजःप्रसादादयो गुणाः काव्ये स्वकर्मणिनिपुणाः सन्तस्तथैवाऽनन्ददायका भवन्ति यथा कान्तासम्पर्कसमये नवोदितश्चन्द्रो आनन्दं स्यन्दति।[1] वर्ण्यमानार्थस्योचितन्यासेन ओजःप्रसादादयो गुणा आनन्दं जनयन्ति। अनेनैतन्निष्पन्नम् यदौचित्यमधितिष्ठन्ति गुणाः। अतो प्रतिपादितदृशा औचित्य-गुणयोर्नित्यः सम्बन्धो वर्तते।

---

1. प्रस्तुतार्थोचितः काव्ये भव्यः सौभाग्यवान् गुणः।
   स्यन्दतीन्दुरिवानन्दं संभोगावसरोदितः।। औ०वि०च० श्लोकः 14, पृ० 31.

उपसंहारः

"उपकारकत्वादलंकारः सप्तममङ्गम् "इत्युक्त्वा राजशेखरेण साहित्यं सप्तमाङ्गत्वेन स्वीकृतम्। "ऋतेच-तत्स्वरूपपरिज्ञानाद्वेदार्थस्यानवगतिः" साहित्यमन्तरा वेदे शास्त्रे च तात्विकं ज्ञानमसम्भवम्, उपमामुखेन प्रतिपादितानां गूढार्थानां सर्गे, नैसर्गिकतत्त्वानां व्याख्यानाय प्रतिपदं वयमलंकारशास्त्रमाश्रयामः। छन्दसि बह्व्यः कथास्सन्ति, विभिन्नानि आख्यानानि च गुणालंकारैरणुस्यूतानि प्रतिभान्ति, गुणैर्विना येषामर्थः केनापि प्रकारेण कर्तुं न पार्यते।

तत्र गुणा अन्वयव्यतिरेकेण रसं पोषयन्तः काव्यमुपकुर्वन्तश्च सहृदयहृदय-योग्यं विदधति। यथा—शरीरे मुख्यत्वेन विद्यमानस्यात्मनो दयादाक्षिण्यादिध-र्मास्तथैवात्मत्वेन विद्यमानस्य रसस्य माधुर्यौजादयो गुणा धर्मत्वेन वर्तमानाः समस्तं काव्यशास्त्रं भृशं विभ्रति।

तान् गुणानुपजीव्यैव मया "संस्कृतसाहित्यशास्त्रे गुणविवेचनम्" इति विषय-मवलम्ब्य प्राचीनार्वाचीनानामाचार्याणां मतानि प्रतिपदं प्रतिपादयता वैदिक-कालादारभ्य इदानीं यावत् प्रस्तुते ग्रन्थे सप्रमाणं गुणविवेचनं विहितम्। संस्कृत-काव्यशास्त्रीयगुणेभ्यः प्राक् तत्सदृशा गुणावैदिकवाङ्मये प्रादुर्वभूवुः, कालक्रमेण श्रुतौ समाम्नातरीतिरलंकार-मधुरौज आदयः शब्दाः,शब्दार्थभावसाम्यैरुरुरोत्तर-क्रमेण विकसन्तो ब्राह्मणारण्यकोपनिषद्रामायणमहाभारतपुराणेषु स्वस्वरूपं परिमार्जयन्तः परिवर्धयन्तश्च संस्कृतकाव्यशास्त्रे स्फुटतया रीत्यलंकारमाधुर्यौज आदिरूपेण स्वीकृता अभूवन्।

चतुर्दशसु विद्यास्थानेषु साहित्यस्य स्थानं रसालंकारयोश्चापि साहित्येनैव स्वीकरणमत्र मया प्रदर्शितम्। साहित्यशास्त्रस्योद्भवेन तस्य क्रमिकविकासेन च प्रमुखानामाचार्याणां कालक्रमानुसारं गुणविन्यासः सुस्फुटं भवेदिति मनसि निधाय, परिचयप्रदाने तेषामौत्पत्तिकमितिहासमशिश्रियम्।

अस्य ग्रन्थस्य मुख्यमुद्देश्यं गुणविवेचनं वरीवर्ति, विवेच्यानां मूलरूप-परिज्ञानाय आगमादिग्रन्थान् विगाहमानोहं मूलभूतं ऋग्वेदमविन्दम्, तत्र मधुरादयःशब्दा मधुररसार्थे, बलार्थे च प्रयुक्ता लभ्यन्ते तानाश्रित्याहं गुणोद्भवमलेखिषम्।

रामायणमहाभारतादिषु सामान्यार्थे प्रयुक्ता मधुरादयः शब्दा अपि काव्यशास्त्रोक्तः कैश्चिद्गुणैः सह नामसाम्यं लक्षणसाम्यं च धारयन्ति। महाभारतपुराणादिषु प्रयुक्ता गुणा यद्यपि काव्ये गुणत्वेन न प्रतिपादिताः सन्ति, तथापि वाक्य-गेय-लेखसम्पत्रूपेण वर्णिता विद्यन्ते।

अग्निपुराणे बाह्याभ्यन्तरवैशेषिकरूपेण गुणाः काव्यशोभोत्पादकत्वेनानिवार्यत्वेन च प्रतिपादिता विद्यन्ते। अस्य गुणविवेचनमैतिहासिककालक्रमानुसारं मम्मटादनन्तरं निरूपणीयमासीत्, परं पुराणशब्दाधारेणास्य विवेचनं पुराणेष्वेव विहितम्। प्राचीनाचार्याणां बहुषु ग्रन्थेषु लुप्तेष्वपि केचन ग्रन्था अद्यत्वेऽपि काव्यशास्त्रीयस्वरूपं बिभ्राणाः साहित्यशास्त्रे दृष्टिपथमायान्ति, तेष्वपि लाक्षणिकग्रन्थानां गुणविषयकं विवेचनमत्र प्रस्तुतंवरीवर्त्ति। भरतादिभिराचार्यैर्भावाऽभावात्मकत्वेन भागद्वयेन विभक्तानां गुणानां निरूपणं कुर्वद्भिः शब्दार्थगतानां गुणानां पृथक्त्वेन निर्देशो न विहितः।

दण्डी गुणान् वैदर्भमार्गस्य प्राणत्वेन स्वीकृत्य तेषामसाधारणत्वमकल्पयत्। वामनः सर्वप्राथम्येन गुणान् भावात्मकानुररीकृत्य तान् शब्दार्थयोर्वर्गद्वये संविभज्य काव्यशोभाजनकत्वेन स्वीचकार।

भामहादनन्तरं गुणत्रयसत्तास्वीकर्तृषु आनन्दवर्धनस्य प्रथमं स्थानं वरीवर्त्ति, यतो हि सः चित्तस्य द्रुतिदीप्तिविकासभेदान् निगदन् गुणानां रसधर्मत्वं साधयन् संघटनां गुणाश्रितामंगीचकार। भरतानन्दवर्धनभोजप्रभृतय आचार्या गुणानां क्रमेण दश-त्रि-चतुर्विंशतिगुणसंख्यां स्वीचक्रुः, अन्य आचार्याः प्रकारान्तरेण तामेव गुणधारणां अनुमुमुदिरे। कुन्तकस्य मार्गत्रयान्तरवर्तिगुणनिरूपणमन्यैर्विद्वद्भिर्नादृतम्।

प्राचीनानां शब्दार्थगुणानामर्वाचीनानां रसधर्मगुणानां समन्वयो न केनाप्यकारि। अस्मिन् ग्रन्थे पंचमषष्ठाध्याययोर्दशगुणेषु माधुर्यौज प्रसादानां त्रयाणां गुणानां रसगतत्वेन शब्दार्थगतत्वेन च काव्यक्षतये न वर्त्तते, इतरेषां सप्तगुणानां साक्षाच्छब्दार्थत्वेन स्वीकरणं श्रेयस्करमिति मे मतिः। एवं स्वीकृते सति त्रि-सप्त- दश (3 + 7 = 10) संख्याका गुणाः पूर्ववर्त्त्यपरवर्त्याचार्यान् समन्वयात्मकदृष्ट्या एकसूत्रे बध्नन्ति।

विश्वनाथेन द्रुत्यास्वादस्वरूपाह्लादयोरभिन्नत्वेन प्रतिपादनं विहितम्, परं तयोर्द्वयोः सूक्ष्मभेदस्य विद्यमानत्वात् पृथक्त्वं प्रतिपादितम्। पण्डितराजजगन्नाथः- आत्मानं निर्गुणं मत्वा गुणानां रसधर्मत्वं खण्डयामास, परं प्रबन्धेऽस्मिन् तमेवात्मानं सगुणत्वेन प्रतिपाद्य गुणानां रसधर्मत्वं सप्रमाणं संसाधितम्।

यथा-भारतीयवैज्ञानिका अक्षराणां रेखाणामंकानां पौर्वापर्यं विधाय स्वाभिलषितसिद्धिं समधिगतवन्तस्तथैव स्थायिभावानामुद्दीपनाय शमनाय च काव्यशास्त्रमर्मज्ञैर्गुणव्यञ्जकत्वं निरूपितम्। "मन्त्र और मातृकाओं का रहस्य" इत्यभिधाने ग्रन्थे "कामधेनुतन्त्रम्", "शारदातिलकतन्त्रम्" (पदार्थादर्शटीका) "स्वच्छन्दोद्योतवामकेश्वरीमतम्", "योगिनीहृदयम्" इत्यादीनां ग्रन्थानामधारेणैव वर्णानां स्वरूपदेवतादिशावाहनादीनां निरूपणं वरीवर्ति, तेषां वर्णानां स्वरूपादीनाधृत्यैवाहं माधुर्यादिगुणव्यंजकवर्णानामाधारमलिखम्। एषां वर्णानां, मधुरौजः प्रसादस्वरूपे को हेतुः मधुरक्रोधादिभावाभिव्यक्तौ किं कारणम् ? किमर्थं टवर्गादयो वर्णा माधुर्यगुणे परित्यक्ताः ? कस्मादिमे केवलमोजसि समादृताः, अस्य विषयस्य स्फुटं तारतम्यं विधाय गुणव्यंजकवर्णानामाधारः संसाधितः। ग्रन्थाऽवसानेऽहं काव्ये गुणानां स्थानं निर्धारयितुं सिद्धान्तनिर्देशपूर्वकं समस्तैः प्रशस्तैः सिद्धान्तैः सह गुणसम्बन्धं प्रास्ताविषम्।

वैदिककालादारभ्य, इदानीं यावदुत्तरोत्तरक्रमेण विदुषां मतमतान्तराणि निर्दिशन् गुणव्यंजकवर्णानां निर्देश इत्यादिभिर्नूतनैर्विषयैः समलंकृतोऽयं ग्रन्थः। मन्ये अनेनग्रन्थेन गुणविषयकाः सर्वेऽपि सिद्धान्ताः सर्वाअपि जिज्ञासाः सुसमाहिता भवेयुरितिशम्।

अनुशीलितग्रन्थानां सूची

क्र. सं.	पुस्तकलेखकयोर्नाम	प्रकाशकः प्रकाशकवर्षाणि च
1.	अग्निपुराणम्	सं० आचार्यवलदेव उपाध्याय, चौखम्बा संस्कृत सीरिज़ आफिस वाराणसी सन् ई. 1966.
2.	अथर्ववेदसायणभाष्यद्वितीयो भागः	विश्वेश्वरानन्दवैदिकशोधसंस्थान होशियारपुर सन् ई. 1944.
3.	अभिनवभारती (अभिनवगुप्तः)	गायकवाड ओरियण्टल इन्स्टीच्यूट बड़ौदा सन् ई. 1934.
4.	अलंकार शेखरः	केशवमिश्रः चौ. सं.सी.अ. वाराणसी सन् ई. 1927.
5.	अलंकारसर्वस्वम् (रुय्यकः)	सं. डॉ. रेवाप्रसाद द्विवेदी, चौ.सं.सी.अ. वाराणसी सन् ई. 1971.
6.	अष्टाध्यायी (पाणिनिः)	चौ.सं.सी.अ. वाराणसी
7.	अलंकारकौस्तुभः	कवि कर्णपूर सं. डॉ. रविशंकरनागर परिमल पब्लिकेशन, दिल्ली सन् ई. 1981.
8.	अर्थशास्त्रम्, (कौटिलीयम्)	टीकाकार पं. रामतेजशास्त्री पं. पुस्तकालय कोश
9.	उपनिषत्संग्रहः	मोतीलाल वनारसीदास दिल्ली सन् 1970
10.	ऋग्वेदसंहिता	तिलक महाराष्ट्र युनिवर्सिटी वैदिक संशोधनमण्डल वैदिकरिसर्च इन्स्टीच्यूट, पूना
11.	ऋग्वेदसंहिता	''सायनभाष्यसहित'' सं. विश्वबन्धु विश्वेश्वरानन्द वैदिक शोधसंस्थान होशियारपुर वि.सं. 2021.

12. ऋग्वेद प्रथमभागः — सं. विश्वबन्धु, विश्वेरानन्द वैदिक शोध संस्थान होशियारपुर वि.सं. 2021.

13. ऋग्वेदद्वितीयो भागः — द्वितीय श्री मत्सायनाचार्य विरचित भाष्यसमेता विश्वेश्वरानन्द वैदिक शोध संस्थान होशियारपुर शके 1858

14. एकावली (विद्याधरः) — उस्मानिया विश्वविद्यालय हैदराबाद सन् ई. 1981.

15. औचित्यविचारचर्चा (क्षेमेन्द्रः) — सं. श्री ब्रजमोहन झा चौखम्बा विद्या भवन वाराणसी सन् ई. 1964.

16. औचित्यविचारचर्चा (क्षेमेन्द्रः) — पूना ओरियन्टल सीरिज, पूना 1954 ई.

17. कठोपनिषद् — शांकरभाष्य, सं. डॉ. सुरेन्द्रदेवशास्त्री स्नातकोत्तरविभाग महाविद्यालय वलिया वि.सं. 2028.

18. कविकण्ठाभरणम् (क्षेमेन्द्रः) — सं. डॉ. वामनकेश्वलेले मोतीलाल वनारसीदास सन् ई. 1967

19. कुवलयानन्दः, (अप्पयदीक्षितः) — चौ.सं.सी.अ. वाराणसी

20. काव्यादर्शः, (दण्डी) — सं. श्रीरामचन्द्रमिश्र, चौखम्बा विद्या भवन वाराणसी सन् ई. 1972.

21. काव्यादर्शः (दण्डी) — सं. नृसिंहदेव शास्त्री मेहरचन्द लक्ष्मणदास लाहौर, सन् ई. 1925.

22. काव्यादर्शः, (दण्डी) — वाणी विलासप्रेस मद्रास सन् ई. 1964

23. काव्यालंकारः, (भामह) — प्रो. देवेन्द्र नाथ शर्मा, विहार राष्ट्र भाषा परिषद् पटना सन् ई. 1962.

24. काव्यालंकारः, (रूद्रट) — डॉ. सत्यदेव चौधरी वासुदेव प्रकाशन दिल्ली सन् ई. 1965.

25. काव्यालंकारसारसंग्रहः, (उद्भट) — सं. डॉ. राममूर्ति त्रिपाठी हिन्दी साहित्य सम्मेलन प्रयाग सन् ई. 1966.

26. काव्यालंकारसूत्राणि, (वामनः)	डॉ. वेचन झा, चौखम्बा अमरभारती वाराणसी सन् ई. 1981.
27. काव्यानुशासन (हेमचन्द्रः)	निर्णसगर प्रेस बम्बई, सन् ई. 1934.
28. काव्यप्रकाशः, (मम्मटः)	बालवोधिनी भण्डाकर ओरियण्टल इन्स्टीच्यूट पूना सन् ई. 1965.
29. काव्यप्रकाशः, (मम्मटः)	हिन्दी भाष्य आचार्य विश्वेश्वर सं. डॉ. नगेन्द्र ज्ञानमण्डल लिमिटेड वाराणसी सन् ई. 1960.
30. काव्यप्रकाश, (मम्मटः)	सं. श्रीनिवास शास्त्री साहित्य भंडार मेरठ सन् ई. 1974.
31. काव्यमीमांसा, (राजशेखरः)	सं. केदारनाथशर्मा सारस्वतविहार राष्ट्रभाषा परिषद् पटना सन् ई. 1965.
32. कामसूत्रम् (वात्स्यायनः)	व्याख्याकार देवदत्त शास्त्री, चौ.सं.सी. आ. वाराणसी सन् ई. 1964.
33. चमत्कारचन्द्रिका (विश्वेश्वरः) कविचन्द्र	मेहरचन्द्रलक्ष्मणदास दिल्ली सन् ई. 1972.
34. चन्द्रालोकः, (जयदेवः)	सं. सुबोधचन्द्र, मोतीलाल बनारसी दास दिल्ली सन् ई. 1975.
35. चन्द्रालोकः, (जयदेवः)	चौ.सं.सी.आं. वाराणसी सन् ई. 1975.
36. तर्कसंग्रहः, (अन्नभट्टः)	खेमराज श्री कृष्णदास श्री वेंकटेश्वर स्टीम् प्रेस बम्बई सं. 1995.
37. दशरूपकम् (धनञ्जयः)	डॉ. भोलाशंकर व्यास, चौखम्बा विद्या भवन वाराणसी, 1967 ई.
38. ध्वन्यालोकः, (आनन्दवर्धनः)	हिन्दी भाष्य आचार्य विश्वेश्वर, सं. डॉ. नगेन्द्र ज्ञानमण्डल लिमिटेड वाराणसी द्वितीय संस्करण वि.सं. 2028.
39. ध्वन्यालोकः, (आनन्दवर्धनः) लोचन टीका सहित :	सं. डॉ. रामसागर त्रिपाठी, मोतीलाल वनारसी दास, दिल्ली सन् ई. 1963

40. ध्वन्यालोकः, (आनन्दवर्धनः) सं.पं. वद्रीनाथ शर्मा, चौ.सं.सी.आ. वाराणसी सन् ई. 1964.

41. नाट्यशास्त्रम्, (भरतः) काव्यमालासंस्करण

42. नाटयशास्त्रम्, (भरतः) "अभिनवभारती सहित" सं.आ. मधुसूदन शास्त्री काशी हिन्दू विश्वविद्यालय वाराणसी सन् ई. 1975.

43. नाट्यशास्त्रम् (भरतः) सं. डॉ. ब्रजमोहन शर्मा चतुर्वेदी आशा प्रकाशन गृह, दिल्ली

44. नारदपुराणम् आचार्य राम शर्मा संस्कृति संस्थानम्, बरेली (उत्तर प्रदेश)

45. न्यायसिद्धान्तमुक्तावली पं. ज्वाला प्रसादागौड, विलासिनी हिन्दी संस्कृत टीकाद्वय सहितः प्रथम संस्करण सन् ई. 1960.

46. निरुक्त (यास्काचार्यः) सं. चन्द्रमणि विद्यालंकार आर्यकन्या गुरुकुलनरेला सं. 2023.

47. नीलरुद्रोपनिषद् "उपनिषद्संग्रहान्तर्गत" प्रथम संस्करण सन् ई. 1968.

48. प्रतापरुद्र यशोभूषण, (धर्मकीर्तिः) सं. मधुसूदन शास्त्री कृष्णदास अकादमी, वाराणसी, 1981 ई.

49. प्रमाणवार्तिक, (धर्मकीर्तिः) सं. स्वामि द्वारिकादास शास्त्री बौद्धभारती नरहरिपुरा, वाराणसी-। प्रथम संस्करण सन् 1968.

50. पातञ्जलमहाभाष्यम् पतञ्जलिमुनिनिर्मितं विद्याविलास प्रेस वाराणसी-। सन् 1954.

51. भट्टिकाव्यम्, निर्णय सागर प्रेस बम्बई, सन् 1964.

52. भोजाज श्रृंगारप्रकाश- (डॉ. व्ही. राघवन्) श्री कृष्णपुरम् स्ट्रीट वसन्तप्रेस थियोसोफिकल सोसाइटी, मद्रास, सन् 1978.

53. मनुस्मृतिः — व्या.पं. रामेश्वर भट्ट निर्णयसागर प्रेस बम्बई सन् 1916.

54. महाभारतम् — नीलकण्ठ टीका, चित्रशाला प्रेस पुण्यपत्तनम् सन् ई. 1932.

55. महाभारतम्, शान्तिपर्व — गीताप्रेस गोरखपुर, सं. 2026.

56. महाभारतम्-शान्तिपर्व — भण्डारक प्राच्यविद्यासंस्थान पुण्यपत्तनम् सन् 1896.

57. महाभारतम्, विराटपर्व — सं. दामोदार सातवलेकर। स्वाध्याय मण्डल भारत मुद्रणालय (पारड़ी) प्रथम सं. सन् 1969.

58. माहेश्वरतन्त्रम्, अपौरुषेयस्" — सं. ब्रह्मचारी श्रीकृष्ण प्रियाचार्य जी चौ.सं.सी. वाराणसी वि.सं. 1996.

59. मीमांसादर्शनम् — प्रका. हरियाना साहित्यसंस्थान गुरुकुल झज्जर रोहतक सं. वि. 2034.

60. याज्ञवल्क्यस्मृतिः — सं. डॉ. उमेशचन्द्र पाण्डे, चौ.सं.सी.आ. वाराणसी सन् 1967.

61. योगिनी हृदयम् — सं. श्री गोपीनाथ कविराज, वाराणसेय संस्कृत विश्वविद्यालय वाराणसी सन् ई. 1963.

62. रसगंगाधरः, (जगन्नाथः) — सं.पं. मदनमोहन का चौ.वि.भ. वाराणसी सन् ई. 1970.

63. रसगंगाधरः (जगन्नाथः) — सं. श्री मधुसूदन शास्त्री बनारस हिन्दू विश्वविद्यालय, वाराणसी सं. 2020.

64. रघुवंश (कालिदासः) — चौ. प्रकाशन

65. रामायणम् — वाल्मीकीय, पण्डित पुस्तकालय वाराणसी

66. रामायणम्, (वाल्मीकीयम्) — सं. मिश्रबन्धु दयानन्द महाविद्यालय संस्कृत ग्रन्थमाला 18.

67. रामायणम् (वाल्मीकीयम्) — प्रका. एम. रामरत्नाचार्य बालकाण्ड द्वितीय संस्करण सन् 1958.

68. राजतग्ङ्नी — चौ. प्रकाशन, जोनराजकृत प्रथम संस्करण 2028.

69. राजतग्ङ्नी (कल्हनः) — एम.ए. स्टेम पी.एच.डी. प्रिन्सिपल ओरियण्टलकॉलेज, लाहौर सैकण्ड अडीशन 1960 जयदप्रेस, दिल्ली (1892).

70. रुद्रयामलम्, उत्तरतन्त्रम् — सं. भागीरथप्रसाद त्रिपाठी, वागीशः शास्त्री सम्पूर्णानन्द संस्कृत विश्व विद्यालय वाराणसी, 1980 खैस्ताब्दे

71. वाक्यपदीयम्, (भर्तृहरिः) — चौखम्बा संस्कृतसंस्थान वाराणसी परिशिष्ट लेखक पं. रुद्रप्रसाद अवस्थी वि.सं. 2037.

72. वाक्यपदीयम् — सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी प्रथम सं. वि.सं. 2034.

73. वाग्भटालंकारः, (वाग्भटः) — मोतीलाल बनारसीदास दिल्ली सं. 1986.

74. वाग्भटालंकारः, (वाग्भटः) — सं. डॉ. सत्यव्रत सिंह चौखम्बा विद्या भवन, वाराणसी 1957 ई.

75. वक्रोक्तिजीवितम् (कुन्तकः) — हिन्दी भाष्य आ. विश्वेश्वर सं. डॉ. नगेन्द्र हिन्दी अनुसन्धान परिषद् दिल्ली विश्वविद्यालय, दिल्ली

76. वक्रोक्तिजीवित, (कुन्तकः) — सं. राधेश्याम मिश्र चौ.सं.सी.आ. वाराणसी 1967 ई.

77. व्यक्तिविवेकः, (महिमभट्टः) सं. डॉ. रेवाप्रसाद द्विवेदी चौ.सं.सं.आ. वाराणसी, 1964 ई.

78. व्याकरणमहाभाष्यम् सं.पं. रुद्रदास झा चौ.सी.आ. वाराणसी, 1964 ई.

79. वृत्तरत्नाकरः, (भट्टनारायणः) चौ.सं. संस्थान वाराणसी सं. 2023.

80. विष्णुधर्मोत्तरपुराणम् प्रथम, द्वितीय खण्डात्मक, विद्या वाचस्पति श्री मधुसूदन शर्मा पं. माधवप्रसाद द्वारा संशोधित क्षेमराज श्री कृष्णदास श्री वेंकङ्टेश्वर यन्त्रालय बम्बई

81. विष्णुपुराणम् अनुवादक श्री मुनिलाल गुप्त प्रका. मोतीलाल जलान गीताप्रेस, गोरखपुर सप्तम संस्करण 2026 सं.

82. विक्रमोर्वशीयम् व्याख्याकार पं. रामचन्द्र मिश्र चौ.सं.सी.आ. वाराणसी सं. 2020.

83. वृहदारण्यकोपनिषद् गीता प्रेस गोरखपुर चतुर्थ संस्करण सं. 2029.

84. वेदार्थदीपक निरुक्तभाष्य, सं. डॉ. चन्द्रमणि विद्यालंकार

85. वैयाकरणसिद्धान्तलधुमञ्जूषा (नागेशः)

86. वैशेषिकसूत्रोपस्कारः व्या. ढुण्डीराज शास्त्री चौ.सं.सी.आ. वाराणसी 1969.

87. वायसनेयी माध्यन्दिन शुक्लयजुर्वेदसंहिता मोतीलाल बनारसीदास 1971 ई.

88. सरस्वतीकण्ठाभरणम, (भोजदेव) सं. कामेश्वरनाथ मिश्र चौ. ओरियण्टालीया वाराणसी 1976 ई.

89. सरस्वतीकण्ठाभरणम सं. आनन्दरामवरूथ

90. साहित्यदर्पणः, (विश्वनाथः) व्या.शालिग्रामशास्त्री मोतीलाल बनारसीदास दिल्ली 1970 ई.

91. साहित्यदर्पणः, (विश्वनाथः) लक्ष्मी व्याख्या, आ. कृष्णमोहन शास्त्री तृतीय संस्करण 2023 सं.

92. साहित्यरत्नाकरः, (धर्मसूरिः) संस्कृत परिषद् उस्मानिया विश्वविद्यालय हैदराबाद

93. साहित्यसुधासिन्धुः विश्वनाथदेव सं. डॉ. रामप्रताप भारतीय विद्या प्रकाशन दिल्ली सन् 1978.

94. सर्वदर्शनसंग्रहः (माधवाचार्यः) सं. डॉ. उमाशंकर शर्मा चौखम्बा विद्या भवन वाराणसी 1978 ई.

95. साहित्यसारः, (अच्युतरायः) निर्णयसागरप्रेस बम्बई 1906 ई.

96. सिद्धान्त कौमुदी तत्वबोधिनी सहिता, क्षेमराज श्री कृष्णदास, वेंकटेश्वर मुद्रणालय प्रकाशिता सं. 1966 शके 1831.

97. स्याद्वादमञ्जरी सं. डॉ. जगदीश चन्द्र जैन श्री मद्रामचन्द्र आश्रम गुजरात 1970 ई.

98. शारदातिलकम् सं. डॉ. चमनलाल गुप्ता, प्रका. संस्कृत संस्थान ख्वाजा कुतुब वेदनगर बरेली, उ.प्र. प्रथम संस्करण 1973 ई.

99. शुक्लयजुर्वेद शतपथ ब्राह्मणम् चौ.सं.सी.आ. वाराणसी द्वितीय संस्करण 1964 ई.

100. शुक्लयजुर्वेदीय, रुद्राष्टाध्यायी व्या.पं. ज्वालाप्रसाद मिश्र लक्ष्मी वंक्ङटेश्वर स्टीम् प्रेस बम्बई सं. 1993.

101. शृंगारप्रकाश, (भोजराजः) सं. रामानुज ज्योतिषक कारोनेषन् मुद्रणालय मैसूर 1956 ई.

102. श्रीशंकरात्प्राग्द्वैतवादः (डॉ. मुरलीधर पाण्डेय) मोतीलाल बनारसी दास दिल्ली सं. 2028.

103. (श्री माहेश्वरतन्त्रम्) चौ.सं.सी.आ. वाराणसी 1940 ई.

अनुशीलितकोशानां सूची

1. अमरकोशः, (अमरसिंहः) — काशी संस्कृत ग्रन्थमाला, चौ.सं.सी. आ. वाराणसी-I प्रथम संस्करण 1970 ई.
2. अमरकोशः, (अमरसिंहः) — खेमराज कृष्णदास श्री वेंकटेश्वर स्टीम् प्रेस बम्बई 1935 ई.
3. मेदिनीकोशः (मेदिनीकरनिर्मितं) — चौ.स.सी.आ. वाराणसी-I सन् ई. 1968.
4. वाचस्पत्यम्, द्वितीय, तृतीय, पंचम भागः — तारानाथ तर्कवाचस्पति भट्टाचार्येण संकलितम् तृतीय संस्करण 2025.
5. विश्वकोषः — सं. भगवतशरण उपाध्याय, फूलदेव सहाय वर्मा राष्ट्रभाषा मुद्रण वाराणसी प्रथम सं. 2020 सं.
6. वैजयन्तीकोषः — चौ.सं. संस्थान वाराणसी 2028 सं. गुणाध्यायः
7. शब्दकल्पद्रुमः — स्याारराजा राधाकान्तदेव वहादुरेण विरचितः तृतीय संस्करण 2024 द्वितीय भाग चौ.सं.सी.आ. वाराणसी उ.प्र.
8. शब्दस्तोममहानिधी — तर्क वाचस्पति, श्री तारानाथ भट्टाचार्य चौखम्बा सं.सी. अफि. वाराणसी 1967 ई.
9. हलायुधकोशः — सं. जयशंकर जोशी हिन्दी समिति ग्रन्थमाला सूचना विभाग उ.प्र. लखनऊ 1967 ई. द्वितीय संस्करण

अनुशीलित हिन्दी ग्रन्थानां सूची

1. अग्निपुराणका काव्यशास्त्रीय अध्ययन (डॉ रामलाल शर्मा) — नेशनल पब्लिशिंग हाउस दिल्ली 1959.
2. आनन्दवर्धन, (डॉ. रेवाप्रसाद द्विवेदी) — मध्यप्रदेश हिन्दी ग्रन्थ अकादमी भोपाल 1972 ई.
3. काव्यांगप्रक्रिया, (डॉ. शंकरदेव अवतरे) — लिपि प्रकाशन दिल्ली
4. काव्यगुणोंका शास्त्रीय विवेचन (डॉ. शोभाकान्त मिश्र) — विहार हिन्दी ग्रन्थ अकादमी 1872 ई.
5. उपनिषदों में काव्यतत्व, (डॉ. कृष्णकुमार धवन) — विश्वेश्वरानन्द वैदिक शोध इन्स्टीच्यूट होशियारपुर
6. भारतीय काव्यशास्त्र की भूमिका (डॉ. नगेन्द्र) — नेशनल पब्लिशिंग हाउस, दिल्ली 1963 ई.
7. भारतीय काव्यशास्त्र, (डॉ. सत्यदेव चौधरी) — अलंकार प्रकाशन, दिल्ली 1974.
8. भारतीयकाव्यशास्त्र के प्रतिनिधि सिद्धान्त (डॉ. राजवंश सहाय हीरा) — चौखम्बा विद्या भवन वाराणसी 1967 ई.
9. मन्त्रमात्रिकाओं का रहस्य, (डॉ. शिवशंकर अवस्थी) — चौखम्बा विद्याभवन वाराणसी 1966 ई.
10. रसगंगाधर समीक्षात्मक अध्ययन (डॉ. शिवशंकर अवस्थी) — राजस्थान हिन्दी ग्रन्थ अकादमी जयपुर 1974 ई.
11. रससिद्धान्त (डॉ. नगेन्द्र) — नेशनल पब्लिशिंग हाउस दिल्ली 1964 ई.

12. संस्कृत साहित्य का इतिहास	सं.आ. वलदेव उपाध्याय
13. संस्कृत काव्यशास्त्र का इतिहास (डॉ. एस.के. डे)	विहार हिन्दी ग्रन्थ अकादमी 1973 ई.
14. संस्कृत काव्यशास्त्र का इतिहास (डॉ. पी.पी. काणे)	मोतीलाल बनारसीदास, दिल्ली प्रथम संस्करण 1966 ई.
15. संस्कृत साहित्य का इतिहास (द्वितीय भाग)	से. कन्हैयालाल पोद्दार
16. संस्कृत साहित्य का आलोचनात्मक इतिहास	सं. डॉ. बाबूराम त्रिपाठी प्र. विनोद पुस्तक मन्दिर रांगेय राघवमार्ग आगरा, प्रथम सं. 1973 जगदम्बाप्रिन्टर्स

अनुशीलितग्रन्थानां सङ्केत सूची

1.	अ.पु.	अग्निपुराणम्.
2.	अ.वे.	अथर्ववेदः
3.	अभि. भा.	अभिनवभारती
4.	अ.शे.	अलंकारशेखरः
5.	अ.स.	अलंकारसर्वस्वम्
6.	अ.कौ	अलंकारकौस्तुभः
7.	अ.शा.	अर्थशास्त्रम्
8.	उ.नि.सं.	उपनिषद् संग्रहः
9.	ऋ.वे.	ऋग्वेद संहिता
10.	औ.वि.च.	औचित्यविचारचर्चा
11.	क.उ.	कठोपनिषद्
12.	क.क.भ.	कविकण्ठाभरणम्
13.	कु.न.	कुवलयानन्दः
14.	का.द.	काव्यादर्शः
15.	भा.कं.ल.	भामहः–काव्यालंकारः
16.	रु.कं.लं.	काव्यालंकारः–रुद्रटः
17.	का.लं.सा.सं.	काव्यालंकारसारसंग्रहः
18.	का.लं.सू.	काव्यालंकारसूत्राणि
19.	हे.चं.का.शा.	काव्यानुशासनम्–हेमचन्द्रः
20.	का.धे.त.	कामधेनुतन्त्रम्
21.	का.प्र.	काव्यप्रकाशः–मम्मटः
22.	का.मी.	काव्यमीमांसा

23.	का.सू.	कामसूत्रम्
24.	च.च.	चमत्कारचन्द्रिका
25.	चं.लो.	चन्द्रालोकः
26.	त.सं.	तर्कसंग्रहः
27.	द.रु.	दशरूपकम्
28.	ध्वा.लो.	ध्वन्यालोकः
29.	ना.शा.	नाट्यशास्त्रम्
30.	ना.पु.	नारदपुराणम्
31.	ना.सि.मु.	न्यायसिद्धान्तमुक्तावली
32.	प्र.रु.य.	प्रतापरुद्रयशोभूषणम्
33.	प्र.वा.	प्रमाणवार्तिकम्
34.	पा.म.	पातञ्जलमहाभाष्यम्
35.	म.स्मृ.	मनुस्मृतिः
36.	म.भा.	महाभारतम्
37.	मी.द.	मीमांसादर्शनम्
38.	या.व.स्मृ.	याज्ञवल्क्यस्मृतिः
39:	यो.हृ.	योगिनीहृदयम्
40.	र.गं.	रसगंगाधरः
41.	रा.त.	राजतरंगिनी
42.	वा.प.	वाक्यपदीयम्
43.	वा.लं.	वाग्भटालंकारः
44.	व.जी.	वक्रोक्तिजीवितम्
45.	व्य.वि.	व्यक्तिविवेकः
46.	व्या.म.भा.	व्याकरणमहाभाष्यम्
47.	वृ.र.	वृत्तरत्नाकरः

48.	वि.ध.पु.	विष्णुधर्मोतरपुराणम्
49.	सं.कं.भ.	सरस्वतीकण्ठाभरणम्
50.	सा.द.	साहित्यदर्पणः
51.	सा.र.	साहित्यरत्नाकरः
52.	सा.सु.सी.	साहित्यसुधासिन्धुः
53.	स.द.सं.	सर्वदर्शनसंग्रहः
54.	सि.कौ.	सिद्धान्तकौमुदी
55.	शु.य.श.प.ब्रा.	शुक्लयजुर्वेदशतपथब्राह्मणम्
56.	शृं,प्र.	शृंगारप्रकाशः
57.	अ.को.	अमरकोशः
58.	मे.को.	मेदिनीकोशः
59.	वा.प.	वाचस्पत्यम्
60.	वि.को.	विश्वकोषः
61.	श.क.दु.	शब्दकल्पद्रुमः
62.	श.स्तो.म.	शब्दस्तोममहानिधिः
63.	ह.को.	हलायुधकोषः
64.	भा.का.शा.भू.	भारतीय काव्य शास्त्र की भूमिका
65.	भा.का.शा	भारतीय काव्यशास्त्र
66.	म.मा.र.	मन्त्रमात्रिकाओं का रहस्य
67.	सं.सा.ह.	संस्कृत साहित्य का इतिहास
68.	सं.का.ह.	संस्कृत काव्यशास्त्र का इतिहास
69.	सं.स.आ.इ.	संस्कृत साहित्य का आलोचनात्मक इतिहास

अनुशीलित ग्रन्थान्तर्गताध्यायादीनां सङ्केत सूची

1.	अ०	अधिकरणम्
2.	अध्या०	अध्यायः
3.	अ०	अध्यायः
4.	अ०	अनुवाकः
5.	अनुः	अनुवाकः
6.	उन्मे०	उन्मेषः
7.	उ०	उद्योतः
8.	उ०	उल्लासः
9.	उल्ला०	उल्लासः
10.	ऋ०	ऋचा
11.	परि०	परिच्छेदः
12.	1म पा०	प्रथमपादः
13.	प्र०पा०	प्रपाठिका
14.	1म	प्रथम
15.	पृ०	पृष्ठ
16.	वा०का०	बालकाण्ड
17.	व०	वर्गः
18.	म०	मन्त्र
19.	2य	द्वितीय
20.	श्लो०	श्लोकः
21.	तृ०खं०	तृतीय खण्ड
22.	9म प्र०	नवम प्रकाशः
23.	7म प्र०	सप्तम प्रकाशः
24.	सू०	सूक्तम्
25.	तत्रैव	तद् ग्रन्थ संकेतः

Bhawan's Sri ... acharya Sanskrit Mahavidyalaya ... Vidya
716

Bhawan's
Vidya

लेखकस्य परिचयः

नाम	- डॉ. विश्वमूर्ति शास्त्री
पिता	- स्व. पं. अनन्तराम ज्योतिषी
माता	- स्व. श्रीमती उमादेवी
जन्मस्थानम्	- कसूरी सेरमंजला (घोरड़ी)
मण्डलम्	- उधमपुरम्
निवासस्थानम्	- अनन्तभवन-रामनगरम्
वर्तमाननिवासस्थानम्	- 3/127 इन्दिराविहार, पुराना जानिपुर,जम्मूतवी-180007
राज्यम्	- जम्मू-काश्मीरम्
जन्मतिथिः	- 10-10-1946
उपाधिः	- साहित्याचार्यः, विद्यावारिधिः (पी-एच.डी.)
गुरुवः	- (क) प्रो. काकारामशास्त्री (ख) प्राचार्य जयरामशास्त्री (ग) प्राचार्य पूर्णचन्द ज्यो. (घ) प्रो. मूलराजशास्त्री (ङ) कुलपति डॉ. मण्डनमिश्र
प्रारम्भिकी शिक्षा	- पितृपादानां चरणमूले
उत्तरकालिकी शिक्षा	- (क) जम्मू काश्मीर विश्वविद्यालयान्तर्गते श्रीरघुनाथसंस्कृतमहाविद्यालये (ख) राष्ट्रिय-संस्कृत-संस्थाने नवदेहल्याम्
कार्यक्षेत्रम्	- (क) जम्मूस्थ श्रीरघुनाथसंस्कृतविद्यापीठे, शास्त्रिनगरे, जम्मूस्थे वर्तमान-राष्ट्रियसंस्कृतसंस्थाने मानितविश्व-विद्यालये रणवीर कैम्पस-जम्मूस्थे 1-4-1971 तः निरन्तरम्।